अद्वितीय * त्रि॰ न द्वितीयं सदृशो यस्य न॰ ब॰। सजातीयद्वितीयरहिते। ब्रह्मणि एकस्मिन् परमात्मनि न॰।

अद्वैत * त्रि॰ द्विधा इतं द्वीतं तस्य भावः द्वैतं तन्नास्ति यस्य ब॰। सजातीयादिभेदशून्ये ब्रह्मणि परमात्मनि।

अद्वैतवादिन् * त्रि॰ अद्वैतं सर्व्वस्य चिदात्मकं वदतीति वद-णिनि। सर्व्वस्य चिदात्मनि रज्जौ सर्प इव स्वप्नादिवत् आरोपितं जगत् प्रतिभाति तथाचाज्ञाने न यथा स्वप्नवृत्तिर्विश्वं तथा चित्त्वे [illegible] [illegible] [illegible] सर्वं बाह्यं वस्तु निरस्य इति वादिनि वेदान्तिनि बुद्धविशेषे च।

अधरिक * त्रि॰ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] च।

[illegible] * स्त्री॰ [illegible] [illegible] [illegible] [illegible] ङीप्। [illegible] [illegible] [illegible]

[illegible] * त्रि॰ [illegible] [illegible] [illegible] [illegible]

भार्यादृष्टान्तादिषु तेषां धनस्वामित्वेऽपि कार्ये यदेतदर्जि-
तोऽस्य तदादिमादित्वात् अधनत्वम् "भार्या पुत्रश्च दासश्च
त्रय एवाधना स्मृताः। यत्ते समधिगच्छन्ति यस्यैते तस्य
तद्धनम्" इति स्मृत्युक्तेस्तथात्वम्। निर्धने अल्पधने च।

अधम ● त्रि॰ अव-अम बाहुल॰ अवतेरमः अधम्+अः अस्तनोपो
वा। कुत्सिते, हीने च।

अधमर्ण ● त्रि॰ अधमः देयम् ऋणं तत् अधमं ऋणं यस्य ब॰।
अधमर्णदेयर्णमोचके (खातक) इति ख्याते ऋणग्रहीतरि।

अधमाङ्ग ● न॰ अधमम् अङ्गम् कर्म॰। चरणे।

अधर ● पु॰ न ध्रियते धृङ्-अच् न॰ त॰। (ठोंट) इति ख्याते ओष्ठे,
नीचे वा ओष्ठे। धरते धरा तत्सम्बन्धरहिते हीने, न्यूने, नीचे
च त्रि॰।

अधरात् ● अव्य॰ अधम्+ऋमाताः पञ्चम्याः सप्तम्या वा आति
अस्तलोपः। अधोभागे। त्रिकाण्डाद् अधरात्-नकदीयम् अर-
णी यथा वेदवादिवृत्तौ नेम यज्ञसावप्यदो बोध्यः।

अधरेद्युः ● अव्य॰ अधरस्मिन् देशे, काले दिने वा अधर+एद्युस्।
आगते पौर्वदेयादौ अधरस्यां दिवि च।

अधरेद्युम् ● अव्य॰ अधरस्मिन्नह्नि अधर+एद्युम्। अधरदिवसे।

अधर्म ● पु॰ ध्रियते नेन धृ—मनिन् विरोधे न॰ त॰। धर्मविरो-
धिनि वेदनिषिद्धकर्मजन्ये पापे, तद्धेतुभूतब्राह्मणहिंसादौ च।
दुःखफलधर्मयुक्ते त्रि॰। सुखादयश्चाधर्मस्ताद्वहिते
प्रकृदि न॰। [अधःस्थानगामिनि त्रि॰। स्त्रियां ङीप्।

अधश्चर ● पु॰ अधःकर्मादि क्षेत्रादौ चरतीति चर—ट। चौरे।

अधःशय्या ● स्त्री॰ शीङ्-क्यप् शय्या कर्म॰। भूमिशयने।

अधस् ● अव्य॰ अधर—असि अधरस्य स्थाने अधादेशश्च। पातादे,
अधःस्थानमात्रे च। तत्रापि वर्तमानात् प्रथमापञ्चमीसप्तम्यां
अलोपः।

अधस्तात् ● अव्य॰ अधर+अस्ताति। अधःशब्दवत् नीचार्थे।

अधि ● अव्य॰ न+धा—कि। अधिकारे, ऐश्वर्ये, स्वत्वे, अधिकत्वे॰
स्मृते, उपरि, आधिक्ये, अनिश्चये च। अधीयते दुःखमनेनेति
आ+धा—कि वा ह्रस्व। मनःपीडायाम् पु॰।

अधिक ● त्रि॰ अधि+क। अतिरिक्ते, अनेकाधिकम्, अलङ्कार-
भेदे (साहित्यदर्पणे १० परि॰ द्रष्टव्यम्)।

अधिकरण ● न॰ अधि—कृ—ल्युट्। आधारे, व्याकरणोक्ते परि-
भाषिते अधिकरणसंज्ञके कर्तृकर्मद्वारा क्रियाश्रये कारके, यथा
गेहे स्थाल्यामन्नं पचतीत्यादौ गेहस्य कर्तृद्वारा, स्थाल्याः
कर्मद्वारा, परम्परया पाकक्रियाश्रयत्वम्, पूर्वमीमांसान्या-
यानुसारेण एकार्थप्रतिपादके न्यायसमुदाये अधिक्रियते निर्ण-
यार्थं विचारो, यत्र विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयकाङ्-
क्षादीनुक्त्वा वाक्यसमुदाये च। तत्र विचाराङ्गं पञ्च विषय
तत्पादेश्च संशयस्य इदं नित्यं न वेति विशयः। तत्र सन्दि-
ग्धमानयोः पक्षयोः अन्यतरस्य युक्तिपदर्शन
सिद्धान्तः पूर्वपक्षोक्तां युक्तिं खण्डयित्वा
वाक्यम्। तदर्थन्यायमिलापेन सिद्धान्तसि
निर्णायकवाक्यमिति। विस्तरस्तु माधवा

अधिकरणविचाल ● पु॰ अधिकरणस्य विचाल
चल घञ् ६त॰। द्रव्यस्य अवस्थान्तरकर
विचालो नाम यदेकमनेकं क्रियते
मात्यम्। एकस्य राशेः पञ्चधाविभागे,
करणेऽधिकरणस्य संख्याया विचालः।

अधिकर्मिक ● पु॰ (न॰) अधिकृत्य कर्म कर्मणि
ठ। हट्टाध्यक्षे, हट्टस्थवणिग्भ्यः शुल्कादा

अधिकाङ्ग ● पु॰ अधिकोऽङ्गात्। धर्मचर्योपरि
स्थापिते सन्नाहिकादौ। ब॰। अधिकाङ्गयुक्ते

अधिकार ● पु॰ अधि+कृ—घञ्। आरम्भे,
कर्तृत्वसम्पादके स्वामित्वे, विनियोज्यपुरु
विहितकर्मादि प्राप्तपदेऽधिकारः। राज्या
दौ, यदाह्ये ब्रह्मचारीऽधिकारी, प्रक
पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवृत्तौ

अधिकारविधि ● पु॰ अधिकारे फलस्वाम्ये
धा—कि कर्म॰। कर्मजन्यफलभोक्तृत्वादि
फलेन यावज्जन्यफलभोक्ता सम्पादयतीति

अधिकारवचन ● न॰ अधिकारस्य स्तुति
दस्तुधर्मादिनिरिक्तस्य वचनम् वच—ल्युट्
निन्दार्थवादे च। [प्रत्ययनमन्विति च।

अधिकृत ● पु॰ अधि+कृ—क्त। आयव्ययादेर

अधिक्षिप्त ● त्रि॰ अधि+क्षिप्—क्त। स्थापिते,
क्षेपे च।

अधिक्षेप ● पु॰ अधि+क्षिप—घञ्। तिरस्का

अधिगत ● पु॰ अधि+गम-क्त। प्राप्ते, ज्ञाते, स्त

अधिगम ● पु॰ अधि+गम-घञ्। प्राप्तौ, ज्ञाते,

अधिज्य ● स्त्री॰ अधि+ज्या॰। उर्वश्योर्दि

अधिदेवता ● स्त्री॰ देव एव देवता अधिका देव
मत्वात्। देवानामपि सर्वादिदेवतादीना
च सूक्ष्मा बोध्या तदधिष्ठानादि सर्वादिदे

अधिदैवत ● न॰ देवमेव स्वार्थे अण्। अधिदैवत
दिग्लक्षणे, कर्मादीनामपि पुरुषे च पु॰।
अधिष्ठातृपि सर्वादीनां तत्तत्कर्मादि निद्
दास्तस्य प्रश्नोऽयमीति इष्ट सर्वदेवतास्वरूप

अधिवाद ● पु॰ अधिकोऽदनं वादुना
तत्सूचनं स्त्रियोऽधि अधि—

अधिप ● त्रि॰ अधि+पा—क।

अधिपति * पु० अधि+पा-डति। प्रभौ। [प्रभौ।

अधिभू * पु० अधिभवति स्वामीभवति स्वाम्यर्थेऽधिः भू-क्विप्।

अधिमांसक * पु० अधिकौ मांसौ यत्र ब० कप्। दन्तरोगविशेषे "हन्वन्ते पश्चिमे दन्ते महाशोथो महारुजः। लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः॥" इति वैद्यकम्।

अधिमास * पु० अधिकः रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तचान्द्रो मासः प्रा० स०। मलमासे असंक्रान्तमासोऽधिमासो निरूप्य इति स्मृतिः रविसंक्रान्तिवर्जितो मासोऽधिमासः। तथाहि "मीनादिस्थो रविर्येषामारम्भः प्रथमे क्षणे। ते चैत्राद्याः" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भः स चैव इत्येव चैत्रादिलक्षणं स्थितं यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मीनस्थे रवौ आरम्भात् उभयोरपि चैत्रता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम्।

अधिराज * पु० अधिको राजा प्रा० स० टच्। सार्वभौमे।

अधिरोहिणी * स्त्री० अधिरुह्यतेऽनया अधि+रुह-करणे ल्युट्। (मइ) इति (सिड़ि) इति च प्रसिद्धे काष्ठवंशादिनिर्मिते उच्चस्थानारोहणसाधने सोपानभेदे।

अधियज्ञ * पु० अधिकृतः स्वामितया यज्ञो यस्य ब०। विष्णौ।

अधियोग * अधि युज-घञ् योगः अधिको योगः प्रा० स०। ज्योतिषप्रसिद्धे शुभदयोगे। स च लग्नचन्द्रयोर्मध्ये, तस्माद्वा चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे वा स्थाने बुधजीवभार्गवाणां [illegible] अन्यतमस्थाने वा स्थितौ सत्यां योगः तत्र दाम्पत्यं क्षेमं [illegible] फलम्। मुहूर्त० चि० प्र०।

अधिवास * पु० अधि+वस घञ्। निवासे। आसंजने। गन्धमाल्यादेः संस्कारे। अधिवासयति देवता अनेन अधि+वस-णिच् करणे घञ्। यज्ञारम्भपूर्वदिवसे देवताद्यावाहनादिकर्मणि।

अधिवासन * न० अधि+वस णिच् अधिकरणे ल्युट्। यज्ञारम्भात् पूर्वदिवसे देवताद्यावाहनादौ। भावे ल्युट्। गन्धमाल्यादेः पुष्पादि संस्कारे। [संस्कारे, कालव्याप्त्याधिवासे देशादौ च।

अधिवासित * त्रि० अधि-वस णिच् क्त। गन्धमाल्यादिभिः कृत-

अधिविन्ना * स्त्री० अधि+विद् कर्मणि क्त। अधि उपरि विन्ना विवाहिता यस्याः। कृताधिवेदनायाम् अन्यूढायां स्त्रियाम्। कृतपूर्वविवाहायाः [illegible] पुनर्विवाहकाले कृतपूर्वा भार्य्या अधिविन्ना। "अधिविन्नस्त्रियै देयम्" इति स्मृतिः।

अधिवेदन * न० अधि [illegible] कृतदारस्य [illegible] च। [illegible] (भावे) इति, [illegible]।

अधिश्रयण * [illegible]।

अधिष्ठान * न० अधि+स्था-ल्युट्। नियमितकार्य्यविशेषाकरणे सान्निध्यमात्रेण, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च। अधिकरणे ल्युटि। पुरे। करणे ल्युटि। चक्रे, प्रभावे च। चक्रेण प्रभावेण च महत्तत्त्वादिसम्भवात्।

अधीत * त्रि० अधि+इङ्-क्त। पठिते। भावे क्त। अध्ययने न०

अधीतिन् * त्रि० अधीतमनेन अधीत+इनि। कृताध्ययने।

अधीन * त्रि० अधिगतमिनं प्रभुं गतिम०। आयत्ते धनाधीन इत्यादौ तु धने अधि-इति वाक्ये समासे अध्युत्तरपदात् ख।

अधीर * त्रि० धीरः धैर्य्यान्वितः न०त०। चञ्चले।

अधीश * त्रि० अधिक ईशः प्रा० स०। अधिकप्रभौ सार्वभौमे।

अधीश्वर * त्रि० अधिक ईश्वरः प्रा० स०। सार्वभौमे। स्त्रियां ङीप्

अधीष्ट * न० अधि+इष० इष-भावे क्त। सत्कारपूर्वकनियोगे कर्मणि क्त। सत्कारपूर्वकं नियोजिते त्रि०।

अधुना * अव्य० अस्मिन् काले इदम्शब्दस्य नि०। संप्रतीत्यर्थे।

अधुनातन * त्रि० भवार्थे अधुना+ट्युल्। इदानीम्भवे स्त्रियां ङीप्

अधृष्ट * त्रि० धृष-निर्लज्जत्वे क्त न० त०। लज्जाशीले। [नीवि

अधृष्य * त्रि० धृष-अर्हार्थे यत् न०त०। धर्षणायोग्ये अनभिभव-

अधोंऽशुक * न० अधर+प्रथमार्थे असि अधरस्य अधादेशश्च। परिधानवस्त्रे।

अधोक्षज * पु० अक्षात् इन्द्रियात् जायते अक्षजं प्रत्यक्षज्ञानम् जन-ड ५त० अधरमधाङ्कृतमक्षजं येन तथाभूत ब०। अधर-प्रथमार्थे असि अधादेशश्च। इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज." इत्युक्तलक्षणे, वा विष्णौ।

अधोजिह्विका * स्त्री० अधस्था जिह्वा जिह्विका स्वार्थे क अधोऽस्था जिह्विका कर्म०। (आलजिभ) इति ख्यातायां तालुस्थजिह्विकायाम्। [पातालनोर्धे।

अधोभुवन * न० अधोऽधरं भुवनं लोकः कर्म०। भूमेरधरे भागे

अधोमुख * त्रि० अधो मुखं यस्य ब०। अवाङ्मुखे, ज्योतिषशास्त्रप्रसिद्धेषु नक्षत्रभेदेषु च। यथा "मूलार्द्रे वा कृत्तिका च विशाखा भरणी तथा। मघा पूर्वात्रयं चैव अधोमुखगणः स्मृतः॥" इति। गोजिह्वाख्यवृक्षे। स्त्री० टाप्।

अधोलोक * पु० अधोऽधरो लोकः कर्म०। भूमेरधस्थपाताले।

अध्यक्ष * त्रि० अधिगतोऽक्षं व्यवहारं अत्या० स०। नृपस्य प्रजाधर्मादिव्यवहारेऽधिकृते। अध्यक्ष्णोति व्याप्नोति अधि+अक्ष-अच्। व्यापके अधिगतं मुख्यतया अक्षम् इन्द्रियम् गति स०। प्रत्यक्षज्ञाने। अर्शआदित्वात् अच्, तद्विषये त्रि०।

अध्यग्नि * अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्येऽर्थे वा अव्ययी०। अग्नौ अग्निसमीपे वा। तत्र स्थाने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न०। स्मृतिशास्त्रे [illegible] परिभाषा कृता। यथा "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम्॥" इति।

वस्यां (भुंइ आमला) इति ख्यातायाम् भूम्यामलक्याम्।

अध्यधीन * त्रि॰ अधिकोऽधीनः प्रा॰ स॰। अत्यधीने गर्भदासे च।

अध्ययन * न॰ अधि+इङ्-ल्युट्। पठने, गुरुमुखोच्चारणानुसारिवि उच्चारणे च। अध्ययनशब्दस्याक्षरमात्रपाठ इति वैदिकाः। मार्थावगहणमिति मीमांसकाः।

अध्यर्द्ध * त्रि॰ अधिकमर्द्धं यस्य स॰। साद्धैन सहिते समुमावे।

अध्यवसाय * पु॰ अधि+अव+सो घञ्। इदमेवेति विषयपरिच्छेदे निश्चये। स आत्मधर्म इति नैयायिकाः। बुद्धिधर्म इति सांख्याः। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः तमसोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यवसाय इति वृत्तिरिति चाख्यायते इति सांख्यतत्त्वकौमुदीपरिभाषितलक्षणः, कर्त्तव्यमिति योऽयं निश्चयः चितिसन्निधानात् आपन्नचैतन्याया बुद्धेः परिणामः सोऽयमध्यवसाय इत्युक्तलक्षणो वा निश्चय। उत्साहे च।

अध्यात्म * अव्य॰ आत्मनि देहे मनसि वा विभक्त्यर्थे अव्ययी॰। आत्माधिकरणे देहाधिकरणे चित्ताधिकरणे च। तदधिकृत्य विद्याविषये आत्मतत्त्वे, स्वभावोऽध्यात्ममुच्यते इति गीतावच-मात् स्वभावे, भावस्य स्वरूपं प्रत्यक् चैतन्यमिति तत्त्वम्, पर-मात्मनि च। अतएव अध्यात्मविद्याशब्दादीनामीतिविषयकवि-चार्थत्वं वेदान्तादौ प्रसिद्धम्। [नरि, उपाध्याये च।

[illegible]पक * त्रि॰ अधि+इङ्-णिच्-ण्वुल्। शास्त्राध्ययनकारयि[illegible]

[illegible]पन * न॰ अधि+इङ्-णिच् भावे ल्युट्। पाठनायाम्। स्त्रीत्वात् टाप्, अध्यापना [illegible]।

[illegible] * पु॰ अधि+इङ्-घञ्। अध्ययने वेदादिशास्त्रस्य एकार्थक पदसमाप्तिद्योतके ग्रन्थविभागे, "सर्गो वर्गः परिच्छेदोद्घाता-ध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च। स्थानं प्रकरणञ्चैव पर्वोह्लाह्निकानि च। पुराणादौ परिच्छेदा ग्रन्थांशे परिकीर्त्तिताः।" इत्युक्तालक्षणविशेषे च। [illegible]

[illegible]ध्यारूढ * त्रि॰ अधि+आ+रुह-कर्मणि क्त। [illegible]

[illegible]ध्यारोप * पु॰ अधि+आ+रुह-णिच्-पुक् च घञ्। [illegible] वस्तुनि [illegible] अध्यारोपः। [illegible]

[illegible]

अधि-आस घञ्। आसने।

अध्यासित * त्रि॰ अधि+आस-क्त। अधिष्ठिते। स्थिते। निवेशिते च।

अध्याहार * पु॰ अधि+आ+हृ-घञ्। आकाङ्क्षाविषयपदानुसन्धाने, ऊहे, तर्के, अपूर्वोत्प्रेक्षणे च।

अध्यूढ * पु॰ अधि+वह-क्त। शम्भौ समृद्धे च। [illegible] त्रि॰। "अध्यूढ नाम गोपते" इति श्रुतिः। कृतसपत्नीकायां स्त्रियां [illegible] द्वितीयविवाहस्य प्रागूढयोषिति स्त्री॰।

अध्येषण * न॰ अधि-इष प्रेरणे ल्युट्। सत्कारपूर्वकप्रार्थनादिः प्रेरणे, प्रवर्त्तनमात्रे च। स्त्रियां टाप् [illegible] स्त्री॰।

अध्रुव त्रि॰ ध्रु-क न॰ त॰। चले, [illegible], अनित्ये, अस्थिरे च।

अध्वग * पु॰ अध्वन्+गम-ड। पथिके, उष्ट्रे, अश्वे च। [illegible] समासे त्रि॰। [illegible] स्त्री॰।

अध्वगम्य * पु॰ [illegible]

[illegible] (समाप्त) इति ख्याते [illegible]

अध्वजा * स्त्री॰ [illegible]

[illegible]

अध्वन् * पु॰ अधि [illegible]

[illegible]

वा विधिना अनाहिताग्नौ गृहस्थादौ, सर्वथा अग्निशून्ये प्रज्वलिते च।

अनघ * त्रि० नास्ति अघं पापं दुःखं व्यसनं कालुष्यं वा यस्य। पापशून्ये, दुःखहीने, व्यसनशून्ये, स्वच्छे च।

अनङ्ग * न० नास्ति अङ्गमाकारो यस्य। आकाशे, चित्ते। कन्दर्पे पु०। अङ्गशून्यमात्रे त्रि०। [विशेषे।

अनङ्गशेखर * पु०, क्रमेण लघुगुरुनिवेशवति दण्डकभेदे छन्दो-

अनच्छ * त्रि० न अच्छः निर्मलः न० त०। कलुषे, अप्रसन्ने च।

अनञ्जन * न० अज्यते लिप्यते अनूज-कर्मणि ल्युट् न० त०। निःसम्बन्धे आकाशे, परब्रह्मणि च। अञ्जनं दोषस्तद्रहिते नारायणे पु०। तथाभूतवस्तुमात्रे त्रि०।

अनडुह् * पु० अनः शकटं वहतीति नि० (एँड़ा) इति प्रसिद्धे गवि। स्त्रियां गवि ङीपि अनडुही अनड्वाहीति च।

अनध्याय * पु० अध्यायोऽध्ययनमभावार्थे न० त०। अध्ययनाभावे। न अधीयतेऽस्मिन् काले इति अधिकरणे घञि, अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयायाम्। मन्वादिषु युगादिषु। अष्टकासु च संक्रान्तौ शयने बोधने हरेः। अनध्यायं प्रकुर्वीत" इत्याद्युक्ते काले, निर्घाते भूमिचलने इत्याद्याकालिकानध्यायकाले च।

अनन्त * पु० नास्ति अन्तः गुणानां यस्य ब०। "गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः। नान्तं गुणानां जानन्ति तेनानन्तोऽयमुच्यते।" इत्युक्तलक्षणे विष्णौ, शेषे च। बहुशीर्षकत्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च। अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च यस्य नास्ति तस्मिन् परब्रह्मणि आकाशे च न०। बहुविस्तारवति सिन्दुवारवृक्षे पु०। अवधिशून्ये, इयत्ताशून्ये, च वस्तुमात्रे त्रि०।

अनन्तव्रत * न० अनन्तस्य व्रतमुपासनार्थत्वात् ६त०। भाद्रशुक्लचतुर्दश्यां कर्त्तव्ये स्वनाम्ना ख्याते व्रते।

अनन्ता * स्त्री० नास्ति अन्तोऽस्या ब०। विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पार्वत्याम्, पृथिव्याम्, दुःस्पर्शायां दुरालभायां, दूर्वायां, हरितक्यां, आमलक्यां, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां च।

अनन्यज * पु० नास्ति अन्यदस्मात् सर्ववस्तुभेदानां तदात्मकत्वात् स विष्णुः तस्मात् जायते जन ड ५त०। कामदेवे। [त्वचित्ते।

अनन्यवृत्ति * त्रि० न अन्यस्मिन् ध्येयभिन्ने वृत्तिर्यस्य ब०। एका-

अनन्वय * त्रि० नास्ति अन्वयो यत्र ब०। अन्वयशून्ये। अर्थालङ्कारभेदे पु०।

अनय * पु० अयः शुभावहो विधिस्तदन्यः न० त०। अशुभदैवे द्यूतादिव्यसनप्रसङ्गगमने च। नयो नीतिः नी-अच् न० त०। नयाभावे अनीतौ। ब०। तच्छून्ये त्रि०। [प्रतिबन्धकशून्ये च।

अनर्गल * त्रि० अर्गलं द्वाररोधकस्तम्भः ब०। द्वाररोधकस्तम्भशून्ये,

अनर्घ * त्रि० अर्घो मूल्यं न० ब०। अमूल्ये।

अनर्थ * पु० अर्थः प्रयोजनं विरोधे न० त०। अनिष्टे। ब०। रहिते विष्णौ पु० आप्तकामत्वात्। अर्थोऽभिधेयः नास्ति यस्य ब०। अर्थरहितमात्रे त्रि०।

अनर्थक * न० अर्थोऽभिधेयोऽप्रागस्त्ये नञा ब०। छर प्रभृति० समामाता:। समुदायार्थशून्ये प्रलापे, अमङ्गले व्यर्थे त्रि०। [अमिते,

अनर्थान्तरम् * न० अन्योऽर्थः अर्थान्तरं मयूर० त० ततः न०

अनल * पु० नास्ति अलः पर्याप्तिर्यस्य बहुदाह्यदहनेऽपि भावात् ब०। वह्नौ, अष्टवसुमध्ये पञ्चमे वसौ, कृत्तिकानक्षत्रे च। (चिता) इति ख्याते चित्रके वृक्षे, ५ सर्वतः पर्याप्तत्वेऽपि पर्याप्तेः सीमाभावात्, (भेला) ख्याते भल्लातके वृक्षे, पित्तनामके देहस्थे आयुर्वर्द्धके धातौ अव्ययी०। नलाभावे अव्य०। न० त०। नलभिन्ने। अन-कलच् षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे। [नासिकायां लतायाम्

अनलप्रभा * स्त्री० अनलस्य प्रभेव प्रभा यस्य ब०। ज्योतिष्मती

अनलि * पु० अनितीत्यन् अन+क्विप् अन् अलिरिव ब०। वकवृक्षे तस्य मधुभिर्भ्रमराणां जीवनधारणात्।

अनवधानता * स्त्री० अवधीयते मनः संयुज्यते कर्त्तव्यकर्मणि यथास्थितं प्रवर्त्यतेऽनेन अव+धा-करणे ल्युट् अवधानं चित्तवृत्तिभेदः तदास्ति यस्य तस्य भावः। प्रमादे। कर्त्तव्येऽकर्त्तव्यताबोधेन ततो निवृत्तिः, अकर्त्तव्ये कर्त्तव्यताबोधेन तत्र प्रवृत्तिः प्रमादः। [निरन्तरे सतृष्टे च

अनवरत * त्रि० अव+रम्-भावे क्त अवतरम् तदास्ति यस्य ब०

अनवलोभन * न० सीमन्तोन्नयनानन्तर चतुर्थे मासि कर्त्तव्ये गर्भसंस्कारविशेषे स्वनाम्ना प्रसिद्धे।

अनवसर * त्रि० अवसरत्यत्र अव+सृ-अच् अवसरः उचितः कालः स नास्ति यस्य ब०। उचितकालविहीने। न०त०। अवसराभावे

अनवस्कर * त्रि० अवस्क्रियते शोध्यते अव+कृ-अच् सुडागमः अवस्करो मलः स नास्ति यस्य ब०। विमले।

अनवस्था * स्त्री० अव+स्था-अङ् अवस्थितिः न० त०। अवस्थाभावे, तर्कदोषविशेषे, उपपाद्यस्य समर्थनाय उपपादकस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्तिर्नास्ति तादृशतर्कस्यानवस्थादोषः तेन स तर्को न ग्राह्यः।

अनवस्थान * न० अव+स्था-ल्युट् न० त०। अवस्थानाभावे। ब० वायौ पु०। चञ्चलमात्रे त्रि०। [भोजनशून्ये त्रि०

अनशन * अश+ल्युट् न० त०। अशनाभावे, उपवासे च। ब०

अनस * न० अनिति शब्दायते अन-असुन्। शकटे। करणे ल्युट् ओदने। मातरि। स्त्री०।

अनसूया * स्त्री० असू-कण्ड्वादित्वात् यक्-अङ् न० त०। असूया गुणेषु दोषारोपस्तदभावे, अत्रिमुनिपत्न्यां च।

अनाकुल * त्रि॰ न आकुलः न॰ त॰। अव्यग्रे, एकाग्रे, स्थिरे, असङ्कीर्णेशब्दे च।

अनाक्रान्ता * स्त्री॰ आक्रमितुमयोग्या सर्वतः कण्टकावृतत्वात् आ+क्रम-क्त न॰ त॰। कण्टकारिवृक्षे। आक्रान्तभिन्ने त्रि॰।

अनागत * त्रि॰ आ+गम-क्त आगतः न॰ त॰। भाविनि, अप्राप्ते, अननुष्ठिते, आगमनकर्त्तृभिन्ने च।

अनागतार्त्तवा * स्त्री॰ अनागतः स्त्रीपुष्पचिह्नं विकाशनम् आर्त्तवम् ऋतु+अण् न आगतमार्त्तवं यस्याः ब॰। स्त्रीधर्मशून्यायां नग्निकायां कन्यायाम्।

अनाचार * पु॰ आ+चर-घञ् आचारः शास्त्रोक्ताचारे वा न॰ त॰। कदाचारे, आचाराभावे च। ब॰। आचारहीने त्रि॰।

अनातप * पु॰ आ+तप-अच् न॰ त॰। आतपस्य रौद्रस्याभावे छायादौ च। ब॰। आतपशून्ये त्रि॰।

अनात्मन् * पु॰ अतति सातत्येन तिष्ठति अत-मनिण् आत्मा तद्भिन्ने देहादौ च न॰ त॰। आत्मभिन्ने, अनात्मज्ञे देहादौ "अनात्मवान् यो आत्मनः स्वयमेवात्मना। आत्मीयात् समनात्मानं बुधाना बहुधादिकम्।" इति मनिवादिते च।

अनादर * पु॰ आ+दृ-अप् आदरः गौरवहेतुका सम्भावना तद्विरोधे नञ् न॰। परिभवे, तिरस्कारे च तस्य आदरविरोधित्वात्। ब॰। आदरशून्ये त्रि॰।

अनादि * पु॰ आदिः कारणम् पूर्वकालो वा स नास्ति यस्य परमेश्वरे। नास्ति आदिः यस्य तादृशो यस्मात् ब॰। हिरण्यगर्भ पु॰ तस्यैव सृष्टेः प्रथमोत्पत्तेः। आदिशून्ये त्रि॰।

अनानत् * न॰ अननम् अन-क्त् अत जीवनम् अनयति अनति अन-क्विप्। अर्थवादे। प्राणशून्ये ततस्थाने पु॰ तस्य वैदिककर्मानर्हत्वात्प्राणत्वात्। प्राणशून्ये त्रि॰।

अनामय * पु॰ अम-अच् आमं मारं तापकेन दा-क आमयो रोगः न॰ त॰। रोगाभावे आरोग्ये। न॰ ब॰। रोगशून्ये त्रि॰।

अनामा * स्त्री॰ अनुष्ठः जिरण्ये दनमायनतया नत्वदोयत्वात् नास्ति नाम सत्वयदोयस्य यस्याः ब॰ नननत्वात् डाप्। अनामशब्दिकायां मध्यमकनिष्ठयोः मध्यगायामङ्गुल्याम्। नाम्नि च अनामिकाशब्दः। यदा हि शिवेन ब्रह्मणः शिरश्छिन्नमिति पुराणे प्रसिद्धम् अन्यस्य स्त्रीत्वात् परिवीतदेशेऽपि परिवनामकगुणधारणं क्रियते। [अन्यदन्नार्थे, अङ्गीदे च। ब॰। नामशून्ये त्रि॰।

अनायास * पु॰ आ+यस-घञ् आयासः न॰ त॰। श्रमाभावे,

अनायासकृत ह न॰ अनायासेन अश्रमेण कृतं न॰ त॰। अनायासेन कृते कार्यादौ।

अनारत * न॰ आ+रम-क्त आरतं विरतिः तदभावे न॰ त॰। अजस्रे, अविरते, अविच्छेदे च। ब॰। तद्वति त्रि॰।

अनार्जव * पु॰ अर्जवं भावः आर्जवं सरलता तदभावः यस्या ब॰। रोगे। अनार्जवे अर्जवे॰। ऋजुत्वाभावे अन्य॰ ब॰।

कुटिले त्रि॰।

अनार्यक (ज) * न॰। अनार्यदेशे आर्यावर्त्तादिभिन्ने द्वीपान्तरादौ भवः अनार्य+क। अगुरुकाष्ठे। अर्हति यत्र तस्मिन् जायते जन-ड। अनार्यदेशजाते त्रि॰।

अनार्यतिक्त * पु॰ अनार्येषु तिक्तः शाक॰ त॰। (चिराता) इति ख्याते भूनिम्बे वृक्षे।

अनावृत्ति * स्त्री॰ आ+वृत-क्तिन् अभ्यासः आगतिश्च न॰ त॰। अभ्यासाभावे, आगमनाभावे च। ब॰। तद्वति त्रि॰।

अनावृष्टि * स्त्री॰ आ+वृष-क्तिन् न॰ त॰। वृष्टेरभावे सस्योपघातकोपद्रवे ईतिभेदे।

अनाशक ० पु॰। आ समन्तात् अश्नन् आशः अशनम् आ+अश-घञ् न॰ त॰। उपवासेनाशनाभावे, "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन तपसाऽनाशकेन" इति श्रुतिः।

अनाशिन् * पु॰ न नश्यति नश-णिनि न॰ त॰, न अश्नाति कर्मफलं अश-णिनि न॰त॰ वा। नाशशून्ये, कर्मफलाभोक्तरि च परमेश्वरे।

अनाश्वस् * त्रि॰ न+अश-क्वसु नि॰। अशनमकृतवति।

अनास्था * स्त्री॰ आ+स्था-अङ् आस्था आदरः न॰ त॰। अनादरे। ब॰। आदररहिते त्रि॰।

अनाहत * न॰ आ+हन-भावे क्त आहतं हेतोः भीमी वा न॰त॰। हृदयोर्ध्वादिदेहस्थिते मध्ये पद्मे। तत्रत्याक्षरे परिहृते हृदयस्थिते द्वादशदलपद्मे "शब्दो ब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते। अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितम्।" इत्युक्तलक्षणे च अस्मिन् पद्मे च आहननाभावेऽपि शब्दोत्पत्तिः तस्यास्ति तत्र नादस्य शब्दस्य श्रवणात् अत एव अनाहत-शब्देन च दश-कर्णकरी-अभ्यासाद्वैचरीति पदितानां वाग्देवीनां मध्ये मध्यमा वाक् अत्रैव तस्याः ह्रदयपद्मे उत्पन्नत्वात्। ब॰। आघातरहिते वस्त्वादौ त्रि॰। [नियतशब्दे। परिधानार्थे।

अनिकेत * त्रि॰ नास्ति निकेतः निवसनं स्थानं यस्य ब॰। निकेत-

अनिमिष * पु॰ नास्ति निमिषः चक्षुस्पन्दनं यस्य निमि-षम् कुटादि॰ न गुणः निमि आदि॰ अम् वा। ब॰। चक्षुस्पन्दनशून्ये देवे मत्स्ये च। निमेषो हार्दनिमेषस्पन्दनशून्ये निमेषे च। न निमिषति अनिमिषिः नि+मिष-क न॰ त॰। स्पन्दे। क्रियाशून्ये वस्तुमात्रे त्रि॰। [मत्स्ये च।

अनिरुक्त * त्रि॰ निर्+वच-क्त न॰ त॰। अनिर्वाच्ये, अस्फुटे।

अनिरुद्ध * पु॰ न केनापि युद्धेन निरुद्धः नि+रुध-क्त न॰ त॰। प्रद्युम्नपुत्रे, चरपुरुषे, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूह प्रसिद्धस्य अनिरुद्धस्य चतुर्भुजस्य देवस्यादिकारणरूपे अनिरुद्धाख्ये देवे च। अप्रतिरुद्धे त्रि॰।

अनिरुद्धपथ * न॰ निरुद्धः पन्थाः यत्र ब॰। आकाशे तत्र प्रचारे प्रतिरोधकाभावात्। प्रतिबन्धरहिते त्रि॰।

अनिर्दिष्ट * त्रि॰ निर्दिष्टः आनिर्दिष्टमिति न॰ त॰। निर्देशशून्ये

निर्+दिश्-भावार्थे ल्युट् न० त०। निर्विशेषे निर्धर्मके परमात्मनि तस्य जातिगुणाद्यभावेन इदं तदिति निर्देशायोग्यत्वात्।

अनिर्वचनीय * पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनं तदगोचरतया निर्वक्तुमशक्ये वियदादौ, परात्मनि च।

अनिल * पु० अनित्यनेन अन+इलच्। वायौ, तेनैव सर्वेषां प्राणधारणात् तद्देवताके स्वातिनक्षत्रे, “वाताः पञ्चाशदूनकाः” इत्युक्तगणदेवताभेदे, अष्टवसुमध्ये पञ्चमे वसौ च।

अनिलघ्नक * पु० अनिलं वातरोगं हन्ति हन्-क तत' स्वार्थे क। (बयड़ा) इति ख्याते वृक्षे तत्फलस्य वातनाशकत्वात्।

अनिलसख * पु० अनिलस्य वायोः सखा टच्। वह्नौ।

अनिलान्तक * पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+णिच् ण्वुल्। (जीयापुति) इतिख्याते वृक्षे।

अनिलामय * पु० अनिलकृत आमयः शाक० त०। वातरोगे।

अनिवार * त्रि० नास्ति निवारो निवारणं यस्य अविच्छेदे, सतते, अनिवार्ये च। [निरन्तरे, सदाभवे वस्तुनि, रात्रिवर्जिते च।

अनिश * त्रि० निशा चेष्टाव्याघातः सा नास्ति यस्य ब०। अविरते,

अनिष्ट * त्रि० इष+क्त विरोधे नञा त० इष्टस्य सुखादेर्विरोधिनि प्रतिकूलवेदनीये दुःखे, तत्साधने, पापे, विपादौ, अपकारे च। नागबलायां स्त्री०।

अनीक * न० अनित्यनेन अन+ईकन्। सैन्ये, तस्य हि जीवनरक्षकत्वात्। न नीयते अपसार्य्यतेऽस्मात्। नी-क्विप् ब० कप् ह्रस्वाभावः। युद्धे, ततो हि प्रायोमरणाद्यापसारणम्।

अनीकस्थ * पु० अनीके युद्धे तिष्ठति स्था-क। युद्धगते सैन्ये।

अनीकिनी ० स्त्री० अनीकं युद्धं प्रयोजनतया अस्त्यस्याः अनीक+इनि। सेनायाम्, हस्त्यादिसंख्याविशेषवत्यां सेनायाञ्च तस्य संख्या च हस्तिनः २१८७। रथाः २१८७। अश्वाः ६५६१। पदातयः १०९३५ समुदिताः २१८७०।

अनीश * पु० नास्ति ईशो नियन्ता यस्य ब०। सर्वनियन्तरि विष्णौ। न० त०। ईश्वरभिन्ने स्वामिभिन्ने च त्रि०।

अनीह त्रि० ईह-अच् न० ब०। स्पृहाशून्ये निश्चेष्टे च।

अनु ० अव्य० अन-उ। पश्चादर्थे, पश्चादर्थे, सादृश्ये, लक्षणे, वीप्सायां, व्याप्तौ, कस्यचित् भागे, अनुक्रमे, आयामे, समीपे च।

अनुक * त्रि० अनुकामयते अनु+कम ड। कामनावति।

अनुकम्पा ० स्त्री० अनु+कम्प-अ। दयायाम्, किञ्चित्कम्पने च।

अनुवाद * न० सादृश्ये-अनु+वद-ल्युट्। अनुवादे। तत्र देशभाषादिभिः सदृशीकरणम्। अनुक्रियतेऽनेनेति करणे ल्युट्। सदृशीकरणसाधने। यथा पदार्थान् अनुवदति कर्म्यते अनुवदन्ति।

अनुकर्ष, ण * पु० अनुकृष्यते आकर्षेण कर्षेण च अनु+कृष-घञ्। रथाधःस्थिते काष्ठे, पूर्वसूत्रोक्तपदानुवृत्तौ अन्यार्थसाकर्षणे च। कर्त्तरि ल्यु। आकर्षणकर्त्तरि।

अनुकल्प ० पु० कल्पात् विधीयते इति कृप-णिच्-अच् कल्पो विहितः अनु हीनः कल्पो मुख्यकल्पादधमः प्रा० स०। गौणकल्पे, प्रतिनिधौ च। यथा मध्वभावे गुडः।

अनुकामीन * त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सदृशे अव्ययी० ततः गच्छतीत्यर्थे ख। यथेष्टगमनशीले।

अनुकार * पु० अनु+कृ-घञ्। वेशभाषादिभिः सदृशीकरणे।

अनुकूल * त्रि० कूलमावरणं खे दैनानुबन्धमिति यावत् अनुगतम् अत्या० स०। सहचरे, सहाये, स्वपक्षपातिनि, अलङ्कारशास्त्रप्रसिद्धे नायकभेदे च। साहित्यदर्पणे ३परि०।

अनुक्रम * पु० अनु+क्रम-घञ् न वृद्धिः। परिपाट्याम्। आनुपूर्व्ये अव्ययी०। यथाक्रमे अव्य०।

अनुक्रमणिका * स्त्री० अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम-करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे के ह्रस्वः। अनुक्रमज्ञापके, ग्रन्थांशे वक्तव्यस्य, ग्रन्थशेषे च उक्तार्थसमुदायस्य संग्राहके पुराणादेरंशविशेषे। स्वार्थे काभावेऽनुक्रमणीत्यपि, तत्रैव। [याम्। अनुगतः क्रोशं गतिस०। प्रासक्रोशके त्रि०।

अनुक्रोश * पु० अनुक्रोशत्यनेन क्रुश आह्वाने रोदने च घञ्। दया-

अनुग * त्रि० अनु+गम-ड। पश्चाद्गामिनि, सहचरे, आनुलोम्ये गते च। [सामान्यधर्मप्रहणेन संगृहीतेऽखिले विशेषे च।

अनुगत * त्रि० अनु+गम-क्त। पश्चाद्गते, सहगते, आनुलोम्यं गते,

अनुगम * पु० अनु+गम-घञ् वृद्ध्यभावः। पश्चाद्गमने, सहायीभवने, आनुलोम्यकरणे, सामान्यधर्मेण सर्वेषां विशेषरूपाणां संग्रहे च।

अनुगुण * अनुकूलो गुणो यस्य। अनुकूले अनुगते च।

अनुग्रह * पु० अनु+ग्रह-अप्। अभीष्टसम्पादनेच्छारूपे प्रसादे आनुकूल्ये, अनिष्टनिवारणपूर्वकेष्टसाधनेच्छारूपायामभ्युपपत्तौ, “विरूपोऽसन्ततिः स्नानमकुत्साभूयकं हि यत्। पूरणं दानमानाभ्यामनुग्रह उदाहृतः॥” इत्युक्तलक्षणे दरिद्रादिपोषणे च। अनो ग्रहस्य सूर्य्यादिग्रहो वा अनुगतस्तम् गतिस०। ग्रहानुगते सूर्य्यादिग्रहानुगते च त्रि०।

अनुचर * त्रि० अनु+चर-ट। सहचरे, पश्चाद्गामिनि, दासादौ। स्त्रियां ङीप्। अनुगतश्चरं दूतं गतिस०। दूतानुगे त्रि०।

अनुज * त्रि० अनु पश्चात् जायते जन-ड। पश्चाज्जाते सहोदरे भ्रातरि। तादृश्यां भगिन्यां स्त्री०।

अनुजीविन् * पु० अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव-णिनि। सेवके, आश्रिते च।

अनुज्ञा ० स्त्री० अनु+ज्ञा-अङ्। स्वयं प्रवृत्तस्यान्यस्य प्रवृत्तिविघाताकरणेन प्रवर्त्तनाकल्पायामनुमतौ।

अनुतर्ष * न० अनुतृष्यतेऽनेन करणे घञ्। सुरापानपात्रे, मद्ये, मद्यपाने च। भावे घञ्। अभिलाषे पानेच्छायाम्।

अनुताप * पु० अनु+तप-घञ्। इदमनुचितं कृतमिति स्वकृत-

नुनो दुःखजनकतया ग्लानेन पश्चात्तापे ।

● त्रि॰ अनुगतः अनुगः तथा भूतः । पश्चाद्गामिनि । [illegible] सेवादारकरिणे । स॰ त॰ । उनपादिमिथ्यं स्त्री॰ ।

● पु॰ अर्थेरागः उद्यानिनः उद्यामः स॰ त॰ । अर्थोद्वारन्तरीषु कपटादिषु मोदीपादकप्रयत्नविशेषे धात्वभेदे ।

● पु॰ अनु+इष-अ ईषदर्थे स॰ त॰ । क्रियमाणेष ईषदितनुमें प्रतिरूपकारके च्यानि । उदिते ऽनुदिते चैवेति मनुः ।

● त्रि॰ अनु+द्रु-क । पश्चाद्गते, "अर्द्धमात्रं द्रुतं अर्थं द्रुताद्युक्तम्" इत्युक्तमध्ये वादनविषये कालविशेषे च ।

● न॰ अनु+धाव-ल्युट् । पश्चाद्गमने, तत्त्वनिश्चयानुसरणे, गुप्तभार्गे च ।

● स्त्री॰ अनु+ध्यै-अङ् । अनुचिन्तने, अनुध्याने, ध्याने च ।

● पु॰ अनु+नी-अच् । विनये, प्रणिपाते, प्रार्थने, सान्त्वने च ।

● पु॰ अनुगतो नासां नासाग्रं स॰ नासिकायां श्वासायां [illegible] नासाकुञ्चने मुखविकाराविषयेषु अर्यान्यं तु इत्यादिषु ।

● अव्य॰ पदस्य पश्चात् अव्ययी॰ । पश्चाद्गमने, अन्वर्थार्थे । अनुगतं पदम् अत्यास॰ । पश्चाद्गामिनि त्रि॰ ।

● त्रि॰ अनुपदम् अर्थे दा अनुपदं पश्चाद्दिरमर्थे [illegible] । अन्वेषणकर्तरि । [illegible]

● स्त्री॰ अनु पदस्य आयामतुल्यायाम आयामोऽस्याः स्त्री॰ । अनुपदं बद्धत्वं च । पादतुल्यायामवत्याः पादुकायाम् (ओजा) इत्यादि व्याख्यायाम् । [illegible]

[illegible]

नानि प्राय॰ त्रि॰ अनुगा॰ द॰ ।

अनुपान ● न॰ अनु भैषज्येन सह पश्चाद् पीयते कर्मणि ल्युट् । औषधाद्धि येन सह सेव्यता पीयते मधूदकादौ । पानस्य अनुगमनीये अव्ययी॰ । अनुसामीप्ये अव्य॰ ।

अनुपूर्व ● पु॰ अनुगतं पूर्वं परिपाटी गति॰ । यथाक्रमे ।

अनुप्रास: ● पु॰ अनुगत॰ रसाद्यनुगुणं प्रकृष्टमासं वर्णन्यासे समवर्णतया समस्वरोच्चारणं वा अनु+प्र-अस् घञ् । अलङ्कारे शब्दवैचित्र्यं हि समवर्णानां रचनायाम् ।

अनुबन्ध ● पु॰ अनु+बन्ध-घञ् । आरम्भे, अनुबन्धे, हानौ च ।

अनुबन्ध ● पु॰ अनु+बन्ध-प्रत्ययं पश्चादौ घञ् । बन्धने, इत्यादि पूर्वप्रवृत्ताकरणे, व्याकरणादिप्रसिद्धान्तर्गतवर्णे, [illegible] [illegible]

[illegible]

यते। करणे ल्युटि। तद्धेतुभूते धूमादौ। श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र स्मृतिवाक्यात् श्रुतिवाक्यमनुमीयते इति श्रुत्यनुमापकं स्मृतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः। [नानुमानशब्दस्यार्थे।

अनुमिति * स्त्री० अनु+मि-मा-वा क्तिन्। प्रागुदीरिते भावसाध-

अनुमोद * पु० अनु+मुद-घञ्। प्रकृतकर्मणि प्रवृत्तिविघाताकरणेनान्यप्रोत्साहानुकूलव्यापारे, त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलापसाधने। [ज्ञादिषु पञ्चसु यागेषु।

अनुयाज * पु० अनु+यज-घञ् कुत्वाभावः। दर्शपौर्णमासाङ्गे प्रय-

अनुयायिन् * त्रि० अनु+या-णिनि। सदृशे, अनुचरे, दासादौ, पश्चाद्गामिनि च। स्त्रियां ङीप्।

अनुयोग * पु० अनुयुज्यते कथनाय नियुज्यते अनु+युज-घञ्। प्रश्ने। सति हि प्रश्ने, पृष्टः कथनाय प्रवर्त्तते।

अनुराग * पु० अनु+रन्ज+घञ्। अत्यन्तप्रीतौ, स्नेहे च। अनुरूपो रागः प्रा० स०। अतिरागानुगे त्रि०। [प्रसदयनचत्वे।

अनुराधा * पु० अनुगता राधां विशाखां अत्या० स०। स्वनामप्रसिद्धे

अनुरूप * अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी०। सादृश्ये योग्यतायाञ्च। अर्शआद्यच्। सदृशे, योग्ये च त्रि०।

अनुरोध * पु० अनु+रुध-घञ्। अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च।

अनुलाप * पु० अनु वारंवारं लप्यते लप-घञ्। मुहुर्भाषणे।

अनुलेप * पु० अनु+लिप-भावे घञ्। चन्दनादिमर्दने कर्मणि घञि। अनुलिप्यमाने चन्दनादौ।

अनुलोम * पु० अनु+लोमन्+यथाक्रमे अव्ययी० अच्। यथाक्रमे।

अनुलोमज * पु० अनुलोमेन यथाक्रमेण जातः जन-ड। परिणीतक्षत्रियादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धाभिषिक्तादौ संकीर्णवर्णे।

अनुवर्त्तन * पु० अनुगतो वर्त्तनमाराध्यादेरिष्टसम्पादनं अत्या० स० अनु+वृत-ल्युट्। अनुरोधे, आराध्यादेरिष्टसम्पादने च।

अनुवाक * पु० अनु+उच्यते-वच-घञ् कुत्वम्। वेदस्य भागविशेषे, ऋग्यजुःसमूहे, वेदांशे महानाम्न्यां ख्याते च।

अनुवासना * स्त्री० अनु+वस-युच् कुत्वम्। वस्तिभेदः यथास्ता नस्याद्यादौ देहशोधनसाधने स्नेहे च।

अनुवाद * पु० अनु+वद-घञ्। ज्ञातार्थस्य प्रतिपादने, सिद्धस्योपन्यासे, प्रमाणान्तरावगतार्थस्य शब्देनोक्तौ, कथितस्य भाषान्तरेण कथने च। [करणे, प्रेरयुक्तवाक्ये च।

अनुवासन * न० अनु+वस-णिच्-ल्युट्। धूपादिना सौरभान्वित-

अनुवृत्त * त्रि० अनु+वृत-क्त। व्याप्ते, धारिते, अनुगते, सीमितस्थिते, अनुवर्त्तिते च।

अनुवृत्ति * स्त्री० अनु+वृत क्तिन्। पूर्वानुवृत्तौ, अनुरोधे, सेवायाम्, अनुकृतौ, व्याकरणशास्त्रप्रसिद्धे पूर्वसूत्रस्थपदा-
दीनामुत्तरत्र सूत्रे अनुषङ्गरूपेऽध्याहारे च।

अनुव्रज्या * स्त्री० अनु+व्रज-क्यप्। अनुसरणादिरूपे सेवने।

अनुशय * पु० अनु+शीङ्-अच्। अत्यन्तद्वेषे, पश्चात्तापे, पूर्ववैरे च। अनुगतः शयं हस्तं गतिस०। हस्तानुगते त्रि०।

अनुशयिन् * पु० अनु+शीङ्-इनि। यावत्कर्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्मणि पश्चात्तापान्विते भूमिलोके जन्मग्रहणाय गन्तुं प्रवृत्ते जीवे। पश्चात्तापयुते त्रि०।

अनुशासन * न० अनु+शास ल्युट्। शासने, आज्ञायाम्, उपदेशे, नियोगकरणे च। शिष्यते ज्ञाप्यते लक्षणादिनेति ;करणे ल्युटि। व्युत्पादनञ्च असाधुभूतेभ्यो विविच्य अनुशिष्याणां बोधनम् यथा व्याकरणे साधुशब्दानामसाधुभ्यो विविच्य प्रबोधनम्।

अनुशीलन * न० अनु+चु०-शील ल्युट्। मुहुरालोचने, पुनःपुनरभ्यासे च। [अनुशोचना तत्रैवार्थे स्त्री०।

अनुशोचन * न० अनु+शुच-ल्युट्। शोके। स्वार्थे णिचि युचि।

अनुश्रव * पु० अनुश्रूयते गुरुपरम्परयोच्चारणादनु अभ्यस्यते, श्रूयते एव न तु केनापि क्रियते वा अनु+श्रु-अप्। वेदे, तस्य श्रूयमाणतया एव सर्वसम्मतत्वात्।

अनुषङ्ग * पु० अनु+सन्ज-घञ् कुत्वम्। दयायाम्, आसक्तौ, एकत्र श्रुतपदस्य अन्यत्रान्वयार्थमनुवृत्तौ,अन्योद्देशेन प्रवृत्तौ तत्क्रियानान्तरीयकतयान्यस्य सिद्धिरूपे स्मृतिशास्त्रप्रसिद्धे प्रसङ्गे च।

अनुष्टुभ् * स्त्री० अनु+स्तुभ-क्विप् षत्वम्। सरस्वत्याम्, अष्टाक्षरपादके छन्दोभेदे च।

अनुष्ठान * न० अनु+स्था-भावे ल्युट् षत्वम्। विहितकर्मादिकरणे।

अनुष्ण * त्रि० उष्णः दृष्टः न० त०। अलसे, उष्णभिन्ने शीते च। उत्पले न०। अलसो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्मणि जड इव भवति, दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड इव सन् व्याप्रियते इति तयोरुष्णानुष्णता। अत्र कारित्वार्थे कनि अनुष्णकोऽपि।

अनुष्णवल्लिका * स्त्री० अनुष्णा शीतला वल्लीव इवार्थे क। टापि अत इत्वम्। नीलदूर्वायाम्।

अनुसन्धान * न० अनु+सम् धाञ्-ल्युट्। अन्वेषणे, चिन्तने च।

अनुसरण * न० अनु+सृ-ल्युट्। अनुगमने, सदृशीकरणे। भावे घञि अनुसारोऽप्यत्र।

अनुस्यूत * त्रि० अनु+सिव-क्त ऊठ्। ग्रथिते, सततसम्बद्धे च।

अनुस्वार * पु० अनु+स्वृ-घञ् उदात्तादिस्वरवत्त्वात् स्वरवर्ण एव स्वारः, अनुगतः स्वारात् अत्या० स०। स्वराश्रयेण उच्चार्यमाणे बिन्दुरूपतया व्यज्यमानेऽनुनासिके वर्णभेदे अनुस्वारो विसर्गश्चेत्युपक्रम्य आश्रयस्थानभागिन इत्युक्तेः तस्य तथात्वम्।

अनुहरण * न० अनु+हृ-ल्युट्। वेशभाषाचेष्टादिना सदृशीकरणे, सादृश्यधर्माविष्करणे च। [शीले च न०।

अनूक * पु० अनु+उच-समवाये क कुत्वं नि०। गतजन्मनि कुले

अनूचान * पु० अनु+वच-कान नि०। शिक्षादिषडङ्गसहितवेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च।

अनून * त्रि० ऊन-क्त न० त०। परिपूर्णे, समग्रे, अहीने च। ऊनं निश्चितं न० त०। अनिश्चिते।

अनूप * त्रि० अनुगता आपो यत्र ब० अच् स० आत ऊत्वम्। जलप्राये देशे, तत्स्थाने सर्वदावासिनि महिषे, "बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः। देशोऽनूप इति ख्यातः" इत्युक्ते देशविशेषे च पु०। अनूपसर इति प्रसिद्धे देशे वा।

अनूपज * न० अनूपे जलप्राये देशे जायते जन-ड ७त०। (आदा) इति ख्याते आर्द्रके तस्य जलप्रायोद्भवत्वात्। तत्स्थानजातमात्रे त्रि०।

अनूरु * पु० न ऊरू यस्य ब०। सूर्यसारथौ अरुणे विनताज्येष्ठपुत्रे। तस्य अपूर्ण एव गर्भे माता अण्डस्य स्फोटनादूरुप्रत्यङ्गविकलत्वं पुराणे प्रसिद्धम्।

अनूरुसारथि * पु० अनूरुः सारथिः रथनियन्ता यस्य। सूर्ये।

अनृच * पु० नास्ति अध्ययनतया ऋक् यस्य अच् समासान्तः। ऋक्शून्ये अनुपनीते बालके।

अनृत * न० ऋतं सत्यं न० त०। सत्यभिन्ने अयथार्थे। अनृतत्वव्यवहारस्तु प्रायेण कथने एव लोके दृश्यते क्वचित् वस्तुन्यपि यथा शुक्तौ रजतादिकं, तत्र रजतमिदमिति भ्रमश्च। तद्वति त्रि०। ब०। वाणिज्ये न० तत्रानृतबाहुल्यात्।

अनेक * त्रि० एक+न० त०। एकभिन्नेषु बहुषु। नञ्तत्पुरुषे उत्तरपदानुसारेणैव लिङ्गवचनतानियमेऽपि अत्र बहुवचनान्ततैव तेन "पतन्त्यनेके जलधेरिवोर्मयः" इति माघः। [द्विपे हस्तिनि।

अनेकप * पु० अनेकाभ्यां मुखशुण्डाभ्यां द्वाभ्यां पिबति पा-क।

अनेकरूप * त्रि० अनेकानि बहूनि रूपाण्यस्य ब०। विश्वरूपे।

अनेकान्त * त्रि० न एकः एकान्तः परिच्छेदो यस्य ब०। अनियतरूपे, अनतिशये च। [विनि २न०। बौद्धभेदे।

अनेकान्तवादिन् * पु० अस्ति नास्ति नित्यं कान्तं न वदति वद-

अनेडमूक * त्रि० एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ब०। (काला, बोबा) इति ख्याते श्रवणवचनशक्तिरहिते, शठे च।

अनेहस् * पु० न हन्यते हन-असि प्रकृतेरेहादेशः। काले।

अनैकान्तिक * पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् न० त०। व्यभिचारिणि दुष्टे हेतौ। यथा धूमसाधने वह्निर्हेतुः न ह्येकान्तो नियमो व्याप्तिर्यत्र ६ब०। अनैकान्तोऽप्यत्रार्थे।

अनोकह * पु० अनसः शकटस्य अकं गतिं हन्ति हन-ड। वृक्षे।

अन्त * न० अम-तन्। स्वरूपे, स्वभावे च। शेषे पु० न०। नाशे, मृत्यौ, सीमायां, निश्चये, अवयवे च पु०। निकटे, मनोहरे च त्रि०।

अन्तःकरण * न० कृ-करणे ल्युट् अन्तरभ्यन्तरं सङ्कल्पादीनां ज्ञानादीनां वा करणं कर्म० ६त० वा। ज्ञानसुखादिसाधने आभ्यन्तरे इन्द्रिये मनोबुद्धिचित्तादिपदाभिलप्यमाने। अस्यावान्तरभेदस्तु वाचस्पत्ये। [शङ्खे। वक्रान्तःकरणे त्रि०।

अन्तःकुटिल * पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयववति

अन्तःपुर * न० अन्तरभ्यन्तरं पुरं गृहं कर्म०। (अन्दर) इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। तत्र स्थितत्वात् राजमहिलायामपि। पुरशब्दसमासे अचि स्त्रीत्वात् ङीप् अन्तःपुरीत्यपि।

अन्तःसत्त्वा * स्त्री० अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी यस्याः ब०। गर्भिण्यां स्त्रियाम्। [त्रिंशि हस्तिनि।

अन्तःस्वेद * पु० अन्तः स्वेदो मदस्यन्दनं घर्मजलं यस्य ब०। मदस्रा-

अन्तक * पु० अन्तं करोति अन्त+तत्करोतीत्यर्थे णिच्-ण्वुल्। यमे। नाशकारके त्रि०।

अन्तकर * त्रि० अन्तं नाशं करोति कृ-ट उप०स०। नाशकारके।

अन्तग * त्रि० अन्तमवसानं गच्छति गम-ड उप० स०। पारगामिनि अवसानं गते च। अन्तगत इत्यपि तत्रार्थे।

अन्तर् * अव्य० अम्-तुडागमश्च। मध्ये, प्रान्ते, स्वीकारे चित्ते च।

अन्तर * न० अन्तं राति ददाति रा-क। अवकाशे, अवधौ, परिधानीयके, अन्तर्धौ, भेदे, परस्परवैलक्षण्ये, विशेषे, तादर्थ्ये, छिद्रे, आत्मीये, विनार्थे, बहिरर्थे, अवधाने, मध्ये, महति च। उदाहरणानि तु वाचस्पत्ये।

अन्तरङ्ग * त्रि० अन्तर्मध्येऽङ्गानि यस्य। आत्मीये, व्याकरणशास्त्रे प्रकृतिप्रत्ययकार्यमध्ये प्रत्यासन्ने कार्ये च।

अन्तरा * अव्य० अन्तरेति इण्-डा। निकटे, मध्ये, विनार्थे च।

अन्तरात्मन् * पु० अन्तर्वर्ती आत्मा। अन्तःकरणे, सर्वान्तर्यामिनि परमात्मनि, अन्तःकरणाभिमानिनि जीवे च। [कारके त्रि०।

अन्तराय * पु० अन्तरं व्यवधानमयते अय-अच्। विघ्ने। व्यवधान-

अन्तराल * न० अन्तरं मध्यसीमामाराति गृह्णाति आ+रा-क रस्य लत्वम्। मध्ये, अभ्यन्तरे च। स्वार्थे कनि अन्तरालकम्।

अन्तरिक्ष * न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते ईक्ष-कर्मणि घञ्, अन्तः ऋक्षाणि यस्य वा पृषो० अत इत्वम्। पञ्चमहाभूतमध्ये भूमेरूर्ध्वमाकाशप्रदेशे। अन्तरीक्षमपि।

अन्तरित * त्रि० अन्तर्+इण्-कर्मणि क्त। अन्तरं व्यवधानं करोतीति णिच् कर्मणि क्त वा। व्यवधानं गते, तिरोहिते च।

अन्तरीप * पु० अन्तर्गता आपो यस्मिन् ब० अच् स० आत ईत्वम्। द्वीपे।

अन्तरीय * न० अन्तरे भवं गहादित्वात् छ। परिधाने वस्त्रे "[illegible]" इत्युद्भटः।

अन्तरे * अव्य० अन्तरमिति इण् विच्। मध्ये। [विनार्थे, तादर्थ्ये च।

अन्तरेण * अव्य० अन्तरेति इण्-ण टाप्रत्ययः [illegible]

अन्तर्गडु • त्रि॰ अन्तर्मध्ये गडुरिव निरर्थकः। ग्रीवाप्रदेशे जातस्य गन्मांसपिण्डस्य गडोर्यथा निरर्थकत्वं तद्वन्निरर्थके। "काव्यान्तर्गडुभूता या सा नाद्दता प्रहेलिका" इति साहित्यदर्पणे १० परि॰। [इति स्थानविशेषे च।

अन्तर्जठर • न॰ अन्तर्जठरस्य। उदरमध्ये, वाराणसीस्थे समावरण-

अन्तर्जठर • न॰ अन्तर्जठरस्य। जठरमध्ये, कुक्षिमध्यस्थकोष्ठे च।

अन्तर्जल • न॰ अन्तर्जलस्य अव्ययी॰। जलमध्ये, जलमध्येकदेशे अदृश्यजलभागे च। "सोमलताभेऽन्तर्जलादिति" इति स्मृतिः।

अन्तर्ज्योतिः • न॰ अन्तः ज्योतिरिव प्रकाशकम्। परमात्मनि।

अन्तर्दहन • न॰ अन्तर्दह्यते मादकता धार्यतेऽनेन। दह-करणे ल्युट्। [illegible]मूलौ मद्यबीजे। [कोष्ठसन्तापे च।

अन्तर्दाह • पु॰ अन्तर्मध्ये दाहः दह-घञ्। देहाभ्यन्तरसन्तापे,

अन्तर्द्वार • पु॰ अन्तर्मध्यं द्वारम्। गृहमध्यस्थे गुप्तद्वारे।

अन्तर्धान • न॰ अन्तर्+धा-ल्युट्। तिरोधाने इन्द्रियदार्थस्य दर्शनादेशसम्बन्धे [illegible], मृगादीनां प्रतिबन्धे च। कवि। अन्तर्ध्यानार्थे स्त्री॰।

अन्तर्धि • पु॰ अन्तर्+धा कि। अन्तर्धाने, व्यवधाने, आच्छादने च।

अन्तर्भूत • त्रि॰ अन्तर्मध्ये भूतः भू+क्त। मध्यस्थिते अन्तर्गते च।

अन्तर्मनस् • त्रि॰ अन्तर्गतं [illegible] मनो यस्य [illegible], [illegible], [illegible] च।

[illegible]

अन्तेवासिन् • पु॰ अन्ते समीपे वसति वस-णिनि। छात्रे, [illegible]

चतुर्थ्यर्थे त॰। मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च। अन्त एव शय्यानिर्व्यापारार्थकत्वात् कर्म॰। मरणे।

अन्तःस्था • त्रि॰ अन्तःस्पर्शोष्मणोर्मध्ये तिष्ठतीति स्था-क्विप्। यरलवाख्येषु वर्णेषु। वा विसर्गलोपेऽन्तस्था अपि।

अन्तावसायिन् • पु॰ नखकेशानामन्तमवसातुं छेत्तुं शीलमस्य अव+सो-णिनि युक् च। नापिते। अन्ते वृद्धे वयसि अवस्यति निश्चिनोतीति तत्त्वम्। मुनिभेदे। अन्ताय स्वतोपकृते जन्तुनाशाय अवस्यति। प्राणिहिंसके चाण्डालादौ।

अन्ति(का) • स्त्री॰ अन्त्यते सम्बध्यते अन्त-इ। नटाभिनयनकाले तदुक्तौ ज्येष्ठभगिन्याम्। स्वार्थे के टापि अन्तिकेत्यपि।

अन्तिक • त्रि॰ अन्त्यते सम्बध्यते सामीप्येन, अन्त-घञ् सोऽस्यास्तीति मत्वर्थीयः ठन्। सामीप्यवति। स्वार्थे ठनि। सामीप्ये पु॰। चुल्लाम् न॰। औषधिभेदे स्त्री॰।

अन्तिकाश्रय • पु॰ अन्तिके समीपे आश्रीयते आ+श्री-अच्। निकटस्थे, अवलम्बनस्थाने च।

अन्तिम • त्रि॰ अन्ते भवः अन्त+डिमच्। अन्तभवे, चरमे च।

अन्त्य • पु॰ अन्ते पर्यन्ते भवतीति अन्त+यत्। चाण्डाले। मुस्तायाम् स्त्री॰। अन्तिमे चरमे त्रि॰। यथा नक्षत्राणां मध्ये रेवती, राशीनां मध्ये मीनः, वर्णानां मध्ये हकार इत्यादि। संख्याभेदे न॰ "जलधिश्चान्त्यं परार्द्धमिति दशगुणोत्तरा संख्या" इति भास्कराचार्योक्तेः परार्द्धदशभागे।

अन्त्यज • पु॰ अन्त्योऽधमः सन् जायते जन-ड। शूद्रे, स हि वर्णानां [illegible] मध्ये अधमो जातः। "रजकश्चर्मकारश्च नटो वरुड एव च। कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः" इति स्मृत्युक्तेषु रजकादिषु च। अधमजातमात्रे त्रि॰।

अन्त्यजन्मन् • पु॰ अन्त्यं जन्म यस्य। शूद्रे। स हि त्रिवर्णापेक्षयाऽन्त्यजन्मा ब्रह्मणः पादात् शेषे जातः।

अन्त्यावसायिन् • पु॰ "निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम्। श्मशानगोचरं सूते" इति मनूक्ते निषादस्त्रियां चण्डालजाते (मुर्दाफरास) इति ख्याते सङ्कीर्णवर्णे, "चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः।" इत्युक्तेषु चण्डालादिषु च।

अन्त्येष्टि • स्त्री॰ इष्टिर्यागः यज+क्तिन् अन्त्या इष्टिः। मृतस्य दाहादिकर्मणि [illegible] "[illegible]" इति स्मृतिः।

अन्त्र • न॰ [illegible]

[illegible]

[illegible]

[illegible]

अन्ध * दृष्टिनाशे अद॰ चु॰ उभ॰ सक॰ सेट्। अन्धयति ते आन्दि-धत् त। [तेऽनेनेति करणे घञ्। अन्धकारे जले च न॰।

अन्ध * त्रि॰ अन्धयति चक्षुषा न पश्यति अच् चक्षुर्हीने। अन्ध्य-

अन्धक * पु॰ अन्धयति अन्ध-ण्वुल्। देशभेदे, मुनिभेदे, यदुवंश्य-नृपभेदे, हिरण्याक्षसुते दैत्यभेदे च। तत्रत्ये न॰।

अन्धकरिपु * पु॰ अन्धकासुरस्य रिपुः। शिवे, अन्धकस्य तमसो रिपौ सूर्य्ये, चन्द्रे, वह्नौ च। [तमसि।

अन्धकार * पु॰ न॰ अन्धं करोति कृ अण् उप॰ स॰। तेजोऽभावे

अन्धकूप * पु॰ अन्धयतीत्यन्धः स चासौ कूपः। साम्धकारे कूपे। अन्धः कूपो यत्र ब॰। नरकभेदे। अन्धस्य दृष्ट्यभावस्य कूप इव। मोहे। स हि सर्वदृष्ट्यभावस्याकरः।

अन्धतमस * न॰ अन्धयति अन्ध+अच् ताम्यति अनेनेति तम्-करणे असि कर्म॰ अच् समासान्तः। निविडान्धकारे।

अन्धतामिस्र * न॰ तमिस्रा तमस्ततिः तमिस्रैव तामिस्रं अन्धय-तीत्यन्धम् कर्म॰। निविडान्धकारे। अन्धम् अन्धकारकं तामिस्रं यत्र ब॰। नरकविशेषे। सांख्यशास्त्रे प्रसिद्धे भयविशेषविष-यकेऽभिनिवेशे पु॰।

अन्धमूषिका * स्त्री॰ अन्धं दृष्ट्यभावं मुष्णाति मुष+ण्वुल् दीर्घः। देवताडवृक्षे तत्सेवने हि चक्षुष्मत्ता भवतीति वैद्यकप्रसिद्धम्।

अन्धस् * न॰ अद्यते अद-असुन् नुम् धश्च। ओदने।

अन्धिका * स्त्री॰ अन्धयति अन्ध-णिच्-ण्वुल्। रात्रौ, द्यूतभेदे, सर्ष-प्याम्, सिद्धाख्यौषधौ (चान्दुलीति) ख्याते नेत्ररोगभेदे च।

अन्धु * पु॰ अन्ध-कु। कूपे।

अन्धुल * पु॰ अन्ध-उलच्। शिरीषवृक्षे।

अन्ध्र * पु॰ अन्ध-र। देशभेदे, तन्नस्थलोके, ब॰ जातिभेदे च।

अन्न * न॰ अनिश्यनेन अन-नन् अद्यते इति वा अद-क्त कर्मार्थतया न जग्धिः। ओदने, "सिद्धान्ने, "सस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। आमं तु वितुषं ज्ञेयं स्विन्नमन्नमुदाहृतम्।" इति स्मृतिः व्रीहियवादावामात्रे, पृथिव्याम्, अन्नहेतुत्वात् तस्या अन्नत्वम् अतएव वेदान्ते तेजोऽबन्नात्मिका प्रकृतिरित्युक्तम्। उपचारात् उपकरणे च।

अन्नकोष्ठक * पु॰ अन्नस्य व्रीह्यादेः स्वल्पं कोष्ठमिव अल्पार्थे कन्। (कुटी) इति ख्याते धान्यादेः स्थापनस्थाने।

अन्नगन्धि * पु॰ अन्नस्य गन्ध इव गन्धो यस्य ब॰ इत्समासान्तः। अतिसारे, उदरामये च रोगे। अन्नस्य गन्धो लेशो यत्र ब॰ इत्स-मासान्तः। अल्पार्थे भोजनादौ त्रि॰।

अन्नप्राशन * न॰ प्रकृष्ट विधानेन प्रथममशनं प्राशन ६त॰। षष्ठा-ष्टममासादौ बालकादेर्विधानेन प्रथमान्नभोजने।

अन्नमय * पु॰ अन्नस्य विकारः अन्न+विकारार्थे मयट्। स्थूलश-रीरे। अन्नविकारमात्रे त्रि॰। "अन्नमय हि सौम्य मन." इति श्रुतिः।

अन्नविकार * पु॰ वि+कृ-घञ् ६त॰। अन्नस्य विकारे शोणितमांस-मादिपरिणामजे चरमधातौ शुक्रे।

अन्नागम * न॰ अन्नस्य विधानेन आगनम्। अन्नप्राशनार्थे।

अन्य * त्रि॰ अन-अघ्न्या॰ यः। भिन्ने, सदृशे च। सर्वनामता चास्य।

अन्यतम * त्रि॰ अन्य॰ प्रा॰। बहूनां मध्ये निर्द्धारिते एकस्मिन्।

अन्यतर * त्रि॰ अन्य॰ प्रा॰। द्वयोर्मध्ये निर्द्धारिते एकस्मिन् सर्व-नामता। मुग्धबोधमते अन्य+डतम इति।

अन्यत्र * अव्य॰ अन्य+त्रल्। व्यतिरेके, विनार्थे च "अन्यत्र धर्माद-न्यत्राधर्मात्" इति श्रुतौ प्रथमार्थे एव त्रल्। [वितथे, दुष्टे च।

अन्यथा * अव्य॰ अन्य+प्रकारार्थे थाच्। विनार्थे, इतरप्रकारार्थे,

अन्यथासिद्धि * स्त्री॰ अन्यथा सिद्धिः यस्य कारणतां विनापि सिद्धिः। कार्य्यजन्म तस्य अन्यथासिद्धिरिति न्याये परिभाषितरूपे वस्तुनि यथा घटजन्मकाले तत्र गर्दभस्य स्थितावपि तस्य कारणतां विनापि घटादिसिद्धिरिति घटादौ गर्दभादेरन्यथासिद्धिः।

अन्यदा * अव्य॰ अन्यस्मिन् काले दा। अन्यस्मिन् काले इत्यर्थे।

अन्यपूर्व्वा * स्त्री॰ अन्यः पूर्व्वो यस्याः। पूर्व्वपतिमरणादौ पश्चात्-कृततद्भिन्नपतिकायां पुनर्भुवि। अर्शआदित्वादचि अन्या पूर्व्वा यस्य वा। तत्परिणेतरि पुनर्भूपतौ पु॰।

अन्यभृत् * पु॰ अन्येन भ्रियते भृ-कर्म्मणि क्विप्। कोकिले। कर्म्मणि क्ते अन्यभृतोऽप्यत्र। कर्त्तरि क्विपि परपोषके त्रि॰।

अन्यादृश् * त्रि॰ अन्यस्येव दर्शनमस्य अन्य+दृश-क्विन् आत्वम्। अन्यसदृशे, अन्यप्रकारे च। कञि अन्यादृशः क्से अन्यादृक्षो-ऽप्यत्रैवार्थे।

अन्याय * पु॰ न्यायो विचारः, सङ्गतिः, औचित्यं, प्रतिज्ञादि-पञ्चकप्रतिपादकवाक्यञ्च अभावार्थे न॰ त॰। विचाराभावे, सङ्गत्यभावे, अनौचित्ये, भेदार्थे न॰ त॰ पञ्चाङ्गन्यायभिन्ने च। न्यायशब्दार्थे त्वधिकं वक्ष्यते। ब॰। विचारशून्ये, औचित्य-शून्ये, असङ्गते, प्रतिज्ञादिपञ्चकवाक्यशून्ये च त्रि॰।

अन्योदर्य्य * पु॰ अन्यस्मिन् स्वमातृभिन्ने उदरे गर्भे भवः उदर+यत्। एकपितृके भिन्नमातृके वैमात्रेये भ्रातरि। "अन्योदर्य्यस्तु संसृष्टी" इति स्मृतिः। तथा भगिन्यां स्त्री॰। अन्योदरजातमात्रे त्रि॰। अतएव दायभागटीकायां तद्वचनव्याख्याने भ्रातृपुत्रादी-नामपि अन्योदर्य्यपदार्थतया ग्रहणमित्युक्तम्।

अन्योन्य * त्रि॰ अन्य+कर्म्मव्यतिहारे (एकजातीयक्रियाकरणे) द्वित्वम् पूर्व्वपदे सुच्। परस्परार्थे। कृतद्वित्वस्यापि सर्वनामता तेनान्योऽन्यस्मै इत्यादि। अलङ्कारशास्त्रप्रसिद्धे अलङ्कारभेदे न॰ तच्च साहित्यदर्पणे १० परिच्छेदे दृश्यम्।

अन्योऽन्याभाव * पु॰ अन्योऽन्यस्मिन् अन्योऽन्यस्य अभावः भेदो हि यथा घटे पटस्य तथा पटे घटस्य सदाऽस्ति भावस्तु नैवं घटे भूतलस्याभावेऽपि भूतले ५८

अन्योन्याश्रयः * त्रि० अन्योन्यमाश्रयतीति आ+श्रि-अच्। परस्परापेक्षे। न्यायमते तर्कविशेषे पु०। स च एकस्य ज्ञानादिजननाय यथाऽन्यज्ञानाद्यपेक्षा तथा अन्यस्य ज्ञानादिजननायेतरस्य ज्ञानाद्यपेक्षेति स्वापेक्षापेक्षित्वनिमित्तकोऽनिष्टः प्रसङ्गः। विस्तरस्तु वाचस्पत्ये।

अन्वक्ष * त्रि० अनुगतमक्षमिन्द्रियं अत्या० स०। प्रत्यक्षे, अनुपदे अनुगे च। अक्ष्णः समीपेऽव्ययी० टच्। अक्षुर्निकटे अव्य०।

अन्वच् * त्रि० अनु+अन्च-क्विन्। अनुगामिनि अनुपदे च।

अन्वय * पु० अनु+इण्-अच्। सन्ततौ, अनुगतौ, अनुवृत्तौ, आनुकूल्ये, कार्य्य-कारणस्यानुसरणे, कार्य्यसत्तापादकसत्ताकस्य कारणस्य कार्य्योपस्थितौ, स्वसत्तानियतसत्तावति, कार्य्ये सम्बन्धे च पदानां, पदोपस्थाप्यपदार्थानाञ्च परस्परेण सम्बन्धे च।

अन्वयबोध * पु० अन्वयस्य पदोपस्थाप्यपदार्थानां सम्बन्धस्य बोधः ६त०। न्यायमते शब्दजन्ये शाब्द इति नामके प्रत्यक्षानुमानादिभिन्ने बोधे। वैशेषिकमते शब्दजन्ये अनुमित्यात्मके एव बोधे।

अन्वयव्यतिरेकिन् * त्रि० अन्वयव्यतिरेकौ स्तोऽस्य। साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः। स हि वह्निमति महानसादौ वह्न्यभाववति जलादौ च भावाभावाभ्यां वह्नेरन्वयव्याप्तः व्यतिरेकव्याप्तश्चेति न्यायमते प्रसिद्धम्।

अन्वयव्याप्ति * स्त्री० अन्वयेन व्याप्तिर्व्याप्यस्य नियततया स्थितिः ३त०। यत्र धूमस्तत्र वह्निरित्येवंरूपायां व्याप्तौ।

अन्ववसर्ग * पु० अनु+अव+सृज-घञ्। यथेष्टं क्रियतामित्येवंरूपायामनुज्ञायाम्।

अन्ववाय * पु० अन्ववाय्यते सन्तत्यानुगम्यते अनु+अव+अय-घञ्, इण्-कर्त्तरि अच् वा। वंशे, सन्ताने च।

अन्वष्टका * स्त्री० अनुगतामष्टकाम् अत्या० स०। अष्टकानन्तरतिथिषु पौषमाघफाल्गुनमासानां कृष्णनवमीषु। तत्र मासिकस्य श्राद्धस्याष्टकान्वाहार्य्यम् कर्त्तव्यम्।

अन्वह * अव्य० अह्नि अह्नि वीप्सायामव्ययी० अच्। प्रतिदिने।

अन्वाचय * पु० एकस्य प्राधान्यादन्यः अप्रधानतया बोध्यते यत्र अनु+आ+चि-आधारे अच्। गौणस्य [illegible]। यथा भिक्षां अट यदि गां पश्येस्तदा तामानय, अत्र भिक्षायामेव उद्देश्य न [illegible], गवानयनमप्रधानतया निर्दिष्टम्।

अन्वाजे * अव्य० [illegible] अनु+आ+अज-ए। दुर्बलस्य बलाधाने। [illegible]।

अन्वादेश * पु० अनु+आ+दिश-घञ्। पूर्वोक्तस्य किञ्चित्कार्यं विधातुं पुनरुपदेशे। यथा अनेन व्याकरणमधीतं [illegible] पुनरुपदेशः। कथितकथने, अनुकथने च।

अन्वाधेय * न० अनु+आ+धा-यत् [illegible] [illegible] [illegible]।

कुलाशया।" इत्युक्तलक्षणे स्त्रीधने। पश्चादाधेये वस्तुनि त्रि०।

अन्वासन * न० अनु+आस-ल्युट्। पश्चादुपवेशनरूपे सेवने, अनुशोचने च। आधारे ल्युटि। शिल्पगृहे।

अन्वाहार्य्य * न० अनु आसौ, मासि मासि आह्रियते अनु+आ+हृ-कर्म्मणि ण्यत्। प्रतिमासकर्त्तव्येऽमावास्याविहिते श्राद्धे "पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः" इति स्मृतिः। यागदक्षिणायाञ्च।

अन्वाहार्य्यपचन * पु० अन्वाहार्य्यं श्राद्धं पच्यतेऽनेन पच-करणे ल्युट्। दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ।

अन्विच्छा * स्त्री० अन+इष-श नि०। अन्वेषणे।

अन्विष्ट * त्रि० अनु+इष्-क्त। अन्वेषिते।

अन्वीक्षा * स्त्री० अनु श्रवणादनु ईक्षा श्रुतार्थस्य युक्तायुक्तत्वपर्य्यालोचना अनु+ईक्ष-भावे अ। वेदवाक्यश्रवणानन्तरं तदर्थपर्य्यालोचनायाम्। अतएवैतदुपयोगिनी विद्या आन्वीक्षिकीत्युच्यते।

अन्वेषण * न० अनु+इष-भावे ल्युट्। अनुसन्धाने। अवधानादिना अदर्शनं गतस्य ज्ञानार्थं प्रयत्नोऽवानुसन्धानम्। याच्ञायाञ्च। युचि। अन्वेषणा। तस्मिन्नेवार्थे स्त्री०।

अप् * स्त्री० बहु० आप-क्विप् ह्रस्वः। जले।

अप * अव्य० न पाति पा-ड। वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्जने, चौर्य्ये च। [दरणवति त्रि०

अपकर्म्मन् * न० अपकृष्टं कर्म्म प्रा०। दुष्टाचरणे। ब०। दुरा

अपकर्ष पु० अप+कृष-भावे घञ्। उचितधर्म्मापेक्षया हीनतायां स्वकर्त्तव्यकालात् पूर्व्वकालकरणे च।

अपकार * पु० अप+कृ-घञ्। अनिष्टोत्पादने, तद्धेतौ द्वेषे च।

अपकारगिर् * स्त्री० अपकारेण द्वेषेण गीर्य्यते गॄ-क्विप्। भर्त्सनवाक्ये। [तते च

अपकृष्ट * त्रि० अप+कृष-क्त। अधमे, हीने, स्वकालात् पूर्व्वकाले

अपक्रम * पु० अपसृत्य क्रमो गतिः क्रम-घञ् अवृद्धिः। पलायने

अपक्रिया * स्त्री० अप+कृ-भावे श। द्रोहे, अपकारे च।

अपक्रोश * पु० अप+क्रुश-घञ्। निन्दने। उपक्रोशोऽप्यत्र।

अपक्षेपण * न० अप+क्षिप-ल्युट्। अधःस्थानसंयोगहेतौ क्रियाविशेषे, अधःपातने च। अवक्षेपणमप्यत्रार्थे।

अपगत * त्रि० अप+गम-क्त। मृते, पलायिते, गते, दूरीभूते च।

अपघन * पु० अप+हन-अप् घनादेशः। देहे, अङ्गे निर्दिष्टाङ्गे त्रि०।

अपघात * पु० अप+हन-घञ्। अपकृष्टहनने दुष्टहेतुकमरणे च

अपचय * पु० अप+चि-अच्। हानौ, अपहरणे, व्यये च।

अपचायित * त्रि० अप+चाय णि-स्वार्थे णिच्-वा क्त। पूजिते।

अपचार * पु० अप+चर-घञ्। अहिताचरणे। प्रा० ब० अपगताचारे, दूरवर्त्तिनि च त्रि०।

अपचित * त्रि॰ अप+चाय-क्त चायः चिभावः। पूजिते। चि-क्त क्षीणे। [चि+क्तिन्। हानौ अपचये च।

अपचिति * स्त्री॰ अप+चाय-क्तिन् पक्षे चिभावः। पूजायाम्।

अपटान्तर * त्रि॰ पटेन तिरस्करिण्या अन्तरमत्र। व्यवधानरहिते, आसक्ते, संसक्ते च। अपटान्तरमित्यप्यत्रार्थे।

अपटी * स्त्री॰ अल्पः पटः पटी न॰ त॰। (कानात्) इति ख्याते काण्डपटाभिधाने। [च।

अपटु * त्रि॰ पटुर्दक्षः न॰ त॰। रोगिणि, दक्षतारहिते कार्याक्षमे

अपतर्पण * न॰ अप+तृप-ल्युट्। रोगादौ उपवासे, तृप्त्यभावे च।

अपत्य * न॰ न पतन्ति पितरोऽनेन पत-करणे यत् न॰ त॰। पुत्र-दुहितृरूपे सन्ताने। [औषधिविशेषे गर्भदात्रीविद्यादौ च।

अपत्यदा * स्त्री॰ अपत्यं तद्धेतुं गर्भं ददाति। सेवनेन गर्भदायके

अपत्यशत्रु * पु॰ अपत्यस्य शत्रुः ६त॰। कर्कटे।

अपत्र * पु॰ न विद्यते पत्रमस्य। अङ्कुरे तस्य पत्राभावात् तथात्वम्।

अपत्रप * त्रि॰ अपगता त्रपा लज्जा यस्मात् ५ब॰। लज्जाहीने।

अपत्रपा * स्त्री॰ अप+त्रप-भावे अ। अन्यहेतुकलज्जायाम्।

अपत्रपिष्णु * त्रि॰ अप+त्रप-इष्णुच्। स्वभावतो लज्जाशीले।

अपथ * न॰ न पन्थाः न॰ त॰ वा अच्। कुपथे, अत्र वा अत्वोऽभावे अपथिन् इत्यपि। ब॰। पथिशून्ये त्रि॰। पथोऽभावः मार्गाभावे अव्य॰।

अपथ्य * त्रि॰ पथि (रोगिभोजने) हितं पथिन्+यत् न॰ त॰। रोगिभोजनायोग्ये। [कर्मणि। अपदानमप्यत्रार्थे।

अपदान * न॰ अप+दैप-ल्युट्। शोधने, करणे ल्युट्। प्रशस्ते

अपदिश * न॰ दिशयोर्मध्ये अप+दिशा-अव्ययी॰। दिशोर्मध्ये विदिशि (कोण) इति ख्याते। [निमित्ते, स्थाने च।

अपदेश * पु॰ अप+दिश-घञ्। लक्ष्ये, स्वरूपाच्छादनरूपे, छले,

अपध्वंसज * पु॰ अपध्वस्यतेऽनेन अपध्वंसः वर्णानां भिन्नरूपतासम्पादकः सङ्करस्तस्माज्जायते जन-ड ५त॰। भिन्नवर्णसङ्करजाते कारणादौ सङ्कीर्णवर्णे। [च।

अपध्वस्त * त्रि॰ अप+ध्वन्स-क्त। निन्दिते, परित्यक्ते, अवचूर्णिते

अपनयन * न॰ अप+नी-भावे ल्युट्। दूरीकरणे, खण्डने च।

अपनोदन * न॰ अप+नुद-भावे ल्युट्। दूरीकरणे, खण्डने च।

अपभ्रंश * न॰ अप+भ्रन्श-पतने घञ्। पतने। अपभ्रश्यते अधर्महेतुतया पात्यतेऽनेन करणे घञ्। साधुशब्दभिन्ने अपशब्दे यज्ञादौ तत्कथनस्य पापहेतुत्वात्।

अपमान * न॰ अप+मि-मा-वा भावे ल्युट्। अवज्ञायाम्।

अपमित्यक * न॰ अपमित्य अपमानः तेनाप्तं दुःखं यत्र। अपमानहेतुकदुःखदायके ऋणे, तदर्पणे हि उत्तमर्णसमीपेऽनादरात् दुःखं भवति। [विना शस्त्रादिना स्वयमृतौ वा मरणे।

अपमृत्यु * पु॰ अपकृष्टो मृत्युः प्रा॰ स॰। न ... रक्तं

अपयान * न॰ अप+या-भावे ल्युट्। अपसरणे,

अपर * न॰ न पूर्णते यतः पृ-अपादाने अप् न॰ त॰। गजस्य पश्चाद्भागे। न पृणाति सन्तोषयति पृ-अच् न॰ त॰। गजे। पश्चाद्भीने, भिन्ने च त्रि॰। पश्चिमायां दिशि, आर्ये दाहिनियायां च स्त्री॰।

अपरक्त * त्रि॰ अप+रन्ज-कर्तरि क्त। विरक्ते, अननुकूले।

अपरति * स्त्री॰ अप+रम-भावे क्तिन्। विरागे, निवृत्तौ च।

अपरत्र * अव्य॰ अपर+त्रल्। पश्चादर्थे, परस्मिंश्च च।

अपरत्व * न॰ अपरस्य भावः त्व। (अपर) इति व्यवहारके न्यायमते गुणभेदे, तच्च द्विविधं कालिकं दैशिकञ्च, तत्र आद्यादपरः परः पौत्र इति कालिकं, पाटलिपुत्रादपरा काशीति दैशिकम्।

अपरपक्ष * पु॰ अपरः शेषः पक्षः कर्म॰। कृष्णपक्षे।

अपररात्र * पु॰ अपरं रात्रेः एक॰ त॰ टच्। रात्रिशेषे।

अपरस्पर * न॰ अपरश्च परश्च द्व॰ पूर्वपदे सुट्। क्रियासातत्ये सन्ततैकरूपक्रियाकरणे।

अपराजित * पु॰ परा+जि-क्त न॰ त॰। शिवे, विष्णौ, ऋषिभेदे च। पराजितभिन्ने त्रि॰। शम्यां, अपराजिताख्यातायां लतायां, दुर्गायां, शेफालिकायां, जयन्तीवृक्षे, शङ्खिनीवृक्षे च स्त्री॰।

अपराद्धपृषत्क * पु॰ अपराद्धो लक्ष्यात् च्युतः पृषत्को बाणो यस्य अप+राध-क्त ब॰। लक्ष्याप्राप्तिसायके धानुष्के।

अपराध * पु॰ अप+राध-भावे घञ्। अकार्यादिकरणरूपे दोषे।

अपरान्त * पु॰ अपरस्या अन्तः। पाश्चात्यदेशभेदे। तद्देशवासिनि त्रि॰। [दिनकृदिनस्य तृतीये भागे।

अपराह्ण * पु॰ अपरमह्नः एक॰ त॰ टच् अह्नादेशो णत्वञ्च। दिवा

अपरिग्रह * पु॰ परि+ग्रह-अप् अभावार्थे न॰ त॰। असंग्रहे, स्त्रीकाराभावे च। नास्ति कन्थाकौपीनाद्यतिरिक्तः परिग्रहो यस्य ब॰। परिव्राजके। परिग्रहमात्रशून्ये त्रि॰।

अपरिच्छन्न * त्रि॰ परि+छिद-क्त न॰ त॰। इयत्तारहिते।

अपरिहार्य * त्रि॰ परि+हृ-ण्यत् न॰ त॰। परिहर्तुमयोग्ये।

अपरेद्युस् * अव्य॰ अपरस्मिन्नहनि अपर+एद्युस्। अपरदिने इत्यर्थे।

अपरोक्ष * न॰ परतोऽतीतः अक्ष्णामिन्द्रियाणां न भवति पर+अक्ष-अव्ययी॰ टच् नि॰ सुट्। विषयेन्द्रियसन्निकर्षजन्ये प्रत्यक्षरूपे ज्ञाने। अर्श आद्यच् तद्विषये त्रि॰।

अपर्णा * स्त्री॰ न पर्णमपि भोजनं यस्याः। हिमाद्रिजायाम् तपसि स्थितया तया पर्णस्याप्यभोजनात्तथात्वम्। पर्णशून्ये त्रि॰।

अपर्याप्त * त्रि॰ परि+आप्-क्त न॰ त॰। असमर्थे, असम्पूर्णे च।

अपलाप * पु॰ अप+लप-घञ्। सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, प्रेम्णि च।

अपवरक * न॰ अप+वृ-वुञ् सं... गृहे।

अपवर्ग * पु॰ अप+वृज-भावे ... मोक्षे, कर्मसाधने, समाप्तौ च।

[illegible]

अपाक * पु० पच-घञ् अभावार्थे न० त०। पाकाभावे, भुक्ता[illegible] देर्मिमान्द्यादिना पाकाभावे च। ७ब०। तत्साधने [illegible] शरीरे। ६ब०। पाकरहिते आमे त्रि०। अपक्व०। पाक[illegible] भावे अथ०।

अपाकरण * न० अप+आ+कृ-ल्युट्। निराकरणे।

अपाकशाक * पु० न पच्यते शाको यस्य। आर्द्रके तस्य शुष्कस्य भोजनाय पचनेन शाकः।

अपाङ्क्तेय * त्रि० पङ्क्तिः सह भोजने पङ्क्तिमर्हति पङ्क्त्यर्थे ढक् न त०। पङ्क्तिः सह एकपङ्क्तौ भोजनानर्हे कोपपतितादौ। अपि अपाङ्क्त्य इत्यपि।

कर्ष * पु० न० कृष-अच् कर्मणि घञ् वा। षोड़शमाषके परि-
माणे कृषौ च।
कर्षक * पु० कृष ण्वुल्। कृषीवले। [ऋषन् स्त्री० टाप्
कर्षण * पु० कृषं नकारं कर्षणम्। विलेखने, [illegible]
कर्षिणी * स्त्री० कृष णिनि। खलीनोपयोगे, मलिने च ([illegible]

गामिर लोह)। [कुल्यायां, नदीमात्रे च स्त्री०।

कर्षू ० पु० कृष-ऊ। करीषाग्नौ (घुटियार आगुन), कुल्ये च।

कर्हि ० अव्य० कस्मिन् काले किम्+र्हिल् कादेशः। अनद्यतने। कस्मिन् काले इत्यर्थे।

कर्हिचित् ० अव्य० कर्हि+चित्। कस्मिंश्चित्काले इत्यर्थे।

कल ० संख्यायां सक० शब्दे अक० भ्वादि० आत्म० सेट्। कलते अकलिष्ट। [अचीकलत् त।

कल ० गतौ संख्याने च अद० चुरा० उभय० सक० सेट्। कलयति ते

कल ० क्षेपे (प्रेरणे) चुरा० उभय० सक० सेट्। कालयति ते अचीकलत् त।

कल ० पु० कल-शब्दे घञ् अवृद्धिः अस्फुटमधुरशब्दे, मालक्षे च। कड मदे घञर्थे क डस्य लः। रेतसि। अजीर्णे त्रि०।

[कल]कण्ठ ० पु० कलः अव्यक्तमधुरः कण्ठोऽस्य। कोकिले, हंसे, पारावते च। जातित्वे स्त्रियां ङीप् कलकण्ठी। [स्त्री०।

[कल]कल ० पु० कलप्रकारः गुणवचनत्वात् प्रकारे द्वित्वम्। कोलाहले।

[कलघ]ोष ० पु० कलो घोषो यस्य। कोकिले।

[कलङ्क] ० पु० कलयति क्षिप् कल् ताम्रो अङ्कयति चिह्ने, अपवादे, ताम्रादिधातूनां मलभेदे (कलङ्क), ताम्रादियोगात् अस्त्रादेर्विकारे च।

[कलञ्ज] ० पु० केति शब्दं लञ्जति भाषते क इत्यव्यक्तानुकरणम्। लजि-अण्। विषाक्तास्त्रेण हते मृगे, पक्षिविशेषे च "न कलञ्जं भक्षयेत्" इति स्मृतिः। तामकूटे "कलञ्जसंवेष्टनधूमपानात् प्रादुर्भवन्ति हि मुखरोगजातानि" इति वैद्यके तस्य वचनात् सुवर्णकार्षापणादौ। "दशकैर्दशभिः प्रोक्तः कलञ्जो नाम" इत्युक्तपरिमाणे च।

[कलत्र] ० न० गड-त्रन् गस्य क डस्य लः। नितम्बे, भार्यायाञ्च।

[कल]धौत ० न० कलेन मलेन धौतोऽस्य। स्वर्णे, रजते च। कलधुनमयत। [शब्दे।

[कल]ध्वनि ० पु० ६ब०। कोकिले, पारावते, मयूरे च। कर्म०। मधुरध्वनि।

[कल]न ० पु० कल-ल्युट्। वीर्यमङ्कपे। भावे ल्युट्। चिह्ने, दोषे, ज्ञाने, एकमासिकगर्भे, वचने, स्वीकारे, गणने, ग्रसने च, न०। "कलनात् सर्वभूतानाम्" इति श्रुतिः।

[कल]भ ० पु० कल-अभच्। पञ्चवर्षीय हस्तिशावके, धुस्तूरवृक्षे च।

[कल]भवल्लभ ० पु० ६त०। पीलुवृक्षे। [इव ते रघुम्" इति रघु।

[कल]म ० पु० कल-अम। शिरोमाम्, चौरे, शालिभेदे च। "कलमा

[कल]म्ब ० पु० कड-अम्बच् डस्य लः। शालिकशाके (कलमी), बाणे, कदम्बवृक्षे, शाकनाडाञ्च। स्वार्थे कन्। कलम्बकोऽप्यत्रार्थे।

[कल]म्बिका ० स्त्री० कलम्बी स्वार्थे कन् टाप्। कलम्बीशाके, ग्रीवा[पश्चा]च्छिरायाम्, ...

[कल]म्बी ० स्त्री० कड अम्बच् डस्य लः ... [illegible] ... ङीप्। (कलमी) कलम्बशाकभेदे। "कलम्बी [illegible]"

इति स्मृतिः। [कर्म०। मधुरास्फुटे शब्दे।

कलरव ० पु० रु-अप् कलो रवोऽस्य। कोकिले, पारावते, च।

कलल ० पु० न० कल-कलच्। गर्भवेष्टनचर्मणि, जरायौ, शुक्रशोणितयोः संसर्गे च। [निर्यासे (धुना)।

कललज ० पुं० कललं शुक्रशोणितमङ्घातं इव जायते जन-ड। साल-

कलविङ्क(ङ्ग) ० पु० कलं वङ्क(ङ्ग)ते वगि (वकि)-गतौ अच् पृषो० अत इत्वम्। चटके, स्वर्गे, इन्द्रयवे च।

कलश ० पु० न० कलं शब्दं शवति शु गतौ ड। घटे।

कलशि ० स्त्री० कलं शवति शो-इन् आलोपः। घटे। "कलशिमुदधिगुर्वीम्" इति माघः। वा ङीप्। "कलशीनिभकर्णसमकुम्भीकलशीकम्" इति नैषधम्। पृश्निपर्ण्याम् (चाकुलिया)।

कलस ० पु० केन जलेन लसति अच्। घटे "कलसं श्रमसलम्" इति नैषधम्। जातित्वात् स्त्रियां ङीप्। दीप्यमाने त्रि०।

कलह ० पु० न० कलं हन्ति हन-ड। विवादे, युद्धे, असिकोषे च।

कलहंस ० पु० कलप्रधानो हंसः। राजहंसे, "कलहंसः कलधारामृत स." इति नैषधम्। कादम्बहंसे (कालहांस), परमात्मनि, नृपश्रेष्ठे, ब्रह्मणि, सर्वप्रतीच्छु, सप्तदशाक्षरपादके छन्दोभेदे च।

कलहान्तरिता ० स्त्री० "चाटुकारमपि प्राणनाथं रोषादपास्य या। पश्चात्तापमवाप्नोति कलहान्तरिता तु सा" इत्युक्तलक्षणे नायिकाभेदे।

कला ० स्त्री० कल-अच्। चन्द्रमण्डलस्य षोडशे भागे, कलनमात्रे, शिल्पादौ, अंशमात्रे, कालमाने, कलनाशे ... [illegible] ... चतुःषष्टिकलासु गीतवाद्यादिषु च।

कलाद ० पु० कलामंशमादत्ते आ+दा-क। स्वर्णकारे, तेन हि स्वर्णकारस्य ... [illegible]

कलादक ० पु० कलामंशं ... [illegible] ... स्वर्णकारे ... [illegible] [कर्म०।

कलानिधि ० पु० कलानां निधिः ... [illegible]

कलाङ्कुरादिक ० पु० ... [illegible] ... चटके च।

कलान्तर ० पु० ... [illegible]

कलाप ० पु० ... [illegible] ... मयूरपुच्छे, ... [illegible]

कलापक ० पु० ... [illegible]

कलापिन् ० पु० ... [illegible]

कलाभृत् ० पु० ... [illegible]

कलाद ० पु० ... [illegible]

शरदृतोर्द्वितीये मासे।

कार्त्तिकिक * पु॰ कृत्तिकानक्षत्रेण युक्ता पौर्णमासी कार्त्तिकी सा यत्र मासे ठक्। कार्त्तिके शरदृतोर्द्वितीये मासे।

कार्त्तिकी * स्त्री॰ कृत्तिकानक्षत्रेण युक्ता पौर्णमासी अण्। चान्द्रकार्त्तिकमासस्य पौर्णमास्याम्। [शिवपुत्रे।

कार्त्तिकेय * पु॰ कृत्तिकानामपत्यं तत्पालितत्वात् ढक्। स्कन्दे

कार्त्तिकोत्सव * पु॰ ६त॰। कार्त्तिकशुक्लप्रतिपदि कर्त्तव्ये दीपोत्सवे।

कार्त्स्न्य * न॰ कृत्स्नस्य भावः ष्यञ्। साकल्ये, सामस्त्ये।

कार्पट * पु॰ कीर्य्यते कृ-क्विप् कर्-पटः कर्म॰ स इव भवति अण्। लाक्षायाम् (चापडागाला) स्वार्थेऽण्। जीर्णवस्त्रखण्डे, कर्पटेन कौपीनवस्त्रेण चरति अण्। कार्य्यार्थिनि (उमेदार)। [यते।

कार्पटिक * पु॰ कर्पटेन कषायवस्त्रेण चरति ठक्। तीर्थयात्रो-

कार्पण्य * पु॰ कृपणस्य भावः ष्यञ्। उचितव्ययविमुखतया धनसञ्चयेच्छायां, दैन्ये च "कार्पण्यदोषोपहतस्वभावः" इति गीता।

कार्पास * पु॰ कर्पास्याः फलम् अण् तस्य लुक् तस्य विकारे वा अण्। (तुला॰ कार्पासीफले। तन्मात्रवस्त्रादौ त्रि॰।

कार्पासनासिका * स्त्री॰ कार्पासस्य नासिकेव सूत्राकर्षण स्थानम् यस्याः। नासिकावद्दानेन यन्त्रादिराकृष्यते एवं सूत्राकर्षके तर्कौ, तर्कु (टेको)।

कार्पासी * स्त्री॰ [illegible]। वृक्षभेदे (कापास)।

कार्म्मण * त्रि॰ कर्म्मणि कुशलः अण्। क्रियादक्षे, योगविद्यायाम्।

कार्म्मिक * त्रि॰ कर्म्मणा शिल्पकर्म्मणा निर्वृत्तं ठक्। चित्रितवस्त्रादौ।

कार्म्मुक * पु॰ कर्म्मणे प्रभवति उकञ्। धनुषि, श्वेतखदिरे, महानिम्बे [illegible] च। [illegible] न॰। क्रियादक्षे, कर्म्मक्षमे च त्रि॰।

कार्य्य * न॰ कृ-ण्यत्। प्रयोजने, हेतौ, व्याकरणोक्तेषु आदेशागमादिषु, न्यायमते प्रागभावप्रतियोगिनि घटपटादिविका- [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

धिको घटादिरूपो वा।

कालक * पु॰ पु॰ कल-ण्वुल्। जलौ (देहस्थचिह्नभेदे), जलसर्पे च। कालशाके, यकृति, बीजगणितोक्ते अव्यक्तराशिसंज्ञाभेदे च न॰। [खञ्जने, कलविङ्के, दात्यूहे च।

कालकण्ठ * पु॰ कालः कण्ठो यस्य। नीलकण्ठे, शिवे, मयूरे

कालकूट * न॰ कालमपि कूटयति, दहति, कूट-अण्। शि॰ कालस्य मृत्योः कूटो राशिरिव। देवासुररणे दैत्यैर्हतस्य पृथुमालिनः। दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः। निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः। सोऽहिक्षेत्रे, शृङ्गबेरे कोङ्कणे मलयेऽभवत्" इत्युक्ते वृक्षनिर्यासरूपे विषभेदे पु॰न॰।

कालकृत् * पु॰ कालं समयं स्वगत्या करोति कृ-क्विप् तुक्, सूर्य्ये।

कालकेशी * स्त्री॰ कालः केश एव पत्रादिर्यस्याः। नील्यामोषधौ।

कालखण्ड * न॰ कर्म॰। दक्षिणकुक्षिस्थे मांसखण्डे यकृति।

कालचक्र * न॰ कालचक्रमिव षड्ऋतुरूपारवत्त्वात् सदा परिवर्त्तमानत्वाच्च। कालस्वरूपे द्वादशमासात्मके संवत्सररूपे चक्रे।

कालचिन्तक * पु॰ कालं चिन्तयति विचारयति चिन्ति-ण्वुल्। ज्योतिर्विदि दैवज्ञे।

कालधर्म * पु॰ ६त॰ मृत्यौ, समयस्वभावे च।

कालनियोग * पु॰ कालेन कृतो नियोगः कालस्य वा नियोजना नि+युज-घञ्। दैवाज्ञायां, कालकृतनियमे च।

कालनिर्य्यास * पु॰ कर्म॰। गुग्गुलौ।

कालनेमि * पु॰ राक्षसभेदे, हिरण्यकशिपुपुत्रे दैत्ये च "कालनेमिवधे युद्धे" इति पुराणम्।

कालपर्ण * पु॰ कालं कृष्णं पर्णमस्य। तगरवृक्षे।

कालपुच्छ * पु॰ कालः पुच्छोऽस्य। "गुणैरेणसमः कालपुच्छो मुनिभिरीरितः" इत्युक्ते मृगभेदे।

कालपृष्ठ * पु॰ कालं पृष्ठमस्य। मृगभेदे, कङ्कपक्षिणि, कालो यम इव पृष्ठमस्य। कर्णस्य चापे।

कालमान * पु॰ कालं मानमस्य। कृष्णजीरके, कृष्णतुलस्याम्।

कालमूल * पु॰ कालं मूलमस्य। रक्तचित्रकवृक्षे।

कालमेषी * स्त्री॰ कालं वर्णं मिषति स्पर्द्धते मिष-अण्। मञ्जिष्ठायाम्, सोमराज्याम्, त्रिवृति च।

कालरात्रि * स्त्री॰ कालस्य रात्रिर्नाशिका। सर्वभूतापहारिण्यां देव्याम् यमभगिन्याम् कल्पान्तरात्रौ, "दीपाली तु या प्रोक्ता कालरात्रिश्च सा मता" इत्युक्ते कार्त्तिकामावास्यायाम् [illegible] च।

[illegible] * न॰ कर्म॰। [illegible]।

[illegible] * न॰ कर्म॰। [illegible] भेदे।

[illegible] * पु॰ कालं [illegible]।

[illegible] * न॰ कर्म॰। [illegible]।

कालमर्प * पु॰ नित्यकर्म॰। कृष्णसर्पे महाविषे (केउटासाप)

कालमार * त्रि॰ कालेन मारः मरणं। कृष्णसाराभिधे मृगे।

कालसूत्र ० न॰ कालस्य यमस्य सूत्रमिव। कुम्भपक्वबद्धच्छेदन-
रूपे नरकभेदे।

कालनेय ० न॰ कलम्यां दधिकुम्भ्यां भवं ढक्। तक्रे।

कालस्कन्ध * पु॰ कालः स्कन्धो यस्य। तमालवृक्षे, तिन्दुकवृक्षे,
जीरकवृक्षे, दुग्धदिरे, उदुम्बरे च।

काला * स्त्री॰ काल+वर्णार्थच्। कृष्णत्रिवृति। कालयति अच्।
मञ्जिष्ठायाम्। कल-चेपे कर्मणि घञ्। अश्वगन्धायाम्, पाटला-
वृक्षे, कृष्णजीरके, नीलिकायाञ्च।

कालागुरु * न॰ कर्म॰। प्राग्ज्योतिषदेशोत्पत्तिके कृष्णागुरुचन्दने।

कालाग्नि ० पु॰ कालकारः प्रलयकारी अग्निः। प्रलयाग्नौ। काला-
नलादयोऽप्यत्र। [कालरुद्रे, कपिञ्जले पक्षिणि च।

कालानुनादिन् * पु॰ अनुनदति अनु+नद-णिनि कर्म॰। भ्रमरे,

कालानुसारक * न॰ कालः मृगमद इवानुसरति दूरतो गच्छति
स-ण्वुल्। कृष्णागुरुणि, पीताख्यचन्दने च।

कालानुसारिन् ० न॰ कालः मृगमद इवानुसरति गन्धेन दूरतो
गच्छति णिनि। शैलेये गन्धद्रव्ये। [स्यात्।

कालानुसार्य ० पु॰ न॰। कालेन मृगमदेनानुसार्यते अनु+सृ-
णेर्ण्यत् शैलजे गन्धद्रव्ये, शिंशपावृक्षे (शिसु), तगरे च।

कालान्तरविष * पु॰ कालान्तरे दंशनकालात् बहुकालानन्तरं
विषं यस्य। मूषिकादौ। तस्य हि विषं कालान्तरे कटदम्।

कालायस * न॰ कर्म॰। लोहभेदे।

कालावधि * स्त्री॰ कालस्य शुभकर्मयोग्यसमयस्य अवधिः। शुभ-
कर्माकरणप्रयोजके ज्योतिषोक्ते कालदोषे।

कालिक ० पु॰ काले वर्षाकाले चरति ठक्। बकपक्षिणि, कालं कृष्ण-
वर्णमनुसरति ठक्। कृष्णचन्दने कालागुरुणि। प्रकृष्टः दीर्घः
कालोऽस्य प्रकृष्टे ठञ्। वैरे। कालेन निर्वृत्तं कालस्येदं वा
ठक्। कालभवे कालसम्बन्धिनि च त्रि॰। कालो वर्णोऽस्त्यस्याः
ठन्। देवीभेदे, वृश्चिकपत्रवृक्षे (बिछाति), क्रमेण देयवस्तुमूल्ये,
नवमेघे, पटोलशाखायां, रोमाल्यां, मांस्यां, कालाम्, शिवायां,
मेघावल्यां, स्वर्णादिदोषे, सुरायां, काकोल्यां, श्यामाख्यविहगे,
प्रतिमासदेयवृद्धौ, कुज्झटिकायां, तिमिरायां, हरीतक्याञ्च स्त्री॰।

कालिङ्ग ० पु॰ कुत्सितं लिङ्गमस्य। भूमिकर्कारौ, हस्तिनि, सर्पे,
लोहभेदे च। कलिङ्गानां राजा अण्। कलिङ्गदेशपतौ नृपतौ।
बहुषु तस्य लुक् कलिङ्गाः। "कलिङ्गदेशमारभ्य पञ्चाशद्योजनं
शिवे!। दक्षिणस्यां महेशानि! कालिङ्गाः परिकीर्त्तिताः।"
इत्युक्तदेशभेदे। स॰ अ॰ गौरा॰ ङीप्। राजकर्कट्याम्।

कालिन्दी ० स्त्री॰ कलिन्दाद्रौ भवा अण्। यमुनायाम्।

कालिन्दीभेदन ० पु॰ भिनत्ति हलेनाकर्षणेन गतिरोधनादिना
अन्यथा करोति भिद-ल्यु ६त॰। बलभद्रे। तत्कथा च हरिवंशे।

कालिमन् ० पु॰ कालस्य भावः इमनिच्। कृष्णतायाम्।

काली * स्त्री॰ कालो वर्णोऽस्त्यस्याः अच् ङीप्। देवीभेदे, मञ्जु-
गन्धायां श्यामसातिरिसत्यवत्याम्, नवमेघाली, परीवादे, काला-
ञ्जन्यां, त्रिवृति, रात्रौ, वृश्चिकाख्याम् (बिछाति), वह्निशिखा-
भेदे च। [रिद्रायाम्। कृष्णचन्दने न॰।

कालीयक * पु॰ कालस्य वर्णस्याय हिताच्छः संज्ञायां कन्। दारुह-

कालेय * पु॰ कलेरपत्यम् ढक्। दैत्यभेदे, (कालाय कृष्णवर्णताये
प्रभवति ढक्। यकृति। कालचन्दने न॰। स्वार्थे कन्। कुक्कुरे।
कालीयके चन्दने न॰। हरिद्रायाम् पु॰।

काल्पनिक * त्रि॰ कल्पनायाः आगतः ठञ्। कल्पिते, आरोपिते,
कल्पनाभवे च। [धारणयोग्यकालप्राप्तायां गवि।

काल्या * स्त्री॰ काल. गर्भधारणयोग्यसमयः प्राप्तोऽस्य यत्। गर्भ-

कावेरी * स्त्री॰ कस्य जलस्य वेरं शरीरं तदस्त्यिवण्। सरिद्भेदे।
कुत्सितमपवित्रं वेरं यस्याः स्वाङ्गात् ङीप्। वेश्यायां ग्रम॰।
हरिद्रायाम्। [कविल्वे च।

काव्य ० पु॰ कविरेव स्वार्थे ष्यञ्। शुक्रे। कवेः कर्म। ग्रन्थभेदे,

काव्यलिङ्ग * न॰ अर्थालङ्कारभेदे। साहित्यदर्पणे १॰ परि॰।

काव्यार्थापत्ति * स्त्री॰ अर्थालङ्कारभेदे। साहित्यदर्पणे १॰ परि॰।

काश * दीप्तौ भ्वा॰ आत्म॰ अक॰ सेट्। काशते अकाशिष्ट, काशा-
ञ्चक्रे। णिच्। अचकाशत् त। [अचकाशत् त।

काश ० दीप्तौ दिवा आत्म॰ अक॰ सेट्। काश्यते अकाशिष्ट। णिच्।

काश * पु॰ काश-अच्। रोगभेदे, क्षुते, तृणभेदे च। तत्पुष्पे न॰।
स्वार्थे कन्। काशकः। काशभेदे।

काशिराज ० पु॰ ६त॰ टच् समा॰ षष्ठ्यादीरिति क्षतः। नृपभेदे,
दिवोदासे, धन्वन्तरौ नृपे च।

काशी ० स्त्री॰ काश-णिच् गौरा॰ ङीष्। स्वनामख्यातायां नगर्याम्।
"काशीतलवाहिनी गङ्गा" इति प्रश्नोत्तरमालाम्।

काशीश ० न॰ कं जलमश्नुते व्याप्नोति क+अश-णिनि तेषु अभ्वे
ईटे क। (हीराकस) उपधातुभेदे, तद्भयोगात् दक्षादिनो
जलशरणात् तस्य जलश्वापनप्रधानत्वम्।

काश्मीर * न॰ कश्मीरदेशेषु भवः अण्। कुङ्कुमे, पुष्करमूले, टङ्के
(सोहागा) "शारदापीठमारभ्य कुङ्कुमाद्रितटान्तकम्। तावत्
काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" इत्युक्ते देशे च। स॰
अ॰ तेषां राजा अण्। काश्मीरनृपे तस्य बहुषु लुक्। काश्मीराः।

काश्मीरज * पु॰ काश्मीरदेशे जायते जन-ड। कुङ्कुमे, कुष्ठे, कुष्ठे,
पुष्करमूले च। गौरा॰ ङीप् गाम्भार्याम् अतिविषायाम् स्त्री॰।
स॰। काश्मीरजन्माप्यत्र।

काश्यप * पु॰ कश्यपस्य गोत्रापत्यम् विदाद्यञ्। मुनिभेदे, कणभेदे,
मीनभेदे, गोत्रभेदे, तत्प्रवराध्यायगतमुनिभेदे च। कश्यपसम्ब-
न्धिनि त्रि॰।

काश्यपि * पु॰ कश्यपस्यापत्यम् इञ्। गरुडारुणे अरुणे।

पी * स्त्री० कश्यपस्येयम् अण् ङीप्। पृथिव्याम्।
पेय * पु० कश्यपस्यापत्यम् ढक्। सूर्य्ये, गरुड़े च।
* न० काश-क्थन्। इन्धने दारुणि। [स्याम्।
कदली * स्त्री० काष्ठमिव कठिना कदली शाक०। वनकद-
कीट * पु० ६त०। घुणाख्ये कीटे। [भेदे।
कुट्ट * पु० काष्ठं कुट्टयति छिनत्ति अण्। (काठोकरा) पक्षि-
कुद्दाल * पु० कुमुद्दालयति दल विदारणे अण् शक० कुद्दालः।
६त०। नौकादेर्मलापनयनार्थं काष्ठघटिते कुद्दाले।
तक्ष् * पु० तक्षति क्विप्। रथकारे वर्द्धकौ, (छुतर) इति
ख्याते सङ्कीर्णवर्णे च।
तक्षक * पु० काष्ठं तक्षति ण्वुल्। रथकारे वर्द्धकौ (छुतर)।
लेखक * पु० काष्ठं लिखति ण्वुल्। घुणाख्ये कीटे।
ष्ठा * स्त्री० काश-क्थन्। दिशि, दारुहरिद्रायां, स्थितौ, पर्य्य-
वसानभूमौ, अष्टादशनिमेषात्मके काले, उत्कर्षे, "काष्ठागत-
स्नेहरसानुविद्धम्" इति कुमारः। सीमायाञ्च "परा हि काष्ठा
तपसस्तया पुनः" इति कुमारः।
ष्ठाम्बुवाहिनी * स्त्री० पुनः पुनरम्बु वहति णिनि, काष्ठस्या-
म्बुवाहिनी। काष्ठरचितनौकाकृतिजलसेचन्यां द्रोण्याम्।
(सेचोनी)। [कासामास। लिट्। अचकासत् त।
स * कुत्सितशब्दे भ्वादि० आत्म० अक० सेट्। कासते अकासिष्ट
स * पु० कास-घञ्। रोगभेदे।
सघ्नी * स्त्री० कासं रोगं हन्ति टक्। कण्टकार्य्याम्।
समर्द * पु० कासं मृद्गाति मृद-अण्। (कालकासुन्दे) वृक्षभेदे।
समर्दन * पु० मृद-ल्यु ६त०। पटोले।
सार * पु० के जले आसरति आ+सृ-अच्, ईषत् सरति स्थूल-
कायत्वात् कोः कादेशः वा। महिषे।
सार * पु० केन जलेन सम्यक् सारोऽस्य, ईषत् सारोऽस्य वा।
सरोवरे, सपद्मे निष्पद्मे वा महाजलाशये।
सारि * पु० ६त०। कासमर्दे, वासके च। [उपधातुभेदे।
कासीस * न० क्षुद्रः कासः कासी तां स्यति सो-क। (हीराकष)
कासू * स्त्री० कस-ऊ णिच्। विकलवाचि, दीप्तौ, बुद्धौ, रोगे च।
काहल * पु० कुत्सितं हलति लिखति अच् कोः कादेशः। कुक्कुटे,
बिडाले च। शब्दमात्रे, महाढक्कायाम्, वाद्यभेदे, महाध्वनौ,
अव्यक्तवाक्ये न०। शुष्के, भृशे, खले च त्रि०।
काहलापुष्प * पु० काहलेव पुष्पमस्य। धुस्तूरे।
कि * ज्ञाने जुहो० पर० सक० अनिट्। चिकेति अकैषीत्।
किंवदन्ति(न्ती) * स्त्री० किम्+वद-झिच् वा ङीप्। जनश्रुतौ,
सत्ये असत्ये वा लोकापवादे च।
किंवा * अव्य० किम् वा च द्व०। विकल्पे, अथवेत्यर्थे।
किंशारु * पु० कुत्सितं शृणाति किम्+शॄ-ञुण्। धान्याद्यग्रभागे,
शरे, कङ्कपक्षिणि च।

किकीदिवि * पु० किकीति दीव्यति शब्दायते [illegible]
नि० दीर्घः। चाषपक्षिणि। [किकीदी
किङ्कर * त्रि० किञ्चित् कुत्सितं वा करोति-ट। भृत्ये, [illegible]
किङ्किणी * स्त्री० किञ्चित् किणं करोतीति किम्+कृ [illegible]
ङीप्। कटिभूषणे, क्षुद्रघण्टिकायाम्, विकङ्कतवृक्षे च।
किङ्किर * पु० किम्+कृ-क। कोकिले, भ्रमरे, हये, कन्द
रक्तवर्णे स्त्री०।
किङ्किरात * पु० किङ्किरं रक्तवर्णमतति गच्छति पुष्पद्वारा
अशोकवृक्षे, शुकपक्षिणि, रक्ताम्लवृक्षे (रक्तझांटी)। क
कर्म०। कन्दर्पे, कोकिले च। [अन
किञ्च * अव्य० किम् च च द्व०। आरम्भे, समुच्चये, साकल्ये,
किञ्चन * अव्य० किम्+चन। अल्पार्थे, अल्पे च। [illegible]
पलाशे पु०।
किञ्चित् * अव्य० किम्+चित्। अल्पार्थे, अल्पे च।
किञ्चुलुक * पु० किञ्चित् चुलुम्पति सोढ चुलुम्प-ड संज्ञायां
(केंचो) महीलताख्ये कीटभेदे।
किञ्जल्क * पु० किञ्चित् जलति जल-अपवारणे क तस्य
केसरे, पुष्परेणौ, नागकेशरे, पद्ममध्यस्थे केशाकारे
हाटवेष्टने न०।
किट * गतौ सक० भये अक० भ्वादि० पर० सेट्। केटति
किटि * पु० किट-गतौ इन् कित् च। शूकरे। [मले च
किट्ट * न० किट-क्त इडभावः। धातूनां मले, तैलादीनां
किण * पु० कण-गतौ अच् पृषो० अत इत्त्वम्। (घेंटा)
मांसग्रन्थौ, घर्षणजे चिह्ने च। [गौरा० ङीप्।
किणिही स्त्री० किण-अस्त्यर्थे इनि किणिनी अथात्
किण्व * पु० न० कण-वि नि०। सुराबीजे द्रव्ये "किण्वादिभ्यो
मदशक्तिवत्" इति सांख्यसूत्रम्। पापे न०।
कित * सशये रोगापनयने च भ्वादि० पर० सक० सेट्। चि
अचिकित्सीत्। वासे अक० इच्छायां सक०। केतति
कित * ज्ञाने जुहो० पर० सक० सेट्। चिकेत्ति अकेतीत्।
कितव * पु० कि-भावे-क्त कितेन वाति वा-क। द्यूतकारके,
खले, चोरनामकगन्धद्रव्ये, धुस्तूरवृक्षे च।
किन्तनु * पु० किञ्चिन्मात्रा तनुर्यस्य। अष्टपादे (माकड़सा)
किन्तु * अव्य० किम् तु च द्व०। पूर्ववाक्यसङ्कोचज्ञापने,
विरुद्धार्थे, किं पुनरित्यर्थे च।
किन्नर * पु० कुत्सितो नरः कुत्सा च अश्वमुखत्वे नरदेह
मुखत्वे चाश्वदेहत्वात्। देवयोनिभेदे देवानां गायके।
किन्नरेश * पु० ६त०। कुबेरे धनदे।
किन्नु * अव्य० किम् नु च द्व०। प्रश्ने, वितर्के, सादृश्ये,
किम् * अव्य० कै+डिमु। प्रश्ने, निषेधे, वितर्के, निन्दायां
किमु * अव्य० किम् उ च द्व०। विमर्षे, सम्भावनायाञ्च।

किमुत • अव्य० किम् उत च द्व०। प्रश्ने, वितर्के, विकल्पे, अतिशये च।

किम्पच • त्रि० किं पचति अच्। कृपणे, न हि काकोदरपूर्त्तिमात्रं पचति नागन्तुकातिथिभ्यो दानार्थम्।

किम्पचान • त्रि० किम्+पच-चानश्। काकोदरपूर्त्तिमात्रं पाककर्त्तरि कृपणे। [कृपणे त्रि०।

किम्पाक • पु० निन्दितः पाकोऽस्य (माकाल) इति ख्याते वृक्षे।

किंपु(पू)रुष • पु० कुत्सितः पु(पू)रुषः। देवयोनिभेदे देवगायके। हिमाचलहेमकूटयोर्मध्यस्थे नववर्षात्मकजम्बुद्वीपस्थैकतमे वर्षे।

कियत् • त्रि० किम्+परिमाणे वतुप् किमः क्यादेशः वस्य यः। किंपरिमाणे इत्यर्थे।

कियदेतिका • स्त्री० कियत् एतत् आरब्धमार्थं करोति डिच् डित्त्वे टिलोपे स्वार्थे कन्। उद्योगे, उत्साहे च।

किर • पु० कॄ-क। शूकरे।

किरण • पु० कॄ क्यु। सूर्य्ये, रश्मौ च।

किरणमालिन् • पु० किरणानां माला अस्त्यस्य इनि। सूर्य्ये।

किरात • पु० कोर्व्वान्तोऽवयवा यत्र कृ-क पर्य्यन्तदेशमतति अच्। म्लेच्छजातिभेदे, पर्य्यन्तदेशवासिनि, अल्पतनौ, "तमकुलं समासाद्य रामचेतानकं शिवे।। किरातदेशो, देवेशि! विन्ध्यशैलेऽवतिष्ठति।" इत्युक्तदेशे च।

किराततिक्त • पु० किरातदेश उत्पन्नस्तिक्तस्वादश्च अच्। कर्म०। (चिराता) इति ख्याते वृक्षे, भूनिम्बे च।

किरि • पु० कॄ-इक्। शूकरे।

किरीट • पु० न० कॄ+कीटन् किच्। मुकुटे, शिरोवेष्टने च।

किरीटिन् • पु० किरीट+इनि। अर्जुने। मुकुटवति त्रि०।

किर्मी • स्त्री० किरति क्षिप् किरं मातिमा-क गौरा० ङीष्। पलाशवृक्षे, स्तम्भे, स्वर्णपुत्तलिकायाम्, लौहपुत्तलिकायाम् च।

किर्मीर • पु० कॄ+ईरन् किच् मुडागमश्च। नारङ्गवृक्षे, राक्षसभेदे, चित्रवर्णे च। तद्वति त्रि०।

किल • अव्य० किल-क। वार्त्तायाम्, सम्भावनायाम्, निश्चये, [illegible] हेतावपदेशे, अरुचौ, अलीके, तिरस्कारे च।

किलकिल "वर्णोत्पुलकितोत्तालितास्विव किलकिलेत्यम्" इत्युक्ते शब्दे किलकिलाभेदे। "[illegible] किल" इति [illegible]।

किलकिला • स्त्री० किलकिलेति शब्दार्थाः [illegible] कृत् [illegible] [illegible] किलकाटि, वानराणां [illegible]।

किलाटक • पु० "[illegible]" इत्युक्ते [illegible]।

किलिन् • पु० [illegible] शब्दे [illegible]।

किल्लिक • न० [illegible]।

किलिञ्ज • पु० किल+इञ्च् मतौ [illegible]। कटे, सूक्ष्मकाष्ठे च।

किल्बिष • न० किल टिषच् बुक्। अपराधे, पापे, रोगे, धर्म्मकल्मषे, अनिष्टे, संसारे च।

किशल • पु० न० किं शलति शल-अच् पृषो०। पल्लवे।

किशलय • पु० न० किञ्चित् शलति चलति कयन् पृषो०। पल्लवे।

किशोर • पु० कश-ओरन् नि०। अश्वशिशौ, सूर्य्ये, तरुणावस्थायां "किञ्चिच्छेषः किशोरः स्यात् दशमो हि दशमात् परम्। शूरत्व दर्शने किञ्चित्" इत्युक्ते दशवर्षोत्तरपञ्चदशवर्षपर्य्यन्ते त्रि०। स्त्रियां ङीप्।

किष्क • वधे चुरा० आत्म० सक० सेट्। किष्कयते अचिकिष्कत।

किष्किन्ध(न्ध्य) • पु० दक्षिणदेशस्थे पर्वतभेदे। तत्रत्यगुहायां स्त्री०।

किष्कु • पु० स्त्री० किष्क-उ। हस्तमात्रपरिमाणे, प्रकोष्ठे, हस्तपरिमाणे च। [च (नारङ्गा)।

किष्कुपर्वन् • पु० किष्कुमितं पर्व्व यस्य। इक्षौ, वंशे, नले।

किसलय • पु० न० किञ्चित् सलति चलति कयन् पृषो०। पल्लवे।

कीकट • पु० किञ्चित् कु कन कटति पृषो०। अश्वे। मगधदेशे ब० व० च "कीकटेषु गया पुण्या" इति पुराणम्। कृपणे, निर्धने च त्रि०।

कीकस • पु० कीति कसति कस-अच् अच्। अस्थ्नि।

कीचक • पु० चीकि शब्दे [illegible] वुन्। वंशभेदे, दैत्यभेदे, [illegible] त्रि०।

कीर्ति • पु० [illegible]।

कीचक • पु० [illegible] "कीचका मारुतपूर्णरन्ध्राः [illegible]" [illegible] (नलवंशभेदे), [illegible]।

कीचकजित् • पु० कीचकं जितवान् जि-क्विप्। भीमसेने। [illegible]।

कीट • [illegible]।

कीट • पु० कीट-अच्। [illegible]।

कीटघ्न • पु० [illegible]।

कीटजा • स्त्री० [illegible]।

कीटमणि • पु० [illegible]।

कीदृश् • पु० [illegible]।

कीनाश • पु० [illegible]।

कीर • पु० [illegible]।

कीर्ण • त्रि० कॄ-क्त। [illegible]।

कीर्त्तन • [illegible]।

कीर्त्ति * स्त्री॰ कृत-क्तिन्। यशसि।

कीर्त्तित * त्रि॰ चु॰ कृत-क्त। कथिते, ख्याते च।

कीर्त्तिशेष * पु॰ कीर्त्तिरेव शेषः। मरणे। ब॰। मृते त्रि॰।

कील * बन्धे भ्वादि॰ पर॰ सक॰ सेट्। कीलति अकीलीत्।

कील * पु॰ स्त्री॰ कील-क। अग्निशिखायाम्। करणे घञ्। शङ्कौ, शस्त्रे, कफोणौ, स्तम्भे, लेशे च।

कीलक * पु॰ कील+स्वार्थे संज्ञायां वा कन्। कीलार्थे, गवां दोहनार्थे बन्धनस्तम्भे, गवां कण्डूयनार्थे स्तम्भे च।

कीलाल * न॰ कीलां वह्निशिखामलति वारयति अण्। जले, रुधिरे च। कीलामीषदग्नेः शिखां लाति ला+क। अमृते। कीलेन प्रतिबन्धेन अल्यते वार्य्यते अल-घञ्। पशौ पु॰।

कीलित * त्रि॰ कील+क्त। बद्धे। भावे-क्त। बन्धे न॰।

कीश * पु॰ कस्य वायोरपत्यम् अत इञ् किः हनुमान् ईशो यस्य। वानरे। [ङीप्। कीशपर्णोऽप्यत्र।

कीशपर्ण * पु॰ कीशः लोमेव पर्णमस्य। अपामार्गे। [illegible]

कु * शब्दे भ्वादि॰ आत्म॰ सक॰ अनिट्। कवते अकोष्ट। [अकृत।

कु * आर्त्तस्वरे तुदा॰ आत्म॰ सक॰ अनिट् कुटादि। कुवते

कु * शब्दे अदा॰ पर॰ अक॰ अनिट्। कौति अकौषीत्।

कु * अव्य॰ कु+डु। पापे, निन्दायाम्, ईषदर्थे, निवारणे च। भूमौ, [illegible] स्त्री॰।

कुक * आदाने भ्वा॰ आत्म॰ सक॰ सेट्। कोकते। अकोकिष्ट।

कुकील * पु॰ कौ पृथिव्याः कील इव स्तब्धत्वात्। पर्वते।

कुकुट * पु॰ कौ कुटति कुट-क। (कुकुटि) इति ख्याते शाकभेदे।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

कुकुन्दर [illegible]

[illegible]

कुकूल [illegible]

[illegible]

[illegible]

[illegible]

कुकुभ * पु॰ कुक् इत्यव्यक्तं शब्दं कौति कु-भक्। [illegible]

कुकुर * पु॰ कोकते क्विप् कुरति शब्दायते कुर शब्दे [illegible] स्वनामख्याते पशौ। ग्रन्थिपर्णे वृक्षे न॰।

कुकुरद्रु * पु॰ कुकुरस्याप्रेयो द्रुश्चः शाक॰। [illegible]

कुकुवाच् * पु॰ कुक् इत्यव्यक्ता वाक् यस्य। सारङ्गे। [illegible]

कुक्षि * पु॰ कुष-क्सि। उदरे, उदरस्य [illegible]

कुक्षिम्भरि * त्रि॰ कुक्षिं बिभर्त्ति भृ+इन्-मुम् च। [illegible] स्वेनात्मोदरमात्रपूरके।

कुक्षिरन्ध्र * न॰ कुक्षेरिव रन्ध्रं छिद्रं यत्र। नले।

कुङ्कुम * न॰ कुक्यते आदीयते कुक-उमक् नि॰ नुम्। [illegible] शब्दे स्वनामख्याते गन्धद्रव्ये। [स्त्रियां

कुङ्कुमाद्रि * पु॰ कुङ्कुमस्याकरः अद्रिः। काश्मीरदेशस्थे [illegible]

कुच * रोधे, सम्पर्के, लेखने च सक॰ कौटिल्ये अक॰ [illegible] कुटादि। कुचति अकुचीत् चुकोच।

कुच * उच्चे शब्दे भ्वादि॰ पर॰ अक॰ सेट्। कोचति [illegible]

कुच * पु॰ कुच+सम्पर्के अच्। स्तने। [

कुचन्दन * न॰ कुत्सितं गन्धहीनत्वात् चन्दनम्। रक्त[illegible]

कुचफल * पु॰ कुचाविव फलमस्य। दाडिम्बवृक्षे।

कुचर * त्रि॰ कुत्सितं चरति चर-अच्। परदोषकथन[illegible]

कुचेला * स्त्री॰ कुत्सितं चेलमिव पत्रमस्याः। [illegible] ङीप्। अम्बष्ठायां (आकनादि)। [

कुज * स्तेये भ्वादि॰ पर॰ सक॰ सेट् उदित्। कोजति [illegible]

कुज * पु॰ कौ पृथिव्यां जायते जन-ड। मङ्गलग्रहे [illegible] वृक्षमात्रे च। सीतायां, कात्यायन्याश्च स्त्री॰।

कुज्झटि(टी) * स्त्री॰ कु-क्विप् कुत् झट संहतौ [illegible] (कुयासा) नीहारे।

कुञ्चन * न॰ कुन्च-ल्युट्। कौटिल्ये अनादरे च। [illegible] दीर्घं नयन्ति यदा मलाः। तदा द्रष्टुं न शक्नोति [illegible] तद्विदुः।" इत्युक्ते नेत्ररोगभेदे च। स्वार्थे कन्। [illegible]

कुञ्चि * पु॰ कुन्च कौटिल्ये इन्। "अष्टमुष्टिर्भवेत् कुञ्चिः [illegible] [illegible] च पुष्कलम्" इत्युक्ते मानभेदे।

कुञ्चिका * स्त्री॰ कुन्च-ण्वुल् टाप्। [illegible] ख्याते मत्स्यभेदे, (कलमी) वंशशाखायां, [illegible] च (काटी) "उद्घाटिनी कुञ्चिका" इति अमरः। [illegible]

कुञ्चित * न॰ कुन्च क्त। तगरपुष्पे। वक्रे, [illegible]

कुञ्ज * पु॰ कौ पृथिव्यां जायते जन-ड पृ॰। [illegible] लतादिभिराच्छादिते मध्यशून्ये पर्वतादेः स्थानभेदे [illegible]

कुञ्जर * पु॰ कुञ्ज+अस्त्यर्थे र। हस्तिनि।

कुञ्जराशन * पु॰ [illegible] "[illegible]" [illegible] [illegible]

कुञ्जरक्षार * [illegible]

कुक्षरागन * पु॰ कुक्षोरेज्यते अय भक्षे ल्युट्। [illegible]।
कुक्षल * न॰ कुत्सितं जलं यत्र पृषो॰। काञ्जिके (कामानि)।
कुट ० कौटिल्ये तुदा॰ पर॰ सक॰ सेट् कुटादि। कुटति अकुटीत् चुकोट।
कुट ० प्रतापने चुरा॰ आत्म॰ सक॰ सेट्। कोटयते अचूकुटत।
कुट * वैकल्ये भ्वा॰ इदित् पर॰ अक॰ सेट्। कुण्टति अकुण्टीत्।
कुट ० पु॰ कुट-क। दुर्गे (गड), पर्वते, वृक्षे च। घटे पु॰ न॰। गृहे स्त्री॰ ङीप्। शिलाकुट्टे अस्त्रे पु॰। अत्र कुट्ट इत्येके इत्यन्ये। [गिरिसन्निकटे च।
कुटङ्क * पु॰ कुटं गृहं कायति क ड पृ॰। गृहाच्छादने (चाल),
कुटज * पु॰ कुटे पर्वते जायते जन-ड। (कुड़ची) वृक्षभेदे, अस्य फलम् इन्द्रयवः। कुटे घटे जायते। अगस्त्यमुनौ, द्रोणाचार्य्ये च।
कुटजबीज * न॰ ६त॰। इन्द्रयवे।
कुटनट ० पु॰ कुटन् वक्रीभवन् नटति। श्योनाकवृक्षे। मुस्तके न॰।
कुटप * पु॰ कुट-कपन्। मुनौ। गृहसमीपस्थोपवने, कुडवरूपमानभेदे च। पद्मे न॰। [ङीप्।
कुटि * पु॰ कुट इन्। वृक्षे, देहे, जले च। कुटगृहे स्त्री॰ वा
कुटिचर ० कुटौ जले चरति चर अच्। वारिचरे शूकरे।
कुटी(टि)र * पु॰ अल्पा कुटी ईरन्। पर्णशालादौ (कुँड़े)।
कुटिल * त्रि॰ कुट-इलच्। वक्रे, भङ्गुरे च। तगरपुष्पे न॰।
कुटिलग * पु॰ कुटिलं गच्छति गम-ड। सर्पे। नद्यां स्त्री॰ टाप्। वक्रगामिनि त्रि॰। [वा क अच्। यतिभेदे।
कुटि(टी)च(र)क * पु॰ कुट्यां कुटौ वा चरति, चकति तृप्यति।
कुटुम्ब * पु॰ न॰ कुटुम्ब अच्। पोष्यवर्गे, बान्धवे, सन्ततौ, द्वितीय गृहे च।
कुटुम्ब * धृतौ चुरा॰ आत्म॰ अक॰ सेट्। कुटुम्बयते अचुकुटुम्बत।
कुटुम्बिनी ० स्त्री॰ कुटुम्ब+इनि। पतिपुत्रादियुक्तायां [illegible] स्त्रियाम्। [अचुकुटुम्बत।
कुट्ट * छेदने निन्दने च अद॰ चुरा॰ उभ॰ सक॰ सेट्। कुट्टयति ते
कुट्ट * प्रतापने अद॰ चुरा॰ आत्म॰ सक॰ सेट्। कुट्टयते अचुकुट्टत।
कुट्टक * पु॰ कुट्ट-ण्वुल्। लीलावत्यां [illegible] गणितभेदे। छेदके त्रि॰। [illegible]।
कुट्टनी * स्त्री॰ कुट्ट-ल्युट् ङीप्। (कुटनी) परपुरुषेण सह परस्त्रियाः [illegible]।
कुट्टमित * न॰ "केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात्। आहुः कुट्टमितं नाम शिरःकरविधूननम्" इत्युक्ते स्त्रीणां विलासभेदे।
कुट्मल * पु॰ न॰ कुट-क्मलच्। मुकुले, विकासोन्मुखकलिकायाम्। नरकभेदे न॰ यत्र [illegible] हीयते।
कुठ * छेदने सौत्र पर॰ सक॰ सेट्। कोठति अकोठीत्।
कुठ * वैकल्ये [illegible] इदित् भ्वा॰ [illegible] सेट्। कुण्ठति अकुण्ठीत्।
कुठ ० पु॰ कुठ-[illegible]। वृक्षे।

कुठर * पु॰ कुठ करन्। मन्थनदण्डबन्धनार्थस्तम्भे। [वृक्षे पु॰।
कुठार * पु॰ स्त्री॰ कुठ-कारन्। अस्त्रभेदे (कुड़ाल)। स्त्रियां ङीप्।
कुठारु * पु॰ कुठ आरुन्। वानरे पु॰ स्त्री॰। वृक्षे, अस्त्रकारे च।
कुठेर * पु॰ कुठ-एरन्। श्वेततुलस्याम्, अर्क्के, (बाबुइ) इति ख्याते वृक्षे च। स्वार्थे कन्। (बाबुइतुलसी) इति वृक्षे।
कुड * वैकल्ये भ्वा॰ इदित् पर॰ अक॰ सेट्। कुण्डति अकुण्डीत्।
कुड * दाहे भ्वादि॰ इदित् आत्म॰ सक॰ सेट्। कुण्डते अकुण्डिष्ट।
कुड * रक्षणे चुरा॰ इदित् उभ॰ सक॰ सेट्। कुण्डयति ते अचुकुण्डत् त। [कुडति अकुडीत् चुकोड।
कुड * अदने सक॰ बाल्ये अक॰ तुदा॰ पर॰ सेट् कुटादि।
कुडव(प) * पु॰ कुड-कपन् (कवन्) वा। प्रस्थचतुर्थांशरूपे परिमाणभेदे। [नरकभेदे न॰।
कुड्मल * पु॰ न॰ कुड-क्मलच्। विकासोन्मुखकलिकायाम्।
कुड्य * न॰ कुड ण्यत्। भित्तौ, विलेपने च।
कुड्यच्छेदिन् * पु॰ छिद+णिनि ६त॰। चौरे, येन गृहभित्तिं विदार्य्य चौर्य्यं क्रियते।
कुड्यच्छेद्य * पु॰ कुड्य छेद्यं यस्य। [illegible]।
कुण ० आमन्त्रणे, सङ्कोचे च अद॰ चु॰ उभ॰ सक॰ सेट्। कुणयति ते अचुकुणत् त। [अकोणीत्।
कुण ० उपकरणे शब्दे च तुदा॰ पर॰ सक॰ सेट्। कुणति
कुणप * पु॰ कुण कपन् [illegible]। शवे, [illegible], पूतिगन्धे महति च त्रि॰। गौरा॰ ङीप्। [illegible] (गुयामालिक)।
कुणि * पु॰ कुण इन्। तुन्नवृक्षे (तूँद)। कुणिनखे त्रि॰।
कुण्ठ * त्रि॰ कुठि-अच्। क्रियासु मन्दे, अकर्मण्ये, मूर्खे च।
कुण्ठक * त्रि॰ कुठि [illegible] मूर्खे।
कुण्ड ० पु॰ कुण्डते कुडि [illegible] वा अच्। [illegible] पत्युः जारजे पुत्रे, मानभेदे पात्रे, [illegible] च। होमादि[illegible]भेदे पु॰ न॰। ङीप्। [illegible] स्त्री॰।
कुण्डपाय्य पु॰ कुण्डेन पीयते सोमोऽस्मिन्। यज्ञभेदे।
कुण्डल * न॰ कुडि दाहे रक्षणे वा कलच्। कर्णभूषणे, वेष्टने, पाशे, वलये च।
कुण्डलिनी ० स्त्री॰ कुण्डलं वेष्टनं अस्त्यस्याः [illegible]। "[illegible] कुण्डलिनी [illegible]" इति [illegible]। [illegible], [illegible], [illegible]।
कुण्डलिन् ० पु॰ कुण्डल+[illegible]। सर्पे।
[illegible] ० स्त्री॰ [illegible]
[illegible]
कुण्डिका * स्त्री॰ [illegible]
कुण्डिन ० पु॰ [illegible]

कुतप * पु॰ कुत्सितं तपति तप-अच्। सूर्य्ये, वह्नौ, ब्राह्मणे, अतिथौ, गवि, भागिनेये, दौहित्रे च। वाद्ये, नेपालकम्बले, कुशतृणे, दिवसस्याष्टमभागे काले च क्ली॰। स च मध्याह्नात् पूर्वोत्तरदण्डद्वयात्मकः मुहूर्त्तरूपः कालः। [च।

कुतस् * अव्य॰ किम्+तसिल् कादेशश्च। कस्मादित्यर्थे, प्रश्ने, निन्दने

कुतुक * न॰ कुतुं चर्म्मनिर्म्मितस्नेहपात्रमिव कायति कै-क पृषो॰ ह्रस्व। फलनिरपेक्षतया चिकीर्षिते कौतुके। [(कुपो)।

कुतुप * पु॰ ह्रस्वः कुतुः कुतुपच्। अल्पे चर्म्ममये घृतादिस्नेहपात्रे

कुतुम्बुक * न॰ कुत्सितं तुम्बुरु कुगति॰। कुत्सिततिन्दुकफले।

कुतू * स्त्री॰ कुत्सितं तनोति तन-कू। चर्म्मनिर्म्मिते घृतादिस्नेहपात्रे (कुपा)।

कुतूहल * न॰ कुतुं चर्म्ममयं स्नेहपात्रं हलति लिखति हल-अच्। अपूर्ववस्तुदिदृक्षातिशये चेष्टाभेदे, फलनिरपेक्षतया चिकीर्षिते कौतुके च। प्रशस्ते, अद्भुते च त्रि॰।

कुत्ति * न॰ कुत्सितं तर्म्म कुगति॰। (पाषा) कुश्चाम्।

कुत्र * अव्य॰ किम्+त्रल् कादेशः। कस्मिन्नित्यर्थे। ततश्चित्। कुत्रचिदित्यव्ययार्थे।

कुत्स * निन्दने चुरा॰ आत्म॰ सक॰ सेट्। कुत्सयते अचुकुत्सत।

कुत्सा * स्त्री॰ कुत्स-अ टाप्। निन्दायाम्, परिवादे च।

कुत्सित * न॰ कुत्स-क्त। कुष्ठनामौषधे (कुड़)। निन्दिते त्रि॰।

कुथ * [illegible] इदित् भ्वादि॰ सक॰ सेट्। कुन्थति अकुन्थीत्।

कुथ * पूतिभावे दिवा॰ पर॰ अक॰ सेट्। कुथ्यति अकोथीत्।

कुथ * पु॰ स्त्री॰ कुथ-क। हस्तिपृष्ठस्थे चित्रकम्बले "कुथेन नागेन्द्रमिवेन्द्रवाहनम्" इति माघः। स्त्रियां टाप्। कुशतृणे पु॰।

कुदाल * पु॰ कुं भूमिं दलयति विदारयति दल णिच् अण्। (कोदाल) [illegible]

कुद्दाल * [illegible] "[illegible]" इति [illegible]।

[illegible] (कुद्दाल) न॰।

[illegible] त्रि॰।

[illegible] [illegible] त्रि॰।

[illegible]

कुन्तल * पु॰ कुन्तं कुन्ताग्राकारं लाति ला-क। केशे, यवे, हस्ते च। जनपदभेदे ब॰ व॰।

कुन्तलवर्द्धन * पु॰ कुन्तलान् वर्द्धयति वृध+णिच्-ल्यु। [illegible] तद्रससेवनेन हि केशवृद्धिः।

कुन्ति * पु॰ कम-झिच् पृ॰। देशभेदे। युधिष्ठिरादिमातरि वा ङीप्। सा च शूरसेनराजस्यौरसी पृथानाम्नी [illegible] कुन्तिभोजाय पित्रा अपत्यकृत्याय दत्ता।

कुन्थ * क्लेशे घाते च भ्वादि॰ पर॰ अक॰ सेट्। कुन्थति [illegible]

कुन्द * पु॰ कुं भूमिं दायति द्यति वा दै-दो वा-क [illegible] (कुँद) पुष्पवृक्षे, कुन्दुरुनामगन्धद्रव्ये, भ्रमियन्त्रे (कुँदे), निधिभेदे, करवीरवृक्षे च।

कुन्दुरु * पु॰ कुं भूमिमुनत्ति अव्यादित्वात् नि॰। सुगन्धिद्रव्य

कुन्दुरुकी * स्त्री॰ कुन्दुरुरिव प्रतिकृतिः कन् गौरा॰। शल्लकी

कुप * आच्छादने इदित् वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सेट्। कुम्पयति ते कुम्पति अचुकुम्पत् त अकुम्पीत्।

कुप * द्युतौ चुरा॰ उभ॰ अक॰ सेट्। कोपयति ते अचूकुपत् [illegible]

कुप * कोपे दिवा॰ पर॰ अक॰ सेट्। कुप्यति अकुपत् अकोपीत्

कुपाणि त्रि॰ कुत्सितः पाणिरस्य ब॰। वक्रहस्ते।

कुविन्द * पु॰ कुप-किन्दच्। तन्तुवाये।

कुपीलु * पु॰ कुत्सितः पीलुः। काकेन्दौ (कुचला)। [त्रि॰

कुपूय * त्रि॰ कुत्सितं पूयते पूय-विसरणे अच्।

कुप्य * न॰ गुप-क्यप् नि॰। स्वर्णरूप्याभ्यामन्यस्मिन् तैजसादौ धातौ, (दस्ता) इति ख्याते धातौ च।

कुभ * इदित् स्तृतौ वा॰ चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सेट्। कुम्भयति ते कुम्भति अचुकुम्भत् त अकुम्भीत्।

कुबे(वे)र * पु॰ कुम्बति धनम् एरक् नलोपश्च। यक्षराजे, वृक्षे च। कुत्सितं बेरं देहोऽस्य। "कुम्बायां क्षितिमर्थाय [illegible] [illegible]। कुबेरः कुशरीरत्वादिरवश्यं वमर्थोऽप्ययम्" [illegible] शीरे न॰। मन्दे त्रि॰। [पाटलावृक्षे, मन्दारवृक्षे

कुबे(वे)राक्षी * स्त्री॰ कुबे(वे)रस्याक्षीवाक्षि पुष्पमस्या [illegible]

कुब्ज * पु॰ ईषत् उब्जति [illegible] सक॰। खड्गे, [illegible] दयं यदि वा पृष्ठमुन्नतं [illegible] अहो वायुर्दातुं [illegible] तदा तं कुब्जमादिशेत्।" इत्युक्तलक्षणरोगवति [illegible] त्रि॰।

कुब्जक * पु॰ कुब्ज। कन्। कुब्जे। [illegible] पुष्पप्रधाने वृक्षे [illegible] पुष्पे न॰। "वर्षाकाले कुब्जकपुष्पाणाम् [illegible] तोषपुष्पमात्रतया कुब्जकं पुष्पमुत्तमम्" इति मानसिंहः।

कुमार * क्रीडे अद॰ चुरा॰ उभ॰ अक॰ सेट्। कुमारयति ते [illegible] कुमारत् त।

कुमार * पु॰ कुमारयति क्रीडति, कुत्सितो मारो यस्मात्, [illegible] [illegible] दुष्टात् वा। युवे पार्वतिसुते, कार्त्तिकेये, मारे [illegible]

राशौ, पत्रदारके, सिन्धुनदे, वरुणवृक्षे, पञ्चवर्षीये बालके च। स्त्रियां ङीप्। [र्यायाम्। "कुमारभृत्याकुशलै" इति रघु.।

कुमारभृत्या * स्त्री॰ भृ-क्यप् ६त॰। प्रसवकाले गर्भिण्याः परिच

कुमारिका * स्त्री॰ कुमार+वयसि प्रथम इति ङीप् ततः स्वार्थे कन्। दशवर्षीयायाम् अविवाहितायां कन्यायाम्, नवमल्लिकावृक्षे, भारतवर्षस्य खण्डभेदे च "वर्णव्यवस्थितिरिहैव कुमारिकाख्ये" इति सिद्धान्तशिरोमणिः।

कुमारी * स्त्री॰ कुमार+ङीप्। नवमल्लिकायाम्, एलकुमार्यां, नदीभेदे, अपराजितायां, वन्ध्याकर्कोट्यां, स्थूलैलायां, तरुणपुष्पे, "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी" ... "सप्तमे द्वादशे वर्षे कुमारीत्यभिधीयते" इति स्मृत्युक्तायां द्वादशवर्षीयायाम् अनूढायां कन्यायाम्, श्यामापक्षिणि च।

कुमाल * कण्डौ अद॰ चुरा॰ उभ॰ अक॰ सेट्। कुमालयति ते अचुकुमालत् त।

कुमालक * पु॰ कुमाल-ण्वुल्। सौवीरदेशे।

कुमुद् * न॰ कौ भूमौ मोदते मुद-क्विप्। कैरवे, रक्तोत्पले च। कृपणे, अप्रीते च त्रि॰।

कुमुद * न॰ कौ भूमौ मोदते मुद-क। कैरवे, कह्लारे (कोइ), सितोत्पले च। वानरभेदे, दैत्यभेदे, कर्पूरे च पु॰।

कुमुदबान्धव * पु॰ ६त॰। चन्द्रे, तस्य कुमुदप्रकाशकत्वेन तद्बान्धवत्वम्, एवं तन्नाथादयोऽप्यत्र, कर्पूरे च।

कुमुदा * स्त्री॰ कौ भूमौ मोदते मुद-क टाप्। (पाना) वारिपर्ण्याम्, गाम्भारीवृक्षे, शालपर्णीवृक्षे, धातकीवृक्षे, कट्फले च।

कुमुदाभिख्य * न॰ कुमुदस्य अभिख्या शोभा यस्य। रजते।

कुमुदिनी * स्त्री॰ कुमुदानां समूहः इनि। कुमुदसमूहे। मत्वर्थे इनि। कुमुदयुक्तपुष्करिण्यादौ, कुमुदलतायाञ्च।

कुमुद्वत् * त्रि॰ कुमुदानि सन्त्यस्मिन् ड्मतुप् मस्य वः। कुमुदबहुलदेशे। स्त्री॰ ङीप्। कुमुदिन्याम्।

कुम्भ * पु॰ कुं भूमिं कुत्सितं वा उम्भति उन्भ पूरणे अच्। घटे, रुद्रगणभेदे, हस्तिशिरःस्थमांसपिण्डद्वये, "तैः क्रिमस्तकरीन्द्रकुम्भकुहरे" इति अनर्घराघवम्। कुम्भकर्णस्य पुत्रे, वेश्यापतौ, प्राणायामाङ्गे श्वासरोधके चेष्टाभेदे, "दश द्रोणा भवेत् खारी कुम्भस्तु द्रोणविंशतिः" इत्युक्ते परिमाणभेदे "धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकम्" इति स्मृतिः। ज्योतिषप्रसिद्धे मेषावधिके एकादशराशौ च। गुग्गुलौ, त्रिवृति च न॰।

कुम्भक * पु॰ कुम्भ इव कायति निश्चलतया प्रकाशते कै+क। "त्यागसंरोधने हित्वा निरोधः कुम्भकः स्मृतः" इत्युक्ते श्वासप्रश्वासत्यागेन प्राणवायोर्निरोधरूपे प्राणायामाङ्गे योगशास्त्रादौ प्रसिद्धे व्यापारे।

कुम्भकर्ण * पु॰ कुम्भ इव कर्णावस्य। रावणानुजे राक्षसभेदे।

कुम्भकार * पु॰ कुम्भं करोति कृ, अण् उप॰। जातिभेदे कुक्कुभपक्षिणि च।

कुम्भकारिका * स्त्री॰ कुम्भ+कृ-ण्वुल्। कुलत्थायाम् (कुलत्थकलाइ)।

कुम्भकारी * स्त्री॰ कुम्भ+कृ-अण्+ङीप्। मनःशिलायां, कुलत्थाञ्जने, कुम्भकारपत्न्याञ्च।

कुम्भतुम्बी * स्त्री॰ कुम्भकारा तुम्बी। (गोललाउ) अलाबुभेदे।

कुम्भयोनि * पु॰ कुम्भो योनिरुत्पत्तिस्थानं यस्य। अगस्त्यमुनौ "कुम्भयोनेर्महौजसः" इति रघुः। द्रोणाचार्ये, द्रोणपुष्पाञ्च। कुम्भसम्भवादयोऽप्यत्र। [कुमारशाला]।

कुम्भशाला * स्त्री॰ कुम्भस्य पाकशाला ६त॰। कुम्भादिपाकस्थाने

कुम्भाण्ड * पु॰ कुम्भाकारः अण्डः। कुष्माण्डे, बाणासुरमन्त्रिणि च। गौरा॰ ङीप् कुम्भाण्डी स्त्री॰। कुष्माण्डे।

कुम्भिका * स्त्री॰ कुम्भ+अस्त्यर्थे ठन्। (पाना) वारिपर्ण्याम्, पाटलावृक्षे, द्रोणपुष्पे च।

कुम्भिन् * पु॰ कुम्भ+अस्त्यर्थे इनि। हस्तिनि, कुम्भीरे, गुग्गुलौ च।

कुम्भिल * पु॰ कुम्भ+अस्त्यर्थे इलच्। चौरे, शालमत्स्ये, श्लोकार्थचौरे, श्याले च।

कुम्भी * स्त्री॰ कुनुम-अच् गौरा॰ ङीप्। उखायां, पाटलावृक्षे, वारिपर्ण्याम्, पुन्नागे, गणिकारिकायां, कट्फले च।

कुम्भीपाक * पु॰ कुम्भ्यां तैलघटे पाको यस्मिन्। "यत्र यत्रानुचरास्तप्ततैले यत्रोपरन्धयति स कुम्भीपाक." इत्युक्तलक्षणे नरकभेदे। [नक्रे।

कुम्भीर * पु॰ कुम्भिनं हस्तिनमपीरयति ईर-अण्। जलजन्तुभेदे

कुम्भीरमक्षिका स्त्री॰ कुम्भीरोपपदा मक्षिका शाक॰ त॰। (कुम्भीरे पोका) कीटभेदे।

कुर * शब्दे तुदा॰ पर॰ अक॰ सेट्। कुरति अकोरीत्।

कुरङ्कर * पु॰ कुर शब्दं करोति कृ+अच् पृ॰ मुम्। सारसपक्षिणि।

कुरङ्ग * पु॰ कौ रङ्गति रङ्ग-अच्। 'कुरङ्ग ईषत्ताम्रः स्यात् हरिणाकृतिको महान्" इत्युक्तचिह्ने मृगभेदे, मृगमात्रे च।

कुरङ्गम * पु॰ कौ रङ्गं मिमीते मा-ड। हरिणभेदे।

कुरण्ट * पु॰ कुर्यते शब्द्यते कुर-अण्टक्। पीतझिण्ट्याम्। स्वार्थे कन्। अत्रैवार्थे।

कुरर * पु॰ कवते कुङ्-शब्दे क्वरन्। उत्क्रोशपक्षिणि।

कुररी * स्त्री॰ कुरर+ङीप्। कुररपक्षिस्त्रियां, मेष्याञ्च।

कुरल * पु॰ कुर-कलच्। कुररपक्षिणि, अलककुन्तकेशेषु च।

कुरव * पु॰ अल्पमकरन्दत्वात्स्वादलीनामीषद् रवो यत्र। रक्तझिण्ट्याम्, कुरवके, सितमन्दारे च। कुत्सितशब्दे बहु॰। तथाशब्दयुक्ते त्रि॰। ततः स्वार्थे कन् तत्रैवार्थेषु (कुडचि) इति ख्याते पुष्पवृक्षे। "कुरवकस्तवकव्यतिषङ्गिणि" इति माघ.।

कुरस * पु॰ कुत्सितो रसोऽत्र। मद्यभेदे। कुत्सितरसयुक्ते त्रि॰। गोजिह्वालतायां स्त्री॰ टाप्। कुग॰। कुत्सितरसे पु॰।

कुरु * पु॰ कृ-कु। चन्द्रवंशीयराजभेदे, "हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे। पञ्चालपूर्वभागे तु कुरुदेशः प्रकीर्त्तितः."

इत्युक्ते देशभेदे ब॰ व॰। श्रोदने, कण्टकारिकायाम्। मयशपी-
तत्कस्य जम्बुद्वीपस्य वर्षभेदे च पु॰।

कुरुक्षेत्र * न॰ कुत्सितं रौति कुरु पापं कर्म तस्य क्षेपणात् अपा-
करणात् क्षेत्रम् "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मच-
क्रुकस्य। एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते।"
इत्युक्ते देशे, तत्र कुरुपाण्डवानां युद्धभूमिः। [अर्थवार्थे।

कुरुण्ट ॐ पु॰ कुं रुण्टति रुटि स्तेये अण्। पीतझिण्टयाम्। गवुल।

कुरुवक * पु॰ ईषत् रौति रु+शब्दे सञ्ज्ञायां कुन्-उवक्। रक्तझि-
ण्टयाम्, पीतझिण्टयाञ्च।

कुरुविन्द * पु॰ कुरून् विन्दति विद-श मुचादित्वात् मुम्। मुस्ता-
यां, कुल्माषे, दर्पणे, हिङ्गुले च। पद्मरागमणौ न॰।

कुरुविल्व ॐ पु॰ कुरुषु विल्व इव। पद्मरागमणौ (माणिक)।

कुरुविस्त * पु॰ कुरुषु विस्तः चतुस्तोलकमिते स्वर्णे।

कुरुवृद्ध * पु॰ कुरूणां जनपदानां राजानः तद्राजस्य तद्धितस्य
बहुषु लुक् तेषु कुरुषु वृद्धः। भीष्मे।

कुरूप्य * न॰ ईषत् रूप्यं शुभ्रत्वेन आढ्यत्वात्। रङ्गनामके धातौ।

कु(कू)र्द ॐ क्रीडायां भ्वादि॰ आत्म॰ अक॰ सेट्। कु(कू)र्दते अकु(कू)-
र्दिष्ट।

कु(कू)र्दन * न॰ कु(कू)र्द-ल्युट्। क्रीडायाम्। [कफोणौ च।

कुर्पर * पु॰ कुर-क्विप् कुर् विपर्त्ति अच् परः कर्म॰। जानुनि,

कुर्पास * पु॰ न॰ कुर्परे अस्यते आस्ते वा घञ् पृ॰। स्त्रीणां कञ्चुलि-
कायां (काँचुली)। स्वार्थे कन्। अत्रैवार्थे।

कुर्वत् ॐ त्रि॰ कृ शतृ। कर्मकरे भृत्ये, कारके च।

कुर्वद्रूप * पु॰ कुर्वत् फलोन्मुखं रूपं यस्य। बौद्धमतसिद्धे फलज-
ननाय योग्ये धान्यादौ बीजे। [लीत्।

कुल ॐ बन्धे संस्त्याने च भ्वादि॰ पर॰ अक॰ सेट्। कोलति अको-

कुल * न॰ कुल क। वंशे, सजातीयगणे, देहे, गृहे, देहे, तन्त्रोक्ते
ओंशादौ, मध्यमदलद्वयेन कृष्यमाणाया भूमौ च "दशौ कुलन्तु
भुञ्जीत" इति मनुः। कुले भवे त्रि॰। शिल्पिकुलप्रधाने पु॰।

कुलक * न॰ कुल-वुन् सञ्ज्ञायां कन्। पटले, एकवाक्यतापन्ने
पद्यादिपञ्चकसमुदाये च। वल्मीके, काकतिन्दुके, कुलकवृक्षे
च पु॰।

कुलकुण्डलिनी * स्त्री॰ कुले: कुण्डाकारेण स्थिता कुण्डलिनी माहे-
श्वर्यादिरूपाकारवती शक्तिः। तन्त्रशास्त्रप्रसिद्धे मूलाधारस्थिते
भुजङ्गरूपे शक्तिभेदे। [पाणिकायां स्त्री॰ टाप्।

कुलज * त्रि॰ कुले सत्कुले जायते जन-ड। सत्कुलोद्भवे। कुल-

कुलटा * स्त्री॰ व्यभिचारार्थं भिक्षार्थं वा कुलानि अटति अट+अच्
शक॰। असत्यां पुंश्चल्याम्, भिक्षुक्यां सत्याञ्च।

कुलत्थ पु॰ कुले तिष्ठति स्था-क पृ॰। कलायभेदे (कुलत्थकलाय)
[illegible] स्त्री॰ टाप्।

कुलदीपिका * न॰ कुलस्य दीप इवार्थे कन्। कुलस्याद्युत्पन्नाकारे प्रस्त-
रभेदे। यान्। यनकुलत्थी।

कुलधारक * पु॰ कुलस्य वंशस्य धारकः धृ+णिच्+ण्वुल्।

कुलपति * ६त॰ "मुनीनां दशसाहस्रं योऽन्नदानादि
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः" इति।
शालिनि मुनिविशेषे, मैन्यवर्गाध्यक्षे च।

कुलपर्वत * पु॰ कौ पृथिव्यां लीयते ली+ड कर्म॰।
महः शक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च
कुलपर्वताः।" इत्युक्तेषु महेन्द्रादिषु पर्वतेषु।
स्यञ्च।

कुलपालक * न॰ कुलं पालयति पाल-ण्वुल्। (कमलालेबु)
कृष्णभेदे। वंशपालके त्रि॰।

कुलस्त्री * स्त्री॰ कुलस्यैव स्त्री नान्यगामिनी।

कुलाचार * ६त॰। कुलोचितं धर्म, "जीवः प्रकृतितत्त्वञ्च
कालमेव च। चित्यपूतजीवायत्त्व कुलमित्यभिधीयते।
बुद्ध्या निर्विकल्पमितिव्याचरणञ्च यत्। कुलाचारः स॰
इत्युक्तरूपे ज्ञाने च।

कुलाय * पु॰ कुलं पक्षिसङ्घातोऽयतेऽत्र अय-घञ्। पक्षि
नीडे, स्थानमात्रे च। कौ लायो गतिरस्मात्। देहे न॰।

कुलायिका ॐ स्त्री॰ कुलायः पक्षिवासस्थानं विद्यतेऽस्या ठन्।
शालायां (चिड़ियाखाना)।

कुलाल * पु॰ कुल-कालन्, कुलमलति अल-अण्, कुलं
व्या+ला-क वा। कुम्भकारे (कुमार), कुक्कुभपक्षिणि च।

कुलाली ॐ स्त्री॰ कुलमलति अल-अण्। नीलोत्पलभेदे,
अरण्यकुलत्थिकायाम्, कुम्भकारभार्यायाञ्च।

कुलाह * पु॰ कुलमाहन्ति आ+हन-ड। ईषत् पीतवर्णे
जानौ अश्वे। ततः सञ्ज्ञायां कन्। कृकलासे, (राङ्गाकुड़े)
इति ख्याते शाकभेदे च।

कुलाहल ॐ पु॰ कुलमाहलति स्पर्द्धते अच्। (कुकरमोड़ा)

कुलि * त्रि॰ कुल-इन्। हस्ते। काष्ठकार्ष्यां स्त्री॰ वा ङीप्।

कुलिक * पु॰ कुल+अस्त्यर्थे ठन्। अष्टनागान्तर्गतनागभेदे।
(खाडा) इति ख्याते शाके, ज्योतिषोक्ते रव्यादिवारे
च। कुलश्रेष्ठे त्रि॰।

कुलिङ्ग * पु॰ कौ पृथिव्यां लिङ्गति चरणार्थं गच्छति अच्।
धूम्याटे, (फिङ्गा) भूमिप्रत्यासन्नतया धान्यादिचारिणि
कुत्सितलिङ्गे न॰। ब॰। तद्वति त्रि॰। स्वार्थे कन्। चटके।
कर्कटशृङ्ग्याम्। [पिटिकायां

कुलिङ्गाक्षी * स्त्री॰ कुलिङ्गमक्षि फलमस्याः षच् समा॰।

कुलिन् * पु॰ कुल+अस्त्यर्थे इनि। पर्वते। सत्कुलवति त्रि॰।

कुलि(ली)र * पु॰ कुल-इरक् ईरक् वा। कर्कटे (काँकड़ा)
धिके चतुर्थे राशौ च।

कुलिश * पु॰ न॰ कुलौ हस्ते शेते शी+ड, कुलिनं पर्वतं

शी+ड वा। वज्रे। कौ लिशति श्लिष्यति लिश-क। अस्थि-
संहारवृक्षे, मत्स्यभेदे च। [भगिन्याञ्च।

कुली * स्त्री॰ कौ लीयते-ड ङीप्। कण्टकार्य्यां, पत्न्या ज्येष्ठ-

कुलीन * पु॰ कुले आकरे भवः ख। अश्वभेदे। तम्बोली कुलाचार-
वति, सत्कुलीने च त्रि॰।

कुलीनक * पु॰ कौ भूमौ लीनः ली+क्त संज्ञायां कन्। वनमुद्गे।

कुल्माष * पु॰ कोलति कुल-क्विप् कुल् माषोऽस्मिन् ३त॰। "अर्द्ध-
स्विन्नास्तु गोधूमा अन्ये च चणकादयः। कुल्माष इति कथ्यन्ते"
इत्युक्तेषु अर्द्धस्विन्नगोधूमादिषु "स ह कुल्माषान् खादन्त
विभिदे" इति श्रुतिः, सस्यस्य पारिपार्श्विकभेदे, शूकधान्ये
यवादौ च। काञ्जिके, मसीपरिणामे च न॰।

कुल्य * न॰ कुल-संस्थाने क्यप्। अस्थि, अष्टद्रोणीरूपपरिमाणे, शूर्पे,
आमिषे च। कुले भवः, कुलाय हितो वा यत्। सत्कुलोद्भवे,
कुलहिते च त्रि॰। कुल-क्यप्-टाप्। कृत्रिमायामल्पनद्याम्,
जीवन्त्यामोषधौ, कुलस्त्रियां, स्थूलवार्त्ताकौ च स्त्री॰। [च।

कुव * न॰ कुं भूमिं वाति गच्छति वा क। जलजे पुष्पमात्रे, उत्पले

कुवङ्ग * न॰ कुत्सितं वङ्गम्। सीसके (सीसा) धातुभेदे।

कुवल * न॰ कौ वलते वल संवरणे अच्। उत्पले, मुक्ताफले च।
कोलिवृक्षे स्त्री॰ ङीप्। बदरीफले न॰।

कुवलय * न॰ कोर्वलयमिव शोभाहेतुत्वात्। उत्पले, श्वेतोत्पले,
नीलोत्पले च, "कुवलयदलश्यामविस्तीर्णदृष्टि" इत्युद्धृतम्।

कुवलयापीड * त्रि॰ कुवलयमापीडो भूषणं यस्य। नीलोत्पलभूष-
णवति जने। कंसासुरस्य हस्तिरूपधारिणि दैत्यभेदे पु॰।

कुवाद * त्रि॰ कुत्सितं वदति अण्। परदोषकथनशीले। भावे
घञ् कुग॰। कुत्सितवाक्ये।

कुविन्द * पु॰ कुं भूमिं विन्दति विद-श। तन्तुवाये, शूद्रीगर्भे
विश्वकर्मणो जाते वर्णभेदे च (तांति)।

कुहलिकृत् * पु॰ कोः पृथ्व्याः हलिं वेष्टनं करोति कृ-क्विप्। (कें-
टाकाष्ठा) इति ख्याते कृमौ। कुत्सितहलिकर्त्तरि त्रि॰।

कुविल(ली) * स्त्री॰ कुत्सितं विलमस्याः यस्याम् विल-इन्, वा
ङीप्। मलयधान्याम् (धाणुर)।

कुश * पु॰ न॰ कौ शेते शी-वा ड कुं पापं श्यति शो-वा ड कुशति कुश-
क वा। दर्भाख्यतृणे। कुशानुत्पत्य गर्भके इति रामसुते
च "त्रिपुरार्द्धं कुशम्" इति रघु॰। जले, एतन्मुद्रेखाङ्किते
द्वीपभेदे च पु॰। जले न॰।

कुश * श्लेषे दिवा॰ पर॰ सक॰ सेट्। कुश्यति अकुशीत्।

कुस * श्लेषे दिवा॰ पर॰ सक॰ सेट्। कुस्यति अकुसत् अकोसीत्।

कुशध्वज * पु॰ जनकस्य कनिष्ठभ्रातरि।

कुशपुष्प * न॰ कुशाकारं पुष्पमस्य। ग्रन्थिपर्णे वृक्षे।

कुशल * न॰ कुश-कलच्। कल्याणे। शक्ते त्रि॰। कुशान् लाति
आदत्ते ला-क। दक्षे त्रि॰। कौ पृथिव्यां शलति वर्त्तते शल-

अच्। कार्य्यचतुरे त्रि॰।

कुशलिन् * त्रि॰ कुशल+अस्त्यर्थे इनि। कल्याणवति। "कुशलिनी
वत्सस्य वार्त्ता" इति साहित्यदर्पणे।

कुशस्थल * न॰ ६त॰। कान्यकुब्जदेशे। द्वारकायां स्त्री॰ ङीप्।

कुशा * स्त्री॰ कुश-क। वल्गायां, रज्ज्वां, मधुकर्कट्यां, सामगानां
स्तोत्रगानार्थचोद्यस्वरशङ्कुषु च।

कुशाकर * पु॰ कुशैराकीर्य्यते समन्तादर्पित मूलाच्छादनेन वेष्ट्यते
आ+कृ-अप्। यज्ञाग्नौ। स हि कुशकण्डिकायां कुशैराक्रियते।

कुशाग्रीय * त्रि॰ कुशाग्रमिव छ। अतिसूक्ष्मे।

कुशाल्मलि * पु॰ कुत्सितः शाल्मलिः। रोहितकवृक्षे।

कुशावती * स्त्री॰ कुश-अस्त्यर्थे मतुप् मस्य वः दीर्घः। रामात्मज-
कुशस्य राजधान्यां पुर्य्याम्।

कुशिक * पु॰ कुश-अस्त्यर्थे ठन्। जमदग्निपितरि, विश्वामित्रस्य
पितरि च मुनिभेदे। कुश+इवार्थे इकन्। फाले, सर्जवृक्षे,
विभीतकवृक्षे, अश्वकर्णवृक्षे, तैलकिट्टे च। केकरे (टेरा) त्रि॰।

कुशी * स्त्री॰ कुश-पदार्थविकारेऽर्थे ङीप् नि॰। लौहविकारे फाले।

कुशीलव * पु॰ कुत्सितं शीलं कुशीलं तदस्त्यस्य व, कुशीलं वाति
वा-क वा। कीर्त्तिसञ्चारके भट्टे, चारणे, नर्त्तके च। कुशी-
लवाभिमानचरित्रगायकत्वात् वाल्मीकौ मुनौ।

कुशीलव * पु॰ द्वि॰ व॰। कुशश्च लवश्च द्व॰ नि॰। रामपुत्रयोः।

कुसूल * पु॰ कुस-ऊलच्। तुषाग्नौ, धान्यकोष्ठे, इष्टकादिनिर्मिते
धान्यादिस्थापनार्हे स्थाने च।

कुसूलधान्यक * पु॰ कुसूलपरिमितं धान्यं यस्य। यावता धान्येन
वर्षत्रयं यावत् कुटुम्बस्य भरणं निर्वाहो भवति तावता
परिमितधान्ये विप्रे। [शिवे, कपिकच्छुवृक्षे च।

कुशेशय * न॰ कुशे जले शेते शी-अच् अलुक्। पद्मे, सारस-

कुष * निष्कर्षे क्र्यादि॰ पर॰ सक॰ सेट्। कुष्णाति अकोषीत्।
निरस इट् निरकोषीत् निरकुक्षत्।

कुषाकु * पु॰ कुष्णाति कुष-आकु। वानरे, सूर्य्ये, वह्नौ च। पर-
सन्तापिनि त्रि॰। (कुड) रोगभेदे च।

कुष्ठ * न॰ कुष्णाति [illegible] कुष-क्थन्। (कुड) [illegible],

कुष्ठगन्धि * न॰ कुष्ठस्येव (कुड) गन्धोऽस्य इत् समा॰। एलवालुके।

कुष्ठगन्धिनी * स्त्री॰ कुष्ठस्य गन्धोऽस्त्यस्याः इनि। [illegible]।

कुष्ठघ्नी * स्त्री॰ कुष्ठं हन्ति हन-टक्-ङीप्। काकोदुम्बरिकायाम्।

कुष्ठनाशन * पु॰ कुष्ठं नाशयति नश+णिच्-ल्यु। [illegible],
[illegible] च। [illegible]

कुष्ठ[illegible] * स्त्री॰ कुष्ठं [illegible]

कुष्ठ[illegible] * न॰ [illegible]

कुष्ठ[illegible] * पु॰ [illegible]

कुष्ठ[illegible] * पु॰ [illegible]

कुष्ठ[illegible] * पु॰ [illegible]

कुष्ठारि * पु० ६त०। विट्खदिरे, पटोले, गन्धके च।

कुष्ठिन् * त्रि० कुष्ठ+अस्त्यर्थे इनि। कुष्ठरोगयुक्ते।

कुष्माण्ड * पु० ईषत् उष्मा पित्तहेतुत्वात् अण्डेषु वीजेषु यस्य शक०। (कुमड़ा) इति ख्याते वृक्षे, शिवस्य गणदेवताभेदे च। जातित्वात् स्त्रियां ङीप् कुष्माण्डीत्यप्यत्र। लताभेदे ऋग्वेद-प्रसिद्धेषु ऋग्विशेषेषु "कुष्माण्डी पावनीश्च" इति स्मृतिः। स्वार्थे कन् कुष्माण्डकोऽपि। (कुमड़ा) वृक्षे, ओषधौ, उमायां, ककारी च।

कुस * श्लेषे दिवा० पर० सक० सेट्। कुस्यति अकुसत् अकोसीत्।

कुसित * पु० कुस-क्त। जनपदभेदे। ईषच्छुभ्रे पु०। तद्वति त्रि०।

कुसीद * न० "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यं ततः स्मृतम्" इत्युक्ते वृद्धिभेदे (सुद) अर्थप्रयोगे वृद्धि(सुद)जीविकायाम् "स्यामलाभनिमित्तं यत् दानमृणमिष्यते। तत् कुसीदमिति प्रोक्तम्" इत्युक्ते स्वान्तस्य मूलधनस्य यथावस्थित्वे, ततो लाभाय चोत्तमर्णाधमर्णाभ्यां दत्ते, गृहीते च धने। अर्श आदित्वादच्। तत्प्रयोगकर्त्तरि त्रि०।

कुसीदिक * त्रि० कुसीदाय वृद्धै प्रयच्छति कुसीद+ठन्। वृद्ध्या जीविनि वार्द्धुषिके। स्त्रियां जित्वात् ङीप्।

कुसुम * न० कुस-उमक्। पुष्पे, फले, स्त्रीरजसि, नेत्ररोगभेदे च।

कुसुमपुर * न० (पाटना) इति ख्याते पाटलिपुत्रे नगरे, पृषो० अन्त्यलोपे कुसुमसप्यत्र।

कुसुमगन्ध * पु० कुसुमं गन्धे अल्पगन्धे यस्य। (घासदा) वृक्षभेदे।

कुसुमाकर * पु० ६त०। वसन्ते ऋतौ "विद्धि मां कुसुमाकरम्" इति गीता।

कुसुमागम * पु० कुसुमानामागमो यत्र काले। वसन्ते ऋतौ।

कुसुमाञ्जन * पु० कुसुमाकारमञ्जनं शाक०। पैत्तलमलजाते पुष्पाकारे अञ्जनभेदे। [अनेन पुष्पाकारत्वम्।

कुसुमात्मक * न० कुसुमस्येवात्मा स्वरूपं यस्य। कुङ्कुमे, तस्य मर्दा-

कुसुमाधिप * पु० कुसुमेषु कुसुमप्रधानेषु वृक्षेषु अधिपः श्रेष्ठः सुगन्धित्वात्। चम्पकवृक्षे।

कुसुमायुध * पु० कुसुममायुधमस्य। कामदेवे। [मर्दे वर्ण।

कुसुमासव * न० कुसुमस्य रसभवमासवम्। पौष्पे मधुनि, तस्मात्

कुसुमेषु * पु० कुसुमान्येवेषवो यस्य। कामदेवे। [मधुनि।

कुसुमोच्चय * पु० कुसुमानामुच्चयः सङ्ग्रहो यत्र। [illegible]। ६त० पुष्प-

कुसुम्भ * न० कुस-उम्भ। [illegible] (कुसुम। "कुसुम्भं मानि-[illegible]" इति [illegible]। स्वार्थे क। [illegible]।

[illegible] * स्त्री० [illegible]।

[illegible] * पु० [illegible] त्रि०। [illegible] च। [illegible]।

[illegible] * न० [illegible] त्रि-[illegible]।

कुस्म(स्म) वृद्धौ दर्शने च चुरा० आत्म० सक० सेट्। कुस्मयते अचुकुस्म(स्म)त। [ति।

कुह * विस्मयने अद० चुरा० आत्म० सक० सेट्। कुहयते

कुह * अव्य० किम्+ह-कु तिह्नोरिति कादेशः। कुत्र इत्यर्थे।

कुहक * कुह-ण्वुल्। इन्द्रजालमायया अन्यथास्थितस्य यादर्शने। तद्युक्ते त्रि०।

कुहन * न० ईषत् यत्नेन हन्यते हन-कर्मणि अच्। मृद्भाण्डे। यत्नेन हन्ति कर्त्तरि अच्। सर्पे, चौरे च। कुं भूमिं खनति अच्। मूषिके। कुह-युच्-टाप्। दम्भचर्यायां स्त्री० ईर्ष्यालौ त्रि०।

कुहर * पु० कुं हरति हृ+अच्। नागभेदे। कुहं विस्मापनं रा-क। छिद्रे। कर्णे, कण्ठे, कण्ठशब्दे, समीपे च न०।

कुहलि * पु० कुत्सितं हलति हल-इन्। ताम्बूल्याम् (पान)।

कुहा * स्त्री० कुह-अच्। कुज्झटिकायां, कटुकायां च।

कुहू(हु) * स्त्री० कुह-कु-वा ह्रस्व्। नष्टेन्दुकलायां याममावास्यायां, कोकिलालापे च "त्वमपि रवः" इति "कुहूरिति कुहूरवध्वनिभिया" इति चोद्भटः।

कुहूकण्ठ * पु० कुहूरिति शब्दः कण्ठे यस्य। कोकिले।

कुहूरव * पु० कुहूरिति रवो यस्य। कोकिले।

कुहेलिका * स्त्री० कुत्सितं हेलयति अ ल्। कुज्झटिकायाम्।

कू * आर्त्तस्वरे तुदा० आत्म० अक० सेट् कुटादि। कुवते

कू * शब्दे क्र्यादि० उभ० अक० सेट् प्वादि०। कुनाति कुनीते अकवीत् अकविष्ट।

कूकुद * पु० सत्कृत्यालङ्कृतकन्यादातरि।

कूचिका * स्त्री० कू-चिक्-मत्वायां कन्। तूलिकायाम्। वा ङीप्। कूचीत्यप्यत्र।

कूज * शब्दे भ्वादि० पर० सक० सेट्। कूजति अकूजीत्।

कूजित * न० कूज-क्त। पक्षिशब्दे अव्यक्तशब्दे च "रचितकूजितकुञ्जकुटीरे" इति जयदेवः।

कूट * पु० कूट-अच् कर्मणि घञ् वा। अगस्त्यमुनौ। स्त्री० पु० निश्चले, धान्यादिराशौ, अयोघने (निहाइ), लौहमारे, मायायां, यथार्थवस्त्वाच्छादने, अद्रिशृङ्गे, तुच्छे, आवर्त्ते, सीराङ्गे, मूर्ध्नि, मृगबन्धनहेतौ-यन्त्रे, अनृतवादे, च पु०। स्वार्थे कन्। फाले। सञ्ज्ञायां कन्। कार्यां नामनभेदे च पु०। [illegible]

कूट * अप्रदाने दानाभावे च चुरा० आत्म० सक० सेट्।

कूट * दाहे मन्त्रणे प्रच्छादने च अद० चुरा० उभय० सक० कूटयति ते अचुकूटत् त।

कूटकार्षापण * पु० कर्म०। मिथ्याभूतरौप्यादिमुद्रायाम्।

कूटकृत् * पु० कूटं मिथ्याभूतं करोति कृ क्विप् तुक् च। [illegible] त्रि०। कम्मादिस्थापने (घोयान)।

कूटपालक * पु॰ कूटं धनिसंहाराद्युर्ध्वं पालयति ण्वुल्। कुलाले।

कूटपाश * म॰ कूटेन कृतं पाशम्। आमिषादिदानेन मृगपक्षि-धारणार्थे पातितं पाशे।

कूटशाल्मलि * पु॰ कूटः मिथ्याभूतः शाल्मलिः। कूटशाल्मली।

कूटसंक्रान्ति * स्त्री॰ "अर्द्धरात्रे व्यतीते तु यदा संक्रमते रविः। सा ज्ञेया कूटसंक्रान्तिः" इति उक्तायां रवेरर्द्धरात्रोत्तरं राश्यन्तरसञ्चारे।

कूटसाक्षिन् * त्रि॰ कर्म॰। साक्ष्ये मिथ्याभिधायिनि।

कूटस्थ * त्रि॰ कूटेऽयोघनवत् निश्चलं यथा तथा तिष्ठति स्था-क। एकरूपतया सर्वकालव्यापिनि परिणामादिकार्यान्तरशून्ये आकाशादौ, सर्व्वाणि च। व्याघ्रनखाख्यगन्धद्रव्ये पु॰।

कूटागार * न॰ कर्म॰। स्वपागारे, चन्द्रशालिकायाम्, (चिलाघर) क्रीडागृहे च। [यन्त्रभेदे।

कूटायुध * न॰ कर्म॰। अन्तर्गुप्तनिशितशस्त्रे बहिःकाष्ठादिमये

कूटार्थभाषा * स्त्री॰ कूटार्थस्य कल्पितार्थस्य भाषा कथा। प्रबन्धकल्पनारूपायां कथायाम्।

कूड * घनीभावे तुदादि॰ पर॰ अक॰ सेट्। कूडति अकूडीत्।

कूण * सङ्कोचे अद॰ चुरा॰ उभ॰ अक॰ सेट्। कूणयति ते अचुकूणत् त।

कूण * सङ्कोचे चुरा॰ आत्म॰ अक॰ सेट्। कूणयते अचुकूणत।

कूणि * त्रि॰ कूण-इन्। रोगादिना सङ्कुचितनखकरादौ जने।

कू(कु)प * दौर्बल्ये अद॰ चुरा॰ उभ॰ अक॰ सेट्। कू(कु)पयति ते। अचुकू(कु)पत् त।

कूप * पु॰ कुत्सिताः ईषत् वा आपो यत्र अच् समा॰ कुवन्ति मण्डूका अस्मिन् कू-पक् दीर्घश्च वा। स्वनामख्याते जलाधारे, गर्त्ते च। ततः सञ्ज्ञायां कन्। नौकादौ गुणाधारे (मास्तुल) काष्ठमये हवे। [रोमाञ्चे।

कूपाङ्ग(ङ्ग) * पु॰ कूपाकारोऽङ्गमिव कूपाकारमङ्गं वाऽस्मिन्।

कूपार * पु॰ कुं पृथिवीं पिपर्त्ति पूरयति अण् पूर्वदीर्घः। समुद्रे।

कूपी * स्त्री॰ कूप-अच् गौ॰ ङीप्। स्नेहादिधारणार्थे चर्ममये पात्रभेदे।

कूर्च * पु॰ न॰ कुर्य्यते कुर-चट् नि॰ दीर्घः। भ्रुवोर्मध्ये स्थिते लोमौघे, श्मश्रुणि, कैतवे, दर्भे, मयूरपुच्छे, कुशमुष्टौ, अङ्गुष्ठाङ्गुलिमध्यस्योपरिभागे, अङ्गुष्ठे, शीर्षे, आसनभेदे, तन्त्रोक्ते बीजभेदे च (हुम्)।

कूर्चशिरस् * न॰ ६त॰ अहिं स्कन्धे (गुडमुडा)। [शिखरादयोऽप्यत्र।

कूर्चशीर्ष * पु॰ कूर्चं श्मश्रु तद्वत् शीर्षमस्य। नारिकेले। कूर्च-

कूर्चिका * स्त्री॰ कूर्च+श्मश्रु अस्त्यर्थे ठन्। (क्षीरसा) दुग्धविकारे, सूचिकायां, तूलिकायाम्, कुड्मले, कुञ्चिकायाञ्च, द्रव्यमार्जनसाधने द्रव्ये (कुँचि), तृणगुच्छे च।

कूर्पास * पु॰ कूर्पासवत् सर्व्वम्।

कूर्म * पु॰ कुत्सितः कौ वा ऊर्मिर्वेगो यस्य पृ॰। कच्छपे, "उन्मीलने स्मृतः कूर्मः" इत्युक्ते देहस्थे वायुभेदे च।

कूर्मचक्र * न॰ कूर्माकारं चक्रम्। ज्योतिषोक्ते कृषिकर्मोपयोगिनि, तन्त्रोक्ते जपादिकर्मोपयोगिनि च कूर्माकारे चक्रभेदे।

कूर्मपुराण * न॰ कूर्मेण कूर्मावतारेण भगवता उक्तं पुराणम्। अष्टादशसु पुराणेषु मध्ये पुराणभेदे।

कूर्मपृष्ठक * न॰ कूर्मस्य पृष्ठमिव इवार्थे कन्। शरावे (शरा)।

कूल * आवृतौ भ्वादि॰ पर॰ सक॰ सेट्। कूलति अकूलीत्।

कूल * न॰ कूल-अच्। नद्यादेर्जलसमीपस्थाने तीरे, स्तूपे, सैलपृष्ठे च।

कूलक * पु॰ कूल-ण्वुल्। कृमिपर्वते, वल्मीके स्थाने (उपदीपि)।

कूलङ्कष * पु॰ कूलं कषति कष-खच् मुम् च। समुद्रे। नद्यां स्त्री॰।

कूवर * पु॰ न॰ कूङ् शब्दे कुटादि वरच्। रथस्य चक्रकाष्ठासङ्गके काष्ठे युगन्धरे, कवचे च। रथे त्रि॰।

कूष्माण्ड * पु॰ कुत्सित ऊष्मा अण्डेषु बीजेषु यस्य। (कुमडा) वृक्षभेदे, गणदेवताभेदे च। जातित्वात् ङीप्। कुष्माण्डीत्यप्यत्र।

कृ * कृतौ भ्वादि॰ उभ॰ सक॰ अनिट्। करति ते अकार्षीत् अकृत।

कृ * कृतौ तना॰ उभ॰ सक॰ अनिट्। करोति कुरुते अकार्षीत् अकृत। कृषिमः। [अकृत।

कृ * वधे स्वादि॰ उभ॰ सक॰ अनिट्। कृणोति कृणुते अकार्षीत्

कृक * पु॰ कृ-काक्। गले।

कृकण * पु॰ कृ इति कणति कण-शब्दे अच्। (कयार) क्रकरपक्षिणि, क्षुधाकारके देहस्थे वायुभेदे च।

कृकर * पु॰ कृ इति शब्दं करोति। क्षुधाकारे देहस्थे वायौ।

कृकलास * पु॰ कृकं कण्ठं लासयति अण्। सरटे (कांकलास) पक्षिणि। [मयूरे, सरटे च।

कृकवाकु * पु॰ कृकेण वक्ति वच-परिभाषणे ञुण् कुत्व। कुक्कुटे,

कृकाटिका * स्त्री॰ कृकं कण्ठमटति अट-ण्वुल् टाप् कापि अत इत्वम्। ग्रीवायामुन्नतदेशे।

कृच्छ्र * न॰ कृत-रक् छोऽन्तादेशः। कष्टे, दुःखे, तत्कारणे-पापे, कष्टदायके-प्राजापत्यादिव्रते, मूत्रकृच्छ्ररोगे च। तद्वति त्रि॰।

कृत * छेदे तुदा॰ पर॰ सक॰ सेट्। मुचादि। कृन्तति अकर्त्तीत् कर्त्तिष्यति कर्त्स्यति कृत्तः।

कृत * वेष्टे रुधा॰ पर॰ सक॰ सेट्। कृणत्ति कृत्तः अकर्त्तीत्।

कृत * न॰ कृ क्त। "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्" इति मनूक्ते दिव्यमानेन चतुःसहस्रमितवर्षे, मानुषमानेन १७२८००० मितवर्षे, सत्ययुगे, पर्य्याप्ते, चतुर्मिते, फले च। रचिते त्रि॰। [त्रि॰।

कृतक * न॰ कृत+कन्। विड्लवणे कृत्रिमे, स्त्रियाकल्पिते च

कृतकृत्य * त्रि॰ कृतं कृत्यं कर्त्तव्यं येन। तकार्य्ये,

कृतक्षण * त्रि॰ कृतः क्षणः समयो येन। लब्धावकाशे।

कृतघ्न * कृतं हन्ति हन-क। कृतोपकारस्य जनस्य अपकारे प्रवर्त्तमाने "कृतघ्ने नास्ति निष्कृतिः" इति पुराणम्।

कृतच्छिद्रा * स्त्री॰ कृतं छिद्रं यस्याम्। कोषातकीलतायाम्।

कृतज्ञ * त्रि॰ कृतं कृतोपकारं जानाति ज्ञा-क। कृतोपकारज्ञातरि प्रत्युपकारके। कुक्कुरे पु॰।

कृतधी * त्रि॰ कृता सम्पादिता धीर्येन। शास्त्राभ्यामसंस्कृतान्तःकरणे, स्थिरचित्ते, "कृतधीः किं प्रभाषेत" इति गीता।

कृतप्रणाश * पु॰ कृतयोः पुण्यापुण्ययोर्भोगमन्तरेण प्रणाशो नाशः। कृतहानौ।

कृतम् * अव्य॰ कृत-कमु। अलमर्थे, निषेधे च।

कृतमाल * पु॰ कृता मालास्य। आरग्वधे (सोन्दाल), कर्णिकारे च।

कृतलक्षण * त्रि॰ कृतानि लक्षणान्यस्य। गुणैर्विख्याते।

कृतवर्मन् * पु॰ हृदिकासुते यादवे क्षत्रियभेदे।

कृतयम * त्रि॰ कृतः यमो येन। महोत्साहान्विते।

कृतवीर्य * पु॰ कृतं वीर्यमनेन। एकवीरन्तृपात्मजे कार्त्तवीर्यार्जुनजनके नृपभेदे। वीर्यान्विते त्रि॰।

कृतविद्य * त्रि॰ कृता अभ्यस्ता विद्या येन। अभ्यस्तविद्ये।

कृतसापत्निका * स्त्री॰ कृतं सापत्न्यं यस्याः कप् यलोपः टापि अत इत्वम्। अध्यूढायां स्त्रियां यस्या विवाहात् पश्चात् तत्पतिना विवाहान्तरं कृतं तस्याम्।

कृतस्वर * पु॰ कृतः स्वरो यत्र। स्वर्णोत्पत्तिस्थाने, स्वर्णाकरे च।

कृतहस्त * त्रि॰ कृतः अभ्यस्तः हस्तो बाणादित्यागमोचणलाघवरूपा हस्तशिक्षा येन। सुशिक्षितशरमोक्षणविधौ जने।

कृताकृत * न॰ कृतं कार्य्यमकृतं कारणं च समा॰ द्व॰। कार्य्यकारणयोः। कर्म॰। कृतं अकृतं च होमादौ। अतएव ऋत्विग्विशेषस्य ब्रह्मणः कृताकृतावेक्षणाय होमादौ वरणम्।

कृताञ्जलि * पु॰ कृतोऽञ्जलिरिव पत्रसङ्कोचो येन। लज्जालुवृक्षे। सम्पुटीकृतहस्ते त्रि॰।

कृतात्मन् पु॰ कृतः शिक्षितः संस्कृतो वा आत्माऽन्तःकरणं यस्य। शिक्षितचित्ते, शुद्धान्तःकरणे च।

कृतात्यय * पु॰ कृतस्य कर्मजन्यभोगस्यात्ययोऽवसानम्। भोगेन कृतकर्मनाशे "कृतात्ययेऽनुशयवान्" इति शारीरकसूत्रम्।

कृतान्त * पु॰ कृत. अन्तो विषय्यं यत्र। अन्तो निश्चयो विषयपरिच्छेदो वा येन। सिद्धान्ते। कृतो नाशो येन। दैवे, पापे, यमे च।

कृतान्न * न॰ कृत पक्वं तदन्नञ्च मध्वादौ पक्वान्ने, "कृतान्नमुदकं स्त्रियः" इति स्मृतिः।

कृतार्थ * त्रि॰ कृतः अर्थः प्रयोजनं येन। कृतकार्य्ये।

कृतास्त्र * त्रि॰ कृतं शिक्षितमस्त्रं येन। शिक्षितास्त्रे।

कृति * स्त्री॰ कृ-क्तिन्। कृतिशक्तौ, अङ्गुष्ठाकारे, [illegible] कृन्दोभेदे च। [वसि, विदुषि, कर्ते, हर्षे

कृतिन् * स्त्री॰ कृतमनेन इष्टादिनिरिनि। पण्डिते, [illegible]

कृत्त * त्रि॰ कृत-क्त। छिन्ने, वेष्टिते च।

कृत्ति * स्त्री॰ कृत-क्तिन्। चर्मणि, भूर्जपत्रे च।

कृत्तिका * स्त्री॰ कृत-क्तिन् संज्ञायां कन्। अश्विन्यादिषु नक्षत्रे। [क्रामे शुभेतर

कृत्तिकासुत * पु॰ कृत्तिकायाः सुतः। स्कन्दे। [illegible]

कृत्तिवासस् * पु॰ कृत्तिश्चर्म वासो यस्य, कृत्तिं वस्ते वा। शिवे। [यत्तद्धितभिन्नेषु प्रत्ययेषु पु॰।

कृत्य * न॰ कृत-क्यप्। कार्य्ये, व्याकरणोक्तेषु [illegible]

कृत्यविद् * त्रि॰ कृत्यं कर्त्तव्यं वेत्ति विद्+क्विप्। "कृत्यविदित्युवाच" इति रघुः। [illegible]

कृत्या * स्त्री॰ कृ-क्यप् टाप्। क्रियायाम्, [illegible]

कृत्रिम * कृ-क्त्रि वे मप् च। विड्लवणे, काचलवणे, गन्धद्रव्ये, रसाञ्जने च। सिह्लके, [illegible] च पु॰। क्रियया निष्पन्नमात्रे त्रि॰।

कृत्स्न * न॰ कृत-क्स्न। सकले, जले, कुक्षौ च। [illegible]

कृन्तन * न॰ कृत-ल्युट्। नि॰ नुम् च। छेदने, "कृन्तनानां छेदनश्च वनस्पते." इति स्मृतिः।

कृप * कल्पने भ्वादि॰ आत्म॰ लुङि लुटि लृटि कृतादि अक॰ वेट्। कल्पते अकल्पत् अकल्पिष्ट अक्लृप्त, कल्पितासे कल्प्तासे कल्प्स्यति कल्पिष्यते।

कृप * दौर्बल्ये अद॰ चुरा॰ उभ॰ अक॰ सेट्। कृपयति [illegible] अचकृपत् त।

कृप * युतौ विशीकरणे वा चुरा॰ पक्षे भ्वादि॰ पर॰। कल्पयति अचीकल्पत्-त अकल्पीत्।

कृप * पु॰ कृप-क। शरद्वत. पुत्रे द्रोणश्यालके कृपाचार्य्ये।

कृपण * पु॰ कृप-क्युन्। कृमौ। मन्दे, क्षुद्रे च "कृपणाः फलहेतवः" इति गीता। दीने, "कार्पण्यदोषोपहतस्वभावः" गीता, अदातरि च त्रि॰।

कृपा * स्त्री॰ कृप-अङ्। दयायां, फलनिरपेक्षतया [illegible]

कृपाण * पु॰ कृपां नुद-ड। खड्गे। ङीप्। कृपाणी छुरिकायाम्, कर्त्तर्य्याञ्च।

कृपालु * त्रि॰ कृपा लाति ला-डु। कृपायुक्ते।

कृपी * स्त्री॰ द्रोणाचार्य्यस्य पत्न्याम् शरद्वतो दुहितरि।

कृपीट * न॰ कृप-कीटन्। उदरे, तोये च।

कृपीटयोनि * कृपीटस्य जलस्य योनिः। वह्नौ "वायोरग्निराप:" इति श्रुतेरस्य जलयोनित्वम्।

कृमि * पु॰ क्रम-इन् सम्प्रसारणञ्च। कीटात् सूक्ष्मजन्तौ, लाक्षायां, उदरजातकीटयुक्तरोगे च। [illegible]

कृमिकण्टक * पु॰ कृमिरिव कण्टकोऽस्य। विडङ्गे, [illegible]

कृमिकोषोत्थ * न० कृमिः कोषात् उत्तिष्ठति उत्पद्यते उद्-स्था-क। कौषेये (रेशमिवस्त्रे)।

कृमिघ्न * पु० कृमिं हन्ति हन-क। विडङ्गे, पलाण्डौ, कोलकन्दे, भल्लातके च। हरिद्रायाम् स्त्री० टाप्। धूपवायां स्त्री० ङीप्।

कृमिज * न० कृमिभिर्जन्यते जन-कर्मणि ड। अगुरुणि चन्दने। कृमितो जाते त्रि०। लाक्षायां स्त्री० टाप्।

कृमिफल * पु० कृमयः फलेऽस्य। उडुम्बरे।

कृमिशैल * पु० कृमीणां शैल इव। वल्मीके। [वनमुद्गे।

कृमीलक * पु० कृमीन् ईरयति जनयति ईर-ण्वुल् रस्य लः।

कृश * तनूकरणे दिवा० पर० सक० सेट्। कृश्यति अकृशत् अकर्शीत्।

कृश * त्रि० कृश-क्त नि०। अल्पे, सूक्ष्मे च।

कृशाङ्गी * स्त्री० कृशमङ्गमस्याः। प्रियङ्गुवृक्षे। कृशदेहे त्रि०।

कृशानु * पु० कृश-आनुक्। वह्नौ, चित्रकवृक्षे च।

कृशानुरेतस् * पु० कृशानौ वह्नौ रेतो यस्य। शिवे। देव्या मोहनमस्य शिववीर्यस्याग्नौ प्रक्षेपः ततोऽग्निभिः कार्त्तिकेयो जातः इति पुराणकथा अनुसन्धातव्या। [पञ्चशत पञ्चाष्ट।

कृष * आकर्षणे विलेखने च तुदा० उभ० सक० अनिट्। कृषति।

कृष * आकर्षणे विलेखने च भ्वादि० पर० सक० अनिट्। कर्षति अक्राक्षीत्-अकार्क्षीत्-अकृक्षत्।

कृषक * पु० कृष-क्वुन्। फाले, वृषे च। कर्षके त्रि०।

कृश(स)र * पु० "तिलतण्डुलमाषाकः कृश(स)रः परिकीर्त्तितः" इत्युक्ते तिलमिश्रिते पक्वे तण्डुलादौ।

कृषि * स्त्री० कृष-इक्। वैश्यवृत्तिभेदे भूमिकर्षणरूपे शस्योत्पादनव्यापारे। कर्मणि इक्। भूमौ।

कृषिजीविन् * त्रि० कृष्या जीवति जीव-णिनि। स्वयमसमर्थो वा अन्यया कृषिकृत्या जीविनि।

कृषीवल * त्रि० कृषिरस्यास्ति वलच् दीर्घश्च। कर्षके।

कृष्टपच्य * त्रि० कृष्टे क्षेत्रे स्वयमेव पच्यते पच-यत्। धान्यादौ।

कृष्ण * पु० कृष-नक्। भगवतोऽवतारभेदे वासुदेवे देवकीनन्दने। "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्युक्ते परब्रह्मणि, वेदव्यासे, अर्जुने मध्यमपाण्डवे च। कृष्णवर्णत्वात् काके, कोकिले, करमर्दके (करमचा) वृक्षे, नीले वर्णे च। तद्वति त्रि०। कालागुरुणि, पापकर्मणि च न०। द्रौपद्यां, नीलीवृक्षे, द्राक्षायां, नीलपुनर्नवायाम्, कृष्णजीरके, माषपर्ण्याम्, कटुकायाम्, राजसर्षपे, पर्पट्यां, काकोल्यां, कोलाल्याम्। कृष्णवर्णत्वात् स्त्री० टाप्। नीलाञ्जने, लौहे, मरिचे च पु०।

कृष्णकलि * पु० कृष्ण इव सुन्दरः कलिः कलिकाऽस्य। स्वनामख्याते पुष्पप्रधाने वृक्षे।

कृष्णकाय * पु० कृष्णः कायो यस्य। महिषे। कृष्णवर्णतनुयुक्ते त्रि०।

कृष्णगन्ध * पु० कृष्णः उग्रो गन्धोऽस्य। शोभाञ्जनवृक्षे।

कृष्णगर्भ * पु० कृष्णवर्णो गर्भोऽस्य। कट्फले। [वृक्षे।

कृष्णचूडा * स्त्री० कृष्णस्य चूडा इव चूडाऽस्य। स्वनामख्याते पुष्प-

कृष्णचूर्ण * न० कृष्णस्य चूर्णम्। लोहमले (लोहार गु)।

कृष्णजटा * स्त्री० कृष्णा जटा यस्याः। जटामांस्याम्।

कृष्णजीरक * पु० कर्म०। कृष्णवर्णजीरके (कालजीरे)।

कृष्णद्वैपायन * पु० द्वीपे भवः फञ् कर्म०। वेदव्यासे, तस्य पराशरात् यमुनाद्वीपे एव जन्मेति पुराणम्।

कृष्णधुस्तू(धत्तू)र * पु० कर्म०। (कालकधुतरा) वृक्षभेदे।

कृष्णपर्णी * स्त्री० कृष्णं पर्णमस्याः। (कालतुलसी) कृष्णतुलस्याम्।

कृष्णपक्ष * पु० कर्म०। प्रतिपदाद्यमावास्यान्तासु पञ्चदशसु तिथिषु, "पञ्चदशदिवसः पक्षः कृष्णश्चन्द्रक्षयात्मकः" इत्युक्ते मासार्द्धकाले च। [ऽस्य। करमर्दे।

कृष्णपाक * पु० पच्यते इति पाकः फलं कृष्णः कृष्णवर्णः पाको-

कृष्णपाकफल * पु० कृष्णपाकं फलमस्य। करमर्दे।

कृष्णफल * पु० कृष्णं पाकावस्थायां फलमस्य। करमर्दे, सोमराज्यां स्त्री० टाप्। [कटुकायाम्।

कृष्णभेद * पु० कृष्णो वर्णेन भेदश्छेदः यस्याऽस्य। वा ङीप्।

कृष्णमृग * पु० कर्म०। (कालमृग) मृगभेदे।

कृष्णरुह * स्त्री० कृष्णः सन् रोहति रुह-क। जतुकालतायाम्।

कृष्णलवण * न० कर्म०। सौवर्चलवणे (कालानोन)।

कृष्णलक * पु० कृष्णं वर्णं लाति गृह्णाति ला-क संज्ञायां कन्। गुञ्जाफले, तत्परिमाणात्मके "पञ्चकृष्णलको माषः" इति मनुः।

कृष्णला * स्त्री० कृष्णं वर्णमेकदेशे लाति ला-क टाप्। गुञ्जायाम्।

कृष्णलोह * न० कर्म०। अयस्कान्ते।

कृष्णलोहित * पु० कृष्णः सन् लोहितः वर्णो वर्णेन सम०। तद्रूपमिश्रितवर्णे। तद्वति त्रि०।

कृष्णवक्त्र * पु० कृष्णं वक्त्रमस्य। वानरे।

कृष्णवर्ण * पु० कृष्णो वर्णोऽस्य। राहौ शूद्रे। कृष्णः सदृशो वर्णः। शूद्रे। न०। कृष्णवर्णवति त्रि०।

कृष्णवर्त्मन् * पु० कृष्णं वर्त्म धूमरूपमस्य। वह्नौ, राहौ शठे, चित्रकवृक्षे च। कृष्णमार्गे दुराचारे दुष्कर्मकारके त्रि०।

कृष्णवल्लिका * स्त्री० कर्म०। [illegible]।

कृष्णवृन्ता * स्त्री० कर्म०। कृष्णतुलस्याम्, [illegible]।

कृष्णबीज * पु० कृष्णं बीजमस्य। [illegible]।

कृष्णवृन्ता * स्त्री० कृष्णं वृन्तमस्याः। [illegible]। [illegible]।

कृष्णशार * पु० कृष्णसारौ [illegible]।

कृष्णशालि * पु॰ कर्म॰। (कालधान) धान्यभेदे।
कृष्णशिम्बिका * स्त्री॰ कर्म॰। काकाण्डशाम्।
कृष्णसारङ्ग * पु॰ कर्म॰। कृष्णयोमाञ्चने (कालवजना)।
[illegible] * पु॰ कृष्णस्य [illegible]। महिषे।
कृष्णसर्प * पु॰ कर्म॰। (राइ सर्षा) राजसर्षपे।
कृष्णसार * पु॰ कृष्णः सारोऽस्य। शिंशपावृक्षे (शिश)।
कृष्णस्कन्ध * पु॰ कृष्णः स्कन्धोऽस्य। तमालवृक्षे।
कृष्णागुरु * न॰ कर्म॰। कालागुरुणि, "कृष्णं गुणाधिकं तत् तु लोहवद् वारि मज्जति" इत्युक्तलक्षणे धूपकाष्ठे।
कृष्णाजिन * न॰ कर्म॰। कृष्णसारमृगचर्मणि।
कृष्णायस * न॰ कर्म॰ टच् समा॰। कृष्णलौहे अयस्कान्ते।
कृष्णार्चिस् * पु॰ कृष्णः कृष्णा अर्चिषो यस्य। कृष्णताकारक- शिखे वह्नौ।
कृष्णार्जक * पु॰ कर्म॰। शिखण्डी (कालतुलसी) वनबर्वरे।
[illegible] * पु॰ [illegible]। [illegible]।
कृष्णिका * स्त्री॰ अल्पार्थे संज्ञायां कन्। (राइ सर्षा) राजसर्षपे।
कृष्णेक्षु * पु॰ कर्म॰। (काजला) इक्षुभेदे।
[illegible] * स्त्री॰ [illegible]। कर्षणयोग्यां भूमौ।
कॄ * विक्षेपे तुदा॰ पर॰ सक॰ सेट्। किरति अकारीत्। कीर्णः।
कॄ * हिंसायां क्र्यादि॰ उभ॰ सक॰ सेट्। कृणाति अकारीत्।
कॄ * विज्ञाने चुरा॰ उभ॰ सक॰ सेट्। कारयति अचीकरत।
कॄत * संशब्दने चुरा॰ उभ॰ सक॰ सेट्। कीर्तयति ते अचकीर्तत् त।
[illegible]
केकय * पु॰ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

रिपौ च। राहोः शरीरात्मके उपग्रहे। ज्योतिषे सिद्धा स॰ व॰।
केतुमाल * न॰ "सुकेतनं केतुमालं प्रतीच्यां गन्धमादनात्" जम्बुद्वीपस्य नवखण्डान्तर्गते खण्डभेदे।
केदार * पु॰ के शिरसि दारोऽस्य। पर्वतभेदे, तत्स्थे [illegible] भेदे, भूमिप्रभेदे, आलवाले, क्षेत्रे च।
केनिपात * पु॰ के जले निपातोऽस्य अलुक् स॰। अरित्रे गतिनियामके (हाल) इति प्रसिद्धे काष्ठे। वा [illegible]
केन्दु * पु॰ कुत्सित इन्दुः कोः कादेशः। तिन्दुकवृक्षे। [illegible] (गाब) गालकवृक्षे।
केमुक * पु॰ कं शिरसि भ्रमयति रुजति भ्रम+उक् पृषो॰ (केन्द) इति ख्याते केन्दुवृक्षे। "कथं केमुकवर्जितम्" इति [illegible]
केयूर * पु॰ के बाहुशिरसि याति या-ऊरच् अलुक् स॰। (ताड़) बाहुभूषणे।
केरल * पु॰ ब॰ व॰। "शुभक्षेत्रं समारभ्य [illegible] तावत् केरलदेशः स्यात्" इत्युक्ते देशे। [illegible] रिणि रमश्रुधारिणि, "कोलिसर्पा माहिषका दर्वीचोर रलाः। सर्वे ते क्षत्रियास्तात। धर्मस्तेषां निराकृतः" इति [illegible] वंशोक्ते क्षत्रियभेदे च। [क्षत्रिय]
केल * चालने भ्वादि॰ पर॰ सक॰ सेट्। केलति अकेलीत्।
केलि * पु॰ स्त्री॰ केल-इन्। परीहासे, क्रीडायाञ्च। स्त्रियां वा ङीप्।
केलिवृक्ष * पु॰ केलेः क्रीडार्थं वृक्षः। केलिकदम्बवृक्षे।
केलिसचिव * पु॰ केलौ सचिवः सहायः। नर्मसचिवे, [illegible] सहचरे च। [अमरः]
केव * सेवने भ्वादि॰ आत्म॰ सक॰ सेट्। केवते अकेविष्ट।
केवल * त्रि॰ केव-कलच् कं सरसि वलयति वल अच् [illegible] एके, कृत्स्ने च। निश्चिते, ज्ञानभेदे, अद्वैते च न॰।
केविका * स्त्री॰ केव-ण्वुल्-टाप्। बङ्गदेशप्रसिद्धे (केवी) ख्याते पुष्पप्रधाने वृक्षे, मुक्तायां च।
केश * पु॰ क्लिश्यते क्लिश्नाति वा क्लिश-अच् ललोपश्च [illegible] वरुणे, [illegible], दैत्यभेदे, विष्णौ, शिरोरुहे च। [illegible] [illegible] केशः। [illegible] [illegible] [illegible] "[illegible]" [illegible]।
केशकीट * पु॰ [illegible]। [illegible] केशकीटे (उकुण)।
केशपर्णी * स्त्री॰ केश इव पर्णमस्याः जातित्वात् ङीप्। [illegible]
केशदामी * स्त्री॰ केश+दाम-मोता॰ ङीप्। [illegible] [illegible]।
केशमथनी * स्त्री॰ [illegible]
केशमार्जक * न॰ केशान् मार्ष्टि मृज-ण्वुल्। (काँकुइ) [illegible]

इति स्मृत्युक्तौ केशनखादिच्छेदने अधिकारात्।
केशर • पु० के जले शीर्य्यते शॄ-अच्। किञ्जल्कस्याग्रभागे, बकुलवृक्षे, पुन्नागवृक्षे, हिङ्गुनि, नागकेशरवृक्षे, तुरङ्गादिस्कन्धकेशे च। सिंहे न०। स्वर्णे पु० न०।
केशरवर • न० केशरं वृणोति वृ-अच्। कुङ्कुमवृक्षे (जाफरान)।
केशराम्ल • पु० केशरः अम्लोऽस्य। मधुजम्बीरे (बीजपूर)।
केशरिन् • पु० केशर अस्त्यस्य इनि। सिंहे, अश्वे, पुन्नागवृक्षे, नागकेशरवृक्षे, रक्तशिग्रुवृक्षे, हनुमत्पितरि वानरभेदे च।
केशहन्त्री • स्त्री० केशान् हन्ति हन-तृच् ङीप्। शमीवृक्षे (शाइगा)।
केशव • पु० केशाः प्रशस्ताः सन्त्यस्य व। विष्णौ। "यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्दन। तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसि" इत्युक्तेः। "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मात् मां प्राहुर्मुनिसत्तमाः" इत्युक्तेः सूर्य्यांशरूपत्वात् परमेश्वरे च। केश+वाच्च। पुन्नागवृक्षे त्रि०। [मत्वर्थे।
केशवर्द्धिनी • स्त्री० केशान् वर्द्धयति वृध-णिच्-णिनि। सहदेवी-
केशवेश • पु० केशस्य वेशः। कबरीबन्धे। [लतायाम्।
केशहन्त्री • स्त्री० केशान् हन्ति स्वाश्रयस्थितान् हन-तृच् ङीप् च। सहदेवी-
केशिक • त्रि० प्रशस्ताः केशाः सन्त्यस्य ठन्। प्रशस्तकेशयुक्ते जने।
केशिका • स्त्री० केशिक इव कायति प्रकाशते कै-क। शतावरी-
वृक्षे। [विष्णौ, दैत्यभेदे, सिंहे च पु०।
केशिन् • त्रि० प्रशस्ताः केशाः सन्त्यस्य केश+इनि। प्रशस्तकेशवति।
केशिनिषूदन • पु० केशिनं निषूदयति हिनस्ति नि+सूद-णिच्-ल्यु। कृष्णे। केशिदैत्यघातकत्वात्।
केश्य • न० केशाय हितं केश-यत्। कृष्णागुरुणि। भृङ्गराजे पु०।
केसर • न० के जले सरति सृ-अच्। हिङ्गौ, नागकेशरपुष्पे, कासीसे, स्वर्णे च। नागकेशरवृक्षे, तुरङ्गस्कन्धे केशे, किञ्जल्कस्याग्रभागे, पुन्नागवृक्षे च पु०। सिंहस्कन्धे पु० न०।
कै • शब्दे भ्वादि० पर० अक० अनिट्। कायति अकासीत्।
कैकसी • स्त्री० केकसस्य दैत्यस्य सुता तत्सुतत्वम् अपि सैव। रावणादीनां मातरि। [दिग्भेदे।
कैकेय • पु० केकय+राजनि+अण् नि० यस्य लुक् हरिः। केकय-
कैकेयी • स्त्री० केकयस्यापत्यं स्त्री अण्। भरतमातरि दशरथपत्न्याम्।
कैटभ • पु० कीटवत् भाति भा-क स्वार्थे अण्। दैत्यभेदे।
कैटभजित् • पु० कैटभं जितवान् जि+भूते क्विप् तुक् च। विष्णौ। कैटभारिप्रभृतयोऽप्यत्र।
कैटर्य • पु० किट-त्रासे घञ् किटं याति या-कनिच्छितत्वात् क स्वार्थे ष्यञ्। निम्बे, मदनवृक्षे, कट्फले, पूतिकरञ्जे, महानिम्बे च।

कैतव • न० कितवस्य कर्म अण्। कपटे, द्यूते। स्वार्थे अण्। धूर्ते, वैदूर्य्यमणौ, धुस्तूरवृक्षे च। [चै स्वमन्ते न०।
कैदार • पु० केदारस्य चैत्रस्यादम् अण्। केदारजन्ये शालिधान्ये।
कैदारिक • न० केदार+समूहार्थे वुञ् ठञ् वा। क्षेत्रसमूहे।
कैरव • न० के जले रौति रु-अच् अलुक्। पु० कैरवी चन्द्रस्य प्रियत्वात्। कुमुदे, श्वेतोत्पले, शत्रौ च।
कैरविणी • स्त्री० कैरव+इनि। कुमुदसमूहे, कुमुदलतायाम्।
कैरवी • स्त्री० कैरवस्य प्रिया अण्। चन्द्रिकायाम्।
कैरात • पु० किरात इव शूरः स्वार्थे अण्। चन्दनभेदे, किरातदेशे (उर्ध्वदेशे) भव अण्। भूनिम्बे, शम्बरचन्दने च न०।
कैलास न० केलाश्रये भवम् अण्। पिण्डे।
कैलास • पु० के जले लासो लसनं दीप्तिरस्य अलुक् स०, केलयः स्फटिकस्येव शुभ्र अण्, केलीनां समूहः अण्, कैले हेमाद्रेरेव भास-अच् वा। शिवकुबेरयोः स्थाने।
कैलासनाथ • पु० ६त०। शिवे। [(कैटै) कुबेरजालो।
कैवर्त • पु० के जले वर्त्तते वृत-अच् अलुक् स०। ततः स्वार्थे अण्।
कैवर्तमुस्तक • पु० कर्म०। जलजमुस्तके (केउर)।
कैवल्य • न० केवलस्य शुद्धस्य सर्वाधिकरहितस्य भावः। मोक्षे।
कैशिक • न० केशानां समूहः ठञ्। केशसमूहे। नाटकवृत्तिभेदे शृङ्गारभेदे स्त्री० कौप् वाचिकादिवृत्ति इति०।
कैशोर • न० किशोरस्य भावः अण्। "कौमार्य" इत्यनावस्थायां, कैशो-रमावत्सरात्" इत्युक्तायां किशोरावस्थायाम्।
कैश्य • न० केशानां समूहः ष्यञ्। केशसमूहे।
कोक • पु० कोकते कुक+आदाने अच्। चक्रवाके, वृके, खर्जूरीवृक्षे, दर्दुरे, विष्णौ च।
कोकनद • पु० कोकान् चक्रवाकान् नदति नादयति चक्रवाक-शब्दार्थं नद-अच्। रक्तकुमुदे, रक्तपद्मे च। [त्रि०।
कोकनदच्छवि • पु० कोकनदस्येव छविर्दीप्तिरस्य। रक्तवर्णे। तद्वति
कोकबन्धु • पु० कोकानां चक्रवाकानां मिलनकारित्वात् बन्धुरिव। सूर्य्ये। [त्रिलो टाप्।
कोकिल • पु० कुक आदाने इलच्। स्वनामख्यातपक्षिभेदे। स्त्री
कोकिलाक्ष • पु० कोकिलस्याक्षीव रक्तमक्षि पुष्पं यस्य। (तालमाखना) वृक्षभेदे, कासौन्दीभेदे, इक्षुगन्धायाञ्च।
कोकिलावास • पु० ६त०। आम्रवृक्षे।
कोकिलेष्ट • पु० कोकिल इव इष्ट इष्टः। (केसर) वृक्षभेदे।
कोङ्कण • पु० कोङ्किनि कण्ठरव। "स्वराष्ट्र" कनाराख्य कोङ्कण-देशस्य प्रयोरे। चतुर्नामोदेशो हि कोङ्कणः परिकीर्त्तितः।" इत्युक्ते देशभेदे।
कोच • पु० कुच-अच्। देशभेदे, तद्देशे "कोचश्चैव तु द्रुमः कोलकाश्चैव तन्तुहरः। कोचवार्तिदर्शितं ख्यातम्" इत्युक्ते जाति-भेदे च।

कोजागर ॰ पु॰ कोजागर्त्तीति वदत्यस्मिन् ष॰। आश्विनपौर्णमास्याम्। "निशीथे वरदा लक्ष्मीः कोजागर्त्तीति वादिनी" इति।

कोट * पु॰ कुट-घञ्। कौटिल्ये, दुर्गे च (गड़)।

कोटर * पु॰ न॰ कोटं कौटिल्यं राति रा-क। वृक्षगह्वरे।

कोटवी * स्त्री॰ कोटं वाति वा-क गौरा॰ ङीष्। नग्निकायां स्त्रियां, दुर्गायाञ्च।

कोटि * स्त्री॰ कुट-इञ्। धनुषोऽग्रभागे, वस्तुमात्रस्याग्रभागे, पृक्कायाम् (पिड़िङ्गशाक), मंगयस्यालम्बने, वादे निर्णयार्थं कृते पूर्वपक्षे, शतलक्षमितसंख्यायां, तत्संख्येये च। वा ङीप् कोटीत्यपत्र। [कोटि।

कोटिक ॰ पु॰ कोट्या वहुधा कायति प्रकाशते कै-क। इन्द्रगोपकीटे।

कोटिर ॰ पु॰ कोटिं राति रा-क। इन्द्रे, नकुले, इन्द्रगोपकीटे च।

कोटिवर्षा ॰ स्त्री॰ कोटिभिरग्रैर्वर्षति मधु वृष-अण्। (पिड़िङ्ग) शाकभेदे।

कोटि(टी)श * पु॰ कोट्या अग्रेण श्यति शो-क। लोष्टभेदनेऽस्त्रे।

कोटीर * पु॰ कोटिमीरयति ईर-अण्। किरीटे, जटायाञ्च।

कोट्ट ॰ पु॰ कुट्ट-घञ् नि॰ गुणः। दुर्गे (गड), राजधानीभेदे च।

कोट्टवी * स्त्री॰ कोट्टं वाति वा-क गौरा॰ ङीष्। नग्नायां स्त्रियाम्, मुक्तकेश्याञ्च।

कोट्टार ॰ पु॰ कुट्ट-आरक् ष॰। कूपे, पुष्करिण्याः पाटके च।

कोठ * पु॰ कुठि-घञ् नि॰ नलोपः। मण्डलाकारे कुष्ठरोगे।

कोण * पु॰ कुण-करणे घञ् कर्त्तरि अच् वा। येन धनुराकृतिना काष्ठेन वीणादयो वाद्यन्ते तस्मिन् वादनसाधने काष्ठे, गृहादीनामेकदेशे, अस्त्रौ, अस्त्राणामग्रभागे, लगुड़े, मङ्गलग्रहे च।

कोणकुण * पु॰ कोणे मस्तकैकदेशे कुणति शब्दति कुण-क। मत्कुणे (ছারপোকা)। [देशभेदे च।

कोदण्ड * न॰ कु-शब्दे विच् कोर्दण्डोऽस्य। धनुषि, भ्रूलतायां,

कोद्रव * पु॰ कु-विच् कोः द्रवति द्रु-अच् कर्म॰ (कोदो) धान्यभेदे।

कोप * पु॰ कुप भावे घञ्। क्रोधे कामाद्याश्रिते चित्तवृत्तिभेदे।

कोपनक * पु॰ कुप-युच् कोपनः स इव कायति कै-क। चोरनामकगन्धद्रव्ये।

कोपना * स्त्री॰ कुप-युच् टाप्। प्रकृत्या कोपवत्यां स्त्रियाम्। कोपशीले त्रि॰। [गामिनि त्रि॰।

कोपिन् * पु॰ कपटं कुप्यति णिनि। जलपारावते। अवगतकोप-

कोमल * न॰ कु-कलच् मुट् नि॰ गुणः। जले। मृदौ, अकठिने, मनोहरे च त्रि॰। कोमलिकायां स्त्री॰ टाप्।

कोमलवल्कली * स्त्री॰ कोमलं वल्कलं यस्याः। कदल्याम्।

कोयष्टि * पु॰ कं जलं यष्टिरिवास्य ष॰। अत कोत्वम्। जलकुक्कुभे टीके च। स्वार्थे कन्। (टिटिर) टिटिभपक्षिणि।

कोरक * पु॰ न॰ कुर-शब्दे कुर-वुन्। कलिकायाम्, मृणाले, कक्कोले च। "[illegible]" इति माघः। अमरे मुकुलोऽस्त्री प्रादि॰

कामिपाबीज।

कोरङ्गी * स्त्री॰ कुर-अङ्गच्-ङीष्। सूक्ष्मैलायाम्, पिप्पल्याम्

कोरदूष * पु॰ कोरं दूषयति दुष-णिच् अण्। (कोदो) धान्ये

कोल * पु॰ कुल-संस्त्याने अच्। क्रोडे-शनिग्रहे, शूकरे, (डोङ्गा), भुजान्तरे, भेलके, चित्रायाम् (चिता), वदरी- इयमाने, जातिभेदे च। अस्त्री, मरिचे, तोलकमाने च न॰। [मरिचे,

कोलक * पु॰ कुल-ण्वुल्। अङ्कोठवृक्षे (कांकला) च।

कोलकन्द ॰ पु॰ कोलमिव कन्दोऽस्य। महाकन्दभेदे।

कोलदल * न॰ कोलं वदरीफलमिव दलमस्य।

कोलपुच्छ * पुं॰ कोलस्य शूकरस्येव पुच्छोऽस्य। कङ्कपक्षिणि।

कोलमूल * न॰ कोलस्य वदर्या इव मूलम्। पिप्पलीमूले।

कोलम्बक * पु॰ कुल-अम्बच् संज्ञायां कन्। तन्त्रीभिः असृतिसमुदाये वीणायाः काये।

कोलवल्ली * स्त्री॰ कोल इव वल्ली तत्तुल्यरोमवत्त्वात्।

कोलशिम्बि॰ स्त्री॰ कोलपादाकारा शिम्बिरस्याः। (आलकुशी) ख्यातायां शूकरपादिकायां लतायाम्। [दिवस

कोला * स्त्री॰ कुल-अच्-टाप्। पिप्पल्याम्, चव्यभेषजे,

कोलाविध्वंसिन् ॰ त्रि॰ कोलां विध्वंसितुं वस्तुं शीलमस्य इन धातोरन्यार्थपरत्वम्। पर्वतवासिनि म्लेच्छभेदे, पालयतस्तस्य म्लेच्छाः पर्वतवासिनः। कोलाविध्वंसिनः इति देवीभागवतम्। "कोलाविध्वंसिनस्तथा" इति भ्राम्। कोलाशब्दः कोलाहलवाचकस्तया च राज्यविध्वंसं कुर्वन्ति ये। तेषु।

कोलाहल ॰ पु॰ कुल-घञ् तमाह्वलति अच्। बहुविधः

कोलि * पु॰ स्त्री॰ कुल-इन्। वदर्याम्। स्त्रीत्वपक्षे वा ङीप्।

कोविद * पु॰ कुङ्-शब्दे विच् कोर्वेदस्तं वेत्ति विद+क। विदुषि। [रक्तका

कोविदार * पु॰ कुं भूमिं विदृणाति वि+दृ-अण्।

कोश(ष) ॰ पु॰ कुश(ष) घञ्। पानपात्रे, कुड्मले, खड्गपिधाने, शताशतयोः स्वर्णरूप्ययोः, अर्थसञ्चये, पेश्याम्, अण्डकोषे, दिव्यभेदे, योनौ, शिम्बायाम्, गुप्तगेहे, मद्यपानपात्रे, आच्छादके, पनसादिफलमध्ये च (कोया)।

कोशफल ॰ न॰ कोशे फलमस्य। कक्कोले, मधुपाम् (মধু)।

कोशल ॰ पु॰ स्त्री॰ कुश-कलच् नि॰ गुणः। अयोध्यापुरे।

कोशलात्मजा * स्त्री॰ कोशलानां राजा तद्राजस्य सुता रामचन्द्रस्य मातरि। [ठन्। कक्कोले

कोश(ष)मिश्र ॰ न॰ कोशं(षं) धनसञ्चयं लाति ला-क

कोशाम्र ॰ पु॰ न॰ कोशाकारकमाम्रमस्य। बहुमूले वृक्षभेदे।

कोशा(षा)तकी ॰ स्त्री॰ कोश(ष)मतति अत-ण्वुल् गौरा॰

...) पत्न्यां तत्फलेऽपि हरीतक्यादित्वात् लुप् कौलम् ।

... * स्त्री० कोष+अस्त्यर्थे पिच्छादित्वात् इलच् । मुद्गपर्ण्याम् ।

...ी) * स्त्री० कुष (कुष) अच् गौरा० । चर्मपादुकायाम्, ...पादपभागे च (शुङ्गा) ।

... पु० कोषवत् ।

... * पु० कोषाकारा यस्यफलम् । मातृमपचिषि ।

... * स्त्री० कोषस्य धनसञ्चयस्य वृद्धिः । धनवृद्धौ कोषस्य वृद्धिर्यस्मिन् । रोगभेदे पुं० ।

...शिका * स्त्री० कोषे शेते शी-ण्वुल् । कुरिकायाम् ।

... * पु० कोष+हरि । धान्यहर्षे ।

... पु० कुष-थन् । चक्रमध्ये, उदरमध्ये, धान्यादिस्थापने कुशूले (कुटी) । धान्यौदे त्रि० ।

... न० ईषदुष्णम् कोः कादेशः । ईषदुष्णार्थे । तद्वति त्रि० ।

... * पु० को पृथिव्यां मलति उत्कर्षं गच्छति अच् पृ० गुणः । ...मौरनिविष्टे देशे । पर्योष्ठायां स्त्री० । [च ।

... * पु० को वसति वर्तते अच् पृ० गुणः । पात्रभेदे, मद्यभेदे

...टक * पु० कुहटीं मायां, पादपतनदेशम्च पश्यति टक् । ...ष्ठिके, कौटादिवधभीत्या पादयोः पश्चादपहारि यथा-...नि च ।

...टक * कुहो मतनं यस्य टक्रच् । मतनुविषदे पदे ।

* पु० कूटे अद्रिशृङ्गे भवः अण् । कुटजे (कुरची) । कुटजा माषः... । साक्ष्ये त्रि० ।

... * पु० कूटमिव कोटं तत्र जातः । कुटजे हर्षे ।

...ल्य * पु० चर्म० । ... । [कौटिलि ख्याते ।

...क * त्रि० कूटेन मृगबन्धनयन्त्रेण चरति ठक् । मांसविक्रय-

...िक * त्रि० कुहकः सञ्चरति (... मसादिकरणार्थम्) तस्य ...यः ...ण्यं ...वम् वा ठक् । कुहकभाण्ड... , ...पनद्योर्थे चेचे च ।

... * पु० कुन्तः प्रासः अस्त्रविशेषः शिल्पमस्य अण् । राजभेदे ।

... * न० कुतुक+प्रज्ञादित्वात् स्वार्थे अण् । अपूर्ववस्तुदर्शनेच्छायाम् ।

...हल * न० कुतूहल+प्रज्ञादित्वात् स्वार्थेऽण् । कौतुके ।

...द्रव त्रि० कोद्रवाणां भवनं क्षेत्रम् अञ् । (कोदो) धान्यभेद-...भवनयोग्ये क्षेत्रे ।

...ी * स्त्री० कुन्तिषु देशेषु भवा अण् ङीप् । अस्त्रविशेषौषधी ।

... * त्रि० कुन्ते भवः अण् । "कुन्ती ...कान्तारी ...न्योन्य...ति ... । ...कौन्त ... कौन्तेय..." ...कुन्तीरूपे । [illegible] ... इति ...दर्दे ...त्रि० ।

...न * न० कुत्र ... [illegible] त्रि० । ...दे, ...त्रि० । ...दाम् ...वान् ...वैश्य... ...कौन्तेय... [illegible] ...ने च "कौन्तेयस्य ... [illegible]"

इति पुराणम् ।

कौमार * न० कुमारस्य भावः अण् । "प्रातः कं पृथिवीं पद्भ्यां नाक्रमेत् न कुमारकः" इत्युक्तलक्षणायां "कौमारं पञ्चमाब्दान्तम्" इत्युक्तायां "कौमारं यौवनं जरा" इति गीता ।

कौमारी * स्त्री० कुमारस्य कार्त्तिकेयस्येयम् अण् । कार्त्तिकेयशक्तौ, पुनर्भूमारीनिकायाश्च । "अपूर्वपतिः कुमारीम्" उपयच्छेत् इति कौमारपूर्ववचने इयम् । भार्यायाम् ।

कौमुद * पु० "कौ मोदन्ते जना यस्मिन् कौमुदस्तेन कीर्त्तितः" इत्युक्तनिरुक्ते कार्त्तिकमासे ।

कौमुदी * स्त्री० कुमुदानां हर्षहेतुरियम् अण् । ज्योत्स्नायां, तन्मयत्वे हि कुमुदविकासः कविकल्पितः "कौ मोदन्ते जना यस्यां नानाभावैः परस्परम् । हृष्टाः पुष्टाः सुखायत्ताश्च सा कौमुदी मता" इत्युक्तलक्षणायां कार्त्तिकपौर्णमास्याम्, आश्विनपौर्णमास्यामपि । [विष्णुः लक्ष्मीः तस्येदम् अण् । विष्णुगदायाम् ।

कौमोदकी * स्त्री० कौः पृथिव्याः पालकत्वात् मोदक कुमोदको

कौरव * पु० कुरोरपत्यम् उत्सादित्वादण् । कुरुवंशजाते धृतराष्ट्रपुत्रेषु पाण्डवेषु च तथात्वेऽपि कुरुवंशजातत्वात् ।

कौरव्य * पु० कुरु-ण्य । कुरुवंशजे क्षत्रिये । बहुषु लुक् । कुरवः ।

कौर्म * त्रि० कूर्मे तत्स्वरूपे भवः अण् । मत्स्यपुराणे, कर्मानि कुर्मावतारे च ।

कौलटिनेय * पु० स्त्री० भिक्षुक्याः असत्याः अपत्यम् ढक् इनादेशश्च । सत्याः भिक्षुक्याः पुत्रे । स्त्रियां ङीप् ।

कौलटेय * पु० स्त्री० कुलटायाः असत्याः अपत्यम् । ढक् । सत्याः भिक्षुक्याः कुलटायाः पुत्रे । स्त्रियां ङीप् । [पुत्रे ।

कौलटेर * पु० स्त्री० कुलटायाः अपत्यं ढ्रक् । [illegible]

कौलिक * त्रि० कुलादागतः ठक् । कुलपरम्परागते । कुलेनापि नः ठक् । कुलाचारे ... कुलधर्मे ... ठक् । कुलधर्मे ... तन्त्रोक्ते शिवे, तन्तुवाये च ।

कौलीन * न० कौ पृथिव्यां लीन इत्यात् ... ख । कुले, ... जनवादे, कुलीनस्य भावः ... । पश्वहिः-युद्धे, ... ।

कौलेय * त्रि० कुल+ढक् । सत्कुलोत्पन्ने ।

कौलेयक * पु० कुले भव ढकञ् । कुक्कुरे ।

कौवेरी * स्त्री० कुबेरस्येयम् अण् । उत्तरदिशि, ... च ।

कौशल * न० कुशलस्य भावः अण् । [illegible]

कौशल्या * स्त्री० कुशलस्य ... ढक् । कुशलस्य ... [illegible]

कौशाम्बी [illegible]

[illegible]

[illegible]

कौशिक * पु० [illegible]

क्रौञ्चदारण(न) * पु॰ क्रौञ्चं दैत्यं पर्वतं वा दारयति दृ+णिच्-ल्युट् ल्यु वा। कार्त्तिकेये, स हि "क्रौञ्चः क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हिमकन्दरे। स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना। स येनास्तस्य दैत्यस्य ख्यातवीर्येण कर्म्मणा। केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" इति पुराणम्।

क्रौञ्चादन * न॰ क्रौञ्चानां वकभेदानामदनं भक्ष्यम्। मृणाले, (घेंचु) चिञ्चोटके, पिप्पल्याञ्च। धम्यो‌ऽपि स्त्री॰।

क्लथ * वधे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् घटादि। क्लथयति ते क्लथति अचिक्लथत् अक्लाथीत् अक्लथीत्।

क्लद * रोदने अक॰ आह्वाने सक॰ इदित् पर॰ भ्वादि॰ सेट्। क्लन्दति अक्लन्दीत्। [क्लदयति ते।

क्लद * वैक्लव्ये दिवा॰ आत्म॰ अक॰ सेट् घटादि। क्लद्यते अक्लदिष्ट

क्लन्द * रोदने भ्वादि॰ उभ॰ इदित् अक॰ सेट्। क्लन्दति ते अक्लन्दीत् अक्लन्दिष्ट।

क्लप * अव्यक्तशब्दे चुरा॰ उभ॰ अक॰ सेट् घटा॰। क्लपयति ते अचिक्लपत् त। [क्लान्त्वा। क्लान्तः।

क्लम * ग्लानौ दिवा॰ पर॰ अक॰ सेट्। क्लाम्यति अक्लमीत्। क्लमि-

क्लम * ग्लानौ भ्वादि॰ पर॰ अक॰ सेट्। क्लामति अक्लमत् अक्लमीत् क्लमित्वा क्लमितः।

क्लम * पु॰ क्लम-घञ् अवृद्धिः। आयासे, श्रमे च।

क्लमथ * पु॰ क्लम-अथच्। आयासे। [क्लमयति क्लमित्वा क्लान्त्वा।

क्लव * भये दिवा॰ आत्म॰ अक॰ सेट् घटादि। क्लव्यते अक्लविष्ट

क्लान्त * त्रि॰ क्लम-क्त। श्रान्ते। [अक्लवीत् अक्लावीत्।

क्लिद * आर्द्रीभावे दिवा॰ पर॰ अक॰ सेट्। क्लिद्यति। अक्लिदत्

क्लिन्द * रोदने इदित् भ्वादि॰ उभ॰ अक॰ सेट्। क्लिन्दति अक्लिन्दीत्।

क्लिन्न * त्रि॰ क्लिद क्त। आर्द्रे। [क्लिशित्वा। क्लिशितः क्लिष्टः।

क्लिश * उपतापे दिवा॰ आत्म॰ अक॰ सेट्। क्लिश्यते। अक्लेशिष्ट

क्लिश * विबाधे क्र्यादि॰ पर॰ सक॰ वेट्। क्लिश्नाति अक्लेशीत् अक्लिक्षत्। [ख्याते।

क्लिष्ट * त्रि॰ क्लिश-उपतापे क्त। सम्बद्धे वा। इदमापे क्लिष्ट-

क्लीतक * न॰ क्लीव[illegible] [illegible] [illegible] (इति भाषा)। [क्ली।

[illegible]

[illegible] [illegible] [विक्लवे च।

[illegible]

[illegible] च।

[illegible]

[illegible]

[illegible]

क्लेश * पु॰ क्लिश-घञ्। दुःखे, रोगादौ, योगशास्त्रोक्तेषु अविद्यास्मितादिषु पञ्चसु। [कौन्तेय" इति गीता।

क्लैव(व्य) * न॰ क्लीव(व)-भावे ष्यञ्। निष्पौरुषत्वे "मा क्लैव्यं गच्छ

क्लोमन् * न॰ क्लुङ्-गतौ मनिन्। "अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति। जलवाहि शिरामूलं तृष्णास्थानं मतं बुधैः॥" इत्युक्ते वाह्लीमध्ये स्थानभेदे। [क्वचनेति चाचार्थे।

क्व * अव्य॰ किम्+अ क्वादेशः। कुत्रेत्यर्थे, चिञ्चनयोः क्वचित्

क्वण * शब्दे भ्वादि॰ पर॰ अक॰ सेट्। क्वणति अक्वाणीत् अक्वणीत्

क्वण * पु॰ क्वण-अप्। वीणायाः शब्दे, ध्वनिमात्रे च।

क्वथ * निष्पचने भ्वादि॰ पर॰ सक॰ सेट्। क्वथति अक्वथीत्।

क्वथित * त्रि॰ क्वथ-क्त। अतिशयपक्वे व्यञ्जनादौ, दशमूलपाचनादौ च।

क्वाथ * पु॰ क्वथ-घञ्। दुःखे, द्रव्यमात्रस्यातिशये पाके।

क्वाथोद्भव * न॰ क्वाथादुद्भवति अच्। तुत्थाञ्जने।

क्वेल * चालने गतौ च भ्वादि॰ पर॰ सक॰ सेट्। क्वेलति अक्वेलीत् क्वेलयति अचिक्वेलत्। [अचक्षञ्जत् त।

क्षज * कृच्छ्रजीवने इदित् चुरा॰ उभ॰ अक॰ सेट्। क्षञ्जयति ते

क्षज * वधे भ्वादि॰ आत्म॰ सक॰ सेट् घटा॰। क्षजते अक्षजिष्ट। क्षजयति। [अक्षञ्जिष्ट।

क्षञ्ज * गतौ दाने च भ्वादि॰ आत्म॰ इदित् सक॰ सेट्। क्षञ्जते

क्षण * वधे तना॰ उभ॰ सक॰ सेट्। क्षणोति क्षणुते। अक्षणीत् अक्षणिष्ट।

क्षण * पु॰ क्षणोति दुःखम् क्षण-अच्। उत्सवे, अवसरे, मध्ये, दशपलपरिमिते काले, निमेषक्रियाचतुर्थभागे च।

क्षणद * पु॰ क्षणं यात्रिकादिशुभसंसूचकं वा ददाति दा-क। गणके। जले न॰। रात्रौ स्त्री॰।

क्षणप्रभा * स्त्री॰ क्षणं व्याप्य प्रभा यस्याः। विद्युति।

क्षणभङ्ग * पु॰ क्षणात् भङ्गो यस्य। क्षणनाशे, सर्व्वो भावपदार्थो प्रतिक्षणमवयवध्वंसप्राप्यदवस्थावयवभङ्गस्य बौद्धाचार्यैरभिमतं तादृशो बौद्धादीनां मते। [क्षणाग्रे वस्तुनाशे।

क्षणभङ्गुर * त्रि॰ क्षणात् भज्यते भञ्ज-कर्म्मकर्त्तरि घुरच्। क्षणे

क्षणिक * त्रि॰ क्षणं व्याप्नोति ठञ्। एकक्षणमात्रव्यापिनि पदार्थे। तेषां प्रथमक्षणे उत्पत्तिः द्वितीयक्षणे स्थितिस्तृतीयक्षणे नाश इति ते क्षणिका यथा बुद्ध्यादय इति तार्किकाः। सर्व्वं सत्पदार्थानामाद्यक्षणे उत्पत्तिर्द्वितीयक्षणे नाश इति बौद्धाः "सर्व्वं क्षणिकम्" इत्युक्ते। [पुंसि त्रि॰।

क्षत * न॰ क्षण-भावे क्त। अस्त्रकृतादौ व्रणे। कर्म्मणि क्त। क्षत-

क्षतज * पु॰ क्षते जायते जन-ड। (कुङ्कुमाख्य) पुष्पभेदे। क्षाताः-[illegible]

क्षतज * न॰ क्षतात् जायते जन-ड। रुधिरे।

क्षति * स्त्री॰ क्षण क्तिन्। हानौ, अपचये, नाशे च।

क्षत * पु॰ क्षण-क्त। शदात् अविद्यायाम्प्रमे गङ्गोर्ध्ववर्षे, प्रमो-हार्धे, घातदे, भृक्षिप्रापृष्ठे, निपृष्ठे, वेदनि च।

क्षत्र * पु॰ क्षण-क्विप् क्षत् ततस्त्रायते त्रै+क। क्षत्रिये "क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दः" इति रघुः।

क्षत्रबन्धु * पु॰ क्षत्रस्य बन्धुरिव तत्संबन्धमात्रात् न तत्कर्मा। क्षत्रकार्यशून्ये निन्द्ये क्षत्रिये।

क्षत्रिय * पु॰ क्षत्रस्यापत्यं घ। क्षत्रजातौ राजन्ये "क्षत्रजं सेवते कर्म वेदाध्ययनसंयुतम्। दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते" इत्युक्ते वर्णभेदे।

क्षद * संवरणे भौवा॰ आत्म॰ सक॰ अनिट्। क्षदते अक्षत्त। [ते।

क्षप * प्रेरणे अद॰ चुरा॰ उभ॰ सक॰ सेट्। क्षपयति ते अचक्षपत्

क्षप * लङ्घने चुरा॰ इदित् उभ॰ सक॰ सेट्। क्षम्पयति ते अच-क्षम्पत् त।

क्षप * क्षेपे चुरा॰ उभ॰ सक॰ सेट्। क्षपयति ते अचिक्षपत् त।

क्षपणक * पु॰ क्षपयति चित्तरागं क्षप-ण्युल् संज्ञायां कन्। बौद्ध-सन्यासिनि। "एकः क्षपणकः साकाहस्ती" इत्युद्भटः।

क्षपा * स्त्री॰ क्षपयति चेष्टाम् क्षै-णिच् पुक् च अच्। रात्रौ।

क्षपाकर * पु॰ क्षपायां रात्रौ करो दीप्तिरस्य। चन्द्रे, स हि रात्रौ सूर्यतेजसा दीप्यते। [विद्वलाद्यैः" इति भट्टिः।

क्षपाट * पु॰ क्षपायामटति अट-अच्। राक्षसे "ततः क्षपाटैः पृथु-

क्षम * सहने भ्वादि॰ आत्म॰ सक॰ वेट्। क्षमते अक्षमिष्ट अक्षंस्त। [क्षाम्यतु यः क्षमी" इति माघः। अक्षमीत्।

क्षम * सहने दिवा॰ पर॰ सक॰ सेट् शमादि। क्षाम्यति "कामं

क्षम * न॰ क्षम-अच्। युक्ते। शक्ते, हिते, क्षमावति च त्रि॰।

क्षमता * स्त्री॰ क्षम+तल्। योग्यतायां, शब्दनिष्ठे अर्थप्रकाशन-सामर्थ्ये च "क्षमता च लिङ्गम्" इति मीमांसा।

क्षमा * स्त्री॰ क्षम-अङ्। तितिक्षायाम्, "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता" इति "आक्रुष्टोऽभिहतो वापि नाक्रोशेन्न च हन्ति वा। अदुष्टवाङ्मनःकायैस्तितिक्षुः सा क्षमा मता" इति चोक्त-लक्षणायां चित्तवृत्तौ, भूमौ च। [यः क्षमी" इति माघः।

क्षमिन् * त्रि॰ क्षम-घिनुण् वृद्ध्यभावः। क्षमावति। "कामं क्षाम्यतु

क्षय * पु॰ क्षि-अच्। नाशे, ह्रासे, अपचये, कासरोगभेदे, गृहे, निरामे, हिंसायाम्, ६॰ वर्षमध्ये "देशभङ्गश्च दुर्भिक्षं क्षये संक्षी-यते प्रजा" इत्युक्तफलके वत्सरभेदे, रविसंक्रान्तिद्वययुक्तशुक्लप्रति-पदादिके अमावास्यान्ते मासे "द्विसंक्रान्तिमासः क्षयः" कार्त्ति-कादौ। "सौरायदा चन्द्रमसो गरीयान् मासो द्विसंक्रान्तिरतो क्षयाख्यः" इत्युक्ते मासे च।

क्षयथु * पु॰ क्षि-अथु। (कासरोगे)।

क्षयकामिनी * स्त्री॰ क्षयं कामं कामयति कम-णिङ्-णिनि। जीव-न्तीवृक्षे।

क्षयपक्ष * पु॰ क्षयस्य (चन्द्रस्य क्षयार्थः) पक्षः अग्रग्रामादिवत् समा॰। कृष्णपक्षे।

क्षर * सञ्चलने भ्वादि॰ पर॰ अक॰ सेट्। क्षरति अक्षारीत्।

क्षर * पु॰ क्षर-अच्। मेघे। "कार्यकारणरूपस्तु नश्वरं क्षरमुच्यते" इत्युक्ते नश्वरे त्रि॰। "क्षरः सर्वाणि भूतानि" इति गीता। जले न॰। [यति ते क्षालति अचिक्षलत् त अक्षालीत्।

क्षल * शौचे वा चु॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। क्षाल-

क्षव * पु॰ क्षु-अप्। क्षुते (हाँचि), राजिकाभेदे च।

क्षवक * पु॰ क्षव+संज्ञायां कन्। राजिकाभेदे, अपामार्गे च।

क्षवथु * पु॰ क्षु-अथुच्। क्षुते (हाँचि)। [हि क्षुतं जायते।

क्षवपत्रा * स्त्री॰ क्षवः पत्रेषु यस्याः। द्रोणपुष्प्याम्, तत्पत्रघ्राणे

क्षात्र * न॰ क्षत्रस्य कर्म भावो वा अण्। "शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रकर्म स्वभाव-जम्।" इत्युक्ते क्षत्रियकर्मणि। "क्षात्रं द्विजत्वञ्च परस्परार्थम्" इति भट्टिः। [तत्प्रतीकारपराङ्मुखे च।

क्षान्त * त्रि॰ क्षम-क्त। सहिष्णौ, केनचित् पीडनेऽपि सतिसामर्थ्ये

क्षान्ति * स्त्री॰ क्षम-क्तिन्। क्षमायां, सामर्थ्ये सत्यपकारिणोऽप-काराचिकीर्षायाञ्च।

क्षाम * त्रि॰ क्षै-क्त तस्य मः। क्षीणे, दुर्बले च।

क्षार * पु॰ क्षर-ण। (क्षार) इति ख्याते रसे, लवणे, क्षारजाते काचे, भस्मनि, गुडे, धूर्ते च। टङ्कणे (सोहागा), यवक्षारे, विड्लवणे, सर्जिकाक्षारे च न॰। [द्विपिटके च।

क्षारक * पु॰ क्षर-ण्वुल्। (जालि) नवकलिकावृन्दे, पक्षिमत्स्या-

क्षारदला * स्त्री॰ क्षारो दलेऽस्याः। क्षुद्रवास्तुकशाके।

क्षारभूमि * स्त्री॰ क्षारयुक्ता भूमिः। अम्बुधिसमीपस्थभूमौ "किमा-श्चर्यं क्षारभूमौ प्राप्यते यमदूतिका" इति उद्भटः।

क्षारमृत्तिका * स्त्री॰ क्षारसंयुक्ता मृत्तिका। ऊषरस्थाने।

क्षारित * त्रि॰ क्षर-णिच्-क्त। अपवादग्रस्ते, पापदोषे, स्राविते च।

क्षालित * त्रि॰ क्षल-क्त। निर्णिक्ते, कृतप्रक्षालने च।

क्षि * क्षये भ्वादि॰ पर॰ अक॰ अनिट्। क्षयति अक्षैषीत्।

क्षि * हिंसायां स्वादि॰ पर॰ सक॰ अनिट्। क्षिणोति क्षिणुतः क्षिण्वः क्षिणुवः अक्षैषीत्। [षीत्।

क्षि * गतौ सक॰ निवासे अक॰ तुदा॰ पर॰ अनिट्। क्षियति अक्षै-

क्षि * हिंसायां क्र्यादि॰ पर॰ सक॰ अनिट्। क्षिणाति अक्षैषीत्।

क्षिण * हिंसायां तना॰ उभ॰ सक॰ सेट्। क्षिणोति क्षिणुते अक्षे-णीत् अक्षेणिष्ट।

क्षिति * स्त्री॰ क्षि-निवासे आधारे क्तिन्। भूमौ। भावे क्तिन्। निवासे। क्षि-क्षये भावे क्तिन्। क्षये, रोचनाख्यगन्धद्रव्ये च।

क्षितिधर * पु॰ क्षितिं धारयति धृ-णिच्-अच् ६त॰। पर्वते, कूर्म-वासुकिदिग्गजेषु च।

क्षितिपति * पु॰ ६त॰। रा[illegible]पतौ।

क्षितिरुह * पु० रोहति रुह-क ७त०। वृक्षे।
क्षितिवर्द्धन * पु० क्षितिं वर्द्धयति वृध-णिच्-ल्यु। शवे "करोमि क्षितिवर्द्धनम्" इति भट्टिः। [क्षीत् अक्षिप्त।
क्षिप * प्रेरणे तुदा० उभ० सक० अनिट्। क्षिपति ते अक्षै-
क्षिप * नोदने दिवा० पर० सक० अनिट्। क्षिप्यति अक्षैप्सीत्।
क्षिपणि(णी) * स्त्री० क्षिप-अनि वा ङीप्। नौकादण्डे (दाड़), शस्त्रे, वड़िशे च।
क्षिप्त * त्रि० क्षिप+क्त। प्रेरिते, त्यक्ते, विकीर्णे, अवज्ञाते, रागद्वेषादिवशाद्विषयासक्तचित्ते, वायुरोगग्रस्ते च। [त्रि०।
क्षिप्र * न० क्षिप-रक्। ज्योतिषोक्ते नक्षत्रभेदे, शीघ्रे च। तद्वति
क्षिप्रकारिन् * त्रि० क्षिप्रं करोति कृ-णिनि। (चालाक) शीघ्रक्रियाकारके। [द्रुमभेदे। शीघ्रपाकवति त्रि०।
क्षिप्रपाकिन् * पु० क्षिप्रं शीघ्रं पचते घिणुन्। (गन्धभादिलिया)
क्षिव * निरसने भ्वादि० पर० सक० सेट्। क्षेवति अक्षेवीत्।
क्षिव * निरसने दिवा० पर० सक० सेट्। क्षीव्यति अक्षेवीत् क्षेविला क्ष्युत्वा। [अक्षैष्ट।
क्षी * हिंसायां भ्वादि० उभ० सक० अनिट्। क्षयति ते अक्षैषीत्
क्षीज * अव्यक्तशब्दे भ्वादि० पर० अक० सेट्। क्षीजति अक्षीजीत्।
क्षीण * त्रि० क्षि-क्त। दुर्बले, क्षामे च "चतुर्दश्यष्टमे यामे क्षीणो भवति चन्द्रमाः" इति स्मृतिः। [(वी)त्।
क्षीब(व) * मदे भ्वादि० आत्म० अक० सेट्। क्षीब(व)ते अक्षीबी-
क्षीब(व) * त्रि० क्षीब(व)-क्त नि०। मत्ते। [जले च।
क्षीर * न० क्षी-सम्पादित्वात् क्विप् तामीरयति ईर+अण्। दुग्धे,
क्षीरकण्ठ * पु० क्षीरं कण्ठे यस्य। स्तनन्धये बालके।
क्षीरकन्द * पु० क्षीरमिव कन्दो यस्य। क्षीरविदार्य्याम्, क्षीरवसायाञ्च। [अर्कवृक्षे च।
क्षीरकाण्डक * पु० क्षीरान्वितं काण्डं यस्य कप्। स्नुहीवृक्षे,
क्षीरदल * पु० क्षीरं दले यस्य। अर्कवृक्षे।
क्षीरनाश * पु० क्षीरं नाशयति नश+णिच्-अण्। साखोटवृक्षे (सेयोड़ा), तत्पत्रादिनिर्यासयोगेन शीघ्रमेव दुग्धं दधिवत् घनीभवतीति तस्य दुग्धनाशकता।
क्षीरपर्णी * क्षीरं पर्णे यस्याः ङीप्। अर्कवृक्षे।
क्षीरवल्ली * स्त्री० क्षीरा क्षीरवती वल्ली। क्षीरविदार्य्याम्। स्वार्थे कन् अतो इत्व. क्षीरवल्लिका अप्यत्रार्थे।
क्षीरविकृति * स्त्री० ६त० "दध्ना सह पयः पक्वं यत् स्यात् सा दधिकूर्चिका" इत्युक्तायां (क्षीरसा) दधिकूर्चिकायाम्।
क्षीरवृक्ष * पु० क्षीरप्रधानो वृक्षः। उदुम्बरे, राजादन्याञ्च।
क्षीरसार * पु० क्षीरं सरति सृ-अच्। (छाना) आमिक्षायाम्।
क्षीरशाक * न० "पयस्तमिव यत् क्षीरशाकं हि तत् पयः" इत्युक्ते नष्टे दुग्धे, राजादने च। भूकुष्माण्डे स्त्री०।
क्षीरशृङ्ग * पु० क्षीरमिव दलः। शृङ्गाटके (पानिफल)।
क्षीरसार * पु० क्षीरस्य सारः। नवनीते "क्षीरसारसमुद्भवं इत्युक्तः, (छाना) आमिक्षायाञ्च। [प्रकाण्डे
क्षीरहिण्डीर * पु० ६त०। दुग्धफेने। क्षीरमिव हिण्डीर।दिर्दे
क्षीराब्धि * पु० क्षीरस्य दुग्धस्याब्धिः। क्षीरसमुद्रे। एवं दुग्धसागरादयोऽप्यत्र।
क्षीराब्धिज * पु० क्षीराब्धौ जायते जन-ड। चन्द्रे। लक्ष्म्यां स्त्री०।
क्षीरावी * स्त्री० क्षीरमवति अव-अण्-ङीप्। दुग्धिकायाम् दुर्ग।
क्षीरिका * स्त्री० क्षीर+अस्त्यर्थे ठन्। (क्षीरा) राजादन्याम्।
क्षीरिणी * स्त्री० क्षीर+अस्त्यर्थे इनि। तिलकदुग्धायां, पीतदुग्धक्षीरलतायाञ्च। [राजादने, सोमलतायाम्, अश्वत्थे
क्षीरिन् * पु० क्षीर+इनि। स्नुह्याम्, वटे, प्लक्षे, उदुम्बरे, अश्वत्थे
क्षीरिवृक्ष * पु० कर्म०। क्षीरयुक्तेषु न्यग्रोधाश्वत्थोदुम्बरपारिशप्लक्षेषु पञ्चसु वृक्षेषु।
क्षीरोद * पु० क्षीरमुदकमस्य उदकस्योदादेशः। क्षीरसमुद्रे।
क्षु * क्षुतौ अदा० पर० अक० सेट्। क्षौति अक्षावीत् दुर्गमः" इति मा क्षुतः। क्षुत्वा। क्षवथुः। [(दुर्गमः" इति मा
क्षुण्ण * त्रि० क्षुद+क्त। अभ्यस्ते, विहते च "अक्षीलामक्षुण्णत
क्षुत् * स्त्री० क्षु-सम्पदा० क्विप् तुक् च।(हाँचि) क्षुते।
क्षुत * न० क्षु-क्त। नासातः वायुनिःसरणजे शब्दे (हाँचि)।
क्षुद * पेषणे रुधा० उभ० सक० सेट्। क्षुणत्ति क्षुन्ते। अक्षुदत् अक्षौत्सीत् अक्षोदिष्ट। [त्रि
क्षुद्र * त्रि० क्षुद-रक्। नीचे, कृपणे, क्रूरे, दरिद्रे, अल्पे, मुखमाक्षि
क्षुद्रकण्टकी * स्त्री० क्षुद्रं कण्टकं यस्याः ङीप्। वृहत्याम्।
क्षुद्रकण्टिका * क्षुद्रं कण्टकं यस्याः टाप् अत इत्वम्। कण्टकारिकालतायाम्।
क्षुद्रकम्बु * पु० कर्म०। शम्बूके। [(क्षुद्र)
क्षुद्रघण्टिका * स्त्री० घण्टैव कन् घण्टिका कर्म०। किङ्किण्याम्
क्षुद्रजन्तु * पु० कर्म०। "क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव शतं वा प्रसृतौ येषां केचिदानकुलादपि" इत्युक्ते स्वल्पे प्राणि।
क्षुद्रजम्बू(म्बु) * स्त्री० कर्म०। भूमिजम्बाम्।
क्षुद्रजीरक * न० कर्म०। कणजीरके, सुगन्धे च।
क्षुद्रधात्री * स्त्री० कर्म०। कर्कटवृक्षे।
क्षुद्रधान्य * न० कर्म०। कङ्गुप्रभृतौ तृणधान्ये। [ङीप्। वल्वजायाम्
क्षुद्रपत्रा * स्त्री० क्षुद्रं पत्रं यस्याः टाप्। चाङ्गेर्य्याम् (चुकोपालं)
क्षुद्रपनस * पु० कर्म०। लकुचे (मांदार)।
क्षुद्रफल * पु० क्षुद्रं फलमस्य। जीवनवृक्षे। कण्टकार्य्याम्, दन्त्यां, भूमिजम्ब्वाञ्च स्त्री० टाप्।
क्षुद्रभण्टाकी * स्त्री० कर्म०। वृहत्याम्।
क्षुद्रमुस्ता * स्त्री० कर्म०। कसेरुकन्दे।
क्षुद्रवार्त्ताकिनी * स्त्री० कर्म०। कण्टकार्य्याम्।
क्षुद्रवार्त्ताकी * स्त्री० कर्म०। वृहत्याम्।

…शङ्ख * पु० कर्म०। शम्बूके। [त्रि०।
…शीर्ष * पु० क्षुद्रं शीर्षमस्य। मयूरशिखावृक्षे। स्वल्पशीर्षवति
…शुक्ति * स्त्री० कर्म०। जलशुक्तिकायाम्। स्वार्थे कन् तत्रैवार्थे।
…श्याम * पु० कर्म०। स्वल्पश्यामरोगे। [रगन्धायाञ्च।
…सहा * स्त्री० सह+अच् क्षुद्रस्य सहा ६त०। मुद्गपर्ण्याम्, मार्जा-
…सुवर्ण * न० कर्म०। पित्तले। [स्त्रले टाप्। सर्वैवार्थे।
…सिंहली * स्त्री० कर्म०। कण्टकार्य्याम्। स्वार्थे कन् अत्रो
…। * स्त्री० क्षुद+रक्। वेश्यायाम्, कण्टकार्य्याम्, सरघायां, मक्षि-
कामात्रे, चाङ्गेर्य्याम्, हिंसायां, गवेधुकायाञ्च (गडगडेधान)।
…ग्निमन्थ * पु० कर्म० (छोटगणियारी) स्वल्पगणिकारिकायाम्।
…म्लपनस * पु० अल्पः अम्लरसः पनसः कर्म०। लकुचे (डेयो)
(मान्दार)। [स्वार्थे कन् तत्रैवार्थे।
…म्ला * स्त्री० अल्पा अम्लरसा कर्म०। चाङ्गेर्य्याम् (चुकोपालङ्ग)
…र्क * पु० कर्म०। गोपालकर्कट्याम्।
…डुम्बरिका * स्त्री० कर्म०। काकोडुम्बरिकायाम्।
… * बुभुक्षायां दिवा० पर० सक० अनिट्। क्षुध्यति अक्षुधत्।
…(धा) * स्त्री० क्षुध-सम्पदादित्वात् क्विप् वा टाप्। भोजनेच्छा-
याम्। [कापथिमदिक्स्थे पर्वतभेदे च।
… * पु० क्षु-अक्। ह्रस्वशाखाशिफायुक्ते मार्कोटादिद्रुमे, दार-
… * पुं० क्षुभ-क्त नि०। मन्थनदण्डे। क्षुभितं त्रि०।
… * सञ्चलने भ्वादि० आत्म० अक० सेट्। क्षोभते अक्षुभत् अक्षो-
भिष्ट क्षुब्धः क्षुभितः। [भीत्। क्षुभितः।
… * सञ्चालने वा दिवा० अक० सेट्। क्षुभ्यति क्षुभ्नाति अक्षो-
…भित * त्रि० क्षुभ क्त। आलोडिते, व्याकुले, भीते च।
…मा * स्त्री० क्षु-मक्। (मसिना) (तिसी) अतस्याम्।
… * विलेखने तुदा० पर० सक० सेट्। क्षुरति अक्षोरीत्।
… * पु० क्षुर-क क्षु-रक् वा। नापितास्त्रे, पश्वादीनां शफे (खुर),
कोकिलाक्षे, गोक्षुर, मदनपिण्डीतके, बाणे च। [च।
…क * पु० क्षुर-क्वुन्। गोक्षुरे (गोखुरी), कोकिलाक्षे, तिलकद्रुमे
…(रि)कर्मन् * न० क्षुरस्य क्षुरिणो वा नापितस्य कर्म०। क्षौरे
मलकर्मादिकर्त्तव्ये "क्षुर(रि)कर्म न कुर्वीत जन्मनाभे च
जन्मभे" इति स्मृतिः। [क्षुरभाण्डादयोऽप्यत्र।
…धान * न० क्षुरो धीयतेऽस्मिन्। नापितास्त्राधारे (भाड)।
…धार * पु० क्षुरादौ धारेव शरपत्रधारा यत्र। नरकभेदे। [त्रि०।
…पत्र * पु० क्षुर इव पत्रमस्य। बाणे। क्षुरतुल्यपर्णयुक्ते शरपत्रादौ
…पत्रिका * पु० क्षुर इव पत्रं यस्याः। पालङ्क्यायाम्।
…(प्र)प्र * पु० क्षुरः (खुर) इव प्रयाति छिनत्ति प्र-क। (क्षुरप्रो)
इति ख्याते धातसर्ष्टे दलभेदे, तत्तुल्याग्रफलके शरे च।
…मर्दिन् * पु० क्षुरं मर्दयति घर्षयति मृद-णिनि। नापिते।
…मुण्डिन् * पु० क्षुरेण मुण्डयति मुण्ड-णिनि ६त०। नापिते।
…राह्व * पु० क्षुर इवाह्वमस्य। गोक्षुरे (गोखुरी)।

क्षुरिणी * स्त्री० क्षुर+अस्त्यर्थे इनि ङीप्। वराहक्रान्तायाम्, नापि-
तभार्य्यायाञ्च।
क्षुरिन् * पु० क्षुर+इनि। नापिते, पशौ च। [लघौ, कनिष्ठे च।
क्षुल्ल * त्रि० क्षुद्(क्षु द-क्विप् क्षुद्-शुत्) तां लाति ला-क। अल्पे,
क्षुल्लक * त्रि० क्षुधा लक्यते लक-आस्वादने कर्मणि क। नीचे,
पामरे, अल्पे च।
क्षेत्र * न० क्षि-ष्ट्रन्। देहे, अन्तःकरणे, इन्द्रिये, "इन्द्रियाणि दशै-
कञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं सङ्घातश्चे-
तना धृतिः। एतत् क्षेत्रम्" इति गीतोक्ते इन्द्रियादिसङ्घाते,
शस्याद्युत्पत्तिस्थाने केदारे, सिद्धस्थाने, कलत्रे, मेषादिराशिषु च।
क्षेत्रज * क्षेत्रे जायते जन-ड। "यस्तल्पजः प्रमीतस्य क्लीबस्य
व्याधितस्य वा। स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजो मतः"
इत्युक्ते द्वादशविधपुत्रमध्ये पुत्रभेदे। क्षेत्रजातमात्रे त्रि०।
गोक्षिकायाम्, श्वेतकण्टकार्य्याञ्च स्त्री०।
क्षेत्रज्ञ * पु० क्षेत्रं देहमात्मत्वेन जानाति ज्ञा-क। "क्षेत्राणि हि
शरीराणि बीजञ्चापि शुभाशुभम्। तानि वेत्ति स योगात्मा ततः
क्षेत्रज्ञ उच्यते" इत्युक्ते जीवात्मनि।
क्षेत्रपति * पु० ६त०। "इदं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे।
आत्मानमेव वा केचित् क्षेत्रस्य पतिमब्रुवन्" इत्युक्तेषु रुद्रादिषु,
क्षेत्रस्वामिमात्रे च। क्षेत्रपालादयोऽप्यत्र।
क्षेत्ररुहा * स्त्री० क्षेत्रे रोहति रुह-अच्। वालुकर्कट्याम्।
क्षेत्राजीव * पु० क्षेत्रं शस्योत्पादनभूमिराजीवो यस्य। कृषके।
क्षेत्रिक * त्रि० क्षेत्र+अस्त्यर्थे ठन्। क्षेत्रस्वामिनि।
क्षेत्रिन् * त्रि० क्षेत्र+अस्त्यर्थे इनि। क्षेत्रस्वामिनि।
क्षेत्रिय * पु० परक्षेत्रे देहान्तरे चिकित्स्यः परक्षेत्र+घ नि०।
देहान्तरचिकित्स्यमेहादि असाध्ये रोगे, "इत्वा॰ं क्षेत्रियो हैन
मव्यपाती" इति भट्टि, परदारनिरते क्षेत्रजपुत्रादौ च। क्षेत्र
जातमात्रे त्रि०। [त्रिकले, हैस्त्राञ्च।
क्षेप * पु० क्षिप-घञ्। निक्षेपे, निन्दायाम्, गर्वे, प्रेरणे, लङ्घने,
क्षेपक * त्रि० क्षिप ण्वुल्। क्षेपकर्त्तरि। प्रक्षेपार्थे कन्। ग्रन्थादौ
अन्यकर्तृकत्वेन निवेशिते, नाविके च। … …
… … [… इति स्मृतिः।
क्षेपण * न० क्षिप-ल्युट्। प्रेरणे, "… …
क्षेपणिका * स्त्री० क्षिप्यते … क्षिप-ण्वुल्। …
… (दाड), जालभेदे च (…)।
क्षेपीय * … क्षिप ईयसुन्। … …
… च। …मात्रे त्रि०।
क्षेपिष्ठ * त्रि० … … क्षिप इष्ठन्। … …
"… क्षेपिष्ठा …" इति स्मृतिः।
क्षेम * न० क्षि-मन्। … …
न०। … न०। … त्रि०। … …

क्षेमफला * स्त्री० क्षेमाय फलान्यस्याः। उदुम्बरद्रुमे।

क्षेव * सेवने भ्वादि० पर० सक० सेट्। क्षेवति अक्षेवीत्।

क्षै * क्षये भ्वादि० पर० अक० अनिट्। क्षायति अक्षासीत्।

क्षैत्र * न० क्षेत्राणां समूहः भिक्षादित्वात् अ। क्षेत्रसमुदाये।

क्षैरेय * त्रि० क्षीरे संस्कृतं ढञ्। क्षीरसंस्कृते यवागू-आदौ। यवाग्वाम् स्त्री० ङीप्। [रथ्य व।

क्षोणि(णी) * स्त्री० क्षु-नि वा ङीप्। धरायाम्। पृ० नि० क्षौणि-

क्षोद * पु० क्षुद-घञ्। रजसि, चूर्णे, पेषणे च।

क्षोदक्षम * त्रि० क्षोदं क्षमते अच्। विचारसहे, तत्त्वनिर्णयार्थं विचारणीये अप्रमक्षद्रूपणे वाक्ये। [तरे।

क्षोदिष्ठ * त्रि० अयमेषामतिशयेन क्षुद्रः इष्ठन् क्षोदादेशः। क्षुद्र-

क्षोभ * पु० क्षुभ घञ्। स्थैर्यमितस्ततः सञ्चलने, चित्तस्य भयादिहेतुके स्वकार्य्यासामर्थ्ये च।

क्षोभण * पु० क्षोभयति क्षुभ-णिच्-ल्यु। कामबाणभेदे, सांख्यमते प्रकृतिप्रेरके पुरुषे, ईश्वरे च।

क्षौद्र * न० क्षुद्राभिः सरघाभिर्निर्वृत्तम्। अण्। "मक्षिका कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु। मुनिभिः क्षौद्रमित्युक्तम्" इत्युक्ते मधुनि।

क्षौद्रज * न० क्षौद्राज्जायते जन+ड। मधुजाते (मोम) सिक्थके।

क्षौद्रधातु * पु० कर्म०। माक्षिके मधुनि। [मधुप्रिये त्रि०।

क्षौद्रप्रिय * पु० क्षौद्रमिव प्रियः माधुर्य्यात्। जलमधूकद्रुमे ६त०।

क्षौद्रेय * न० क्षुद्राभिः कृतम् ढञ्। सिक्थके (मोम)।

क्षौम * पु० न० क्षुमाया अतस्या विकारः अण्। अतसीवल्कलजाते वस्त्रे, दुकूले, अट्टे वस्त्रे च। क्षु-मन् प्रज्ञादित्वादण्। अट्टालिकायाम्। [याच।

क्षौरी * स्त्री० क्षुरेः प्रज्ञाद्यण्। क्षुरिकाम्, क्षुमानिर्मितकन्था-

क्षौर * न० क्षुरेण निर्वृत्तम् अण्। क्षुरनिष्पाद्ये वपनादौ।

क्ष्णु * तेजने अदा० पर० सक० सेट्। क्ष्णौति अक्ष्णावीत्।

क्ष्मा * स्त्री० क्षमते भारं क्षम-अच् उपधालोपश्च। धरायाम्।

क्ष्माभृत् * क्ष्मां पृथिवीं बिभर्ति धारयति वा भृ-क्विप् तुक् च। नृपे, पर्वते च। भूधरादयोऽप्यत्र।

क्ष्माय * विधूनने भ्वादि० आत्म० अक० सेट्। क्ष्मायते अक्ष्मायिष्ट।

क्ष्मील * निमेषे भ्वादि० पर० अक० सेट्। क्ष्मीलति अक्ष्मीलीत्।

क्ष्विड * स्नेहे भ्वादि० आत्म० अक० सेट्। क्ष्वेडते अक्ष्विडत् अक्ष्वेडिष्ट। [इत् अक्ष्वेडिष्ट।

क्ष्विद * मोचने स्नेहने च भ्वादि० अक० सेट्। क्ष्वेदते अक्ष्वि-

क्ष्विद * स्नेहे दिवा० पर० अक० सेट्। क्ष्विद्यति अक्ष्वेदीत् अक्ष्विदत्।

क्ष्वेड * अव्यक्ते शब्दे भ्वादि० पर० अक० सेट्। क्ष्वेडति अक्ष्वेडीत्।

क्ष्वेड * पु० क्ष्विड-घञ्। लोहितार्कवृक्षे, विषे, कर्णरोगे ध्वनौ च। लोहितार्कपुष्पे न०। दुरासदे, कुटिले च त्रि०।

क्ष्वेडा * स्त्री० क्ष्विड-अच्-टाप्। वीरानामाम्, सिंहनादे, वंशशलाकायाञ्च।

क्ष्वेडित * न० क्ष्विड-क्त। सिंहनादे।

क्ष्वेल * सञ्चालने, गतौ सक० क्रीडायाम् अक० भ्वादि० पर० सेट्। क्ष्वेलति अक्ष्वेलीत्, णिचि लुङि अचक्ष्वेलत्।

क्ष्वेला * स्त्री० क्ष्वेल-अ। क्रीडायाम्।

ख

ख * पु० खर्व-ड। सूर्य्ये। इन्द्रिये, देहे, पुरे, शून्ये, अभ्रे, बिन्दौ, आकाशे, स्वर्गे, सुखे च न०।

खक्ख * हासे भ्वादि० पर० अक० सेट्। खक्खति अखक्खीत्।

खग * पु० खे आकाशे गच्छतीति गम-ड। सूर्य्ये, देवे, शरे, विहगे, वायौ, सूर्य्यचन्द्रादिषु ग्रहेषु च।

खगगति * स्त्री० ६त०। "डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम्। विडीनमवडीनञ्चातिडीनं डीनडीनकम्। गतागतं प्रगतिं सम्पातः पक्षिणां गतिः" इत्युक्ते विहगगमने।

खगप * पु० खगान् पाति पा-क। गरुडे। खगपत्यादयोऽप्यत्र।

खगस्थान * न० ६त०। द्रुमस्थे कोटरे। [विहगे।

खगान्तक * न० अन्तयति अन्तं करोति णिच्-ण्वुल् ६त०। श्येन-

खगोल * पु० खं गोल इव। भूगोलोपरिस्थिते मण्डलाकारे आकाशे, तस्य संस्थितिमानविशेषो वाचस्पत्ये द्रष्टव्यः।

खच * भूतौ उत्पत्तौ च क्र्या० पर० सक० सेट्। खच्ञाति अखचीत् अखाचीत्। [खचत् ते।

खच * बन्धने अद० चुरा० उभ० सक० सेट्। खचयति ते अच-

खचर * पु० खे आकाशे चरति चर-ट। राक्षसे, स्त्रियां ङीप्। सूर्य्ये, वायौ, पक्षे, अश्वतरे च। आकाशगामिनि त्रि०।

खचित * त्रि० खच-क्त। बद्धे, संयुक्ते च।

खज * मन्थे भ्वादि० पर० सक० सेट्। खजति अखाजीत् अखजीत्।

खञ्ज * पङ्गुतायां भ्वादि० इदित् पर० अक० सेट्। खञ्जति अखञ्जीत्।

खज * पु० स्त्री० खज-अच्। दर्व्याम् (हाता), मन्थदण्डे च।

खजाका * स्त्री० खज-आक। दर्व्याम् (हाता)।

खद्योतिम * पु० खे आकाशे ज्योतिरस्य। खद्योते कीटे।

खञ्ज(ञ्जा) * पु० खञ्जि गतिवैकल्ये अच् वा तुन्। (खोंडा) पादविकले।

खञ्जखेट * पु० खञ्ज इव खेटति अच्। खञ्जनविहगे।

खञ्जखेल * पु० खञ्ज इव खेलति अच्। खञ्जनपक्षि। [हे।

खञ्जन * पु० खञ्ज+ल्यु। स्वनामख्याते विहगे। स्वार्थे कन् तत्रै-

खञ्जरीट * पु० खञ्ज इव रीयते रीङ्-गतौ कीटन्। खञ्जनविहगे।

खट * काङ्क्षे भ्वादि० पर० सक० सेट्। खटति अखटीत् अखाटीत्।

खट * पु० खट-अच्। अन्धकूपे, कफे, टङ्के, तृणे, लाङ्गले च।

खटिक • पु० खटा+ठन्। कुब्जपाणौ। (खड़ि) नियमदय्यो स्त्री०। "खटिकां लिखेत्ति" इति नैषधम्।

खटिनी • स्त्री० खटा+इनि। लेखनद्रव्ये (खड़ी) "न पतति खटिनी मलबुना दम्" इत्युद्भटः।

खटी • स्त्री० खट-अच् गौरा० ङीप्। (खड़ी) लेखनसाधनद्रव्ये।

खट्ट ० हतौ चुरा० उभ० सक० सेट्। खट्टयति ते अचखट्टत् त।

खट्टा ० स्त्री० खट्ट क्वन्। "खट्टाभिः काष्ठपट्टेव कृता खट्वेति कथ्यते" इत्युक्तायां मञ्चादाम्। [रत्नम्। खन्दपरायाम्।

खट्टिका ० स्त्री० खुद्रा खट्टा अल्पार्थे कन् अभावितपुंस्कत्वात् वा अत

खट्वाङ्ग ० पु० राजभेदे। खट्वाया अङ्गमिव। शरपञ्जरे, ईशायुधविशेषे, पृथ्वधे च। ६त० खट्वाया अङ्गे न० "खट्वाङ्गधारकः" इति षट्कर्मदीपिकम्। [षट्कर्मभेदे च।

खट्वाङ्गधर • पु० खट्वाङ्गं बिभर्त्ति धृ किप् तुक् च। शिवे,

खट्वारूढ • पु० खट्वा अम् आरुह-क्त निरुक्त०। प्रमादवति। खट्वायिते त्रि०। [खपक्किट।

खड • मन्थने भञ्जने च भ्वादि० आत्म० इदित् सक० सेट्। खण्डते।

खड • भेदे चुरा० उभ० सक० सेट्। खडयति ते अचीखडत् त।

खड ० न० खड-अच्। तृणभेदे (खड)। पानान्तरे, भेदे च पु०।

खड्डरी • स्त्री० खडत् इत्यव्यक्तशब्दं करोति कृ-ड गौरा० ङीप्। पदहारे (खिड्कि)। [लेखनद्रव्ये।

खड्डी • स्त्री० खडि+अच् नि० नलोपः गौरा० ङीप्। सनामख्याते

खड्ग • पु० खडि-ग नि० नलोपः। गण्डकशृङ्गे, तद्वति गण्डकपशौ च (गाण्डार)। चोरनामगन्धद्रव्ये, असौ च। लौहे न०।

खड्गकोष • पु० ६त०। चर्मादिमये असिपिधाने (खाप) मत्सुनि, (ढाल) खड्गावरके च। [खड्गकोषे (खाप) च।

खड्गत्र • पु० खड्गस्य पत्रमिवाच्छादकम्। (ढाल) खड्गावरके,

खड्गविधान • न० खड्गः विधीयतेऽनेन। (खाप) खड्गकोषे।

खड्गिन् • पु० खड्ग+मत्वर्थे इनि। गण्डारे। खड्गधारिणि त्रि०।

खण्ड • खडि-घञ्। भेदे "खण्डं खण्डं यदुवंशाः" इति देवीमाहात्म्यम्। विकलत्वे, इक्षुविकारे (खाँड) च न०। कर्मणि घञ्। एकदेशे पु० न०। [भेदे।

खण्डकर्ण ० पु० खण्ड इव कर्णः कन्दो यस्य। (शकरकन्द) आलु-

खण्डकालु ० पु० खण्ड इव कायति कै-क कर्म०। (शकरकन्द) आलुभेदे। [(काँदवो)

खण्डधारा ० स्त्री० खण्डे एकदेशे धारा यस्याः। कर्त्तर्याम्

खण्डन • न० खडि ल्युट्। भञ्जने, भेदने, निराकरणे च।

खण्डपरशु • पु० खण्डयति खण्डः परशुरस्य। शिवे, तच्छिष्ये जामदग्न्ये च। खण्डपर्शुरप्यत्र।

खण्डिक • पु० खण्ड+मत्वर्थे ठन्। कलाये, अर्चिभेदे, कक्षे च। क्रुद्धे त्रि०। "खण्डिकोपाध्यायः शिष्याय चपेटं ददाति" इति भाष्यम्।

खण्डित • त्रि० खडि क्त। भेदिते, छिन्ने, द्विधाकृते च। "प्रातरन्यसङ्गचिह्नैः खण्डितेर्ष्याकषायिता" इत्युक्तायां नायिकायां स्त्री०।

खण्डी • स्त्री० खण्डाते गौरा०। वनमुद्गे।

खण्डीर • पु० खण्डशः खण्डी प्रज्ञादित्वात् र। पीतमुद्गे।

खतमाल • पु० खे तमाल इव। धूमे, मेघे च। [अखदीत्।

खद ० स्थैर्ये अक० वधे सक० भ्वादि० पर० सेट्। खदति अखादीत्

खदिर • पु० खद किरच्। (खयर) द्रुमभेदे, इन्द्रे, चन्द्रे च।

खदिरपत्रिका • स्त्री० खदिरस्येव पत्रमस्याः ङीप् ततः संज्ञायां कन् कपि ह्रस्वः। अरिमेदे, लज्जालुलतायाञ्च। कन् भावे। खदिरपत्रीत्यप्यत्रैव। ["त्रिमा खदिरसारेण" इत्युद्भटः।

खदिरसार पु० ६त०। खदिरद्रुमस्य निर्यासजे सारे (खयर)

खदिरिका • स्त्री० खदिरः खदिररसोऽस्त्यस्याः ठन्। लाक्षायां तस्या हि खदिरतुल्यनिर्यासः। [(लज्जालु) लतायाञ्च।

खदिरी • स्त्री० खद-किरच् गौरा० ङीप्। लज्जालुलतायाम्, शाकभेदे, (लालझोडा) लतायाञ्च।

खदिरोपम • न० खदिर उपमा यस्य। (काँटाबाबला) द्रुमभेदे।

खद्योत • पु० खे द्योतते द्युत-अच्। सूर्ये, कीटभेदे च (जोनाकिपोका)।

खधूप • पु० खमाकाशं धूपयति धूप-अच्। (हाउइ) प्रसृतौ अग्निक्रीड़ने "मुमुचुः खधूपान्" इति भट्टिः।

खन • विदारे भ्वादि० उभ० सक० सेट्। खनति अखानीत् अखनीत् अखनिष्ट खायात् खन्यात्। [त्रि०।

खनक • पु० खन-ण्वुल्। मूषिके, सन्धिचौरे च। भूमिदारके (कोड़ा)

खनि(नी) ० स्त्री० खन-इ वा ङीप्। धातुरत्नाद्युत्पत्तिस्थाने। आकरे, भूविदारणे च।

खनित्र • न० खन-इत्र। (खोन्ता) अस्त्रभेदे।

खपुर • पु० खमिन्द्रियमाकाशं वा पिपर्त्ति पृ-क। गुवाकद्रुमे (सुपारी), भद्रमुस्तके, व्याघ्रनखे च। अङ्गगते पुरे, घटे च न०। अलसे त्रि०। [पर्णाम् (पाना)।

खमूली • स्त्री० खे आकाशे भूमिसम्बन्धेनापि मूलमस्याः। वारि-

खम्ब • गतौ भ्वादि० पर० सक० सेट्। खम्बति अखम्बीत्।

खर • पु० खं मुखबिलमतिशयेनास्त्यस्य र खमिन्द्रियं राति रा-क वा रलयोरेकत्वम्। गर्दभे, अश्वतरे, राक्षसभेदे च "चेरतुः खरदूषणौ" इति भट्टिः। कण्टकिवृक्षभेदे, काके, कङ्कविहगे, कुररपक्षिणि, ६० संवत्सरमध्ये वत्सरभेदे, रवेः पार्श्वचरे, तिक्तरसे च। महति, कठिने च त्रि० "खरविमदमन्यवक्तार्यम्" इति भाष्यम्। देवताड्वृक्षे स्त्री० टाप्।

खरकाष्ठिका ० स्त्री० खरमुग्रं काष्ठं यस्याः। बलायामोषधौ।

खरगन्धा • स्त्री० खरो गन्धो यस्याः। नागबलायाम्।

खरघातन ० पु० खरमुग्ररोगं घातयति हन+णिच्-ल्यु। मार्क-

शरे, रामे च ।
खरच्छद * पु० खरः छदः पत्रमस्य । (उलुखड) तृणभेदे ।
खरणस्(स) * त्रि० खरा कठिना नासिकास्य नासिकाया नस वान्यलोपः । णत्वञ्च । कठिननासिके ।
खरत्वच् * पु० खरा कठिना त्वक् यस्य । लज्जालुभेदे । [पद्मो ।
खरदण्ड * न० खरः पुष्पाद्यपेक्षया कठिनो दण्डो नालो यस्य ।
खरदला * स्त्री० खरं दलं यस्याः । काष्ठोडुम्बरे ।
खरदूषण * पु० खरमुग्रं दूषणमुन्मादकताहेतुदोषो यत्र । धस्तूरे (धुतुरा) । बहुदोषे त्रि० । [णिनि । रामे ।
खरध्वंसिन् * पु० खरं खरनामानं राक्षसं ध्वंसयति ध्वंस-णिच्-
खरनादिनी * स्त्री० खरं नदति नद-णिनि । रेणुकानामगन्धद्रव्ये ।
खरपत्र * पु० खराणि पत्राण्यस्य । शाकद्रुमे, मरुवके, अल्पपत्रतुलस्याञ्च । गोजिह्वायां स्त्री० टाप् ।
खरपत्रक * पु० खरपत्र+संज्ञायां कन् । तिलकद्रुमे ।
खरपादाढ्य * न० खरैः पादैः मूलैराढ्यः । कपित्थद्रुमे ।
खरपुष्पा(ष्पी) * स्त्री० खराणि पुष्पाण्यस्याः वा ङीप् । बर्बराशाके (बावुइ तुलसी) ।
खरमञ्जरी स्त्री० खरा मञ्जरी यस्याः गौरा० ङीप् । अपामार्गे ।
तनूरुह • न॰ तनौ रोहति रुह-क। लोमनि पक्षिणां पक्षे च। "सुतनुभतनूरुहोद्गतानाम्" इति नैषधम्। [ग

तन्थ • गतौ भ्वादि॰ पर॰ सक॰। तन्थति अतन्थीत्। [illegible]

तन्च • सङ्कोचने रुधा॰ पर॰ सक॰ वेट्। पाणिनीयमते [illegible] माङ्क्यादेय वैडेव वोपदेवमते उदित्करणं [illegible] तनक्ति अतञ्चीत् अताङ्क्षीत्।

तन्ज • सङ्कोचने रुधा॰ पर॰ सक॰। पाणिनीयमते [illegible] इत्यत्र तञ्जू इति पाठान्तरम् अनुनासिकपर्यात् [illegible] स्यात् वेडेव। तनक्ति अतञ्जीत् अताङ्क्षीत्।

तन्तु • पु॰ तन-तुन्। ग्राहे, अपत्ये, सन्ततौ, सूत्रे च।

तन्तुकीट पु॰ तन्तोः कीटः। (गुटिपोका) कीटभेदे।

तन्तुनाभ • पु॰ तन्तुर्नाभावस्य अच् समा॰। (माकडसा) लूतायां

तन्तुनिर्यास पु॰ तन्तुरिव निर्यासो यस्य। तालवृक्षे।

तन्तुपर्वन् • न॰ तन्तोः यज्ञोपवीतस्य दानरूपं पर्व। श्रा॰ पौर्णमास्याम्। तद्दिने हि वासुदेवाय यज्ञोपवीतदानोत्सव विहितः।

तन्तुभ • पु॰ तन्तुना सन्तत्या भाति भा-क। सर्षपे, वत्से च।

तन्तुर(ल) • तन्तुरिवास्त्यस्य र लच् वा। मृणाले।

तन्तुवाप • पु॰ तन्तून् वपति वप-अण् उप॰। तन्तुवाये [illegible]

तन्तुवाय • पु॰ तन्तून् वयति वे-अण्। (ताँति) जातिभेदे।

तन्तुविग्रहा • स्त्री॰ तन्तवो विग्रहे यस्याः। कदल्याम् [illegible] हि बहुतन्तवो प्रादुर्भवन्ति।

तन्तुशाला • स्त्री॰ तन्तूनां वयनाय शाला। (ताँतघर) [illegible]

तन्तुसन्तत • त्रि॰ तन्तुभिः सन्ततं व्याप्तम्। व्यूतवस्त्रे।

तन्तुसार • तन्तुरिव सारो [illegible]। गुवाकवृक्षे।

तन्त्र • न॰ तन्त्र-अच्। सिद्धान्ते, औषधे, कुटुम्बकृत्ये [illegible] [illegible]

[illegible]

तन्मता * स्त्री॰ तन्मयस्य भावः तल्। अनेकोद्देशेन सकृत्प्रवृत्तौ। यथा तर्पणपूजनाद्यनेककर्मोद्देशेन सकृत्स्नाने कृते सर्वकर्माङ्गस्नानसिद्धिः।

तन्तवाप(य) * पु॰ तन्वादि तन्तून् वप(य)ति वप-वे-वा अण् उप॰। तन्तुवाये (ताँति)। [गुडूच्याम्।

तन्त्रिका * स्त्री॰ तन्त्र्यते तन्त्र-ई ततः स्वार्थे कन् अणो ह्रस्वः।

तन्त्री * स्त्री॰ तत्रि-ई। गुडूच्यां, वीणाभेदे, देहशिरायां, रज्ज्वां, नदीभेदे, युवस्त्रीभेदे च।

तन्द्रा * स्त्री॰ सौ॰ तद्रि-अ। आलस्ये, निद्रायां, प्रमीलायाम्।

तन्द्रालु * त्रि॰ सौ॰ तद्रि-आलुच्। निद्राशीले।

तन्द्रि(न्द्री) * स्त्री॰ सौ॰ तद्रि इन् वा ङीप्। आलस्ये, निद्रायाञ्च।

तन्मय * त्रि॰ तदेव मयट्। तदात्मके, अभेदे च।

तन्मात्र * त्रि॰ तदेव मयूर॰। तदात्मके। सा मात्रा यस्मिन्। सांख्योक्तेषु "तस्मिंस्तस्मिंश्च तन्मात्रा तेन तन्मात्रता स्मृता। तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः।" इत्युक्तेषु पञ्चसु शब्दादिकारणीभूतेषु भूतेषु।

तन्वी * स्त्री॰ तनु+ङीप्। पृश्निपर्ण्याम्। तनुत्वगुणयुक्तायां कृशाङ्ग्याञ्च। [अतपिष्ट।

तप * दाहे उभ॰ सक॰ सेट्। तपति ते अताप्सीत् अतपीत्

तप * उपतापे सक॰ ऐश्वर्ये अक॰ दिवा॰ आत्म॰ अनिट्। तप्यते अतप्त।

तप * दाहे चुरा॰ उभ॰ सक॰ सेट्। तापयति ते अतीतपत् त।

तप * उपतापे सक॰ ऐश्वर्ये अक॰ भ्वादि॰ पर॰ अनिट्। तपति अताप्सीत्।

तप * पु॰ तप-अच्। ग्रीष्मे, स्वेदाद्यात्मके ऋतौ च।

तपती * स्त्री॰ तप-शतृ ङीप्॰। छायागर्भजा सूर्यपुत्र्यां, नदीभेदे, सूर्यसुतायाञ्च यद्योगात् कुरवस्तापत्या उच्यन्ते।

तपन * पु॰ तप-ल्यु। सूर्ये, तापे, भल्लातकवृक्षे, नरकभेदे, ग्रीष्मे, ऋतौ, अर्कवृक्षे, श्वेतामिमन्थवृक्षे, सूर्यकान्तमणौ च।

तपनतनय * पु॰ ६त॰। यमे। यमुनायां, शमीवृक्षे च स्त्री॰।

तपनी * स्त्री॰ तप-ल्यु गौरा॰ ङीप्। गोदावरीनद्याम्।

तपनीय * न॰ तप-अनीयर्। स्वर्णे। स्वार्थे कन्। अत्रैवार्थे।

तपस् * पु॰ तप-असुन्। माघे माघे मासि, शिशिरे ऋतौ, जनलोकोपरिस्थे लोकभेदे च। आलोचने, "स तपोऽकुरुत" इति श्रुतिः, स्वाश्रमविहितधर्मे, वेधे कायक्लेशके चान्द्रायणादौ कर्मणि, ज्योतिषोक्ते लग्नतो नवमस्थाने च न॰।

तपस्य * पु॰ तपसि तपश्चरणाय साधुः अनतिशीतोष्णत्वात् यत्। फाल्गुने मासि। तपसि माघे भवः यत्। कुन्दपुष्पवृक्षे। तपश्चर्ये साधुर्यत्। तपस्याभिरते त्रि॰। [

तपस्या * स्त्री॰ तपश्चरति तपस्+क्यच् च। तपश्चरणे,

तपस्विन् * त्रि॰ तपस्+अस्त्यर्थे विनि। तापसे, चान्द्रायणादिव्रतधारिणि, अनुकम्प्ये, दीने, प्रशस्ततपोवति च। घृतकरञ्जे, मत्स्यभेदे, चटके च पु॰।

तपस्विनी * स्त्री॰ तपस्+विनि ङीप्। तपोयुक्तायां स्त्रियां, जटामांस्यां, कटुरोहिण्याम्, दीनायाम्, अनुकम्प्यायां स्त्रियाञ्च।

तपात्यय * पु॰ तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले। वर्षाकाले "तपात्यये वारिभिरुक्षिता" इति कुमारः।

तपोधन * पु॰ तपो धनमतीवेष्टत्वात् यस्य। तापसे, तपनवृक्षे च।

तपोवन * न॰ ६त॰। तापससेव्ये वनभेदे, तीर्थभेदे च।

तप्तकुम्भ * पु॰ तप्तः कुम्भो यत्र। नरकभेदे।

तप्तकृच्छ्र * न॰ "षट्पलन्तु पिवेदम्भस्त्रिपलन्तु पयः पिबेत्। पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते" इत्युक्ते व्रतभेदे। "अपो घृतमुदकं वायुं तप्तं प्रतित्र्यहं पिबेत्। स तप्तकृच्छ्रः" इति गौतमोक्तः पुंस्त्वमपि। [भेदे।

तप्तपाषाणकुण्ड * न॰ तप्ता पाषाणा यत्र तादृशं कुण्डं यत्र। नरक॰

तप्तवालुक * न॰ तप्ता वालुका यत्र। नरकभेदे।

तप्तमुद्रा * स्त्री॰ तप्ता मुद्रा चिह्नम्। वैष्णवोचितधर्मत्वेऽग्निसंतापितलौहशलाकादिना कृते भगवदायुधाकारे "कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनुम्। चक्रादिचिह्नितं भूप! धारयेत् वैष्णवो नरः॥" इति ब्रह्माण्डोक्ते चिह्नभेदे।

तप्तसुराकुण्ड * न॰ तप्तायाः सुरायाः कुण्डं यत्र। नरकभेदे।

तप्तसूर्मिकुण्ड * न॰ तप्तसूर्म्याः कुण्डं यत्र। नरकभेदे।

तम * खेदे अक॰ इच्छायां सक॰ दिवा॰ शमा॰ पर॰ सेट्। ताम्यति। अतमत्-अतमीत्। तमित्वा तान्त्वा।

तम * पु॰ ताम्यति तम-अच्। तमोगुणे, मतान्तरे राहौ च। तमालवृक्षे च। रात्रौ स्त्री॰। अन्धकारे, पादाग्रे च न॰।

तमःप्रभ * पु॰ तमस इव प्रभा यस्य। नरकभेदे। नरकभूमौ स्त्री॰।

तमस् * न॰ तम-असुन्। नैजज्ञप्तिरोधके नैशादिध्वान्ते, शोके, पापे, कार्याकार्याविवेके, विशिष्टदर्शनविरोधिदोषे, सांख्योक्ते "गुरुवरणमेव तमः" इत्युक्ते गुणभेदे, राहौ च।

तमस * न॰ तम-असच्। अन्धकारे। नदीभेदे स्त्री॰। "तमसाप्रभावा." इति रघुः।

तमस्विनी * स्त्री॰ तमस् अस्त्यर्थे विनि। रात्रौ।

तमाल * पु॰ तम-कालन्। श्यामक्षपाते वृक्षे, तिलके, वरुणवृक्षे, खड्गे, वंशत्वचि च। वंशत्वचि पु॰ न॰। ताम्रकूटपत्राम्, वरुणवृक्षे च स्त्री॰ ङीप्।

तमालक * पु॰ तमाल+स्वार्थे कन्। तमालवृक्षे, वृश्चिकपत्रभेदे च न॰। पत्रके (तेजपात) पु॰ न॰।

तमालपत्र * न॰ तमालस्य पत्रमिव। तिलके

तमि(मी) * स्त्री॰ तम-इन् वा ङीप्। रात्रौ॰

[illegible]मिस्र * न॰ तमोऽस्त्यस्य र नि॰।

ः * पु॰ न॰ तल+अच्। करतले, यथा भूमितलं करतलम्। अधो-
भागे, चपेटे, तालवृक्षे च। व्यङ्गुष्ठौ, आधारे, स्वभावे च पु॰।
सर्वं न॰, त्सराख्यखड्गमुष्टौ, गर्ते च क्ली॰ न॰। [चपेटाघाते।
तलप्रहार * पु॰ तलेन चपेटेन प्रहारः प्र+हृ-घञ्। (चापड़ मारा)
तलातल * न॰ अतलादिषु सप्तसु पञ्चमे पाताले।
लिन * न॰ तल+नाशका॰ इनच्। अल्पतामे। [च त्रि॰।
लिम * न॰ तल इमन्। शय्यायाम्। विरले, स्तोके, तुच्छे, स्वच्छे
लुन * पु॰ तृ-उनन् रस्य लः। वायौ। यूनि, तरुणे च त्रि॰।
तरुण्यां स्त्री॰ ङीप्।
ल्प * पु॰ न॰ तल पक्। शय्यायाम्, अट्टालिकायाम्, दारेषु च।
ल्पकीट * पु॰ ६त॰। (छारपोका) कीटभेदे।
ल्पज * पु॰ तल्प कलत्रे जायते जन-ड। क्षेत्रजे। उत्तरपदस्थो-
ऽयम् प्रमापयनेदेति समासेऽपि नियतलिङ्ग एव तेन भ्राता-
थोऽनलज इत्येव।
ष्ट * त्रि॰ तक्ष-क्त। तनूकृते, छिद्रकृते, गुम्फिते च।
ष्टृ * पु॰ तक्ष-तृच्। (छुतार) जातिभेदे, विश्वकर्मणि, वर्धकौ च।
स * अलङ्कारे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्
इदित्। तंसयति तं तंसति तंसयति अततंसत् त अतंसीत्।
स * उत्क्षेपे दिवा॰ पर॰ सक॰ सेट्। तस्यति अतसीत् अता-
सीत्। तसित्वा तस्त्वा।
स्कर * पु॰ तत् करोति तद्+कृ-अच् नि॰। चौरे, प्रकाशाप्रका-
शाभ्यां परद्रव्यापहारके, दमनकवृक्षे, वृक्षादके च। कोपवत्यां
स्त्रियां स्त्री॰ ङीप्।
ास्कौर्य * न॰ तत् शीलमस्य ष्यञ्। नियततत्स्वभावे।
ाट(ड)ङ्क * पु॰ ताडने ताडः वा इस्य टः अङ्कः चिह्नं यस्य शक॰।
कर्णभूषणभेदे।
ाटस्थ्य * न॰ तटस्थस्य भावः ष्यञ्। औदासीन्ये, नैकट्ये च।
ाडका * स्त्री॰। राक्षसीभेदे। [(कोड़ा चावुक)।
ाडनी * स्त्री॰ ताड्यतेऽनया तड आघाते ल्युट्। कशायाम्
ाडपत्र * न॰ ताडयति अच् ताडं पत्रमिव। कर्णभूषणभेदे।
ाडि(डी) * स्त्री॰ चुरा॰ तड-इ। (ताड़ियाल) इति ख्याते वृक्षभेदे।
ाण्डव * न॰ तण्डुना मुनिना प्रोक्तमनुष्ठानं यस्य अण्। "पुंनृत्यं
ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते पुंसां नृत्ये, तृण-
भेदे, उद्धतनृत्ये च। [त्रि॰।
ाण्डवप्रिय * पु॰ ताण्डवं प्रियं यस्य। शिवे। नृत्यप्रियमात्रे
ात * पु॰ तन+क्त दीर्घश्च। पितरि। अनुकम्प्ये, पूज्ये च त्रि॰।
ात्पर्य * न॰ तत्परस्य भावः ष्यञ्। वक्तुरिच्छायाम्, अभिप्राये,
तत्परतायाञ्च। [च।
ादर्थ्य * न॰ तस्मै इदम् तदर्थं तस्य भावः ष्यञ्। तदर्थत्वे, तदुद्देश्य
ादात्म्य * न॰ स आत्मा स्वरूपं यस्य तस्य भाव ष्यञ्। अभेदे,
स्वरूपे च। [क्विप्। तादृक्। टक्। तादृशः। एतादृगनुकार्ये।

तादृश * त्रि॰ तस्येव दर्शनमस्य दृश+कञ्। तथाविधेऽर्थे।
तान * पु॰ तन-घञ्। "विस्तार्यन्ते प्रयोगाय मूर्च्छनाशेषसं-
श्रयाः। तानास्तेऽप्युनपञ्चाशत् सप्तस्वरसमुद्भवाः" इत्युक्ते
गानाङ्गे स्वरभेदे "तानप्रदायित्वमिवोपगन्तुम्" इति कुमारः।
विस्तारे च। ज्ञानविषये न॰।
तान्त्रिक * त्रि॰ तन्त्रं सिद्धान्तं तदात्मकशास्त्रं वाधीते वेद वा
ठक्। ज्ञातसिद्धान्ते, शास्त्रादिविदि, तन्त्रशास्त्राभिज्ञे च।
ताप * पु॰ तप-घञ्। सन्तापे, कष्टे च।
तापस * न॰ तपसि साधु यत्। तमालपत्रे (तेजपात)। तपः
अस्त्यस्य अण्। तपस्विनि त्रि॰। दमनकवृक्षे, बकवृक्षे च पु॰।
तापसतरु * पु॰ तापसोपयुक्तस्तरुः। इङ्गुदीवृक्षे, तत्तैलादिना
तापसानां सर्वकर्मनिर्वाहात्।
तापसप्रिय * पु॰ तापसानां प्रियः छायाप्रदत्वात्। प्रियालवृक्षे।
तापिच्छ(ञ्ज) * पु॰ तापिनं छादयति जयति वा छद-जि-वा ड।
पृषो॰। तमालवृक्षे। [वाहिनदीभेदे।
तापी * स्त्री॰ तापयति अच् गौरा॰ ङीप्। विन्ध्याचलस्थे पश्चिम-
तामरस * न॰ तामरे जले सरति सस-ड। *पद्मे, ताम्रे, स्वर्णे,
धुस्तूरे, द्वादशाक्षरपादके छन्दोभेदे च।
तामलकी * स्त्री॰ ताम्य णिच् क्विप् ताम् कर्म॰। भूम्यामलक्याम्।
तामस * पु॰ तमसि अन्धकारे अविद्यागुणे वा रतः अण्। सर्पे,
उलूके, खले च। तमसा गुणभेदेन निर्वृत्तम् अण्। सांख्योक्ते
तमोजन्ये अहङ्कारादौ त्रि॰। तमसः राहोरपत्यम् अण्।
राहुसुतेषु ज्योतिषोक्तेषु केतुषु। तमसा व्याप्ता अण् ङीप्।
रात्रौ, जटामांस्याम्, तमोऽधिकायां स्त्रियाञ्च स्त्री॰।
तामिस्र * पु॰ तमिस्रमस्त्यस्मिन् अ। सांख्योक्ते अष्टादशविधे विप-
र्ययरूपाज्ञानभेदे, भोगेच्छाप्रतिघातजे क्रोधे, तमिस्राचारिणि
राक्षसे च। अन्धकारमये नरकभेदे न॰।
ताम्बूल * न॰ तम-ऊलच् बुगागमः दीर्घश्च। (पान) इति ख्याते
नागवल्लीदले, गुवाके च।
ताम्बूलकरङ्क * पु॰ ६त॰। (पानबाटा) ताम्बूलाधारपात्रे।
ताम्बूलपत्र * पु॰ ताम्बूलमिव पत्रमस्य। पिण्डालौ।
ताम्बूलवल्ली * स्त्री॰ तम-क्विप् ताम्, बुल-मज्जने क पृ॰ दीर्घः
कर्म॰। ताम्बूलाख्या वल्ली। (पान) नागवल्ल्याम्। स्वार्थे कन्
अत्रैवार्थे। [क्रयोपजीविनि जातिभेदे।
ताम्बूलिक * त्रि॰ ताम्बूलं पण्यमस्य ठक्। (तामुलि) ताम्बूलवि-
ताम्बूलिन् * त्रि॰ ताम्बूल+अस्त्यर्थे इनि। (जातिभेदे।
ताम्र * न॰ तम-रक् दीर्घश्च। धातुभेदे रोगभेदे च।
तद्वर्णे पु॰। तद्वति त्रि॰। [श्याम्।
ताम्रकर्णी * स्त्री॰ ताम्रौ कर्णौ अ पश्चिमदिग्गजस्त्रि-
ताम्रकार * पु॰ ताम्रं ताम्रम अण्। (कां
भेदे।

ताम्रकूट * न॰ ताम्रस्य ताम्रवर्णस्य कूटमिव। (तामाकु) इति ख्याते पदार्थे। "संविदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम्" इति तन्त्रम्

ताम्रचूड * पु॰ ताम्रा चूडा यस्य। कुक्कुटे।

ताम्रत्रपुज * न॰ ताम्रञ्च त्रपु च ताभ्यां जायते जन-ड। कांस्ये, तद्योमयधातुजन्यत्वात्।

ताम्रपट्ट * न॰ ताम्रमयं पट्टम्। (पाटी) ताम्रमये लेखनपत्रे।

ताम्रपत्र * पु॰ ताम्रवर्णं पत्रमस्य। जीवशाके। कर्म॰ ताम्रमये लेखनपत्रे न॰। [इति रघुः।

ताम्रपर्णी * स्त्री॰ नदीभेदे "ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः"

ताम्रपल्लव * पु॰ ताम्राणि पल्लवानि यस्य। अशोकवृक्षे।

ताम्रपाकिन् * पु॰ पक्वेन पाकः फलपुष्पादि ताम्रः पाकः अस्त्यस्य इनि। गर्दभाण्डवृक्षे।

ताम्रपुष्प * पु॰ ताम्राणि रक्तानि पुष्पाण्यस्य। भूमिचम्पके।

ताम्रपुष्पिका * स्त्री॰ ताम्राणि पुष्पाण्यस्याः ङीप् संज्ञायां कन् ह्रस्वः। रक्तत्रिवृति (लाल तेओडि)। [क्वाथ।

ताम्रपुष्पी * स्त्री॰ ताम्राणि पुष्पाण्यस्याः ङीप्। अजायाम्, धात-

ताम्रफल * पु॰ ताम्रं फलमस्य। अङ्कोठवृक्षे। [कुम्भी)।

ताम्रमूला * स्त्री॰ ताम्रं मूलमस्याः टाप्। दुरालभायाम् (धाल्-

ताम्रवल्ली * स्त्री॰ कर्म॰। मञ्जिष्ठायाम्।

ताम्रवीज * पु॰ ताम्रं वीजं यस्य। कुलत्थे।

ताम्रवृन्त * पु॰ कर्म॰। रक्तचन्दनवृक्षे, कुलत्थे च।

ताम्रवृन्ता * पु॰ ताम्रं वृन्तमस्य। कुलत्थे, स्त्रीत्वमपि टाप्।

ताम्रशिखिन् * पु॰ ताम्रवर्णा शिखा अस्त्यस्य इनि। कुक्कुटे।

ताम्रसार * पु॰ ताम्रवर्णं सारमस्य। रक्तचन्दनवृक्षे। कर्म॰। ताम्रसारे न॰। [च।

ताम्राक्ष [illegible] * पु॰ ताम्रे अक्षिणी अस्य टच्। रक्तचक्षुषि, रक्तचन्दने

ताम्रिक * पु॰ ताम्रस्य विकारः ताम्रस्येदं वा ठक्। ताम्र [illegible] ताम्रनिर्मिते पदार्थे च।

ताय * [illegible] विस्तारे च भ्वादि॰ आत्म॰ सक॰ सेट्। तायते [illegible]। [illegible]

तार * पु॰ तॄ-णिच्-अच्, [illegible] णिच् कर्त्तरि घञ् वा। [illegible] [illegible] (स्त्री), नक्षत्रे, [illegible] [illegible] च। [illegible] स्त्री॰ न॰। [illegible] न॰। [illegible] निर्मले च त्रि॰। महाविद्या-भेदे [illegible] स्त्री॰।

तारक * पु॰ [illegible]। [illegible], भेलके, दैत्यभेदे च, [illegible] [illegible] स्त्री॰ टाप् [illegible]। [illegible]

तारकजित् * पु॰ [illegible] जितवान् जि-क्विप्। कार्त्तिकेये, [illegible]

[illegible] न॰ [illegible]। [illegible]

तारण * पु॰ तारयत्यनेन ल्युट्। भेलके। इत॰। [illegible] भवति सामान्यं तारणे सुरवन्दिते" इत्युक्ते वत्सरभेदे। तारयितरि त्रि॰।

तारतम्य * न॰ तरतमयोर्भावः ष्यञ्। न्यूनाधिक्ये। "निरतं [illegible] समेतयोर्यो यस्तारतम्यविधिमुक्तचेतसाम्" इत्युद्भटः।

तारपुष्प * पु॰ तारं निर्मलं शुभ्रत्वात् पुष्पमस्य। कुन्दवृक्षे।

तारमाक्षिक * न॰ तारस्य रूपस्य माक्षिकम् उपधातुभेदः। तुल्ये उपधातुभेदे।

तारशुद्धिकर * न॰ तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् मलशुद्धिङ्करोति कृ+ठक्। सीसके, [illegible] शुद्धिलौकसिद्धा।

तारापति * पु॰ इत॰। शिवे, चन्द्रे, वृहस्पतौ, वालिवानरे, [illegible]

तारापीड * पु॰ तारा पीडमिव यस्य। चन्द्रे, [illegible] नृपभेदे च। [illegible]

ताराभ * पु॰ तारो निर्मलः जलशून्यः यथा मेघ इव [illegible]

तारिणी * स्त्री॰ तारयति तॄ+णिच्-णिनि। शिवपत्न्यां [illegible] महाविद्यायाम्, तारणकर्त्र्यां स्त्रियाञ्च।

तार्किक * त्रि॰ तर्कं वेत्त्यधीते वा ठक्। तर्कशास्त्राध्येतरि भिन्ने च। तर्कशास्त्रञ्च गौतमकणादहरदत्तादिप्रणीत [illegible]

तार्क्ष * पु॰। कश्यपमुनौ। [रथे, अश्वकर्णवृक्षे, [illegible]

तार्क्ष्य * पु॰ तार्क्षस्यापत्यम् यञ्। गरुडे, अरुणे, सर्पे, [illegible]।

तार्त्तीयीक * त्रि॰ तृतीय-स्वार्थे ईकक्। तृतीये।

ताल * पु॰ तल-घञ्, णिच्-अच् वा। [illegible] प्रसारिताभ्याम् अङ्गुष्ठमध्यमाभ्यां परिमिते दीर्घपरिमाणभेदे तलौ, कराम्फोटे (ताल), कांस्यमयवाद्यभेदे (करताल, मुष्टौ च। लिङ्गपत्रे न॰। "तालो हादशभिर्जानुभ्यः [illegible] कीर्त्तितः" इत्युक्ते हादशधा हस्तेन जानुमण्डलादिप [illegible] कालक्षये मानभेदे, गीतादौ हिकमात्रादि [illegible] माने च।

तालक * न॰ तल-ण्वुल्। द्वारपिधानयन्त्रे, हरिताले, [illegible]

तालध्वज * पु॰ तालाङ्कितो ध्वजो यस्य। बलभद्रे।

तालनवमी * स्त्री॰ भाद्रशुक्लनवम्याम्। तस्यां देव्यै [illegible] तालदानस्य स्मृतौ विहितम्।

तालपत्र * न॰ तालस्य पत्रमिव। कर्णभूषणभेदे [illegible]

तालपर्णिका * स्त्री॰ तालस्य पर्णमिव पर्णमस्याः ङीप् [illegible] कन् ह्रस्वः। तालमूलीवृक्षे।

तालपत्री * स्त्री॰ तालस्य पत्रमिव पत्रमस्याः। मूषिकपर्ण्याम्

तालपर्ण * न॰ स्त्री॰ तालस्य पत्रमिव पर्णमस्य। मुराख्यगन्धद्रव्ये [illegible] स्त्रीत्वे ङीप्। धात्र्यां स्त्री॰ ङीप्।

तालमूली * स्त्री॰ तालस्य मूलमिव मूलमस्याः। मुषली [illegible] कन्। तालमूलिकाप्यत्र।

ालवृन्त * न० ताले करतले वृन्तं बन्धनमस्य, तालस्येव वृन्तमस्य वा। व्यजने (पाखा)। स्वार्थे कन्। अत्रार्थे।

ालाङ्क * पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य। बलदेवे।

ालिक * पु० तालेन करतलेन निर्वृत्तः ठक्। चपेटे (चापड़) (हाततालि)। ताली+स्वार्थे कन्। तालमूल्याम् स्त्री०।

ाली * स्त्री० तालेन सविषयासेन निर्वृत्ता अण्। (ताडी) ताल-जातसुरायाम्। तल+ज्वलात् अच् गौरा० ङीष्। (ताडियान्) वृक्षभेदे, तालमूल्याम्, (भुइआमला) वृक्षभेदे, आढक्याम् (अड़र), तालीशपत्राख्ये वृक्षे, तालकोद्घाटनयन्त्रे (चाबि) कुञ्चिकायाञ्च।

ालीश * न० तालीव शीतात् श्यति शो-ड। स्वनामख्याते वृक्षे।

ालीशपत्र * न० तालीशं तालीवत् शीतनाशकं पत्रं यस्य। स्वना-मख्याते वृक्षे, भूम्यामलक्याञ्च।

ालु * न० तरन्त्यनेन वर्णाः तॄ-ञुण् रस्य लः। जिह्वेन्द्रियाधिष्ठाने (तालो) स्थानभेदे। स्वार्थे कन् तालुकमप्यत्र।

ालुजिह्व * पु० तालु एव जिह्वा यस्य। कुम्भीरे, तस्य जिह्वाशून्य-त्वेऽपि तालुनैव रसास्वादात्।

ावत् * अव्य० तत्परिमाणमस्य नि०। साकल्ये, अवधौ, माने, अव-धारणे, प्रशंसायां, पक्षान्तरे, वाक्यभूषणे, तदर्थे च। "अत्रापि तावत् क्रथकैशिकानाम्" इति रघुः। तत्परिमाणवति त्रि०। स्त्रियां ङीप् तावती। [अततिकत् त।

तिक्क * गतौ भ्वादि० आत्म० सक० सेट्। तिक्कते अतिक्किष्ट णिच्।

तिक्क * आस्कन्दे बधे च स्वा० पर० सक० सेट्। तिक्नोति अतिक्कीत्।

तिक्त * पु० तिज-क्त। पर्पटद्रुमे, कुटजे, रसभेदे (तित) च। तद्वति त्रि०। पर्पटौषधौ न०। कटुकायां, पाठायां, छिक्कण्याञ्च स्त्री० टाप्।

तिक्तक * पु० तिक्त+संज्ञायां कन्। भूनिम्बे, (चिरता) चिरतिक्ते खदिरे, निम्बे, इङ्गुदीवृक्षे, तिक्तार्थे, पटोले च। कटु-तुम्ब्यां स्त्री० टाप्। [याम्।

तिक्तगन्धिका * स्त्री० तिक्तो गन्धो निर्गतोऽपि यस्याः। वराहक्रान्ता-

तिक्तगुञ्जा * स्त्री० गुञ्जेव तिक्ता राजदन्ता०। करञ्जे।

तिक्ततण्डुला * स्त्री० तिक्तस्तण्डुलोऽन्तर्भागो यस्याः। पिप्पल्याम्।

तिक्ततुम्बी * स्त्री० कर्म०। कटुतुम्ब्याम् (तितलाउ) [मङ्गराय।

तिक्तदुग्धा * स्त्री० तिक्तं दुग्धं निर्यासो यस्याः। क्षीरिण्याम्, अज-

तिक्तपत्र * पु० तिक्तं पत्रमस्य। (काकरोल) कर्कोटके।

तिक्तपर्वन् * स्त्री० तिक्तं पर्व ग्रन्थिर्यस्याः। दन्तिदूर्वायाम्।

तिक्तपुष्पा * स्त्री० तिक्तानि पुष्पाण्यस्याः। (आकनादी) पाठायाम्।

तिक्तफल * पु० तिक्तानि फलानि यस्य। कतकवृक्षे (निर्मली)।

तिक्तभद्रक * पु० भद्रं करोति भद्+ण्वुल् तिक्तोऽपि भद्रकः कर्म०। पटोले। [कायाम् (खाटकी) स्वार्थे कन् अत्रार्थे।

तिक्तरोहिणी * स्त्री० तिक्ता सती रोहति रुह-णिनि कर्म०। कटु-

तिक्तवल्ली * स्त्री० कर्म०। मूर्वालतायाम्।

तिक्तबीजा * स्त्री० तिक्तानि बीजानि यस्याः। कटुतुम्ब्याम्।

तिक्तशाक * पु० तिक्तः शाकोऽस्य। वरणद्रुमे, खदिरवृक्षे च।

तिक्तसार * पु० तिक्तः सारो निर्यासोऽस्य। खदिरे। [म्ब्याम्।

तिक्तिका * स्त्री० तिक्ता स्वार्थे कन् ह्रस्वे अत इत्त्वम्। कटु-

तिग * आस्कन्दे हिंसायाञ्च स्वादि० पर० सक० सेट्। तिग्नोति अतेगीत्।

तिग्म * न० तिज-मक् जस्य गः। तीक्ष्णे। तद्वति त्रि०।

तिग्मरश्मि * पु० तिग्मा रश्मयोऽस्य। सूर्ये। तिग्मांश्वादयोऽप्यत्र।

तिघ * घातने स्वादि० पर० सक० सेट्। तिघ्नोति अतेघीत्।

तिज * तीक्ष्णीकरणे, चुरा० उभ० सक० सेट्। तेजयति ते अती-तिजत् त।

तिज * क्षमायां स्वार्थे सन् निशाने न सन् भ्वादि० आत्म० सक० सेट्। तितिक्षते तेजते। अतितिक्षिष्ट अतेजिष्ट। [क्षाम्।

तितउ * पु० तन-डउ सन्वच्च डउ इति निर्देशात् न सलोपः। चाल-

तितिक्षा * स्त्री० तिज-क्षान्तौ स्वार्थे सन्-अ-टाप्। क्षमायां, परा-पकारादिसहने, शीतोष्णादिद्वन्द्वसहने च। [नीमे।

तितिक्षु * त्रि० तिज-सन् उ। परकृतापकारमर्षणशीतादिसह-

तित्ति(त्ती)रि * पु० तित्ति इत्यव्यक्तशब्दं राति रा-क, डि वा। (ति-तिर) पक्षिभेदे।

तिथि(थी) * पु० स्त्री० अत-इथिन् पृ० वा ङीप्। पञ्चदशसु चान्द्र-कलाक्रियारूपासु प्रतिपदादिषु, पञ्चदशसंख्यायाञ्च।

तिथिपत्र * पु० तिथीनां तिथ्युपलक्षितचन्द्रकलानां पत्रः ज्ञाप-कं पत्रम्। रूढौ पञ्चाङ्गाख्यायाम्। (न०) तिथीनां सारी।

तिथिप्रणी * पु० तिथीन् प्रणयति सम्पाद्य निर्णयति प्र+नी-क्विप्। चन्द्रे "सावनतो तिथिप्रणीः" इति माघः।

तिन्तिडीक * न० तिम च द्वित्वादि अनीकादयश्च नि०। चुक्रे। (तेतुल) वृक्षभेदे पु०। क-स्वार्थे। तिन्तिड्यप्यत्रार्थे स्त्री०। तत्र वा तन्वी तिन्तिलीकादयोऽप्यत्र।

तिन्दु * पु० तिज-दु-मुगागमादि० नि०। (गाब) इति ख्याते वृक्षे। स्वार्थे कन्। (गाब) इति ख्याते वृक्षे पु० स्त्री० स्त्रीत्वे ङीप्।

तिप * क्षरणे भ्वादि० आत्म० सक० सेट्। तेपते अतेपिष्ट अतिप्त।

तिम * आर्द्रीभावे भ्वादि० पर० सक० सेट्। तेमति अतेमीत्।

तिम * आर्द्रीकरणे दिवा० पर० सक० सेट्। तिम्यति अतेमीत्।

तिमि * पु० तिम इन्। मत्स्ये, समुद्रे, महामत्स्यभेदे च "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव" इति रामायणम्।

तिमिङ्गिल * पु० तिमिं महामत्स्यं गिलति गृ-खश् मुम् गस्य लत्वञ्च। महामत्स्ये [illegible]

तिमित * त्रि० तिम-क्त [illegible]

तिमिर * न० तिम [illegible]

[illegible]

[illegible] [illegible] । [illegible]

[illegible] [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] मूत्राशय (मृगी)।

[illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible]

चतुष्पदयोः, तद्दुग्धं च यामिनं हि तज्जातेन भवति।

तैलम्पाना * स्त्री॰ तैलस्य पानोऽत्र ष नि॰ मुम् च स्वधायाम्, तद्-दन्तरिति ख्याते च। [गन्धद्रव्यभेदे।

तैलसाधन * न॰ तैलं साधयत्यनेन सिध णिच्-ल्युट्। (काकला)

तैलीन * त्रि॰ तिलानां भवनं क्षेत्रं खञ्। तिलभवनयोग्ये क्षेत्रे।

तैष * पु॰ तिष्यनक्षत्रयुक्ता पौर्णमासी तैषी साऽस्मिन् मासे अण्। चान्द्रपौषमासे। [पौषस्य पौर्णमास्याम्।

तैषी * स्त्री॰ तिष्येण नक्षत्रेण युक्ता पौर्णमासी अण्। चान्द्र-

तोक * न॰ पौ॰ तु+क तस्य नेत्वम्। अपत्ये, पुत्रे, दुहितरि च।

तोटक * न॰ द्वादशाक्षरपादके छन्दोभेदे। [णिच्। अतुतोडत्।

तोड * अनादरे भ्वादि॰ पर॰ सक॰ सेट्। तोडति अतोडीत्।

तोडी(री) * स्त्री॰ तुड-अच् गौरा॰ ङीष् वा डस्य रः। स्वनामख्याते तैलसाधने धान्यभेदे। [चाबनदण्डे च।

तोत्र * न॰ तुद-ष्ट्रन्। गवादिताडनदण्डे (पाचनि), गजादि-

तोदन * न॰ तुद्यतेऽनेन ल्युट्। तुण्डे मुखे।भावे ल्युट्। व्यथायाम्।

तोमर * पु॰ न॰ तु-विच् तोः गतेः म्रियतेऽनेन मृ-अच् हस्तक्षेप्ये शस्त्राय दण्डाकारेऽस्त्रभेदे (शावल)।

तोमरिका * स्त्री॰ तोमर+संज्ञायां कन्। आढक्याम्। [नखने च।

तोय * न॰ तौ॰ तु+विच् तवे पूर्त्यै याति या-क। जले, पूर्वाषाढा-

तोयकाम पु॰ तोयं कामयते कम-अण्। जलवेतसे। जलाभिला-षुके त्रि॰।

तोयकृच्छ्र * न॰ जलमात्रपानरूपे व्रतभेदे। [न॰। जलदातरि त्रि॰।

तोयद * पु॰ तोयं ददाति दा+क। मेघे, मुस्तके च। घृते

तोयधि * पु॰ तोयानि धीयन्तेऽत्र धा-कि। समुद्रे। तोयनिधा-दयोऽप्यत्र।

तोयपिप्पली * स्त्री॰ तोये पिप्पलीव। (काँचड़ा) शाकभेदे, शाकु-न्याख्ये। [हृषे।

तोयपुष्पी * स्त्री॰ तोयेन बहुजलदानेन पुष्पाण्यस्याः। पाटला-

तोयप्रसादन * पु॰ तोयं प्रसादयति फलयोगेन प्र+सद णिच्-ल्यु। कतके (निर्म्मलि)।

तोयफला * स्त्री॰ तोयप्रधानं फलं यस्याः। इर्वारौ, कर्कटीभेदे च।

तोयवल्ली * स्त्री॰ तोयमात्रस्थितस्थाने वल्ली। कारवेल्ले (उच्छे)।

तोयसूचक * पु॰ तोयं तोयवर्षं सूचयति स्वैव सूच-ण्वुल्। भेके।

तोरण * पु॰ न॰ तुर+युच्। बहिर्द्वारे, स्कन्धोपरिस्थे शिखाकारे काष्ठे, द्वारबाह्यभागे च। कन्धरायां न॰।

तोल * पु॰ न॰ तुल-अच्। गुञ्जाशीतिपरिमाणे कर्षे। स्वार्थे कन् ण्वुल् वा। तोलकमप्यत्र।

तौर्य्य * न॰ तूर्य्यं मुरजादौ वाद्ये भवम् अण्। मुरजादिध्वनौ।

तौर्य्यत्रिक * न॰ त्रयः परिमाणमस्य कन् तौर्य्योपलक्षितं त्रिकम्। नृत्यगीतवाद्येषु समुदितेषु। "अनेऽपि तौर्य्यत्रिकम्" इति नैष-धम्।

तौलिक * पु॰ तूल्या जीवति ठक्। चित्रकरे। [घीत्।

त्यज * हानौ दाने च भ्वादि॰ पर॰ सक॰ अनिट्। त्यजति अत्या-

त्यद् * त्रि॰ त्यज-अदि डित्। तच्छब्दार्थे "यो वा स्यो वा भवाम्य-हम्" इति [illegible]।

त्यागिन् * त्रि॰ त्यज-घिनुण्। दातरि, शूरे, वर्जनशीले, कर्मफल-त्यागिनि च। "यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते" इति गीता।

त्रक * गतौ भ्वादि॰ आत्म॰ सक॰ सेट्। त्रकते अत्रकिष्ट।

त्रख * गतौ भ्वादि॰ पर॰ सक॰ सेट्। त्रखति अत्रखीत् अत्राखीत्।

त्रङ्घ * गतौ भ्वादि॰ पर॰ सक॰ सेट् इदित्। त्रङ्घति अत्रङ्घीत्।

त्रग * गतौ भ्वादि॰ पर॰ सक॰ सेट् इदित्। त्रङ्गति अत्रङ्गीत्।

त्रद * चेष्टायां भ्वादि॰ पर॰ अक॰ सेट् इदित्। त्रन्दति अत्रन्दीत्।

त्रप * लज्जायां भ्वादि॰ आत्म॰ अक॰ वेट् षा घ॰। त्रपते अत्रपिष्ट अत्रप्त। णिच्। त्रपयति त्रापयति। त्रपा।

त्रपा * स्त्री॰ त्रप-भावे अङ्। लज्जायाम्। अच्। कुलटायाम्। कुले, कीर्त्तौ च। [सीसके, रङ्गे च।

त्रपु * न॰ अग्निं दृष्ट्वा त्रपते लज्जते इव लज्जया द्रवीभवति वा।

त्रपुटी * स्त्री॰ त्रप-उटङ् गौरा॰ ङीष्। सूक्ष्मैलायाम्।

त्रपुष * न॰ त्रपते क्विप् त्रप् उष दाहे क क॰। कर्कटीफले। गौरा॰ ङीष्। (खीरा) (शसा) इति ख्याते फले।

त्रपुस् * न॰ त्रप-उसि। रङ्गे।

त्रय * न॰ स्त्री॰ त्रयाणामवयवः त्रयोऽवयवा येषां वा अयच्। त्रित्व-संख्यायाम् "ऋणत्रयमपाकृत्य" इति मनुः। स्त्रीत्वपक्षे ङीप्। "असौ नरग्निषत्रयी" इति माघः। त्रित्वसंख्याविशिष्टे त्रि॰। स्त्रियां ङीप्। ऋगादिवेदत्रये, "त्रयीव नीताङ्गगुणेन विस्त-रम्" इति नैषधम्। ब्रह्मादिमूर्त्तित्रये, पुरन्ध्र्याम्, सुमतौ, सोमराजीवृक्षे च।

त्रयीधर्म * पु॰ त्रय्या वेदत्रयेण विधीयमानो धर्मः शाक॰। वैदिके धर्मे ज्योतिष्टोमादौ।

त्रयोदशन् * त्रि॰ त्रयश्च दश च, त्रयाधिका वा दश। त्र्यधिकदश-संख्यान्विते। तत्पूरणे तु डट्। त्रयोदश त्रि॰। चन्द्रस्य त्रयो-दशकलाक्रियारूपे तिथौ स्त्री॰ ङीप्। [अतित्रसत् त।

त्रस * गतौ ग्रहे निवेधे च चुरा॰ उभ॰ सक॰ सेट्। त्रसयति ते

त्रस * भासे वा॰ चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् इदित्। त्रंसयति ते त्रंसति अतत्रंसत् त अत्रंसीत्।

त्रस * भये वा दिवा॰ पक्षे भ्वादि॰ कण्वा॰ पर॰ अक॰ सेट्। त्रसति त्रस्यति अत्रसीत् अत्रासीत् त्रेसतुः तत्रसतुः।

त्रस * न॰ त्रस-भये घञर्थे क। वने। त्रस इतौ अच्। जङ्गमे त्रि॰।

त्रसरेणु * पु॰ त्रसः चलो रेणुः कर्म॰। "जालान्तरगते भानौ सूक्ष्मं यद्दृश्यते रजः। प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते" इत्युक्ते गवाक्षान्तर्गतसूर्यकिरणेषु दोधूयमाने परमाणुषट्कात्मके

त्रिनयन • पु॰ त्रीणि नयनानि यस्य। क्षुभ्नादिषु पाठात् संज्ञायामपि न णत्वम्। शिवे। नेत्रत्रययुक्ते त्रि॰। दुर्गायाम् स्त्री॰ टाप्। त्रिनेत्रादयोऽप्यत्र तत्र वा णत्वमिति भेदः।

त्रिनेत्रा • स्त्री॰ त्रीणि नेत्राणीव यस्याः। वाराहीकन्दे।

त्रिपताक • न॰ तिस्रः पताका इव यत्र। पताकाकारवलित्रयान्विते ललाटे। मध्यमानामिकामध्यमेवीमात्रशिष्टाङ्गुलिसमूहोन्नतत्वेन त्रिपताकाकारे करे पु॰। "त्रिपताकं करं कृत्वा" इत्यादि तन्त्रसारे अनामिकाग्रस्पर्शनिर्देशने स्थितम्।

त्रिपथगा • स्त्री॰ त्रयाणां पथां समाहारः पथ्समा॰ तेन गच्छति गम-ड। गङ्गायाम्। [भत्वात् पद्भावः। छन्दोभेदे।

त्रिपदा • स्त्री॰ त्रयः पादा यस्य पादस्य पद्भावः टाबृचीति टापि

त्रिपदी • स्त्री॰ त्रयः पादा यस्याः पादस्य पद्भावे ङीपि पद्भावः। (गोयालिया) गोधापदीलतायाम्। छन्दोभेदे, हंसपद्यां, हस्तिगात्रबन्धे, तत्पादबन्धने, "त्रिपदीच्छेदिनामपि" इति रघु, कुम्भादिपात्राधारे च (तेपाया)। स्वार्थे कन् ह्रस्वः। त्रिपदिकाप्यत्र।

त्रिपर्ण • त्रीणि त्रीणि पत्राणि पर्णान्यस्याः। किंशुके। वनकार्पास्यां स्त्री॰ वा टाप्। ङीप् शालपर्ण्यां, पृश्निपर्णीभेदे च।

त्रिपाद् • पु॰ त्रयः पादा यस्य पद्भावः। विष्णौ "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति श्रुतिः, ज्वरे च।

• पु॰ त्रिभिः कर्णाभ्यां जिह्वया च पिबति सादति जलं पा-क। यात्रोदिते सम्बर्ष छागभेदे।

त्रिपि(वि)ष्टप • पु॰ मर्त्यपातालापेक्षया तृतीयं पि(वि)ष्टपं भुवनम् पृषो॰ विसन्धस्य पूर्वाकर्षता। स्वर्गे।

त्रिपुट • पु॰ त्रयः पुटा यस्य। (खेसारी) कलायभेदे, शरे, तालकहस्ते, गोक्षुरे, वस्त्रभेदे च। सूक्ष्मैलायां, मल्लिकायां, (तेवोड़ि) त्रिवृदोषधौ, कर्णस्फोटायां, देवीभेदे च। स्त्री॰ टाप्। त्रिपुटी इत्यन्ये वा ङीप्। त्रयाणां पुटानां समाहारः। पुटत्रये स्त्री॰ ङीप्।

त्रिपुटीफल • पु॰ त्रिपुटी पुटत्रयं फलेऽस्य। एरण्डवृक्षे।

त्रिपुण्ड्र • न॰ त्रयाणां पुण्ड्राणां रेखाकाराणां समाहारः। समाहारे तिर्यग् रेखात्रयात्मके, भस्मरेखात्रयात्मके च तिलकभेदे। स्वार्थे कन्। "ललाटे भस्मना तिर्यक् त्रिपुण्ड्रकम्" इत्युक्ते तिलकभेदे।

त्रिपुर • पु॰ त्रीणि स्वर्णादिमयानि पुराण्यस्य। असुरभेदे। समाहारेद्विगु पात्रा॰ न ङीप्। पुरत्रयमात्रे न॰।

त्रिपुरान्तक • पु॰ ६त॰। शिवे। त्रिपुरहरादयोऽप्यत्र।

त्रिपुरा • स्त्री॰ त्रीन् ब्रह्मादिदेवान् पुरति पुर-क। दुर्गायाम्, ... इति (काकनेचोड़ि)।

त्रिपुष्कर • न॰ ज्योतिषोक्तभेदेन त्रिषु तिथिषु वारेषु नक्षत्रे योगे "... ... इत्यादिके ...

नक्षत्रे च त्रिपुष्करम्।" इति ज्योतिषोक्ते योगभेदे पु॰।

त्रिभण्डी • स्त्री॰ त्रीन् वातादिदोषान् भनक्ति भञ्ज-परिमाणे अण्। त्रिवृति (तेवोड़ि)। [यौति" इति गीतावली।

त्रिभुज • न॰ त्रयो भुजा यस्य। त्रिकोणक्षेत्रे "त्रिभुजे भुजयो-

त्रिभुवन • न॰ त्रयाणां भुवनानां लोकानां समाहारः पात्रा॰ न ङीप्। त्रिलोक्यां, मिलितेषु स्वर्गमर्त्यपातालेषु च।

त्रिमधु • न॰ त्रयाणां मधूनां मधुराणां समाहारः। "घृतं तिला माक्षिकं च त्रितयं मधुरत्रयम्" इत्युक्ते मधुरत्रये। ऋग्वेदोक्ते "मधुवाता" इत्यादिके मन्त्रत्रिकभेदे, तदभिज्ञे च पु॰।

त्रिमार्गगा • स्त्री॰ त्रिभिर्मार्गैर्गच्छति गम-ड। गङ्गायां "त्रिमार्गगेव त्रिदिवस्य मार्गे" इति कुमारः। [(दामड़ा) तृणभेदे।

त्रियष्टि • स्त्री॰ त्रिषु वातादिषु यष्टिरिव निवारकत्वात्। (खेत-

त्रियामा • स्त्री॰ त्रयो यामा प्रहरा यस्याः। "त्रियामां रजनीं ..." इत्युक्तायां रात्रौ, हरिद्रायाम्, नील्यां, कृष्णत्रिवृति च।

त्रिरात्र • न॰ तिसृणां रात्रीणां समाहारः अच् समा॰। रात्रित्रये, तद्दुक्तसाध्ये यज्ञभेदे च "त्रिरात्रमहर्निर्भेदेन्" इति श्रुतिः।

त्रिरेख • पु॰ तिस्रो रेखा यस्य। शङ्खे।

त्रिलोकी • स्त्री॰ त्रयाणां स्वर्गादीनां लोकानां समाहारः ङीप्। लोकत्रये "यदि त्रिलोकी गणनापरा" इति नैषधम्।

त्रिलोकेश • पु॰ त्रयाणां लोकानामीशः प्रभुः [illegible]। सूर्ये, शिवे, विष्णौ च। [illegible]

त्रिलोहक • न॰ त्रयाणां लोहानां समाहारः। सुवर्ण-

त्रिवर्ग • पु॰ त्रयाणां धर्मादीनां वर्गः। धर्मार्थकामेषु [illegible] त्रिफलायां, [illegible] "[illegible]" [illegible]

[illegible]

त्रिवर्ण • पु॰ [illegible]

[illegible]

[illegible]

त्रिविक्रम • पु॰ [illegible]

[illegible]

[illegible]

[illegible]

त्रिवेणी • स्त्री॰ [illegible]

मोचिकायाम्।　　　[प्रवाहे च दक्षिणे उत्तरे च प्रयागे।

त्रिवेणी * स्त्री॰ तिस्रः वेण्यः प्रवाहा यत्र कप्। युक्तप्रवाहे युक्त-

त्रिवेणु * पु॰ त्रयो वेणवो यत्र। रथमुखस्यावयवभेदे।

त्रिवेदिन् * पु॰ त्रयो वेदाः पाठ्यत्वेन सन्त्यस्य इनि। ऋगादि-
　वेदत्रयपाठके।　　　[मार्जारे, चातके, खद्योते च।

त्रिशङ्कु * पु॰ सूर्यवंशीयनृपभेदे। त्रिषु अवयवेषु शङ्कुरिव। शलभे,

त्रिशाखपत्र * पु॰ तिस्रः शाखा अस्य तादृशं पत्रं यस्य। विल्वे।

त्रिशिख * पु॰ तिस्रः शिखाः प्रतिपत्रमस्य। विल्वे, राक्षसभेदे
　च। त्रिशूले, मण्डलान्तरे च न॰। शिखात्रयवति माणवकादौ
　त्रि॰।

त्रिशिरस् * पु॰ त्रीणि शिरांस्यस्य। राक्षसभेदे, ज्वरे, कुवेरे च।

त्रिशीर्षक * न॰ त्रीणि शीर्षाण्यस्य कप्। त्रिशूले।

त्रिशूल * न॰ त्रीणि शूलानि शिखाग्राणि यत्र। स्वनामख्याते
　अस्त्रभेदे।　　　[त्रि॰। स्त्रियां ङीप्।

त्रिशूलिन् * पु॰ त्रिशूलमस्त्यस्य इनि। शिवे। त्रिशूलधारिमात्रे

त्रिशृङ्ग * पु॰ त्रीणि शृङ्गाण्यस्य। त्रिकूटपर्वते।

त्रि(ष)ष्टुप् * स्त्री॰ त्रिषु स्थानेषु स्तुभ्नाति स्तुभ-क्विप् षत्वं वेः
　संप्रसारणं वा। एकादशाक्षरपादके छन्दोभेदे।

त्रिसन्ध्य * न॰ तिसृणां सन्ध्यानां समाहारः। त्रिकाले प्राह्णापराह्ण-
　मध्याह्नरूपकालत्रये। "त्रिसन्ध्यं यः पठेन्नित्यम्" इति।

त्रि(ष)सवन * न॰ त्रीणि सवनानि यत्र काले वा षत्वम्। त्रिकाले।
　समाहारद्विगुः। त्रैकालिके स्नानत्रये च। "वाग्यतस्त्रि(ष)-
　षवणं चरेत्" इति स्मृतिः।

त्रिस्रोतस् * स्त्री॰ त्रिषु लोकेषु स्रोतो यस्याः। गङ्गायाम्।

त्रिहल्य * त्रि॰ त्रिवारं हलेन कृष्टं यत्। त्रिवारकृष्टे क्षेत्रे।

त्रिहायणी * स्त्री॰ त्रयो हायना वयोमानमस्याः ङीप् णत्वम्।
　त्रिवर्षायां गवि।　　　[अत्रुटीत्।

त्रुट * छेदने दिवा॰ तुदा॰ कु॰ पर॰ सक॰ सेट्। त्रुट्यति त्रुटति

त्रुट * छेदने चुरा॰ आत्म॰ सक॰ सेट्। त्रोटयते अतुत्रुटत।

त्रुटि(टी) * स्त्री॰ त्रुट-इन् किच्च वा ङीप्। लेशे, संशये, सूक्ष्मै-
　लायां, निमेषद्वयरूपे कालभेदे, हानौ च।

त्रुम्(प)प * वधे भ्वादि॰ पर॰ सक॰ सेट्। त्रुम्पति अत्रुम्पीत्।

त्रुम्(फ) * वधे भ्वादि॰ पर॰ सक॰ सेट्। त्रुम्फति अत्रुम्फीत्।

त्रुप(फ) * वधे भ्वादि॰ पर॰ सक॰ सेट्। त्रोप(फ)ति अत्रोपी-
　(फी)त्।

त्रेता * स्त्री॰ त्रीन् इता नि॰। दक्षिणाग्निगार्हपत्याहवनीयात्मके
　अग्नित्रये, चतुर्युगान्तर्गते युगभेदे, द्यूतक्रीडा-
　[illegible] त्रीन् दायान् [illegible]
　[illegible]
　[illegible] इति [illegible]।

त्रेधा * अव्य॰ त्रि-प्रकारार्थे धाच् [illegible]। त्रिप्रकारे।

त्रै * पालने भ्वादि॰ आत्म॰ सक॰ अनिट्। त्रायते अत्रास्त।

त्रैगुणिक * त्रि॰ त्रिगुणार्थं प्रयच्छति त्रिगुणं गृहीत्वैकगुणं प्रयुङ्क्ते
　"तत्प्रयच्छति गर्ह्यम्" इति ठक्। एकगुण दत्त्वा त्रिगुणं ग्रहो-
　तरि वार्द्धुषिकभेदे।

त्रैगुण्य * न॰ त्रयाणां गुणानां सत्त्वरजस्तमसां समाहार त्र-
　स्वार्थे ष्यञ्। सत्त्वादिषु गुणेषु, "त्रैगुण्यविषया वेदा" इति
　गीता। गुणत्रयकार्य्यपुण्यापुण्यकर्मफलयुक्ते संसारे च।

त्रैध * न॰ त्रिप्रकारम्। त्रि-धमुञ्। त्रिप्रकारार्थे।

त्रैलोक्य * न॰ त्रयाणां लोकानां समाहारः ततः स्वार्थे ष्यञ्। स्वर्ग-
　मर्त्यपातालात्मके लोकत्रये।

त्रैलोक्यविजया * स्त्री॰ त्रैलोक्यं विजयते सेवने स्वाधीनं करोति
　वि+जि-अच्। भङ्गायाम् (भाङ)।

त्रैविद्य * पु॰ तिस्रो विद्याः समाहृताः ऋग्यजुःसामरूपास्त्रिविद्यं
　तदधीते वेद वा अण्। वेदत्रयाभिज्ञे।

त्रैष्टुभ * न॰ त्रिष्टुबेव स्वार्थे अण्। एकादशाक्षरपादके छन्दोभेदे।

त्रोटि(टी) * स्त्री॰ पु॰ त्रुट-इ वा ङीप्। कट्फले, चञ्चुम् (पाखि-
　ठोंट), पक्षिभेदे, मत्स्यभेदे च।

त्रोत्र * न॰ त्रै-उत्र। गवादिताडने (पाँचनि) लगुडे।

त्रौक * गत्यां भ्वादि॰ आत्म॰ सक॰ सेट्। त्रौकते अत्रौकिष्ट
　णिच्। अतुत्रौकत् त।

त्र्यम्बक * पु॰ त्रीणि अम्बकानि नेत्राण्यस्य व्युत्पत्त्यन्तर वाक्यस्य
　शिवे। क्वचित् भाषायामपि इयङादेशस्येष्टत्वात् त्रियम्ब-
　कोऽप्यत्र "त्रियम्बकं संयमिनं ददर्श" इति कुमारः।

त्र्यम्बकसख * पु॰ ६त॰ टच् समा॰। कुवेरे।

त्र्यहस्पर्श * पु॰ त्रयाणामह्नां तिथीनां स्पर्शो यत्रैकस्मिन् सौरदिने।
　तिथित्रयस्पर्शयुक्ते एकस्मिन् सौरदिने।

त्र्यहस्पृश् * पु॰ त्रीणि अहानि वारान् स्पृशति स्पृश-क्विन्। सर्व-
　कर्मानर्हकारिण्यामेकायां तिथौ।

त्र्यैणी * स्त्री॰ त्रीणि एतानि कर्बुराणि यस्याः ङीप् तस्य
　(सजारुलोम) शल्यकीलोमनि।

त्व * त्रि॰ तन-विच् अन्य अः। भिन्ने। अन्यस्मिन्नर्थे सर्वनामसु।

त्वक्पञ्चक न॰ त्वचः पञ्चकम्। "न्यग्रोधोदुम्बराश्वत्थपारीषप्लक्ष-
　पादपाः। पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पञ्चकं मतम्।" इत्युक्ते
　न्यग्रोधादिवल्कले।　　　[च। हिङ्गुपत्र्यां स्त्री॰ ङीप्।

त्वक्पत्र * न॰ त्वगिव पत्रमस्य। गुडत्वचि (दारचिनि), तेजपत्रे

त्वक्पुष्प * न॰ त्वचः पुष्पमिव। रोमाञ्चे। किलासरोगे पु॰ स्त्री॰
　स्त्रीत्वे ङीप्।　　　[ङीप्।

त्वच * कार्श्ये भ्वादि॰ पर॰ सक॰ सेट्। त्वचति अत्वचीत् अत्व-

त्वच * संवृतौ भ्वादि॰ पर॰ सक॰ सेट्। त्वचति अत्वचीत्।

त्वक्सार * पु॰ त्वचि त्वक् वा सारोऽस्य। वंशे, गुडत्वचि च
　(दारचिनि)।

त्वक्सार ० पु॰ त्वचि फलश्लकमे सारोऽस्य। सारङ्गे, तनीरे।
त्वक्सुगन्ध ० पु॰ त्वक्सुगन्धात्मा यस्मात् ६ब॰। इक्षिकन्दे।
त्वच ० संवरणे तुदा॰ पर॰ सक॰ सेट्। त्वचति अत्वाचीत् अत्व-
चीत्। [गुडत्वचि च।
त्वच्(चा) ० स्त्री॰ त्वच-सम्प॰ क्विप् वा टाप्। वल्कले, चर्मणि,
त्वच ० न॰ त्वच-अच्। चर्मणि, वल्कले, त्वक्पत्रे च (तेजपात)।
त्वचिसार ० पु॰ त्वचि सारोऽस्य हलदन्ता॰ सप्तम्या अलुक्। वंशे।
त्वद् ० त्रि॰ तन क्विप् अतो दः तुक् च। अन्यार्थे सर्वनामायम्।
त्वञ्च ० गतौ भ्वादि॰ पर॰ सक॰ सेट्। त्वञ्चति अत्वञ्चीत्। तञ्चि
त्वा तञ्चा। [ञ्चीत्। मतान्तरे ष्वादेत् अन्यत्र सेट्।
त्वञ्च ० सङ्कोचे रुधा॰ पर॰ सक॰ वेट्। त्वनक्ति अत्वञ्चीत् अत्वा-
त्वर ० वेगे भ्वादि॰ आत्म॰ अक॰ सेट् घटा॰। त्वरते अत्वरिष्ट।
णिच् त्वरयति। त्वरा।
त्वरा ० स्त्री॰ त्वर-अङ्। वेगे, अभीष्टलाभार्थे विलम्बासहने च।
त्वरित ० न॰ त्वर-क्त। शीघ्रे। तद्वति त्रि॰। [शीघ्रोच्चारिते।
त्वरितोदित ० त्रि॰ त्वरितं शीघ्रं यथा तथोदितमुच्चारितम् वद-क्त।
त्वष्टृ ० पु॰ त्वक्ष-तृन्। देवशिल्पिनि विश्वकर्मणि, द्वादशादित्य-
मध्ये आदित्यभेदे, तक्षकारिणि (छुतार) वर्णसङ्करभेदे,
चित्रानक्षत्रे च। [क्विप्। तादृक्। एतादृगप्युक्तार्थे।
त्वादृश ० त्रि॰ तवेव दर्शनमस्य कञ्। त्वत्सदृशे। ट। तादृशः।
त्वाष्ट्र ० पु॰ त्वष्टुरपत्यम्। वृत्रासुरे। संज्ञानाम्न्यां सूर्यपत्न्याम् स्त्री॰
ङीप्। त्वष्टा देवताऽस्य अण्। चित्रानक्षत्रे।
त्विष्(षा) ० स्त्री॰ त्विष सम्प॰ क्विप् वा टाप्। दीप्तौ।
त्विष ० दीप्तौ भ्वादि॰ उभ॰ अक॰ अनिट्। त्विषति ते। अत्वि-
क्षत् अत्विक्षत।
त्विषांपति ० पु॰ ६त॰ अलुक्समा॰। सूर्ये।
त्सर ० छद्मगतौ भ्वादि॰ पर॰ सक॰ सेट्। त्सरति अत्सारीत्।
त्सरु ० पु॰ त्सर-उ। खड्गमुष्टौ।

थ

थ ० पु॰ थुड-ड। पर्वते, भयत्रारके, व्याधिभेदे, भयचिह्ने, भक्षणे
च। रक्षणे, मङ्गले, भये च न॰।
थुड ० संवृतौ तुदा॰ कुटा॰ पर॰ सक॰ सेट्। थुडति अथुडीत्।
थुत्कार ० पु॰ थुदित्यव्यक्तशब्दस्य कारः कृ-घञ्। निष्ठीवनत्यागा-
नुकरणशब्दे।
थुर्व ० वधे भ्वादि॰ पर॰ सक॰ सेट्। थूर्वति अथूर्वीत्। थूर्णः।

द

द ० पु॰ दा-दैप वा क। पर्वते, दत्ते, खण्डने च। भार्यायाम् स्त्री॰।
दातरि त्रि॰ "दे! अः पतिर्विदुषि" इति नैषधम्।

दंश ० पु॰ दन्श-अच्। वनमक्षिकायाम् (डाँश)। दन्श करणादौ
घञ्। कर्मणि, मर्मणि, दोषे, खण्डने, सर्पाघाते, दन्ते च।
दंशन ० न॰ दन्श-भावे ल्युट्। दन्तादिना खण्डने। करणे
ल्युट्। वर्मणि।
दंशित ० त्रि॰ दंशः वर्म सञ्जातोऽस्य। कृतसन्नाहे, धृतवर्मणि च।
दंष्ट्रा ० स्त्री॰ दशत्यनया दन्श+ष्ट्रन् अजा॰ न ङीप्। दन्तभेदे,
दन्तपङ्क्तिद्वयप्रान्तस्थायां द्विगुणाकृतायां दन्तावलौ च।
दंष्ट्रिन् ० पु॰ दंष्ट्रा+अस्त्यर्थे इनि। शूकरे, सर्पे च। दंष्ट्रायुक्ते त्रि॰।
दक्ष ० वृद्धौ शीघ्रार्थे च भ्वादि॰ आत्म॰ अक॰ सेट्। दक्षते अदक्षिष्ट।
दक्ष ० त्रि॰ दक्ष-अच्। निपुणे, कार्यकुशले, शिक्षिते, अनलसे च।
कुक्कुटे, शिवरूपे, मुनिभेदे, ब्रह्मणः दक्षाङ्गुष्ठाज्जाते प्रजापति-
भेदे च पु॰। [काशु। दक्षजादयोऽप्यत्रैव।
दक्षकन्या ० स्त्री॰ ६त॰। अश्विन्यादितारामध्यतिषु सप्तविंशत्संख्य-
दक्षिण ० पु॰ दक्ष-इनन्। सर्वनायिकासु समानुरागे नायकभेदे,
मध्यदेशात् दक्षिणे देशे, शरीरस्य दक्षिणभागे च। अनुत्तरे,
सरले, परच्छन्दानुवर्त्तिनि, वामभागस्थे, औदार्यवति च त्रि॰।
दक्षिणकालिका ० स्त्री॰ दक्षिणचरणेन शिवहृदयारूढायां कालि-
कायाम्।
दक्षिणतस् ० अव्य॰ दक्षिण+अतसु। दक्षिणे देशे दिशि वा।
दक्षिणपूर्वा ० स्त्री॰ दक्षिणपूर्वयोरन्तराला दिक्। स॰। अग्निकोणे,
विदिशि च। [मार्गे, तन्त्रोक्ते आचारभेदे च।
दक्षिणमार्ग ० पु॰ कर्म॰। पितृयानरूपे कर्मिणां गतागतरूपे
दक्षिणस्थ ० पु॰ दक्षिणे तिष्ठति स्था-क। सारथौ।
दक्षिणा ० अव्य॰ दिग्देशवृत्तेर्दक्षिणशब्दात् प्रथमापञ्चमीसप्त-
म्यर्थे आच्। प्रथमाद्यर्थविशेषिते दक्षिणदिग्देशार्थे। याम्य-
दिशि, यज्ञशेषे कर्मणः साङ्गतायै देये द्रव्ये, यज्ञपत्न्याम्,
"अध्वरस्येव दक्षिणा" इति रघु। प्रतिष्ठायाम्, दक्षिणकालि-
कायाम्, दक्षप्रजापतेः कन्यायां, परिक्रयद्रव्ये, नायिकाभेदे
च स्त्री॰।
दक्षिणाग्नि ० पु॰ कर्म॰। अन्वाहार्यपचनाख्ये यज्ञियाग्निभेदे।
दक्षिणाचार ० पु॰ कर्म॰। "स्वधर्मनिरतो नित्यं पशुनस्येन पूज-
येत्। स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्" इत्युक्ते
आचारभेदे।
दक्षिणात् ० अव्य॰ दक्षिणा+आति। प्रथमापञ्चमीसप्तम्यर्थवृत्तेर्दिग्-
देशवृत्तिदक्षिणशब्दार्थे। आदि। दक्षिणाद्वीत्यत्र।
दक्षिणापथ ० पु॰ ७त॰। स्वयदर्शितनर्मदासीमतिक्रम्य दक्षिण-
दिग्वर्त्ति देशभेदे।
दक्षिणामूर्त्ति ० पु॰ कर्म॰। न पुंवद्भाव। शिवस्य मूर्त्तिभेदे।
दक्षिणायन ० न॰ दक्षिणस्यामयनं गमनं, तत् यस्मिन् काले वा।
कर्कटे रविसंक्रमणे, तदादिषण्मासे काले च। [अर्थ सूर्य।
दक्षिणारुस ० पु॰ दक्षिणे भागे अरुर्व्रणमस्य। व्याधहतदक्षिणाङ्ग-

दक्षिणावर्त्त * त्रि॰ दक्षिणे आवर्त्तते आ+वृत-अच्। दक्षिणावृत्तियुक्ते पदार्थे "दक्षिणावर्त्तशङ्खोऽयम्" इति नाटकम्।

दक्षिणेर्मन् * दक्षिणे ईर्मं व्रणं यस्य नि॰ अनिच्। व्याधकृतव्रणयुक्तदक्षिणाङ्गके मृगे। [दक्षिणीयोऽप्यत्र।

दक्षिण्य * त्रि॰ दक्षिणामर्हति यत्। दक्षिणार्हे ऋत्विगादौ। छ।

दग्ध * त्रि॰ दह+क्त। भस्मीकृते। कर्त्तृणे न॰। [याच।

दग्धरुह * पु॰ दग्धोऽपि रोहति रुह-क। तिलकवृक्षे, भस्मरोहा-

दग्धिका * स्त्री॰ कुत्सिता दग्धा कुत्सिते कन्। (पोड़ाभात) दग्धान्ने। दग्धा+स्वार्थे कन् अत इत्त्वम्। दग्धान्नद्रवे।

दग्धेष्टका * स्त्री॰ कर्म॰। झामके (झामा)। [अदघीत्।

दघ * त्यागे पालने च भ्वादि॰ पर॰ सक॰ सेट् इदित्। दघति

दघ * घातने स्वादि॰ पर॰ सक॰ सेट्। दघ्नोति अदाघीत्-अदघीत्।

दण्ड * दण्डपातने अद॰ चुरा॰ उभ॰ सक॰ सेट्। दण्डयति ते अददण्डत्-त।

दण्ड * पु॰ न॰ दण्ड-अच्। लगुडे (लाठि)। व्यूहभेदे, प्रकाण्डे, कोणे, मन्थनदण्डे, सैन्ये च पु॰। दम्यतेऽनेन दम-ड तस्य च नित्त्वम्। षष्टिपलात्मके काले, भूमिमानभेदे (काठा), सूर्य्यानुचरे पु॰। दण्ड-भावे घञ्। अर्थापहाररूपे राज्ञां चतुर्थोपाये। दण्ड+कर्त्तरि अच्। यमे पु॰।

दण्डका * स्त्री॰ दण्डकारण्ये, जनस्थाननामके वने च।

दण्डकाक * पु॰ दण्डाकारः काकः। द्रोणकाके।

दण्डकारण्य * न॰ दण्डकनामनृपतिदेशे, शुक्रशापात् वनतां गते जनस्थाने वने, तीर्थभेदे च।

दण्डधर(धार) * पु॰ दण्डं धारयति धृ-णिच्-अच् ह्रस्वः अण् वा। यमे, नृपे, कुम्भकारे च। दण्डहस्ते त्रि॰।

दण्डनायक * पु॰ ६त॰। चतुरङ्गसेनाध्यक्षे। [दण्डनीतिशास्त्रे।

दण्डनीति * स्त्री॰ दण्डो नीयते बोध्यते यया नी-क्तिन्। अर्था-

दण्डपारुष्य * न॰ दण्डेन पारुष्यं यत्र। अष्टादशविवादमध्ये विवादभेदे, राज्ञां व्यसनभेदे च।

दण्डविष्कम्भ * पु॰ दण्डं विष्कभ्नाति विष्टभ्नाति वि-स्कम्भ-अच् षत्वम्। दधिमन्थनबाहुभेदे (घोलमथोया खुटि)।

दण्डहस्त * पु॰ दण्डाकारः हस्तादिर्यस्मात् हस्तः। अगुरुभेदे।

दण्डादण्डि * अव्य॰ दण्डैश्च दण्डैश्च प्रहृत्येदं प्रवृत्तं युद्धम् क्रियाव्यतिहारे इच् समा॰ पूर्वपददीर्घः। परस्परदण्डप्रहारपूर्वके युद्धे।

दण्डाहत * न॰ दण्डेनाहन्यते आ-हन-क्त। तक्रे (घोल)।

दण्डिन् * पु॰ दण्ड+अस्त्यर्थे इनि। यमे, नृपे, द्वारपाले, मञ्जुघोषे, ह्रे॰, दामाघाभेदे, जिनभेदे, दमनकवृक्षे, चतुर्थाश्रमिविशेषे, काव्यादर्शकर्त्तरि कविभेदे च। दण्डधारके त्रि॰। [स्त्रियां ङीप्।

दत्त * त्रि॰ दा-क्त। वितरे, न्यस्ते, दर्शिते च। द्वादशपुत्रमध्ये पुत्रभेदे (दत्तक), वैश्यस्योपाधिभेदे "भूतिर्दत्तश्च वैश्यस्य" इति स्मृतेः, दत्तात्रेयाख्ये भगवतोऽवतारभेदे च। भावे क्त। दाने, "दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम्। पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः। स्त्रीशुल्कानुग्रहार्थं च दत्तं सप्तविधं स्मृतम्" इत्युक्ते दानभेदे च न॰। स्वार्थे कन्। अस्मृत्युक्ते "दद्यात् माता पिता वा यं स पुत्रो दत्तको भवेत्" इत्युक्ते पुत्रभेदे पु॰।

दत्ताप्रदानिक * न॰ दत्तस्याप्रदानं पुनरादानमस्त्यस्मिन् ठन्। अष्टादशविवादान्तर्गते दत्तवस्तुनः पुनरुपादानविषये "दत्त्वा द्रव्यमसम्यग् यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्" इति नारदोक्ते व्यवहारभेदे।

दत्तात्मन् * पु॰ दत्त आत्मा येन। "दत्तात्मा तु स्वयं दत्तः" इत्युक्ते पुत्रभेदे।

दत्त्रिम * त्रि॰ दानेन निर्वृत्तः दा+क्त्रि-क्त्रेर्मप् च। दाननिर्वृत्ते। "माता पिता वा दद्यात् यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः" इत्युक्ते दत्तकपुत्रे पु॰।

दद * दाने धृतौ च भ्वा॰ आ॰ सक॰ सेट्। ददते अददिष्ट ददे।

दद्रु * पु॰ दद-रु। रोगभेदे (दाद), कच्छपे च।

दद्रुघ्न * पु॰ दद्रुं हन्ति हन-टक्। चक्रमर्दके (दादमर्दन)।

दद्रुण * त्रि॰ दद्रु-अस्त्यर्थे न। दद्रू-न ह्रस्वश्च वा। दद्रुरोगवति।

दद्रू * पु॰ दरिद्रा-ऊ नि॰। त्वग्रोगभेदे (दाद्)।

दध * दाने धारणे च भ्वादि॰ आ॰ सक॰ सेट्। दधते अदधिष्ट।

दधि * न॰ दध-इन्। (दइ) दुग्धविकृतिभेदे, वस्त्रे च। अर्धर्चादित्वम्। धारणकर्त्तरि त्रि॰।

दधिकूर्चिका * स्त्री॰ "दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिका" इत्युक्तायामामिक्षायाम् (छाना)। [त्थे।

दधित्थ * पु॰ दधिवद्वर्णोऽस्त्यस्मिन् स्था-क पृ॰। कपित्थे (कत्

दधिपुष्पिका * स्त्री॰ दधिवत् शुभ्रं पुष्पमस्याः कप्। अत इत्त्वम्। श्वेतापराजितायाम्। कवभावे ङीप्। कोलशिम्बायाम्।

दधिफल * पु॰ दधिवत् द्रवः फलेऽस्य। कपित्थे।

दधिमण्ड * पु॰ ६त॰। दध्नः मस्तुनि (मात) इति ख्याते पदार्थे।

दधिमन्थ * पु॰ ब॰ व॰। दध्युपसिक्ताः सक्तवः। दधिमिश्रितसक्तु।

दधिसार * न॰ ६त॰। नवनीते।

दधीच(चि) * पु॰ अथर्वमुनेरौरसे कर्दमप्रजापतिकन्यायां जाते मुनिभेदे, वृत्रासुरवधार्थं यस्यास्थिभिः देवैर्वज्रं निर्मितम्।

दधिस्वेद * न॰ ६त॰। तेन निर्मितत्वेन तत्स्वारोपः। यमे, तक्रे, मद्ये क्षीरके च। [मत।

दध्र * पु॰ दध-र। यमभेदे "ओउम्बराय दध्नाय" इति यमतर्पण-

दनु * स्त्री॰ कश्यपपत्न्याम् दक्षप्रजापतेः कन्यायां दानवमातरि।

दनुज * पु॰ दनोर्जायते जन-ड। असुरे। दनुजसुतप्रमुखोऽप्यत्र।

दन्त * पु॰ दम्यतेऽनेनेति दमु+तन्। अवयवावयवभेदे (दांत,

शृङ्गे, पर्वतनितम्बे, सानुनि, द्वाविंशत्सङ्ख्यायाञ्च।

दन्तक * त्रि॰ दन्तैर्भक्षितः कन्। दन्तमार्जनोपजीविनि। नाग-दन्ते, गिरिप्रदेशात् तिर्य्यग्वहिर्गते पाषाणे च पु॰। स्वार्थे कन् दन्तार्थे पु॰।

दन्तकर्षण * पु॰ दन्तान् कर्षति कृष-ल्यु। जम्बीरे।

दन्तकाष्ठ * न॰ दन्तधावनार्थं काष्ठम्। दन्तधावनसाधने काष्ठे। तत् यस्मात् ५त॰। विकङ्कतवृक्षे पु॰। [(ठोट)।

दन्तच्छद * पु॰ दन्ताश्छाद्यन्तेऽनेन छद-णिच्-घ ह्रस्वः। ओष्ठे

दन्तच्छदोपमा * स्त्री॰ दन्तच्छद ओष्ठ उपमीयतेऽनया अङ्। बिम्बीलतायाम् (तेलाकुचा) तत्फलेन हि ओष्ठसादृश्यं प्रसिद्धम्

दन्तधावन * पु॰ दन्तान् धावयति शोधयति धाव-ल्यु। खदिरवृक्षे, गुच्छकरञ्जे, बकुले च। भावे ल्युट्। दन्तशुद्धौ।

दन्तपत्रक * न॰ दन्त इव शुभ्रं पत्रं दलं यस्य। कुन्दपुष्पे।

दन्तपुष्प * न॰ दन्त इव शुभ्रं पुष्पमस्य। कुन्दे, कतकफले च।

दन्तफल * न॰ दन्त इव शुभ्रं फलम्। कतकफले। दन्तवत् फल-मस्य। कपित्थे पु॰। पिप्पल्याम् स्त्री॰ टाप्।

दन्तमूलिका * स्त्री॰ दन्त इव शुभ्रं मूलं यस्याः कप्। दन्तीवृक्षे।

दन्तवक्त्र * पु॰ दन्तप्रधानं वक्त्रमस्य। करूषदेशे नृपतिभेदे।

दन्तबीजक * पु॰ दन्तवत् बीजानि यस्य। दाडिमे वृक्षे।

दन्तशठ * पु॰ दन्तान् शठति खेदयति अच्। जम्बीरे, कपित्थे, कर्मरङ्गे, नागरङ्गे च। चाङ्गेर्य्याम्, क्षुद्राम्लिकायाञ्च स्त्री॰।

दन्ताघात * पु॰ दन्तमाहन्ति आ+हन-अण्। निम्बूके। भावे घञ्। दन्तैराहनने।

दन्तालिका * स्त्री॰ दन्तान् अलति भूषयति, तेभ्यो वा अलति पर्य्याप्नोति दन्त+अल ण्वुल् वा। वल्गायाम् (लागाम)।

दन्ताश्म * पु॰ दन्त+अश्मवत् पक्ष्म पूर्व्वदीर्घः। हस्तिनि।

दन्तिका * स्त्री॰ दन्त-मत्+गौरा॰ ङीष् स्वार्थे कन्। दन्तीवृक्षे।

दन्तिन् * पु॰ दन्त इनि। हस्तिनि।

दन्तिनी * स्त्री॰ दन्त-इनि। दन्तीवृक्षे। [मोचकी च।

दन्ती * स्त्री॰ दन्त-मत्+गौरा॰ ङीष्। वृहत्प्रत्यक्पर्ण्यां, लघुदन्त्यां-

दन्तीबीज * न॰ ६त॰। दन्तीफलमध्यस्थे बीजे।

दन्तुर * त्रि॰ उन्नताः दन्ताः सन्त्यस्य दन्त+उरच्। उन्नतदन्तयुक्ते, उन्नतानत विषमे स्थाने च।

दन्तुरच्छद * पु॰ दन्तुर उन्नतानतः छदो यस्य। बीजपूरे।

दन्तोलूखलक * पु॰ दन्त एव उलूखलं कण्डनसाधनं विद्यतेऽस्य ठन्। तापसभेदे स हि दन्तैरेव व्रीह्यादीन् कण्डयित्वा अत्ति। [illegible]। दन्तोलूखलिकोऽप्यत्र।

दन्त्य * त्रि॰ दन्ते दन्तमूले वा भवः यत्। दन्तदन्तमूलस्थोच्चार्ये लृतुलसादौ वर्णे। दन्तेभ्यो हितम् यत्। दन्तहितद्रव्ये।

दन्दश * पु॰ गर्हितं दशति दन्श-यङ्लुक् दन्श-अच्। सर्पे, कीटादौ, दन्ते च।

दन्भ * दम्भे स्वादि॰ पर॰ सक॰ सेट्। दभ्नोति अदम्भीत्। दम्भिता दब्धा।

दन्भ * सङ्घाते चुरा॰ आत्म॰ सक॰ सेट्। दम्भयते अददम्भत।

दन्श * दंशने भ्वादि॰ पर॰ सक॰ अनिट्। दशति अदाङ्क्षीत्।

दभ * प्रेरणे चुरा॰ उभ॰ सक॰ सेट् इदित्। दम्भयति ते अदद-म्भत् त।

दभ * प्रेरणे चुरा॰ उभ॰ सक॰ सेट्। दभयति ते अदीदभत् त।

दभ्र * न॰ दन्भ-रक्। अल्पे। "अदभ्रदर्भामधिशय्य" इति भारविः। [अदमीत्। दमिता दान्तः।

दम * शमे दण्डे च दिवा॰ सक॰ अक॰ सेट्। दाम्यति अदमत्

दम * पु॰ दम-घञ्। दण्डे, बाह्येन्द्रियाणां कर्मविषयेभ्यो निवर्त्तने, "निवृत्तो बाह्यवृत्तीनां दम इत्यभिधीयते" इत्युक्ते बाह्येन्द्रियव्यापारनिरोधे, विकारहेतुसन्निधानेऽपि मनसः स्थैर्य्ये, "दुर्विज्ञात् कर्म्मणो विप्र। दम विप्रनिवारणम्। स कीर्त्तितो दमः" इत्युक्ते कुकर्म्मभ्यो मनसो निवारणे, कर्द्दमे, दमने च। [दोषतः" इति माघः।

दमघोष * पु॰ शिशुपालपितरि चन्द्रवंश्ये नृपभेदे। "पुत्रो दम-

दमघोषसुत * पु॰ ६त॰। शिशुपाले। दमघोषजादयोऽप्यत्र।

दमनक * पु॰ दम-ल्यु-स्वार्थे कन्। (दोना) वृक्षभेदे, कुन्दवृक्षे च।

दमनी * स्त्री॰ दम्यतेऽनया ल्युट्। अग्निदमन्याम् क्षुपे। [दाङ्

दमयन्ती * स्त्री॰ दम णिच् शतृ। नलराजपत्न्याम्, मल्लिका-

दमित * त्रि॰ दम क्त निः। दान्ते, शास्त्रदण्डादिभिः शासिते च।

दमु(मू)नस् * पु॰ दम-उनसि वा दीर्घः। अग्नौ, शुक्राचार्य्ये च।

दम्पती * पु॰ द्वि॰ व॰। जाया च पतिश्च द्वन्द्वे जायाशब्दस्य दम्-भावः। भार्य्यापत्योः [illegible]।

दम्भ * पु॰ दम्भ-घञ्। कपटे, शाठ्ये च।

दम्भोलि * पु॰ दम्भं दैत्यादिदर्पम् अलति [illegible]। वज्रे।

दम्य * पु॰ दम-यत् [illegible]। [illegible] वत्से, [illegible] च। दमनीये, दमनार्हे, शास्ये च त्रि॰। [illegible]

दय * दाने गतौ, रक्षणे हिंसायां च भ्वादि॰ आत्म॰ सक॰ सेट्। दयते

दया * स्त्री॰ दय-भिदा॰ अङ्। "परदुःखविनाशेच्छा दया" [illegible] कारुण्ये। [illegible] [illegible]

[illegible]

दयालु * त्रि॰ दय-आलुच्। कृपालौ। [illegible]

दयित * पु॰ दय-क्त। पत्यौ [illegible] स्त्री॰।

दर * अव्य॰ दॄ-अप्। ईषदर्थे। [illegible] पु॰। [illegible] [illegible] [illegible] भये, पु॰ [illegible]

[illegible]

दरकम्पन * स्त्री॰ [illegible]

दरद् * स्त्री॰ दॄ-अदि। पर्व्वते, भये, तटे, [illegible]

[illegible]

दरट • पु• [illegible] "दरटाः [illegible]"
[illegible]
[illegible] • पु [illegible]। निर्धने, दीने च।
दरिद्रा • दुर्गतौ [illegible] मेट्। दरिद्राति
[illegible]
[illegible] • [illegible] त्रि•। [illegible], बाद्यभेदे, पर्वत-
भेदे, [illegible] च। [illegible]
[illegible] • [illegible] त्रि•। (दाद) इति ख्याते रोगभेदे।
[illegible] • पु [illegible]। [illegible], दर्वी, [illegible] च।
[illegible] • पु• [illegible]। [illegible]।
[illegible] • पु• [illegible], आदर्शे,
[illegible] च। [illegible]
[illegible] • पु [illegible] "[illegible] वल्मान्न
[illegible] दर्भाः परि-
[illegible]
[illegible] (भाषा)
[illegible]
[illegible] वा
[illegible]
[illegible] अमा-
[illegible] यत्र"
[illegible] वमन"
[illegible]
[illegible] पु•
[illegible]
[illegible], दर्भि,
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

दलामल • न• दलेनामलम्। मरुवके। मदनहक्षे, दमनवृक्षे च।
दलाम्ल • न दलेनाम्लम्। चुक्रे (चुकापालङ)।
दलित • त्रि• दल-क्त। प्रफुल्ले, खण्डिते, विदीर्णे च। "[illegible]
[illegible]" इति सोला•। [illegible]
दलेगन्धि • पु• दले गन्धो यस्याः [illegible] समा• [illegible]
दव • गतौ भ्वादि• पर• सक• सेट्, इदित्। दन्वति [illegible]
दव • पु• दुनोति दु-अच्। वने, वनानले च। भावे अप्। [illegible]
दवथु • पु दु दु उपतापे अथुच्। सन्तापे, गात्रादिदाहे च।
दवाग्नि • पु• दवस्य वनस्याग्निः। दावानले।
दविष्ठ • त्रि• अतिशयेन दूर -इष्ठन् यणादिलोपः गुणश्च। [illegible]
ईयसुनि दवीयस्। सर्वत्रार्थे स्त्रियां ङीप्। [illegible]
दश • दीप्तौ चु• उभ• सक• सेट् इदित्। दंशयति-ते [illegible]
दश • दंशने चुरा• आत्म• सक• सेट् इदित्। दंशयते [illegible]
दशक • न• दश परिमाणमस्य कन्। दशति, दशमहाराज [illegible]
दशकण्ठ • पु• दश कण्ठा यस्य। रावणे। दशकण्ठारि [illegible]
दशत् • पु• दश परिमाणमस्य अति। दशानां वर्गे दशते [illegible]
महापात्र।
दशधा • अव्य• दशप्रकारम् धाच्। दशविधे।
दशन् • त्रि दंश् कनिन्। (दश) सङ्ख्याविशेषे।
दशन • पु• दश्यतेऽनेन नि• नलोपः। दन्ते, शिखरे च। [illegible]
ल्युट्। कवचे। भावे ल्युट्। दंशने, दन्तादिनाघाते च।
दशनाच्छद • न• दशनैराच्छाद्यते येन। अधरादिदलयोः "[illegible]
दशनोच्छिष्टपरिमृतदृष्टे" इति माघः। [illegible] पु• [illegible]
च्छिष्टे त्रि•।
दशपुर • न• दश दिशः पिपर्त्ति पृ क। कैवर्तीमुस्ते। [illegible]
यत्र [illegible] समा•। मालवदेशीयनगरे।
दशबल • पु• "दानशीलक्षमावीर्यध्यानप्रज्ञाबलानि च। [illegible]
प्रणिधिज्ञानं दश बुद्धबलानि वै।" [illegible]
[illegible]। बुद्धमुनौ।
दशभुजा • स्त्री• दश भुजा यस्याः। "[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

मवल्पविकशयमके षोपरागे धृतिहीने, विच्छेदवशात् मर-
णावस्थायां कामिदशे च ।
दशमूल * न० दश मूलानि यत्र । पाचनभेदे । दशानां मूलानां
समाहारः पात्रा० । "बिल्वश्योनाकगाम्भारीपाटलागणिका-
रिकाः । शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् । उभाभ्यां
पञ्चमूलाभ्यां दशमूलमुदाहृतम्" इत्युक्तेषु बिल्वादिदशकमूलेषु ।
दशरथ * पु० दशसु दिक्षु गता रथो यस्य । सूर्य्यवंश्ये नृपभेदे ।
दशरथसुत * पु० ६त० । रामे । एवं दशरथात्मजादयोऽप्यत्र ।
दशहरा * स्त्री० दशविधानि दशजन्मार्जितानि च पापानि हरति
हृ+टक् । गङ्गाजन्मदिने ज्येष्ठशुक्लदशम्याम् । ज्येष्ठशुक्लदशमी-
माधिकृत्य "दशपापहरा यस्मात्तस्मात् दशहरा स्मृता" इत्युक्तम् ।
दशा * स्त्री दन्श-अङ् नि० नलोपः । अवस्थायां, दीपवर्त्त्याम्,
"अर्पितस्नेह न च खेदं न पात्रं न दशान्तरम् । परोपकारनिरता
मणिदीपा इवोत्तमाः" इत्युद्भटः । चित्ते, कालकृतविशेष-
रूपायां गर्भवासजन्माद्यवस्थायां, बाल्ययौवनादिरूपायाञ्च,
कामकृते विरहिणां नेत्ररागाद्यवस्थादशके, ज्योतिषोक्ते नक्ष-
त्रानुसारेण सूर्य्यादिग्रहाणां स्वामित्वेन भोग्यकाले च ।
विस्तरो वाचस्पत्ये । [वस्त्रावले पु० स्त्री० । पुत्त्वे ब० व० ।
दशाकर्ष * पु० दशया तैलादिकमाकर्षति आ+कृष-अण् । प्रदीपे ।
दशाङ्गधूप * पु० "मधु मुस्तं घृतं गन्धो गुग्गुल्वगुरुशैलजम् ।
सरलं सिह्लमित्याद्यै दशाङ्गो धूप उच्यते" इत्युक्ते धूपभेदे ।
प्रकारान्तरमप्यस्ति विस्तरो वाचस्पत्ये । [खण्डे ।
दशापवित्र * न० दशा वस्त्राञ्चलं पवित्रमिव । श्राद्धादिदेये वासः-
दशारुहा * स्त्री० दशसु दिक्षु आरोहति आ+रुह क । कैवर्त्ती-
मुस्तके । [देशभेदे । मदोमद स्त्री० ।
दशार्ण * पु० दश ऋणानि दुर्गाणि जलानि वा यत्र ॥यमरम्दृहेद्दि ।
दशार्ह * पु० यदुराजवंशे । तद्वंश्ये ब० व० ।
दशावतार * पु० दश मीनादयोऽवतारा यस्य । विष्णौ । ते अव-
तारा वाचस्पत्ये दर्शयिष्यन्ते ।
दशाश्व * पु० दश अश्वा रथे यस्य । "रथश्चिचक्रः सोमस्य कुन्दा-
भास्तस्य वाजिनः । वामदक्षिणतो युक्ता दश तेन चरत्यसौ"
इत्युक्ते चन्द्रे । [काशीस्थे तीर्थभेदे ।
दशाश्वमेध * पु दश अश्वमेधा यज्ञा कृताः यत्र ठन् ।
दशाह * पु० दशानामह्नां समाहारः टच् समा० नाह्नादेशः ।
दशसु दिनेषु । "दशाह सूतकी भवेत्" इति स्मृतिः ।
दशेन्धन * पु० दशा वर्त्तिकेव इन्धनं यस्य । प्रदीपे ।
दशेरक * पु० मरुदेशे । तद्देश्ये ब० व० ।
दस * उपक्षये दि० पर० सक० सेट् । दस्यति । अदसत् अदासीत
अद[illegible] । दसित्वा दस्त्वा ।
दस * भासे [illegible] सक० सेट् इदित् । दंसयति-ते अददंसत्-त ।
दस * दर्शने दंशने च चु० आ० सक० सेट् इदित् । दंसयते अददंसत ।

दस्यु * पु० दस-युच् नामादेशः । चौरे, रिपौ, महासाहसिके च ।
दस्र * पु० दस-रक् । गर्दभे । अश्विनीकुमारयोः, द्वि० व० ।
अश्विनीतारके च । [अददंहत् त ।
दह * दीप्तौ भक० दाहे सक० चु० उभ० सेट् इदित् । दंहयति ते
दह * दाहे भ्वादि० पर० सक० अनिट् । दहति अधाक्षीत् ।
दहन * पु० दह-ल्यु । अग्नौ, चित्रकवृक्षे, भल्लातके, दुष्टचेतसि च ।
भावे ल्युट् । दाहे न० ।
दहर * पु० दह-अरन् । मूषिकायाम्, भातृद्रव्यद्रावणपात्रे (मुचि),
सूक्ष्मे 'दहरोऽस्मिन् अन्तराकाशः" इति श्रुतिः, अल्पे च त्रि० ।
दहराकाश * पु० कर्म० । चिदाकाशे ईश्वरे ।
दाण * दाने भ्वादि० पर० सक० सेट् अ इत् । यच्छति अदात् ।
दा * दाने जुहो० उभ० सक० सेट् । ददाति दत्ते अदात् अदित ।
दा * छेदने अदा० पर० सक० अनिट् । दाति अदात् ।
दाक्षायणी * स्त्री० दक्षस्यापत्यं स्त्री फिञ् गौरा० ङीप् । अश्वि-
न्यादितारासु, सतीनाम्नि शिवपत्न्याञ्च ।
दाक्षिणात्य * पु० दक्षिणस्यां दिशि भवः दक्षिण+त्यक् । नारिकेले ।
दक्षिणादेशभवमात्रे त्रि० । [अ० । दक्षिणार्हे ऋत्विजि ।
दाक्षिण्य * न० दक्षिणस्य भावः ष्यञ् । अनुकूलत्वे । दक्षिणामर्हति
दाक्षी * स्त्री० दक्षस्य गोत्रापत्यं स्त्री० इञ् ङीप् । पाणिनिमुने-
र्मातरि ।
दाक्षीसुत * पु० ६त० । व्याकरणकर्त्तरि पाणिनिमुनौ ।
दाडि(लि)म * दि० दल-घञ् दालः तेन निर्वृत्तः इमप् वा लस्य
डः । दाडिमवृक्षे । स्त्रियां ङीप् "वियोगिनीमैक्षत दाडिमी-
मसौ" इति नै० । [६त० । दाडिमपुष्पं न० ।
दाडिमपुष्प * पु० दाडिमस्य पुष्पमिव पुष्पमस्य । रोहितकवृक्षे ।
दाडिम्ब * पु० दा-डिम्ब इस्य नेत्त्वम् । स्वनामख्याते वृक्षे ।
दात * त्रि० दो-क्त । छिन्ने । दैप-क्त । शुद्धे ।
दात्यूह * पु० दो-क्तिन् दितिं खण्डनं वहति दितिवाट् स एव अच्
वाह ऊठ् पादेरात आत्त्वम् । कालकण्ठके पक्षिभेदे ।
दात्र * न० दा ष्ट्रन् । छेदनसाधने (दा) यन्त्रे ।
दान * ऋजुताकरणे, छेदने च भ्वादि० उभ० स्वार्थे सन् । दीदां-
सते । अदीदांसिष्ट । [शुद्धौ, स्थाने च ।
दान * न० दो-दै-दा-वा ल्युट् । हस्तिमदजले, पालने, छेदने,
दानव * पु० दनोरपत्यम् अण् । असुरे । [न० ।
दानवारि * पु० ६त० । देवे, विष्णौ च । कर्म० । हस्तिमदजले
दानशील * त्रि० दानं शील सततमनुष्ठानं यस्य । बहुदातरि ।
दानशौण्ड * त्रि० दाने शौण्डः दक्षः । बहुप्रदे । [दण्डने च ।
दापित * त्रि० दा-णिच्-क्त । साधिते, धनादिना वशीकृते,
धरण * पु॰ धृ+युच्। पर्वतभेदे, लोके, गुणे, धान्ये, दिवाकरे, सेतौ च। चतुर्विंशतिरत्तिकामाने दशरत्तिकापरिमाणे च।

धरणि(णी) * स्त्री॰ धृ-अनि वा ङीप्। भूमौ, कन्दविशेषे, कन्दाली, वनकन्दे च। [कच्छपे च।

धरणि(णी)धर * पु॰ धरणिं(णीं) धरति धृ-अच्। पर्वते, विष्णौ,

धरा * स्त्री॰ धृ-अच्। पृथिव्याम्, गर्भाशये जरायौ, मेदोवहायां नाड्याम्।

धराधर * पु॰ धरां धारयति धृ+अच्। पर्वते, वराहरूपे विष्णौ च।

धरामर * पु॰ धरायाममर इव। ब्राह्मणे। एवं भूदेवादयोऽप्यत्र।

धरित्री * स्त्री॰ धृ-इत्र-गौरा॰ ङीप्। भूमौ।

धर्म * पु॰ न॰। धृ-मन्। शास्त्रविहितकर्मानुष्ठानजन्ये भाविफलसाधनभूते शुभादृष्टे, "श्रुतिस्मृतिभ्यामुदितं यत् स धर्मः" इत्युक्ते श्रौते स्मार्त्ते कर्मणि, "विहितक्रियया साध्यो धर्मः पुंसां गुणो मतः" इत्युक्ते कर्मजन्ये अदृष्टे, आत्मनि, देहधारणात् जीवे, आचारे, वस्तुगुणरूपे, स्वभावे, उपमायाम्, यागादौ, अहिंसायां, न्याये, उपनिषदि, यमे, सोमाध्यायिनि, सत्सङ्गे, धनुषि, ज्योतिषोक्ते लग्नात् नवमस्थाने च। दानादौ न॰।

धर्मक्षेत्र * न॰ "ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्। धर्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि" इत्युक्ते कुरुक्षेत्रे। ६त॰। धर्मस्थाने। [दकपूर्णे घटे।

धर्मघट * पु॰ धर्मार्थो घटः। सौरवैशाखे प्रत्यहं दातव्ये सुगन्धो-

धर्मचारिणी * स्त्री॰ धर्मं दाम्पत्यधर्मं चरति चर-णिनि। भार्य्यायाम्।

धर्मदान * न॰ "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवलं धर्मबुद्ध्या यत् धर्मदानं प्रचक्षते" इत्युक्ते प्रयोजनान्तरानुद्देशेन दाने।

धर्मद्रवी * स्त्री॰ धर्मजनको द्रवो यस्याः। "विष्णुपादाब्जसम्भूते। गङ्गे त्रिपथगामिनि। धर्मद्रवीति विख्याते" इत्युक्तायां गङ्गायाम्। [धारिणि।

धर्मध्वजिन् * त्रि॰ धर्मो ध्वजमिवास्त्यस्य इनि। जीविकार्थे जटा-

धर्मपत्नी * स्त्री॰ धर्माय पत्नी। प्रथम समूढायां सवर्णायां स्त्रियां, कीर्त्तौ, धृतौ, क्षान्तौ, मेधायां, धृतौ, क्षमायाञ्च।

धर्मपुत्र * पु॰ ६त॰। युधिष्ठिरे। [मया॰। यमे, युधिष्ठिरे च।

धर्मराज * पु॰ धर्मेण राजते पचाद्यच्। धर्मस्य राजा वा टच्

धर्मलक्षण * न॰ धर्मो लक्ष्यतेऽनेन लक्ष-ल्युट्। "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" इत्युक्ते धृत्यादौ दशके।

धर्मवाणिजिक * पु॰ वणिगिव व्यापारे ठञ् वाणिजिक अ॰। कर्मफलाभिलाषुके। [.

धर्मवैतंसिक * पु॰ पापेन धनमुपार्ज्यान्यो ...

धर्मशास्त्र * न॰ धर्मप्रतिपादकं शास्त्रम्। मन्वादिस्मृतौ ...

धर्मशील * त्रि॰ धर्मं शीलं सततमनुष्ठेयं यस्य। धार्मिके।

धर्मसंस्थापन * न॰ धर्मस्य सम्यक् अधर्मनिराकरणेन वेदोदितधर्मव्यवस्थापने "धर्मसंस्थापनार्थाय सम्भवामि युगे" इति पुराणम्।

धर्मसंहिता * स्त्री॰ धर्मबोधार्थं संहिता यत्र रचिता मनु॰ मन्वादिप्रोक्ते धर्मप्रतिपादनार्थे शास्त्रे।

धर्मात्मन् * पु॰ धर्मं आत्मा स्वभावो यस्य। धर्मानुगतचित्ते।

धर्माधिकरण * पु॰ धर्मार्थमधिक्रियतेऽसौ कर्मणि ल्युट्। "शर्मा च मित्रे च धर्मशास्त्रविशारदः। विप्रमुख्यः ... धर्माधिकरणो भवेत्।" इत्युक्ते धर्माध्यक्षे। ६त॰। ... स्वानुसारेण धर्मशास्त्रनिरूपणम्। ... धिकरणं हि तत्।" इत्युक्ते विचारस्थाने न॰।

धर्माध्यक्ष * पु॰ "कुलशीलगुणोपेतः सर्वकर्मपरायणः। ... प्रेषयाध्यक्षो धर्माध्यक्षोऽभिधीयते।" इत्युक्ते धर्माधिकारि... ६त॰। सर्वधर्मस्य साक्षिणि परमेश्वरे च।

धर्माभास * पु॰ धर्म इवाभासते अशास्त्रोक्तत्वात्। "श्रुतिस्मृतिभ्यामुदितं यत् स धर्मः प्रकीर्त्तितः। अन्यशास्त्रेषु ... धर्माभासः स उच्यते" इत्युक्ते अन्यशास्त्रोक्ते अधर्मे ...

धर्मासन * न॰ ६त॰। राज्ञो धर्मतो दर्शनार्थमासने।

धर्मिन् * त्रि॰ धर्म+अस्त्यर्थे इनि। पुण्यवति, ...

धर्मिष्ठ * त्रि॰ अतिशयेन धर्मी इष्ठन् इनेर्लुक्।

धर्म्य * त्रि॰ धर्मादनपेतः धर्मेण प्राप्यो वा यत्। धर्मयुक्ते, ... लभ्ये च।

धर्ष * पु॰ धृष-घञ्। प्रागल्भ्ये, अमर्षे, शक्तिबन्धने, संहतौ, ...

धर्षण * न॰ धृष-भावे ल्युट्। परिभवे, रमणे, धर्षयन्त्यनेन ... कर्मणि ल्युट्। अभिसारिकायां स्त्रियाम् स्त्री॰ ङीप्।

धर्षित * न॰ धृष+भावे क्त। मैथुने। कर्मणि क्त। कृतधर्षणे, ... स्कृते च त्रि॰। असत्यां स्त्रियां स्त्री॰।

धव * गतौ भ्वादि॰ पर॰ सक॰ सेट् इदित्। धन्वति अधन्वीत्।

धव * पु॰ धवति धुवति धुनोति धुनाति वा धु-धू-वा अच्। ... धूर्त्ते, नरे, स्वनामख्याते वृक्षे च। भावे अप्। कम्पने।

धवल * धवं कम्पं लाति ला-क। धवदृक्षे, वीरणतृणे, ... हयभेदे, चीनकर्पूरे, श्वेतवर्णे च। तद्वति, सुन्दरे च त्रि॰। शुक्लवर्णायां गवि स्त्री॰ टाप्। गौरा॰ ङीप् वा।

धवलपक्ष * पु॰ धवलौ पक्षौ यस्य। हंसे। कर्म॰। शुक्लपक्षे।

धवलमृत्तिका * स्त्री॰ कर्म॰। खटिकायाम् (खड़ि)।

धवलोत्पल * न॰ कर्म॰। कुमुदे।

धवित्र * न॰ धूयतेऽनेन धू-इत्र। व्यजने।

धा * धारणे पोषणे दाने च जुहो॰ उभ॰ सक॰ अनिट्। दधाति धत्ते अधात् अधित। धविमम्। [(धाइ) गुल्मभेदे।

धातकी * स्त्री॰ धातुं करोति णिच् ण्वुल् पिप्पल्यादि॰ ङीप्।

धातु * पु॰ धा-तुन्। "धारणाद्धातवस्ते स्युर्वातपित्तकफास्त्रयः" इत्युक्तेषु वातादिषु, "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" इत्युक्तेषु रसादिषु, "सुवर्णरूप्यताम्राणि हरितालं मनःशिला। गैरिकाञ्जनकासीससीसलोहं सहिङ्गुलम्। गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः॥" इत्युक्तेषु स्वर्णादिषु, "हेमताररसाराख्य ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं कान्तलोहञ्च धातवो नव कीर्त्तिताः॥" इत्युक्तेषु हेमादिषु नवसु, "हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च। रङ्गमायसं रैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः॥" इत्युक्तेषु अष्टसु, "सुवर्णं रजतं ताम्रं लौहं कुप्यञ्च पारदम्। रङ्गञ्च सीसकञ्चैव इत्यष्टौ देवसम्भवाः॥" इत्युक्तेषु अष्टसु वस्तुषु, लोकेषु सर्वधारणात् परमेश्वरे "स एव विधाता" इति श्रुतिः। व्याकरणोक्ते गणपठिते क्रियावाचके भूप्रभृतौ शब्दभेदे च।

धातुघ्न * न॰ धातून् हन्ति हन-टक्। काञ्जिके।

धातुद्रावक * न॰ धातून् द्रावयति सम्यग्ध्मात् द्रु+णिच्-ण्वुल्। (सोहागा) टङ्कणे। [पुष्पायाम्।

धातुपुष्पिका * स्त्री॰ धातुरिव पुष्पमस्त्यस्य ठन्। (धाइफुल) धातु-

धातुपुष्पी * स्त्री॰ धातुरिव पुष्पमस्याः ङीप्। (धाइफुल) धातु-पुष्प्याम्। [रसरूपे प्रथमे धातौ च।

धातुभृत् * पु॰ धातून् बिभर्त्ति भृ-क्विप्। पर्वते, देहस्थधातुपोषके

धातुमाक्षिक * न॰ धातुषु मध्ये माक्षिकम्। माक्षिके उपधातुभेदे।

धातुमारिणी * स्त्री॰ धातून् स्वर्णादीन् मारयति मृ-णिच्-णिनि। सर्जिकायां (सोहागा)।

धातुवैरिन् * पु॰ ६त॰। गन्धके।

धातुशेखर * न॰ धातूनां शेखरमिव। कासीसे उपधातुभेदे।

धातृ * पु॰ दधाति धा-तृच्। चतुर्मुखे ब्रह्मणि, विष्णौ च। धारण-कर्त्तरि, पालके च त्रि॰। [स्वार्थे कन् इत्वः। पद्मेवार्थे।

धातृपुष्पी * स्त्री॰ धातुपोषकं पुष्पं यस्याः। (धाइफुल) वृक्षभेदे।

धात्री * स्त्री॰ धीयते पीयतेऽसौ धा-ष्ट्रन् षित्वात् ङीष्। मातरि, आमलक्याञ्च। स्वार्थे कन्। आमलक्याम्।

धात्रीपत्र * न॰ धात्र्या इव पत्रमस्य। तालीशपत्रे। ६त॰। आम-लकीदले। [कन् इत्वः। तत्रैवार्थे।

धात्रेयी * स्त्री॰ धात्री+इवार्थे ढक्। उपमातरि (धाइमा)। स्वार्थे

धानक * न॰ धीयते कर्मणि ल्युट्, संज्ञायां कन्। धन्याके।

धाना * स्त्री॰ धा-न-टाप्। धन्याके, अङ्कुरे, चूर्णे, सक्तुषु च। भृष्ट-यवे ब॰ व॰।

धानाचूर्ण * न॰ धानानां भृष्टयवानां चूर्णम्। सक्तुषु (छातु)।

धानी * स्त्री॰ धीयतेऽस्याम् आधारे-ल्युट्-ङीप्। आधारे, यथा राजधानी मत्स्यधानीत्यादि। पीलुवृक्षे च।

धानुष्क * त्रि॰ धनुः प्रहरणमस्य ठक् धनुषा जीवति ठञ् वा। धनुर्द्धरे। अपामार्गे स्त्री॰।

धानुष्य * पु॰ धनुषे हितः यञ्। वंशे।

धानेय * न॰ धानाय साधु ढक्। धन्याके।

धान्य * न॰ धाने पोषणे साधु यत्। सतुषे तण्डुलादौ, शालिति-लयवादौ च। तद्भेदो वाचस्पत्ये। धन्याके, चतुस्तिलपरिमाणे, पूर्वद्वारगृहे च।

धान्यकोष्ठक * न॰ ६त॰। धान्यरक्षार्थे गृहे (गोला)।

धान्यत्वच् * स्त्री॰ ६त॰। तुषे।

धान्यपञ्चक * न॰ ६त॰। "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम्। शिम्बिधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम्॥" इत्युक्तेषु शाल्यादिषु।

धान्यराज * पु॰ धान्येषु राजा टच् समा॰। यवे। [वार्त्ताकुविकल्पे।

धान्यवर्द्धन * न॰ धान्यस्य ऋणप्रयुक्तस्य वर्द्धनं यत्र। (वाड़ी)

धान्यवीर * पु॰ धान्येषु वीर इव बलहेतुत्वात्। माषे।

धान्यशीर्षक * न॰ ६त॰। धान्यस्य मञ्जर्याम्। धान्याग्रादयोऽप्यत्र।

धान्याक * न॰ धान्यमिवाकति अक+कुटिलगतौ अच्। धन्याके।

धान्याचल * पु॰ दानार्थे विधानेन धान्यनिर्मिते पर्वते। तत्प्रका-रस्तु वाचस्पत्ये।

धान्याम्ल * न॰ धान्येषु अभिषुतमम्लम् शाक॰। काञ्जिके।

धान्योत्तम * पु॰ धान्येषूत्तमः। शालिधान्ये।

धामन् * न॰ धा-मनिन्। गृहे, देहे, रश्मौ, आश्रये, स्थाने, जन्मनि, त्विषि, ज्योतिषि, प्रभावे, स्वयं प्रकाशे च।

धामनिधि * पु॰ धामानि तेजांसि निधीयन्तेऽत्र नि+धा+कि। सूर्ये, अर्कवृक्षे च। [याम्, चीवके च।

धामार्गव * पु॰ धाम्नोऽग्नेर्वाति वा-क। अपामार्गे, पीतघोषा-

धाय्या * स्त्री॰ धीयते पुरस्तेऽग्निरनया, धीयतेऽर्प्यते समिदनया वा धा+ण्यत् नि॰। अग्निसमिन्धनार्थायामृचि सामिधेन्याम्।

धार * न॰ धाराभिर्निर्वृत्तम् अण्। "धाराभिः पतितं तोयं यदोर्न स्तोकमम्बरात्। शिलायां वसुधायां वा धौतायां पतितञ्च यत्॥" इत्युपक्रम्य "भाजने कनकादौ तु स्थापितं धारमुच्यते" इत्युक्ते शिलादिभाजनस्थे वर्षोदके जले।

धारण * स्त्री॰ धृ णिच् युच्। "दशादिगुणसंयुक्ते मनसः स्थिरता-करणि। धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः" इत्युक्तायाम-र्थानि चित्तस्य स्थितौ, मर्यादायां, ध्यानप्रवृत्तौ, निश्चये च। धृ+णिच्-ल्युट्। धारणं, धारा च स्त्री॰ ङीप्।

धारा * स्त्री॰ धृ-णिच्-अङ् । घटादिच्छिद्रे, सन्ततौ, द्रवद्रव्यस्य सन्तत्या पतने, खड्गादेर्निशितापे, उत्कर्षे, यशसि, अतिवृष्टौ, समूहे, मेघस्यासारवर्षणे, सैन्ये, पुरीभेदे, "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा" इत्युक्ते अश्वानां गतिपञ्चके, "इतीव धारामवधीर्य्य" इति नैषधम् । सैन्याग्रिमस्कन्धे च ।

धाराकदम्ब * पु॰ धाराकालिकः कदम्बः शाक॰ । प्रावृषेण्ये कदम्बभेदे । धारायां कदम्बं समूहो यत्र । मेघे ।

धाराट * पु॰ धाराऽभिमटति धारां धारया वा अटति अच् । चातके, अश्वे, मेघे, मत्तमातङ्गे च ।

धाराधर * पु॰ धारां धारयति धृ-णिच्-अच् उप॰ स॰ । मेघे "धाराधर ! धाराधारि धारय" इति घातकाटकम् ।

धाराफल * पु॰ धारायुक्तानि अष्टौ वराणि फलान्यस्य । मदनवृक्षे ।

धारावाहिन् * त्रि॰ धारया सन्तत्या वहति वह णिनि । सन्तत्या पातुके, क्रमिकाविच्छेदेन जायमाने च । स्वार्थे कन् । धारावाहिकोऽप्यत्रार्थे ।

धारासम्पात * पु॰ धाराणां सम्पातः पतनम् । महावृष्टौ । [तिकाटामिञ्

धाराङ्कुरी * स्त्री॰ धारायुक्ता अङ्कुरी शाक॰ । [illegible] अङ्कुराम्

धारिणी * स्त्री॰ धृ+णिनि । भूमौ, शाल्मलिवृक्षे च ।

धारिन् * पु॰ धृ-णिनि । पीलुवृक्षे । धारणकर्त्तरि त्रि॰ ।

धार्त्तराष्ट्र * पु॰ धृतराष्ट्रे कुराजदेशे भवः अण् । सर्पभेदे, कृष्णवर्णचञ्चुचरणयुक्ते हंसजातीये पक्षिणि च । धृतराष्ट्रस्यापत्यम् अण् । दुर्य्योधनादौ "निघ्नन्ति धार्त्तराष्ट्राः" इति वेणी॰ ।

धार्मिक * त्रि॰ धर्मं चरति धर्ममनुशीलयति ठक् । धर्मशीले ।

धार्ष्ट्य * न॰ धृष्टस्य भावः ष्यञ् । निर्लज्जत्वे ।

धाव * गतौ शुद्धौ च भ्वादि॰ उभ॰ शीघ्रगतौ अक॰ सेट् । धावति अधावीत् । सर्वधातुभ्योऽनु पर॰ ।

धावक * पु॰ धाव-णिच्-ण्वुल् । रजके । धाव-ण्वुल् । शीघ्रगे, धावनकर्त्तरि त्रि॰ (धावदिया) ।

धावन * न॰ धाव-ल्युट् । शोधने, शीघ्रगमने च । [च ।

धावनि(नी) * स्त्री॰ धाव-अनि वा ङीप् । पृश्निपर्ण्यां, कण्टकार्य्यां

धि * धृतौ तु॰ पर॰ सक॰ अनिट् । धियति अधैषीत् ।

धिक् * अव्य॰ धा-डिकन् । [illegible], निर्भर्त्सने, निन्दायाम् "धिक् [illegible]" इति [illegible] । निन्दनीये च । [illegible]

धिक्कार * पु॰ धिक्-कृ-घञ् । तिरस्कारे ।

धिक्कृत * त्रि॰ [illegible] । निन्दिते ।

धिक्ष * [illegible] [illegible] सेट् । [illegible] [धिक्षिष्ट ।

धिन्व * प्रीणने भ्वा॰ पर॰ सक॰ सेट् [illegible] । [illegible]

धिष * [illegible] सेट् । [illegible]

धिष * [illegible]

धिषणा * स्त्री॰ धृष्णोत्यनया धृष-क्यु धिषादेश. । बुद्धौ ।

धिष्ण्य * न॰ धृष-ण्य नि॰ । स्थाने, गृहे, शक्तौ, नक्षत्रे च । अग्निभेदे, शुक्रे च पु॰ । [कर्षेट् । शे॰

धी * अनादरे आराधने च दिवा॰ आत्म॰ सक॰ अनिट् । धीते

धी * स्त्री॰ ध्यै-क्विप् सम्प्रसारणञ्च । बुद्धौ, ध्याने च ।

धीगुण * पु॰ ६त॰ । "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" इत्युक्तेषु षट्सु धर्मेषु । [तादौ च त्रि॰

धीमत् * पु॰ धीः प्रज्ञाऽस्त्यस्य मतुप् । बृहस्पतौ । बुद्धिमति, पण्डि

धीर * अवज्ञायां अद॰ चुरा॰ उभ॰ सक॰ सेट् । निलयन्ते । अवधीरयति ते अवादिधीरत् त । अवधीर्य्य ।

धीर * त्रि॰ धियं राति रा-क, धियमीरयति ईर+अण् धी-क्रन् वा । धैर्य्यान्विते, विनीते, बलयुते, पण्डिते च । ऋषभौषधौ, राजौ, बुद्धिमेरके बुद्धिसाक्षिणि परमेश्वरे च पु॰ । कुङ्कुमे न॰ । नायिकाभेदे, काकोल्यां, महाज्योतिष्मत्यां, क्षिरायां विदार्य्यां च स्त्री॰ ।

धीराधीरा * स्त्री॰ धीरा च अधीरा च । नायिकाभेदे ।

धीरोदात्त * पु॰ नायकभेदे ।

धीवर * पु॰ दधाति मत्स्यान् धा+ष्वरच् नि॰ । कैवर्त्ते ।

धीशक्ति * स्त्री॰ ६त॰ शुश्रूषादिषु षट्सु धीगुणशब्दे दर्शितेषु गुणेषु ।

धीसख * पु॰ धियः सखा टच् समा॰ । अमात्ये, धीसचिवे च ।

धु * कम्पने स्वादि॰ उभ॰ सक॰ अनिट् । धुनोति धुनीते । अधौषीत् अधोष्ट ।

धुक्ष * सन्दीपने भ्वादि॰ आत्म॰ सक॰ सेट् । धुक्षते । अधुक्षिष्ट । [क्लेशे

धुत * त्रि॰ धु क्त । त्यक्ते, कम्पिते च ।

धुनि(नी) * स्त्री॰ धुनोति वेतसादीन् धु-निक् वा ङीप् । नद्यां

धुन्धुमार * पु॰ बृहदश्वनृपपुत्रे, इन्द्रगोपे कीटे, गृहधूमे (झुल) च

धुर(रा) * स्त्री॰ धुर्व-क्विप् वा टाप् । चिन्तायाम्, रथाद्यवयवे यानमुखे, भारे च । [ह्यादौ, भारसहे च । धवलवृषे पु॰

धुरन्धर * त्रि॰ धुरं धारयति धृ-णिच् अच् मुम् उप॰ स॰ । भारवा

धुरीण * त्रि॰ धुरं वहति ख । भारवाहके, श्रेष्ठे च ।

धुर्य्य * त्रि॰ वहति यत् । भारवाहके, श्रेष्ठे च ।

धुर्व * हिंसे भ्वादि॰ पर॰ सक॰ सेट् । धूर्वति अधूर्वीत् । धूर्णः ।

धूपित्र * न॰ कु॰ धू-इत्र । यज्ञादौ वह्निसंधुक्षणे ।

धुधुमार(मोर) * पु॰ धूम-क्विप् मूर अ कर्म॰ [illegible] वा [illegible] । [illegible] [illegible] [illegible]

धू * कम्पने स्वादि॰ उभ॰ सक॰ वेट् । धुनोति ते अधावीत् अधविष्ट

धू * कम्पने वा [illegible] उभ॰ [illegible] तुदा॰ कु॰ पर॰ सक॰ सेट् । धुवति [illegible] धुवन् अधुवीत् ।

धू * कम्पने [illegible] क्र्यादि॰ स्वादिश्च उभ॰ सक॰ वेट् । धूनोति धुनोते

धुनाति धुनीते। अधावीत् अधविष्ट अधोष्ट "धुनोति चम्पककाननानि धूनोत्यशोकम्" इति "वायुर्विधूनयति" इति च कविरहस्यम्।

धूत * त्रि० धू-क्त। भर्त्सिते, कम्पिते, तर्किते, त्यक्ते च।

धूनक * पु० धूनयति संधुक्षति वह्निम् चु० धू-ण्वुल् नुगागमः। यक्षधूपे (धुना)। [अदूधुपत्-त।

धूप * दीप्तौ चुरा० उभ० अक० दीपने सक० सेट्। धूपयति-ते

धूप * तापे अक० तापने सक० भ्वादि० पर० सेट्। धूपायति अधूपायीत् अधूपीत्। [गन्धद्रव्योत्थे धूमे, तत्साधनद्रव्ये च।

धूप * पु० धूपयति रोगान् दीपान् वा धूप-अच्। गुग्गुलुप्रभृति-

धूपन * पु० धूप-ल्यु। यक्षधूपे (धुना)।

धूपवृक्ष * पु० ६त०। सरलवृक्षे। धूपोऽङ्गमस्य। धूपाङ्गमप्यत्र।

धूपित * त्रि० धूप-क्त वा आयाभावः। अध्वादिगमनेन श्रान्ते, सन्तापिते च। [भजे पदार्थे।

धूम * पु० धू-मक्। आर्द्रकाष्ठजाते मेघकज्वलयोः कारणे वह्नि-

धूमकेतन * पु० धूमः केतनो यस्य। वह्नौ। धूम इव केतनः। तारापुच्छाकारे धूमकेतौ उत्पातभेदे।

धूमकेतु * पु० धूम इव केतुः। उत्पातरूपेऽशुभसूचके ताराभुक्तभेदे। ६ब०। वह्नौ। धूमध्वजादयोऽप्यत्र।

धूमगन्धिक * न० धूमस्येव गन्धोऽस्त्यस्य ठन्। रोहिषतृणे।

धूममहिषी * स्त्री० धूमस्य महिषीव। कुज्झटिकायाम्।

धूमयोनि * पु० धूमो योनिरस्य। मेघे, मुस्तके च। ६त०। वह्नौ, आर्द्रकाष्ठे च। [तद्वति त्रि०।

धूमल * पु० धूमं धूमवद्वर्णं लाति ला-क। कृष्णलोहिते वर्णे।

धूमाभ * पु० धूमस्येवाभा यस्य। धूम्रवर्णे। तद्वति त्रि०।

धूमावती * स्त्री० महाविद्याभेदे। [हितं यत्। धूमसाधने त्रि०।

धूम्या * स्त्री० धूमानां समूहः पाशादि० य। धूमसमूहे। धूमाय

धूम्याट * पु० धूम्या इव अटति अट-अच्। (फिङ्गा) पक्षिभेदे।

धूम्र * पु० धूमं तद्वर्णं राति रा-क पृ०। सिह्लके, उष्ट्रलोमवर्णाभे कृष्णलोहिते वर्णे च। तद्वति त्रि०।

धूम्रक * पु० धूम्र इव कायति कै-क। उष्ट्रे। [भेदे च।

धूम्रलोचन * पु० धूम्रे लोचने यस्य। कपोते, महिषासुरसेनापति-

धूम्रवर्ण * पु० धूम्रो वर्णोऽस्य। सिह्लके, कृष्णलोहितवर्णे च। तद्युक्ते त्रि०। [वृक्षे, तस्या धूम्रसारत्वात्तथात्वम्।

धूम्रिका * स्त्री० धूम्रो वर्णः सारोऽस्त्यस्य ठन्। (शिशु) शिंशपा-

धूर * वधे गतौ च दि० आत्म० सक० सेट्। धूर्यते अधूरिष्ट। धूर्त्तः।

धूर्जटि * पु० जट-सङ्घाते इन् धूरस्त्रैलोक्यचिन्ताया जटिः सङ्घातोऽत्र। शिवे।

धूर्त्त * पु० धुर्व-धूर-वा क्त। धुस्तूरवृक्षे, चोरकवृक्षे, नायकभेदे, "धूर्त्तोऽपरां चुम्बति" इति सा० द०। लौहकीटे, विड्लवणे च। द्यूतकारके, वञ्चके च त्रि०।

धूर्त्तक * पु० धूर्त्त इव वञ्चक इव स्वार्थे कन्। शृगाले।

धूर्वह * त्रि० धुरं वहति वह-अच् रेफे इको दीर्घः। भारवाहके धुरन्धरे। धुर्वह इति ह्रस्वयुक्तकथनं प्रामादिकम्।

धूलि(ली) * स्त्री० धू-लिक् वा ङीप्। रजसि, परागे च।

धूलिध्वज * पु० धूलिरेव ध्वजोऽस्य। वायौ।

धूलिपुष्पी * स्त्री० धूलिप्रचुरं पुष्पमस्याः ङीप्। केतक्याम्। स्वार्थे कन् ह्रस्व। अत्रार्थे।

धूलिकदम्ब * पु० धूलीनां कदम्बं यत्र। कदम्बवृक्षे, वरणवृक्षे, तिलिशवृक्षे च। ६त०। धूलीसमूहे न०।

धूश(ष)(स) * शोभने चुरा० उभ० सक० सेट्। धूश(ष)(स)यति ते अदूधुश(ष)(स)त् त।

धूसर * पु० धू-सर किच्च न षत्वम्। गर्दभे, उष्ट्रे, कपोते, तैलकारे, ईषत्पाण्डुवर्णे, कृष्णश्वेतवर्णे, शुक्लपीतवर्णे च। तत्तद्वर्णवति त्रि०। [हस्तिशुण्डवृक्षे।

धूसरपत्रिका * स्त्री० धूसरं पत्रमस्त्यस्याः ठन्। (हातिशुँड़ा)

धृ * पतने भ्वादि० आ० अक० अनिट्। धरते अधृत।

धृ * स्थितौ अक० धृतौ सक० भ्वादि० उभ० अनिट्। धरति ते अधार्षीत् अधृत।

धृ * स्थितौ अक० धृतौ० सक० तुदा० आ० अनिट्। ध्रियते अधृत।

धृ * धारणे, चुरा० उभ० सक० अनिट्। धारयति ते अदीधरत् त।

धृज * गतौ भ्वादि० पर० सक० सेट् इदित्। धृञ्जति अधृञ्जीत्।

धृतराष्ट्र * पु० चन्द्रवंश्ये दुर्योधनपितरि नृपभेदे, नागभेदे, पक्षिभेदे च।

धृति * स्त्री० धृ-क्तिन्। तुष्टौ, धारणे, यागे, विष्कम्भावधिके अष्टमे योगे, सुखे, धारणायाम्, अवसादेऽपि शरीरादेः स्तम्भनशक्तौ, अष्टादशाक्षरपादके छन्दोभेदे, अष्टादशसंख्यायाञ्च।

धृष * संहतौ अक० हिंसे सक० भ्वादि० पर० सेट्। धर्षति अधर्षीत् धर्षित्वा धृष्ट्वा। [धृष्टः।

धृष * प्रागल्भ्ये स्वादि० पर० अक० सेट्। धृष्णोति अधर्षीत्।

धृष * सामर्थ्यबन्धने चुरा० आत्म० अक० सेट्। धर्षयते अदीधृषत अदधर्षत।

धृष * क्रोधे अभिभवे च वा चु० उभ० पक्षे भ्वादि० सक० सेट्। धर्षयति ते धर्षति अदीधृषत् त अदधर्षत् त अधर्षीत्।

धृष्णज् * त्रि० धृष-नजिङ्। प्रगल्भे, निर्लज्जे, वैयात्ये च (कर्त्तरि)।

धृष्णु * त्रि० धृष-क्नु। प्रगल्भे, निर्लज्जे च।

धृष्ट * त्रि० धृष-क्त। निर्लज्जे, प्रगल्भे, नायकभेदे च।

धृष्टद्युम्न * पु० धृष्टं प्रगल्भं द्युम्नं बलं यस्य। द्रुपदनृपपुत्रे।

धेनु * स्त्री० धयति सुतान् धे-नु इच्च। नवप्रसूतायां गवि।

धेनुक * पु० धेनुरिव इवार्थे कन्। असुरभेदे। हस्तिन्यां स्त्री०। स्वार्थे कन्। धेनौ। [धेनुकध्वंसादयोऽप्यत्र।

धेनुकसूदन * पु० धेनुकं सूदयति हिनस्ति सूद ल्यु। श्रीकृष्णे।

धेनुदुग्धकर * पु॰ धेनोर्दुग्धमिव किरति कृ-अच्। गर्जरे (गाजर)।
धेनुष्या * स्त्री॰ धेनु+संज्ञायां यत् सुक् च। ऋणगोधनार्थमुत्त-
मर्णाय बन्धकत्वेन दीयमानायां धेनौ।
धैनुक * न॰ धेनूनां समूहः ठक्। धेनुसमूहे।
धैर्य्य * न॰ धीरस्य भावः ष्यञ्। "स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति
गीयते" इत्युक्ते मनसः स्थैर्य्ये, धीरत्वे, "मनसो निर्विकारत्वं
धैर्य्यं सत्स्वपि हेतुषु" इत्युक्ते मनसो विकाराभावे, अव्या-
कुलत्वे, विघ्नाद्युपस्थितावपि प्रारब्धापरित्यागहेतौ चित्तवृत्ति-
भेदे च।
धैवत * पु॰ "गत्वा नाभेरधोभागं वस्तिं प्राप्योर्ध्वगः पुनः। धावन्निव
च यो याति कण्ठदेशं स धैवतः" इत्युक्ते कण्ठोत्थिते स्वरभेदे।
धोर * गतिचातुर्य्ये भ्वादि॰ पर॰ अक॰ सेट्। धोरति अधोरीत्।
णिच्। अदुधोरत् त। [भावे ल्युट्। अश्वगतिभेदे।
धोरण * न॰ धोरत्यनेन धोर-ल्यु ल्युट् वा। हस्त्यश्वरथादौ याने।
धोरणि(णी) * स्त्री॰ धोर-अनि वा ङीप्। परम्परायाम् "सद्यः स्व-
लन्मधुरधाराधोरणिधौतधामनि" इत्युद्भटः। [रजते न॰।
धौत * त्रि॰ धाव-क्त-ऊठ्। मार्जिते, प्रक्षालिते, उत्तेजिते, शुभ्रे च।
धौतकौषेय * न॰ कर्म॰। प्रक्षालिते कृमिकोषजाते वस्त्रे।
धौरित * न॰ धोर-क्त प्रज्ञाद्यण्। अश्वानां चतुरायां गतौ। स्वार्थे
कन्। तत्रैवार्थे।
धौरेय * त्रि॰ धुरं वहति ढक्। भारवाहके हयादौ।
ध्मा * अग्निसंयुतौ दीर्घश्वासहेतुके शब्दभेदे भ्वादि॰ पर॰ तादृश-
शब्देन वादने सक॰ अनिट्। धमति अध्मासीत्।
ध्मात * त्रि॰ ध्मा-क्त। संधुक्षिते, दीर्घश्वासहेतुकशब्दयुक्ते च।
ध्माङ्क्ष * आकाङ्क्षे सक॰ घोररवे अक॰ भ्वादि॰ पर॰ सेट् इदित्।
ध्माङ्क्षति। अध्माङ्क्षीत्।
ध्माङ्क्ष * पु॰ ध्माङ्क्ष-अच्। काके, मत्स्यभक्षके पक्षिभेदे, भिक्षुके च।
काकोलिकायां स्त्री॰ गौ॰ ङीष्।
ध्माङ्क्षोली * स्त्री॰ ध्माङ्क्ष-ओल गौ॰ ङीष्। काकोलीलतायाम्।
ध्यान * न॰ ध्यै-ल्युट्। चिन्तने, ध्येयवस्तुविषयचिन्तने, चित्तस्यैक-
तानप्रवाहे, "ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः।
ध्यानशब्देन विख्याता परमानन्ददायिनी" इति वेदान्तोक्ते
ब्रह्मविषये चित्तस्थैर्य्ये, "ध्यै चिन्तायां स्मृतो धातुश्चिन्ता तत्त्वेन
निश्चला। एतद् ध्यानमिह प्रोक्तम्" इति तन्त्रोक्ते ध्येयस्य
चित्तस्थिरतया निश्चये च। [स्वार्थे कन्। रोहिषतृणे।
ध्याम * न॰ ध्यायते वर्णैः ध्यै-मन्। गन्धतृणे, दमनकवृक्षे च।
ध्यै * चिन्तने भ्वादि॰ पर॰ सक॰ अनिट्। ध्यायति अध्यासीत्।
ध्रज * गतौ भ्वादि॰ पर॰ सक॰ सेट्। ध्रजति अध्राजीत् अध्रजीत्
अयमिदित् ध्रञ्जति अध्रञ्जीत्।
ध्रण * शब्दे भ्वादि॰ पर॰ अक॰ सेट्। ध्रणति अध्रणीत् अध्राणीत्।
ध्रम * इत्यत्र ध्मादाने इत्यादि॰ पर॰ सक॰ सेट्। ध्रमति अध्रमीत्
अध्रामीत्। ध्रमित्वा ध्रान्त्वा। [यति ते वदि...
ध्रस * उत्क्षेपे क्र्यादि आदाने च चुरा॰ उभ॰ सक॰ सेट्...
ध्राक्ष * काङ्क्षे घोररवे च भ्वादि॰ पर॰ सक॰ सेट् इदित्...
अध्राङ्क्षीत्। [अध्राक्षीत्। कांक्षणार्थे...
ध्राख * शोषणे अलमर्थे च भ्वादि॰ पर॰ सक॰ सेट्।...
ध्राघ * शक्तौ भ्वादि॰ आत्म॰ अक॰ सेट्। ध्राघते अध्राघिष्ट।
अदध्राघत्।
ध्राड * विभेदे भ्वादि॰ आत्म॰ सक॰ सेट्। ध्राडते अध्राडिष्ट।
ध्रिज * गतौ भ्वादि॰ पर॰ सक॰ सेट्। ध्रेजति अध्रेजीत्।
ध्रु * स्थैर्य्ये अक॰ सर्पणे सक॰ तु॰ कु॰ पर॰ अनिट्। ध्रुवति अध्रु-
वीत् दुध्राव। [णि
ध्रु * स्थैर्य्ये अक॰ सर्पणे सक॰ भ्वादि॰ पर॰ अनिट्।
ध्रुव * पु॰ कु॰ ध्रु-अच्। शङ्कौ, विष्णौ, हरे, ...
वसुभेदे, ज्योतिषोक्ते योगभेदे, नासाग्रे, स्थाणौ, ...
आवर्त्तभेदे, भूगोलस्योत्तरदक्षिणकेन्द्रद्वयोपरिस्थे स्थिर तारके
च। निश्चिते, तर्के, आकाशे, उत्तराषाढ़ारोहिणीत्युत्तरेषु ...
सन्तते, अपरिणामिनित्ये, स्थिरे च त्रि॰। मूर्वायाम्, ...
स्यां च स्त्री॰। शरारिपक्षिणि पु॰ स्त्री॰। स्वार्थे कन्।...
भेदे न॰ (ध्रुया)। [किट। वांक्ष...
ध्रेक * उत्साहे शब्दे च भ्वादि॰ आत्म॰ अक॰ सेट्। ध्रेकते
ध्रै * तृप्तौ भ्वादि॰ पर॰ अक॰ अनिट्। ध्रायति अध्रासीत्।
ध्रौव्य * न॰ ध्रुवस्य भावः ष्यञ्। स्थैर्य्ये।
ध्वंस * पु॰ ध्वन्स+घञ्। विनाशे।
ध्वंसन * न॰ ध्वन्स+ल्युट्। अधःपतने, गमने, नाशे च।
ध्वज * गतौ भ्वादि॰ पर॰ सक॰ सेट्। ध्वजति अध्वाजीत् अध्व-
जीत्। अयमिदिदपि। ध्वञ्जति अध्वञ्जीत्।
ध्वज * पु॰ ध्वज+अच्। शौण्डिके, सर्पे च। चतुष्कोणाकारे दण्ड-
दण्डोपरिस्थे वस्त्रखण्डे, खट्वाङ्गे, मेढ्रे च पु॰ न॰।
ध्वजद्रुम * पु॰ ध्वजाकारः द्रुमः। तालवृक्षे। [लिङ्गवृद्धे रोगभेदे...
ध्वजभङ्ग * पु॰ ध्वजस्य मेढ्रस्य भङ्गः स्वसामर्थ्यहीनता यत्र। ...
ध्वजाहृत * न॰ ध्वजेन सहाहृतम्। "सङ्ग्रामादाहृतं यत्तु विद्राव्य
द्विषतां कुलम्। स्वाम्यर्थं जीवितं त्यक्त्वा तद् ध्वजाहृतमुच्यते"
इत्युक्ते धनविशेषे। तादृशे दासे पु॰।
ध्वजिन् * पु॰ ध्वज+अस्त्यर्थे इनि। नृपे, रथे, ब्राह्मणे, तुरगे, ...
मद्यविक्रयोपजीविनि शौण्डिके, मयूरे च।
ध्वजिनी * स्त्री॰ ध्वजः अस्त्यस्याः इनि। सेनायाम्। [...
ध्वण * ध्वाने भ्वादि॰ पर॰ अक॰ सेट्। ध्वणति अध्वाणीत् अध्व-
ध्वन * रवे भ्वादि॰ पर॰ अक॰ सेट् वा घटादि। ध्वनति अध्वा-
नीत् अध्वनीत्। ध्वनयति ध्वानयति। [अध्वनीत्
ध्वन * शब्दे अद॰ चुरा॰ उभ॰ सक॰ सेट्। ध्वनयति अदिध्वनत्
ध्वन * पु॰ चु॰ ध्वन+घञ्। शब्दे।

ध्वनि * पु॰ ध्वन+इन्। अव्यक्ते मृदङ्गादिशब्दे, अलङ्कारोक्ते उत्तमकाव्ये च।

ध्वनिविकार * पु॰ ध्वनेर्विकारः। शोकादिना शब्दस्य विकारे काकुप्रभृतौ। [ध्वंसते अध्वंसत। क्रा सेट्।

ध्वन्स * गतौ भ्रंशे अधःपतने च भ्वादि॰ आत्म॰ अक॰ सेट्।

ध्वस्त * त्रि॰ ध्वन्स-क्त। च्युते, नष्टे, गलिते च। [अध्वाङ्क्षीत्।

ध्वाङ्क्ष * काङ्क्षे घोररवे च भ्वादि॰ पर॰ सक॰ सेट् इदित्। ध्वाङ्क्षति

ध्वाङ्क्ष * पु॰ ध्वाङ्क्षि+अच्। काके, बके, भिक्षुके, गृहे च।

ध्वान * पु॰ ध्वन+घञ्। शब्दे।

ध्वान्त * न॰ ध्वन-क्त नि॰। अन्धकारे।

ध्वान्तारि * पु॰ ६त॰। सूर्ये, अर्कवृक्षे, चन्द्रे, वह्नौ च।

ध्वान्तोन्मेष * पु॰ ध्वान्ते अन्धकारे उन्मेषोऽस्य। खद्योते।

न

न * अव्य॰ नह-बन्धने ड। निषेधे। तत्र क्रियायोगे अभावे तद्भिन्नयोगे भेदे इत्यनयोरर्थयोः। बन्धे, प्रस्तुते, रत्ने च पु॰।

नकुल * त्रि॰ नास्ति कुलमस्य। निष्कुले। सर्पवैरिणि जन्तौ, शिवे, चतुर्थपाण्डवे च पु॰। कुकुट्यां, जटामांस्यां, सर्पिण्यां, कुटुम्बे च स्त्री॰ ङीप्।

नकुलेष्टा * स्त्री॰ ६त॰। रास्नायां, तस्या नकुलप्रियत्वात्तथात्वम्।

नक्क * नाशने चुरा॰ उभ॰ सक॰ सेट्। नक्कयति-ते अननक्कत् त।

नक्त * न॰ नज-क्त। रात्रौ, सर्वदिनातिक्रमेण रात्रिभोजनरूपे व्रते च।

नक्तक * पु॰ नक्त-ट्कन्। (न्याकड़ा) कर्पटे, जीर्णवस्त्रखण्डे च।

नक्तचारिन् * पु॰ नक्ते रात्रौ चरति चर णिनि। पेचके, विडाले च। रात्रिचारिमात्रे त्रि॰।

नक्तञ्च(चा)र * पु॰ नक्ते, नक्तं वा चरति टक्। राक्षसे, चौरे, पेचके, विडाले च। रात्रिचरे त्रि॰। स्त्रियां ङीप्।

नक्तन्दिव * न॰ नक्तञ्च दिवा च नि॰। अहर्निशे अहोरात्रे।

नक्तम् * अव्य॰ नज-तमु नम्। रात्रौ।

नक्तमाल * पु॰ नक्तम् रात्रौ वा अलति अच्। करञ्जवृक्षे।

नक्तव्रत * न॰ "नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत् सदिवाकरम्।" इत्युक्तलक्षणे दिवाभोजनाभावविशिष्टे रात्रौ प्रदोषकालादौ भोजनरूपे व्रते।

नक्र * पु॰ न क्रामति दूरस्थलम् न+क्रम+ड। कुम्भीरे। (मकर) द्वारोर्ध्वकाष्ठे, नासिकायाञ्च न॰।

नक्रराज * पु॰ ६त॰ टच् समा॰। (हाङ्गर) जलजन्तुभेदे।

नक्षत्र * न॰ नक्ष-अत्रन्। अश्विन्यादिताराकार्षे।

नक्षत्रचक्र * न॰ नक्षत्राणां चक्रम्। अश्विन्यादिनक्षत्रैर्विहितनक्षत्राकारे ज्योतिःशास्त्रोक्ते राशिचक्रे, तन्त्रोक्ते मन्त्रशोधनोपयोगि चक्रभेदे च। [स्त्रियां च।

नक्षत्रनेमि * पु॰ नक्षत्राणां नेमिरिव। ध्रुवाख्ये तारके, चन्द्रे,

नक्षत्रमाला * स्त्री॰ नक्षत्राणामिव माला। सप्तविंशतिमौक्तिकैर्निर्मिते हारभेदे। ६त॰। नक्षत्रपङ्क्तौ।

नक्षत्रसूचक * पु॰ नक्षत्राणि प्रमादमतया सूचयति ण्वुल्। "अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापी ज्ञेयो नक्षत्रसूचकः।" इत्युक्ते "तिथ्युत्पत्तिं न जानन्ति ग्रहाणां नैव साधनम्। परवाक्येन वर्त्तन्ते ते वै नक्षत्रसूचकाः।" इत्युक्ते च सिद्धान्तानभिज्ञे ज्योतिर्विदि। स्त्रियां नक्षत्रसूचिकाप्यत्र।

नक्षत्रेश * पु॰ ६त॰। चन्द्रे। नक्षत्रपत्यादयोऽप्यत्र। [अनखीत्।

नख * सर्पणे भ्वादि॰ पर॰ सक॰ सेट्। नखति अनखीत् अनाखीत्।

नख * पु॰ न॰। नख छिद्रमस्य। करजे, गन्धद्रव्ये नखाख्ये च।

नखकुट्ट * पु॰ नखान् कुट्टयति कुट्ट+अण्। नापिते।

नखनिकृन्तन * न॰ नखानि कृन्तत्यनेन कृत ल्युट् उ॰ सम्। नखच्छेदनार्थे नापितास्त्रभेदे।

नखर * पु॰ न॰ नखं राति रा+क। नखे। [पुंस्यप्यत्र।

नखरायुध * पु॰ नखरमायुधं यस्य। सिंहे, व्याघ्रे, कुक्कुटे च। नखा-

नखाङ्क * पु॰ नख इव अङ्कः। नखक्षते।

नखाङ्ग * पु॰ नखमङ्गं इव यस्य। व्याघ्रनखाख्ये।

नखी * स्त्री॰ नखमस्त्यस्य अर्श आदित्वादच् गौरा॰ ङीष्। गन्धद्रव्यविशेषे नखाख्ये।

नग * पु॰ न गच्छति गम ड। पर्वते, वृक्षे च।

नगण * पु॰ छन्दःशास्त्रोक्ते त्रिलघुवर्णात्मके गणे। न गच्छति गम-युच्। (नागकाञ्चनी) वृक्षभेदे, पाराशरदादाम् स्त्री॰ टाप्।

नगनन्दिनी * स्त्री॰ ६त॰। हिमालयसुतायां दुर्गायाम्।

नगभिद् * पु॰ नगान् भिनत्ति भिद-क्विप्। इन्द्रे। पर्वतभेदके त्रि॰।

नगभू * स्त्री॰ नग इव भूरुत्पत्तिस्थानं यस्याः। क्षुद्रपाषाणभेदायाम्।

नगर * न॰ नगाः इव प्रासादाः सन्त्यत्र नग+र। "पुष्करिण्यादिनिर्युक्तं पर्वतेश्वरम्। अनेकजातिसम्बाधं नैकशिल्पिसमाकुलम्। सर्वदैवतसम्बाधं नगरं त्वभिधीयते।" इत्युक्तलक्षणे पुरभेदे। वा गौरा॰ ङीष्। नगर्यप्यत्र।

नगरघ्नयुक्त * पु॰ नगरस्य पौरवर्गस्य ग्रामं करोति कृ-अण्। कार्त्तिकेये "स नगरं नगरघ्नयुक्तः" इति रघु।

नगरोषा * स्त्री॰ नगरादुत्सिञ्चति वह+ष्ट्रा-क। नगरकाक्षा स्त्रियां, नागरमुस्तायाम्।

नगरौकस् * स्त्री॰ ६त॰। गुग्गुलौ।

नगाट * पु॰ नगेषु वृक्षेषु अटति अच्। वानरे।

नगाधिप * पु॰ नगानामधिपः। हिमालयपर्वते।

नगाटन * पु॰ नगं वृक्षं, पर्वतं वा अटति।

गोरावदा नारो नन्दनं नन्दते दिवि ।" इत्युक्ते ६० वर्षमध्ये

वत्सरभेदे च । इन्द्रोद्याने न० । आनन्दकारके त्रि० ।

नन्दन * पु० नन्दस्य नन्दनः । श्रीकृष्णे । नन्दसुतादयोऽप्यत्र ।

नन्दिनी * स्त्री० ६त० । दुर्गायाम् "नन्दगोपगृहे जाता यशो-

दागर्भसम्भवा" इति चण्डी । नन्दसुतादयोऽप्यत्र ।

नन्दा * स्त्री० नन्द-अच् । "नन्दते सुरलोकेषु नन्दने वसतेऽथवा ।

हिमावले महापुण्ये नन्दादेवी ततोऽभवत् ।" इत्युक्तायां

गौर्याम्, ‌प्रतिपदि, षष्ठ्याम्, एकादश्याम्, तिथिषु, "प्रतिपदेकादशी षष्ठी

नन्दा ज्ञेया मनीषिभिः" इत्युक्तेषु तिथिभेदेषु, "स्थिरे सौर-

वारे तु नन्देति संज्ञा" इति, सूर्यसङ्क्रान्तिभेदे, ननन्दरि,

तीर्थभेदे च ।

नन्दि * पु० नन्द-इन् । सनामख्याते हरे, आनन्दे, कौमख्यानन्दि-

वर्द्धनो नाम." इति रामायणम् । महादेवस्य पार्षदभेदे नन्दि-

केश्वरे । अद्यन्ताद्दे पु० न० ।

नन्दिकेश्वर * पु० शिवस्य पार्षदभेदे । तेन प्रोक्तम् तस्य लुक् ।

पुराणभेदे । [इत्यादयोऽप्यत्र ।

नन्दिक * पु० नन्दयति णिच्-णिनि कर्त० । धनदपुत्रे । नन्दि-

नन्दन * पु० नन्द-णिनि । शिवद्वारपाले, गर्दभाण्डे, वटद्रुमे च ।

नन्दिनी * स्त्री० नन्दयति नन्द-णिनि । वशिष्ठधेनौ, सुतायाम्,

उमायां, गङ्गायां, ननन्दरि, व्याडिमातरि, रेणुकौषधौ च ।

नन्दीसुत * पु० ६त० । व्याकरणस्य संग्रहकारके व्याडिमुनौ ।

नन्दिपुराण * न० नन्दिना प्रोक्तं पुराणम् । उपपुराणभेदे ।

नन्दिवर्द्धन * पु० नन्दिं नन्दं नन्दिनं वा वर्द्धयति वृध-णिच्-ल्यु ।

तनये, मित्रे, शिवे च । आनन्दवर्द्धके त्रि० ।

नन्दीश्वर * पु० नन्द-इन् वा ङीप् कर्म० । पाठ्यभेदे, तूर्ये (तुद),

कुबेरके, श्रेयस्कराख । [नन्दीश्वरादयोऽप्यत्र ।

नन्दीश * पु० नन्दी ईश इव । शिवद्वारपाले । ६त० । शिवे ।

नन्द्यावर्त * पु० "दक्षिणानुगतानन्दवर्यं यत् पश्चिमामुखम् ।

पूज्यनीयो नरप्रायं नन्द्यावर्तं वदन्ति तत् ।" इत्युक्ते भूपगृह-

भेदे, तगरवृक्षे, मत्स्यभेदे च ।

नपुंसक * पु० न० न स्त्री न पुमान् नि० । "स्तनकेशवती नारी

लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ।"

इत्युक्तलक्षणे क्लीबे । शब्दे तद्व्यवहारस्तु पुंस्त्रीभ्यां साम्या-

न्यायव्याभ्यामनुपपत्त्वात् पचादिसंस्कारविशेषत्वाद्वा ।

नप्तृ * पु० न पतन्ति पितरोऽनेन न+पत-तृच् नि० । पौत्रे, दौहित्रे

च । पौत्र्यां, दौहित्र्याञ्च स्त्री० ङीप् ।

नभ * न० नभ-अच् । आकाशे । श्रावणे मासि पु० ।

नभःसद् * पु० नभसि सीदति सद-क्विप् । देवे ।

नभश्चर * पु० नभसि चरति अच् । मेघे, वायौ, पक्षिणि, विद्याधरे,

सूर्यादिषु ग्रहेषु, राक्षसे च । आकाशगामिनि त्रि० ।

नभस * पु० नभ असि । श्रावणे मासि, मेघे, पतद्ग्रहे च ।

आकाशे न० ।

नभस् * न० नभ-असुन् । आकाशे । पक्षिणि ।

नभसङ्गम * पु० नभसं गच्छति गम-खच् मुम् च । पक्षिणि ।

नभस्य * पु० नभसि मेघे साधु यत् । भाद्रपदमासि ।

नभस्वत् * पु० नभोऽस्त्यस्याश्रयत्वेन मतुप् मस्य वः । वायौ ।

नभोमणि * पु० नभस आकाशस्य मणिरिव प्रकाशकत्वात् । सूर्ये ।

नभोरजस् * न० नभसो रज इव दृष्ट्यावरकत्वात् । अन्धकारे ।

नभ्राज् * पु० न भ्राजति भ्राज-क्विप् । मेघे ।

नमस् * अव्य० नम-असि । नतौ, त्यागे, स्तुते च ।

नमस्कार * पु० नमस्+कृ-घञ् । कराभ्यां शिरःसंयोगविशेषेण

व्यापकर्पसूचके व्यापारभेदे ।

नमस्य * त्रि० नमस् करोति नमस्+क्य-नमस्य-कर्मणि यत् । नम-

स्करणीये । भावे च । नतौ, पूजायाञ्च स्त्री० । [ऽसुरभेदे ।

नमुचि * पु० न मुञ्चति न+मुच-कि । शुम्भनिशुम्भयोः कनिष्ठानुजे-

नमुचिद्विष् * पु० ६त० । इन्द्रे । नमुचिसूदनादयोऽप्यत्र ।

नमेरु * पु० नम-एरु । सुरपुन्नागवृक्षे, रुद्राक्षे च ।

नम्ब * गतौ भ्वादि० पर० सक० सेट् । नम्बति अनम्बीत् ।

नम्र * त्रि० नम-र । नते, विनयान्विते च ।

नम्रक * पु० नम्र इव कायति कै-क । स्वार्थे कन् वा । वेतसे ।

स्वार्थे कन् । नम्रे त्रि० ।

नय * गतौ भ्वादि० आत्म० सक० सेट् । नयते अनयिष्ट ।

नय * पु० नी अच् । नीतौ, शुक्राचार्यादिप्रणीते शास्त्रभेदे, द्यू-

भेदे च । कर्त्तरि अच् । नेतरि, न्याय्ये च त्रि० । [प्राप-

नयन * न० नीयतेऽनेन करणे ल्युट् । नेत्रे, चक्षुषि च । भावे ल्यु-

नर * पु० नृ-नॄ-वा अच् । परमात्मनि "आपो वै नरसूनवः" ...

मनुः । विष्णौ, नरावतारे, अर्जुने, ऋषिभेदे, मनुष्ये, श...

शास्त्रोक्ते छायाप्रमाणज्ञानोपयोगिनि शङ्कौ च ।

नरक * पु० नृ-कुन् । भूमिगर्भे वराहाज्जाते दैत्यभेदे, पापिना...

भोगस्थानभेदे रौरवप्रभृतौ च । तेषां त्रिभेदो वाचस्पत्ये...

नरककुण्ड * न० ६त० । पापिनां यातनाभोगकुण्डेषु । [...

वाचस्पत्ये । [नरकान्तकादयो...

नरकजित् * पु० नरकं नरकासुरं जितवान् जि-भूते क्विप् ।...

नरदेव * पु० नरो देव इव । नृपतौ ।

नरनारायण * पु० द्वि० । नरश्च नारायणश्च द्व० । ...

नरनारायण * पु० द्वि० । भगवतोऽवतारभेदे धर्मस्यपुत्रभेदे

ऋष्योः मुनिभेदयोः । भगवतोऽवतारभेदे एकस्वरूपभे...

नरपति * पु० ६त० । राजनि । नरेशादयोऽप्यत्र ।

नरपुङ्गव * पु० पुमान् गौः पुङ्गवः इव नरः पुङ्गव इ...

योग्यत्वात् । मनुष्यश्रेष्ठे, नृपे च ।

नरमाला * स्त्री० नराणां तन्मुण्डानां

तासां मालाया "नरमालाविभूषणे"

नरमेध * पु० नरो मेध्यते वध्यते

...दिमासेषु शुक्लप्रतिपदावधिशुक्लनवमीपर्य्यन्तेषु नवसु
...दिवसेषु, महिषमेषु कर्त्तव्ये व्रतभेदे च। "चैत्रेऽऽश्विने तथाषाढे
...चैव कार्य्यो महोत्सवः। नवरात्रे महाराज" इति देवीभागवते
...नवसु दिवसेष्वपि नवरात्रशब्दप्रयोगः।
...न्न * न० कर्म०। नवाहृते नूतने वसने।
...नायक * पु० "गोपो माली तथा तैली तन्त्री मोदकवारुजी।
कुलालः कर्मकारश्च नापितो नवनायकाः।" इत्युक्तेषु जाति-
भेदेषु।
...व्याह * न० कर्म०। एकादशाहकर्त्तव्ये श्राद्धे।
...नवसूतिका * स्त्री० नवं सूतं प्रसवोऽस्त्यस्याः ठन्। धेनौ, नूतन-
प्रसूतायां गवि च।
...नवान्न * न० कर्म०। नवीनान्ने। नवमन्नं यत्र। नवान्नागमकाले।
"नवोदके नवान्ने च गृहप्रच्छादने तथा। पितरः स्पृहयन्त्य-
न्नम्" इति स्मृतिः।
नवीन * त्रि० नव+ख। नूतने।
नवोदक * न० कर्म०। नवजले। नवमुदकं यत्र। इन्द्रोदानमव-
स्थितिसमये मौरावाटस्य कतिपयदिने।
नवोद्धृत * न० कर्म०। नवनीते। नूतनोद्धृतमात्रे त्रि०।
नव्य * त्रि० नु-यत्। नूतने। रक्तपुनर्नवायां पु०।
नष्ट * त्रि० नश-क्त। तिरोहिते, दर्शनायोग्ये, ध्वस्ते च।
नष्टचन्द्र * पु० "नष्टचन्द्रो न द्रष्टव्य भाद्रे मासि सितासिते। चतु-
र्थ्यां मुदितो।द्रष्टः प्रतिषिद्धो मनीषिभिः॥" इत्युक्ते सौरभाद्र-
मासि उभयपक्षचतुर्थ्यामुदिते चन्द्रे।
नष्टचेष्टता * स्त्री० नष्टा चेष्टा यस्य तस्य भावः तल्। दर्पणोक्ता-
दिभिः सर्वचेष्टाराहित्ये। [व्यात्तंवक्षौ, निरग्नौ च।
नष्टाग्नि * पु० नष्टोऽग्निर्यस्य।प्रमादादिना नष्टवैतानिकाग्नौ, शुम-
नष्टेन्दुकला * स्त्री० नष्टा इन्दुकला यस्याम्। चतुर्दशीयुक्ते दर्शे।
"चतुर्दश्यष्टमं यामं क्षीणो भवति चन्द्रमाः" इति स्मृतेस्तद्युक्ता-
मावास्यायां हि इन्दुकलाक्षयः। [मपि देये चूर्णे।
नस्य * न० नसे हितम्। नासिकादौ कफधारादिरोगनिवारणार्थे
नस्योत * पु० नसि नासिकायां सम्यक् उतः षा+वे-क्त। (नाक-
फोड़ा) बलीवर्दे।
नह * अव्य०। न च ह च। प्रकारार्थे।
नहि * अव्य०। नह-इन्। निषेधे।
नहुष * पु० चन्द्रवंशे नृपभेदे, नागभेदे च।
नहुषात्मज * पु० ययातिनामके नृपे। नहुषपुत्रादयोऽप्यत्र।
ना * अव्य० नह-डा। निषेधे।
नाक * पु० न कमकं दुःखं तदस्ति यत्र। स्वर्गे। "यच दुःखेन
संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत् सुख
स्वःपदास्पदम्" इत्युक्तेः स्वर्गस्य दुःखरहितत्वम्।
...नाकस्याग्रमिव नाकस्य शिरः। देवे।...

नाकु * पु० नम उ नाकादेशः। वल्मीके, पर्वते च।
नाकुली * स्त्री० नकुलस्येदं प्रियत्वात् अण्। कुक्कुटीकन्दे, चविके
(चइ), रास्नायां, यवतिक्तायां, श्वेतकण्टकायाञ्च।
नाग * न० न गच्छति अगः न अगः। मनुष्याकारेषु फणलाङ्गूल-
विशिष्टेषु वासुक्यादिषु सर्पेषु, हस्तिनि, मेघे, नागकेशरे, नाग-
दन्तके, मुस्तके, देहस्थे उद्गारकारके पवनभेदे, नवादिमध्ये
करणभेदे च। नगे भवः अण्। पर्वतभवे त्रि०। रङ्गे, सीसके
च न०।
नागकेशर * पु० नागाख्यः केशरः। स्वनामख्याते पुष्पवृक्षे।
नागगन्धा * स्त्री० नागस्येव गन्धोऽस्याः। नाकुलीकन्दे।
नागज * न० नागात् जायते जन-ड। सिन्दूरे, रङ्गे च।
नागजिह्वा * स्त्री० नागानामिव जिह्वा मूलान्यस्याः। अनन्तमू-
लायां लतायाम्। [हस्तिदन्ते। स्वार्थे कन्। तत्रैवार्थे।
नागदन्त * पु० नागस्य दन्त इव। गृहाद्विर्गतदारुणि। इत०।
नागदन्तिका * स्त्री० नागस्य सर्पस्य दन्तस्तत्सम्बन्धिविषमत्त्यत्र
ठन्। (विछाति) इति ख्यातायां लतायाम्।
नागदन्ती * स्त्री० नागदन्त आख्यात्वेनास्त्यस्य अच् गौरा० ङीप्।
(हातिसुँडा) इति ख्यातायां लतायाम्, वेश्यायाञ्च।
नागदमनी * स्त्री० नागाः सर्पा दम्यन्ते अनया दम-ल्युट्-ङीप्।
(इसेरमूल) इति ख्याते लताभेदे।
नागद्रु * पु० नागप्रियः द्रुः। स्नुहीवृक्षे, तस्य सर्पपूजाधारत्वेन
तत्प्रियत्वम् अतएव "स्नुहीविटपसंस्थिताम्" इति स्मृतौ
सर्पाधिदेवतायाः स्नुहीवृक्षाश्रितत्वमुक्तम्।
नागनिर्यूह * पु० नागाकारः निर्यूहः। नागदन्तके भित्तिस्थे
नागाकारे निर्गतकाष्ठखण्डे।
नागपाश * पु० नाग पाश इव बन्धनहेतुत्वात्। वरुणास्त्रभेदे
नागाकारः पाशः। "नागपाशं नागपाशं नागपाश इति स्मृतः"
इति तन्त्रोक्ते ग्रन्थिभेदे।
नागपुर * न० दक्षिणदेशप्रसिद्धे नगरभेदे, हस्तिनापुरे च। इत०।
पातालस्थे नागानां नगरे। [ह...
नागपुष्प * पु० नागगन्धयुक्तं हस्तिमदगन्धयुक्तं पुष्पमस्य। नाग...
नागपुष्पफला * स्त्री० नागाकारं पुष्पं फलति प्रसूते फल-...
कुष्माण्डाम्।
नागपुष्पी * स्त्री० नागाकारं पुष्पमस्याः ङीप्। नागिन्यां लता...
नागफल * पु० नागाकारं फलमस्य दीर्घत्वात्। पटोलभेदे...
नागबला * स्त्री० नागानां हस्तिनां बलं यस्याः इव०। (...
गाङ्गेरुकी) इति ख्याते लताभेदे।
नागमाता * स्त्री० इत०। कद्रूनामकायां कश्यपपत्न्याम्...
नागमार * पु० नागं हस्तिनं मारयति इ [ण्...
तद्वधं हि हस्तिनो मारकः।
नागयष्टि * स्त्री० ...

शब्दाः। बहुविधाभिधेये, बहुप्रयोजने च।

नान्तरीयक * त्रि॰ अन्तरं प्रतिबन्धादिना व्यवधानं तदनुभवति। नञ्‌अन्तरशब्देन समासे नान्तरीयं ततः स्वार्थे कन्। अवश्यम्भाविनि, व्याप्ते च।

नान्दी * स्त्री॰ नन्दन्ति देवाः पितरो वा यत्र नन्द-इञ् ङीप् पृ॰। समृद्धौ, "नान्दीश्राद्धं ततः कुर्यात्" इति स्मृतिः, नाटकादौ सूत्रधारेण कर्तव्ये "देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्तिता" इत्युक्ते मङ्गलाचरणभेदे च।

नान्दीमुख * पु॰ नान्द्यर्थे हर्षार्थे मङ्गलान्वितं मुखं यस्य। कूपादिमुखबन्धने पटे। नान्दी हर्षस्तदर्थं श्राद्धं वा मुखे यस्य। नान्दीश्राद्धभुजि पितृगणे। गौरादौ स्त्री॰ ङीप्।

नान्दीवादिन् * पु॰ नान्द्यर्थं वदति वादयति वा। नाटकादौ नान्दीकरे सूत्रधारे, तदर्थं तूर्यादिवादके नटादौ च।

नापित * पु॰ क्षुरकर्मकारके जातिभेदे।

नाभि * पु॰ नह्यन्ते बध्यतेऽनेन वा नह+इञ् भान्तादेशः। द्वादशनृपचक्रस्य मध्ये, रथचक्रस्य चामपिण्डिकायाम्, क्षत्रिये च। मृगमदे स्त्री॰। प्राण्यङ्गभेदे (नाइ) पु॰ स्त्री॰। स्त्रीत्वे वा ङीप्। प्रधाने, मुख्ये त्रि॰। [नाभिजन्मादयोऽप्यत्र।

नाभिज * पु॰ नाभौ विष्णुनाभौ जायते जन-ड। चतुर्मुखे ब्रह्मणि।

नाम * अव्य॰ नामयति नम-णिच्-ड। स्वीकारे, निश्चये, स्मरणे, सम्भावनायां, निन्दायां, प्राकाश्ये, विकल्पे, अलीके, कोपे च।

नामकरण * न॰ नाम क्रियतेऽत्र कृ-ल्युट्। "दशमेऽहनि पिता नाम कुर्यात्" इति श्रुत्युक्ते दशमादिदिने कर्तव्ये संस्कारभेदे।

नामधेय * न॰ नामैव स्वार्थे धेय। नामनि, वाचकशब्दे, संज्ञायाञ्च "वाचारम्भणं विकारो नामधेयम्" इति श्रुतिः।

नामन् * न॰ नम्यतेऽभिधीयतेऽर्थोऽनेन नामन्मीमसिति नि॰। आकाशादिपदार्थबोधके संज्ञाशब्दे, आख्यायाञ्च। तानि च पञ्च "तद्धितान्तं कृदन्तं च तद्धितान्तं समासजम्। शब्दानुकरणं चेति नाम पञ्चविधं स्मृतम्" इत्युक्तेः।

नामशेष * त्रि॰ नामैव शेषो न देहादिरस्य। मृते। नाममात्रं शेषो यत्र। मरणे पु॰।

नायक * पु॰ नी-ण्वुल्। नेतरि, स्वामिनि, प्रभौ, हारमध्यमणौ, सेनापतौ, शृङ्गाररसालम्बने पत्युपपत्यादौ च। प्रापयितरि त्रि॰। [महर्षीणु उपखण्डादिषु च।

नायिका * स्त्री॰ नी-ण्वुल्। शृङ्गाररसालम्बने भार्यादौ, दुर्गायाः

नार * पु॰ नरस्यायम् अण्। वत्सके, जले च। "आपो नारा इति प्रोक्ताः" इति मनुः। परमात्मसम्बन्धिनि, मनुष्यसम्बन्धिनि च त्रि॰। "नारं स्पृष्ट्वा तु सचेलम्" इति स्मृतिः। नराणां समूहः अण्। नरसमूहे न॰। [त्रि॰।

नारक * पु॰ नृ+वुञ् प्रषोदरा॰। नरके। नरके भवः। अण्। नरकस्थे

नारकिन् * त्रि॰ नारकं भोग्यत्वेनास्त्यस्य इनि। नरकयातनाभोगिनि जीवे। [विषजीरके, विटे च। शरीरे न॰।

नारङ्ग * पु॰ न अरङ्गः अरञ्जनं यस्य। स्वनामख्याते जम्बीरभेदे,

नारद * पु॰ नारं जलं ददाति दा-क। "नारं पानीयमित्युक्तं तत् पितृभ्यः सदा भवान्। ददाति तेन ते नाम नारदेति भविष्यति" इत्युक्तनिर्वचनयुते मुनिभेदे। नरसमूहं द्यति दो+क; नारं ज्ञानं ददाति दा+क वा। मुनिभेदे, तत्प्रोक्ते पञ्चविंशतिसहस्रात्मके महापुराणे च न॰।

नारदीय * न॰ नारदेन प्रोक्तम् छ। उपपुराणभेदे।

नारसिंह * न॰ नरसिंहमधिकृत्य कृतः ग्रन्थः इत्यण्। उपपुराणभेदे।

नाराच * न॰ नराणां समूहः नारमाचमति आ+चम+ड। सर्वलोहमये अस्त्रभेदे।

नारायण * पु॰ "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" इति मनूक्तनिर्वचनवति विष्णौ।

नारायणक्षेत्र न॰ ६त॰। "प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम्। अत्र नारायणः स्वामी" इत्युक्ते गङ्गायाः प्रवाहावधिहस्तचतुष्टयमितस्थाने। [कृते विधानभेदे।

नारायणबलि * पु॰ स्मृत्युक्ते मृतानां पाषण्डादीनां प्रायश्चित्ता-

नारायणी * स्त्री॰ "जलायना भराधारा समुद्रशयनापि वा। नारायणी समाख्याता नरनारी प्रकीर्तिता।" इत्युक्तायां विष्णुशक्तौ लक्ष्म्यां, दुर्गायां, "नारायणि ! नमोऽस्तु ते" इति चण्डी, गङ्गायां, शतावर्य्याञ्च।

नारिकेल * पु॰ नल-इण् नालिः केन वायुना जलेन वा इलति चलति इल-क कर्म॰ रलयोरैक्यम्। स्वनामख्याते वृक्षे।

नारीष्टा * स्त्री॰ नारीभिरिष्टा। मल्लिकायाम्।

नाल * न॰ नल-ज्वलादि॰ ण। काण्डे, उत्पलादिदण्डे, मृणाले न॰ स्त्री॰। "नाला मृणालाग्रभुजो भजामः" इति नैषधम्।

नालि(ली) * स्त्री॰ नल-इण् वा ङीप्। देहसिरायाम्, शाकभेदे, पद्मादिदण्डे च। संज्ञायां कन्। घटिकायाम्, नाडीशाके, चर्ममयकशायाम्, हस्तिकर्णवेधन्याम्, नाले, छिद्रे, वेणुभाजने, दण्डात्मके काले च।

नालिता * स्त्री॰ नल-णिच् क्त। स्वनामख्याते शाकभेदे।

नालीक * पु॰ नाल्या कायति कै-क। मुखमात्रे, लोहसंयुक्ते अन्तश्छिद्रे शरभेदे, शरीरे च। पद्मखण्डे न॰।

नाविक * पु॰ नावा चरति ठक्। कर्णधारे।

नाव्य * त्रि॰ नावा तार्य्यं तदर्हति नौ-यत्। नौतार्य्ये देशे।

नाश * पु॰ नश-घञ्। पलायने, अदर्शने, निधने, अनुपलम्भे च।

नासत्य * पु॰ द्वि॰ व॰। नास्ति असत्यं ययोः नञ् प्रकृत्या, नासत्यः नञ्-ड नि॰ वा। अश्विनीकुमारयोः "तौ हि मूर्द्धतोऽम्बमानायाः संज्ञायाः उत्तरकुरुषु अश्वरूपं ... सुत-

[illegible] मूर्खैन [illegible] "इति [illegible]।

[illegible] शब्दे च। [illegible] कर्णे च।

[illegible]

[illegible]

दिहारे। भावे ल्युट्। निर्गमे, मरणे, निर्यणे च। [illegible] उपाये। [मारहिते त्रि०। [illegible]

निःमार * पु॰ निर्गता मारात्। [illegible]

निःमास्व * न॰ निःसार्य्यतेऽनेन निर्+स-णिच्-ल्युट्। [illegible] दिष्टो निर्गमपथे। [illegible]

निःसेहा * स्त्री॰ निर्गच्छति स्नेहो यस्मात्। [illegible]

निःस्राव * पु॰ निःस्रवति स्रु-ण। (माड़) (फेन) मण्डे।

निःस्व * पु॰ नास्ति स्वमस्य। दरिद्रे। [illegible]

निकट * न॰ नि+कटच् [illegible] नि+कट-अच् [illegible]

निकर * पु॰ नि+कृ-अप्। समूहे, सारे, न्यायदेये वित्ते, [illegible]

निकर्षण * न॰ निर्गतं कर्षणात्। ग्रामादौ [illegible] ल्पिके देशे, वहिर्विहरणभूमौ च।

निकष(स) * पु॰ नि+कष(स) अच् घ वा। [illegible] पाषाणे, शाणे, [illegible] पाषाणादौ च।

निकषण * न॰ नि+कष-भावे ल्युट्। घर्षणे। [illegible]

निकषा * अव्य॰ नि+कष आ। निकटे, मध्ये च। [illegible]

निकषात्मज * पु॰ [illegible]। राक्षसे। [illegible]

निकषोपल * पु॰ कर्म॰। शाणे, [illegible] (कोपाथर)।

निकाम * न॰ नि+कम-णिङ्। यथेप्सिते, इच्छानतिक्रमे, [illegible] "निकामतत्तापि" इति कुमारः। यष्टे, पर्य्याप्ते च।

निकाय * पु॰ नि+चि घञ् कुत्वम्। समानधर्म्मप्राणिसङ्घे [illegible]

निकाय्य * न॰ निचीयतेऽस्मिन् नि+चि ण्यत् कुत्वम्। [illegible]

निकार * पु॰ नि-कृ-घञ्। परिभवे, अपकारे, [illegible] घञ्। धान्यादेरुत्क्षेपे।

निकार * पु॰ नि+कृ-णिच्-घञ्। मारणे, परिभवकारे। [illegible]

निकुञ्ज * न॰ नि [illegible] कौ जायते जन-ड। [illegible]

निकुम्भ * पु॰ नि [illegible]। [illegible]

निकुम्भिला * स्त्री॰ [illegible]

निकुरम्ब * न॰ नि+कुरम्ब [illegible]। समूहे।

निकृत * त्रि॰ नि+कृ क्त। वञ्चिते, [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

निक्व(क्वा)ण * पु॰ नि-क्वण-अप्, घञ् वा। वीणायाः शब्दे।

निक्षिप्त * त्रि॰ नि+क्षिप-क्त। न्यस्ते, स्थापिते (गच्छित)।

निक्षेप * पु॰ नि+क्षिप-कर्मणि घञ्। अन्यस्मिन् अर्पिते धनादौ, निक्षिप्यमाणे संस्कारार्थेऽर्पिते च। भावे घञ्। स्वद्रव्यस्यान्यस्मिन् विश्वासात् स्थापनरूपे "स्वद्रव्यं यदि विश्वासात् निक्षिपत्यविशङ्कितः। निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः" इत्युक्ते व्यवहारभेदे च।

निखर्व * पु॰ निखर्वति नि+खर्व-गतौ अच्। "अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्" इति लीलावत्युक्ते दशशतकोटिरूपे संख्याभेदे, तत्संख्येये च। वामने त्रि॰।

निखात * त्रि॰ नि+खन-क्त। खनित्वा स्थापिते।

निखिल * त्रि॰ निवृत्तं खिलं शेषो यस्मात्। सकले, समग्रे च।

निगड * पु॰ न॰। नि+गल-अच् लस्य डत्वम्। शृङ्खलायाम् (बेड़ी)। निहतो गडः सेचनमस्मात् कठिनत्वात्। लौहमये हस्तिपादबन्धने अन्दुके।

निगडित * त्रि॰ निगडो जातोऽस्य तार॰ इतच्। बद्धे, संयते च।

निगद * पु॰ नि+गद अप्। भाषणे, शब्दमात्रे च।

निगम * पु॰ नितरां गम्यतेऽनेन वा नि+गम-घञ्, निगमे पुरभेदे अतः अण् न वृद्धिः वा। वाणिज्ये, पुरभेदे, कटभेदे, वणिक्पथे, निश्चये, वाक्ये, प्रतिज्ञायाम्, यथायथार्थेन वेदार्थबोधके ग्रन्थभेदे, न्यायमतसिद्धे पञ्चावयवन्यायवाक्ये अवयवे, न्यायशास्त्रे, तन्त्रभेदे, वेदे च "निगमकल्पतरोः" इति भागवतम्।

निगमन * न॰ नि+गम ल्युट्। प्रतिज्ञायाः प्रमाणोपसंहारात्मके पञ्चावयवन्यायवाक्ये "तस्मात् वह्निमान्" इत्याद्याकारके अवयवे।

निग(गा)र * पु॰ नि+गॄ अप्, घञ् वा। भोजने।

निगाम * पु॰ नि+गम-आदेशे घञ्। [illegible]।

निगूढ * पु॰ नि+गुह क्त। अन्तर्गूढे। गुप्ते, आच्छादिते च त्रि॰।

निगृहीत * त्रि॰ नि+ग्रह क्त। तर्जिते, पीडिते, अवरुद्धे च।

निग्रह * पु॰ नि+ग्रह-अप्। भर्त्सने, रोधाद्याम्, बन्धने, अनुग्रहाभावे, चिकित्सायाम्, निविडग्रहणस्य तिरस्कारे, मारणे, सीमनि, वारणाय रोधे च।

निग्रहस्थान * न॰ निग्रहस्य वादिपराजयस्य स्थानम्। गौतमोक्तेषु षोडशसु पदार्थेषु मध्ये अन्तिमे पदार्थे। [illegible]

निघात * पु॰ नि+घात घञ्। [illegible]

निघ * पु॰ [illegible]

[illegible] पदार्थे।

निघण्टु * स्त्री॰ नि+घण्ट-कुन्। [illegible]

[illegible]

[illegible]

[illegible]

निघ्नाः" इति लीलावती।

निचय * पु॰ नि+चि-कर्मणि अच्। उच्चयादिना सञ्चिते पदार्थे, "सर्वे क्षयान्ता निचयाः" इति पुराणम्। भावे अच्। समुच्चये, समूहे, निश्चये च।

निचाय * पु॰ नि+चि-घञ्। राशीकृते धान्यादौ।

निचित * त्रि॰ नि+चि-क्त। व्याप्ते, पूरिते, सङ्कीर्णे, निर्मिते च।

निचुल * पु॰ नि+चुल-क। हिज्जलवृक्षे, वेतसे, निचोले च।

निचुल * पु॰ नि+चुल-क पृ॰ दीर्घः। हिज्जले वृक्षे, निचोले च।

निचोल * पु॰ नि+चुल-अच्। प्रच्छदपटे (येन शय्यादि प्रच्छाद्यते तस्मिन्), दोलिकाद्यावरणवस्त्रे, स्त्रीपिधानपटे च।

निचोलक * पु॰ नि+चुल ण्वुल्। कञ्चुकादौ। योद्धृणां सन्नाहे, वारवाणे, कूर्पासे च। [पटे।

निचोली * स्त्री॰ नि+चुल क गौरा॰ ङीष्। स्त्रीणां प्रच्छादके

निज * त्रि॰ नि+जन-ड। आत्मीये, शाश्वतिके, नित्ये च।

निजिड़ा * स्त्री॰ (नेंडोड़ा) कन्दभेदे।

निकट * पु॰ नि+तट अच्, [illegible] काशुके [illegible] च वा। स्त्रीणां पश्चाद्भागस्थे, स्कन्धे, कुक्षौ, कक्षा [illegible], काटके (पर्वतमध्यभागे), कटिदेशे च।

नितम्बिनी * स्त्री॰ नितम्ब+प्रशस्त्ये इनि। प्रशस्तनितम्बयुक्तायां स्त्रियां, स्त्रीमात्रे च।

नितराम् * अव्य॰ नि+तर-आमु। [illegible]

नितल * न॰ [illegible]

नितान्त * न॰ [illegible]

नित्य * त्रि॰ [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]मुनिनि मन्त्रभेदे।

नित्यानध्याय * पु॰ सर्वदा वर्जनीयवेदपाठकनादौ। "द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः" इति "इमान्नित्यमनध्यायानधीयानो विवर्जयेत्" इति च मनुना प्रदर्शितेऽनध्यायभेदे।

नित्याभियुक्त * त्रि॰ नित्यमभि समन्तात् युक्त योगे व्यापृतः। देहयात्रामात्राय यतमाने, इतरत्यागासक्ते योगिनि।

निदर्शन * न॰ नि+दृश-ल्युट्। उदाहरणे, पर्यालङ्कारभेदे च स्त्री॰ टाप्।

निदाघ * पु॰ नितरां दह्यतेऽत्र नि+दह-घञ् न्यङ्क्वादि॰ कुत्वम्। उष्णे, घर्मे, घर्मकाले, ज्यैष्ठाषाढमासयोः, घर्मजले च।

निदाघकर * पु॰ निदाघं घर्मं करोति कृ अच्। सूर्ये।

निदाघकाल * पु॰ [illegible]। ग्रीष्मर्तौ, ज्यैष्ठाषाढमासयोः।

निदान * न॰ [illegible]तया दीयते दा-ल्युट्। आदिकारणे, [illegible], शुद्धौ, [illegible] वत्सदामनि, अवसाने, [illegible] रोगनिर्णये च।

निदिग्ध * त्रि॰ नि+दिह-क्त। उपचिते, लेपादिना वर्द्धिते च [illegible] स्त्री॰। [illegible] कण्टकारिकायां स्त्री॰।

[illegible]

[illegible] "आत्मा वा अरे द्रष्टव्यः [illegible] निदिध्यासितव्यः" इति [illegible]

[illegible]

[illegible] [भावने च।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] [अनुष्ठानेऽपि।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

च। [पाठिनु, [illegible]

निपात * पु॰ निकृष्टः पातः। अन्तिमपतने मरणे, [illegible]

निपान * न॰ नियतं पीयतेऽत्र। कूपसमीपस्थे जलाधारे, [illegible] कृतजलाधारस्थाने, गोदोहनपात्रे च। [निपीड़ितो

निपीडित * त्रि॰ नितरां पीडितः नि+पीड-क्त। [illegible]

निपुण * त्रि॰ नि+पुण-कर्मणि क। प्रवीणे, क्रियासु दक्षे।

निफला * स्त्री॰ निकृष्टं फलं यस्याः। ज्योतिष्मत्यां लतायाम्।

निबन्ध * पु॰ नि+बन्ध-घञ्। कालविशेषे देयत्वेन प्रतिश्रुते द्रव्ये "निबन्धो द्रव्यमेव" इति स्मृतिः, संग्रहग्रन्थभेदे, मूत्ररूपे रोगभेदे, बन्धने च। "निबन्धा यासुरी मता" इति [illegible] निबध्नाति कोष्ठम् अच्। निम्बवृक्षे, तस्मिन्सेवने [illegible] भवति। [निबन्धनोऽप्यभाति च। भावे ल्युट्। [illegible]

निबन्धन * न॰ निबध्यतेऽनेनास्मिन् वा ल्युट्। हेतौ, वीणाया [illegible]

निभ * पु॰ निभाति नि+भा-क। व्याजे। उत्तरपदस्थ। [illegible] त्रि॰। यथा पितृनिभः मातृनिभेत्यादि तत्सदृशः [illegible] स्वातन्त्र्येणास्य न प्रयोगः।

निभालन * न॰ नि+चु॰ भल+ल्युट्। दर्शने।

निभृत * त्रि॰ नि+भृ-क्त। धृते, विनीते, निश्चले, [illegible] निर्जने, अस्तायोपस्थिते च "नभसा निभृतेन्दुना" इति र[illegible]

निमज्जथु * पु॰ नि+मस्ज-अथुच्। अवगाहने, निद्रया [illegible] च। [निमज्जनया [illegible]

निमज्जन * न॰ नि+मस्ज-ल्युट्। अवगाहने, जलादौ [illegible]

निमन्त्रण * न॰ नि+मन्त्र ल्युट्। आकारणे [illegible] नर्मभेदे यथा "श्राद्धादौ भोजनार्थं नियोगस्त्वाकरणे [illegible] जायते" इति स्मृतौ प्रसिद्धम्, आह्वाने च।

निमान * न॰ निमीयते क्रीयतेऽनेन मा-ल्युट्। मूल्ये।

निमि * पु॰ इक्ष्वाकुवंश्ये, चन्द्रवंश्ये च नृपभेदे।

निमित्त * न॰ नि+मिद-क्त। कारणे, हेतौ, शकुने, [illegible] भाविशुभाशुभसूचके ज्योतिषाद्युक्ते शकुने च "निमित्तज्ञः" इति रघुः। "निमित्तानि च पश्यामि" इति [illegible] चिह्ने च। "निमित्तात् कर्मसंयोगः" इति पाणिनिः।

निमित्तकारण * न॰ कर्म॰। न्यायोक्ते समवाय्यसमवायि[illegible] कारणे यथा घटादौ दण्डादि समवायिकारणं कपाल[illegible] तत्संयोगोऽसमवायिकारणं तदुभयभिन्नं कुलालादि निमित्तकारणम्।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मिनि त्रि॰।
निम्बोदक * त्रि॰ निम्बं तदुदकञ्च। उष्णतालने, मधुरे च।
निम्ब * पु॰ निम्बति स्वास्थ्यं णिवि-सेचने अच्। (निम) वृक्षे।
निम्बतरु * पु॰ निम्ब इव तरुः कर्म॰। मन्दारवृक्षे।
निम्बबीज * पु॰ निम्ब इव तद्बीजं यस्य। राजादनीवृक्षे।
निम्बू * स्त्री॰ निम्ब-ऊ। (नेबु) वृक्षभेदे। स्वार्थे कन्। अत्रैवार्थे।
निम्रोचन * न॰ नि+म्रुच-ल्युट्। अस्तगमने।
नियत * त्रि॰ नि-यम-क्त। निश्चिते, नित्ये, आचारयुक्ते, नियम-वति, वशीकृतेन्द्रिये च। नित्यकर्मणि न॰।
नियति * स्त्री॰ नि+यम-क्तिन्। नियमे, भाग्ये, "नियतिः केन बाध्यते" इति पुराणम्। प्राक्तनशुभाशुभकर्मणि, पुण्ये च।
नियन्तृ * पु॰ नियच्छति वाहान् नि+यम-तृच्। सारथौ। शासि-तरि चक्रप्रेरके त्रि॰। स्त्रियां ङीप्।   [च।
नियन्त्रित * त्रि॰ नितरां यन्त्रितः नि+यन्त्र-क्त। अबाधे, प्रतिरुद्धे
नियम * पु॰ नि+यम-घञ्। बन्धने, प्रतिज्ञायां, निश्चये, अङ्गी-कारे पूर्वमीमांसोक्ते अप्राप्तस्य इतरपक्षव्युदासेन एकतर-पक्षे व्यवस्थापने, यथा व्रीहीनवहन्ति। अत्र वितुषीकरण-साधनभूतस्य नखादेरवहननस्य वा उभयोः प्राप्तौ अवघात इव प्रवृत्तिर्व्यवस्थाप्यते। व्रते, "नियमस्तु स यत् कर्मानित्यमाग-न्तुसाधनम्" इत्युक्ते अनित्ये आगन्तुकसाधने उपवासादौ कर्मणि, शौचादिषु च। विस्तरस्तु वाचस्पत्ये।
नियामक * पु॰ नि+यम-ण्वुल्। कर्णधारे। नियन्तरि त्रि॰।
नियुत * न॰ "शतं सहस्रमयुतं नियुतं प्रयुतं तथा" इत्युक्तायां लक्ष-सङ्ख्यायां, "लक्षञ्च नियुतञ्चैव" इत्युक्तायां दशलक्षसंख्यायां, तत्तत्सङ्ख्यान्विते च।
नियुद्ध * न॰ नियतं नितरां वा युद्धम्। बाहुयुद्धे।
नियोग * पु॰ नि+युज-भावे घञ्। अवधारणे, आज्ञायाम्, नियु-क्तस्य प्रेरणे च। नियुज्यतेऽस्मिन् आधारे घञ्। कार्य्ये।
नियोग्य * त्रि॰ नियोक्तुमर्हति ण्यत्। नियोगकरणार्हे प्रभौ।
नियोज्य * त्रि॰ नियोक्तुं शक्यते कर्मणि ण्यत् कुत्वाभावः। प्रेष्ये प्रेरणार्हे भृत्ये।   [निष्क्रान्ताद्यर्थे च।
निर् * अव्य॰ नॄ+क्विप्। न दीर्घः। निषेधे, निश्चये, बहिर्भावे,
निरंश * त्रि॰ निर्गतोऽंशोऽस्य। अंशरहिते पतितक्लीवादिपुत्रादौ। राश्यंशरहिते प्रथमदिने अन्तिमदिने च।   [दिषु निषु वर्णेषु।
निरग्नि * पु॰ नास्ति अग्निरस्य। अग्निसाध्यश्रौतकर्मशून्ये पु विप्रा-
निरङ्कुश * त्रि॰ निर्गतोऽङ्कुशात्। बाधाशून्ये, अनिवार्य्ये च।
निरञ्जन * त्रि॰ निर्गतमञ्जनं यस्मात्। अञ्जनशून्ये, निर्मले च। अञ्जनं तमः मलिनस्वभावत्वात् तस्मात् निर्गतं सर्वगतं तस्माद्वा। परमब्रह्मणि "निरञ्जनं साम्यमुपैति दिव्यम्" इति श्रुतिः।   [कृष्टे।
निरतिशय * त्रि॰ निर्गतोऽतिशयोऽस्मात्। अतिशयशून्ये परमोत्-
निरत्यय * त्रि॰ निर्गतोऽत्ययोऽस्मात्। निर्बाधे, अमायिके च "निर-त्ययं साम" इति भारविः।   [निरवधौ, निश्छिद्रे च।
निरन्तर * त्रि॰ निर्गतमन्तरात् निर्गतमन्तरं वा यस्मात्। निविडे,
निरपत्रप * त्रि॰ निर्गतोऽपत्रपायाः। निर्लज्जे।
निरर्गल * त्रि॰ निर्गतमर्गलं यस्मात्। अबाधे, प्रतिबन्धरहिते च।
निरर्थक * त्रि॰ निर्गतोऽर्थो यस्मात् कप्। निष्प्रयोजने, अभिधेय-शून्ये च।
निरवग्रह * त्रि॰ निर्गतोऽवग्रहात्। निष्प्रतिबन्धे।
निरवद्य * त्रि॰ निर्गतोऽवद्यात्। दोषशून्ये, उत्कृष्टे च।
निरवयव * पु॰ निर्गतोऽवयवात्। परमाणौ। आकारशून्ये आका-शादौ त्रि॰।
निरवशेष * त्रि॰ निर्गतोऽवशेषो यस्मात्। सर्वस्मिन्।
निरवसित * त्रि॰ निर्+अव+सो-क्त। पात्रबहिष्कृते (यस्य भोजन-पात्रं संस्कारेणापि न शुध्यति तस्मिन्) चाण्डालादौ नीचवर्णे।
निरसन * न॰ निर्+अस-ल्युट्। परित्यागे, प्रतिक्षेपे, वधे, निष्का-सने च।   [प्रतिहते, भर्त्सिते च।
निरस्त * त्रि॰ निर्+अस-क्त। त्वरितोच्चारिते, निष्ठ्यूते, क्षिप्ते,
निराकरण * न॰ निर्+आ+कृ-ल्युट्। निवारणे, दूरीकरणे च।
निराकरिष्णु त्रि॰ निर्+आ+कृ-इष्णुच्। निवारणशीले, प्रति-क्षेपकर्त्तरि च।
निराकृत * त्रि॰ निर्+आ+कृ-क्त। दूरीकृते, निवारिते च।
निराकृति * स्त्री॰ निर्+आ+कृ-क्तिन्। निवारणे।   [च पु॰।
निरामय * त्रि॰ निर्गत आमयात्। रोगरहिते। वनच्छगले, शूकरे
निरामालु * पु॰ नितरां रमतेऽत्र रम-आलु। कपित्थवृक्षे।
निरालम्बा * स्त्री॰ निर्गत आलम्बोऽस्मात्। आकाशलम्बिन्यां मांस्याम्।   [नास्तिके त्रि॰।
निरीश * न॰ निर्गतमीशायाः। फाले। ईश्वरशून्यतावादिनि
निरुक्त * न॰ निश्चयेनोच्यतेऽत्र। निर्+वच-क्त। "वर्णागमो वर्ण-विपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविध निरुक्तम्" इत्युक्तदिशा प्रकृतिप्रत्ययाद्य-वयवार्थनिर्वचनप्रतिपादके वेदाङ्गे ग्रन्थभेदे।
निरुक्ति * स्त्री॰ निर्+वच-क्तिन्। निर्वचने प्रकृतिप्रत्ययाद्यवय-वार्थकथनद्वारा समुदितार्थबोधने।
निरुपाख्य * त्रि॰ निर्गता उपाख्या यस्मात्। असत्पदार्थे वन्ध्या-पुत्रादौ, बाधौ नमनयविषयत्वेऽसमर्थोऽपि अस्फुटस्वरूपे च ब्रह्मणि।
निरूढ़ * पु॰ निर्+वह-क्त। शक्तिशून्यलक्षणयाऽर्थबोधके शब्दे।
निरूढ़लक्षणा * स्त्री॰ निरूढ़ा शक्तितुल्या लक्षणा। व्याकरणको-षादिसङ्केततः शक्तितुल्यायां लक्षणया शब्दार्थ-बोधनायकौ।
निरूढ़ि * स्त्री॰ निर्+वह-क्तिन्। प्रसिद्धौ।

निर्यूह • पु॰ निर्+ऊह-क पृ॰ । नागदन्तके, द्वारे, निर्यासे, शापीडे, शेखरे च ।

निर्लयनी • स्त्री॰ नितरां लयति श्लिष्यताम् लवि ल्युट् ङीप् पृ॰ । सर्पत्वचि (खोलस) "यथाहिनिर्लयनी वल्मीके मृता शेते" इति श्रुतिः । [कृपायां निष्कृतौ ।

निर्वचन • न॰ निर्+वच-ल्युट् । प्रकृतिप्रत्ययविभागेन पदार्थकथन-

निर्वपण • न॰ निर्+वप-ल्युट् । चर्वादीनां विभागे, दाने च ।

निर्वर्त्तित • त्रि॰ निर्+वृत णिच्-क्त । निष्पादिते ।

निर्वहण • न॰ निर्+वह-ल्युट् । नाट्योक्तौ प्रस्तुतकार्यसमाप्तौ, प्रस्ताभिनयस्य निर्वाहे, नाटकसन्धिभेदे च ।

निर्वाण • न॰ निर्+वा-भावे क्त नि॰ न । मोक्षे, चात्यन्तिकमोक्षे, निवृत्तौ, विनाशे, गजमज्जने, कर्दमे च । कर्त्तरि क्त । निर्वृते, शान्ते, मुक्ते, निश्चले, शून्ये, विश्रान्ते च त्रि॰ ।

निर्वाद • पु॰ निर्+वद-घञ् । लोकापवादे ।

निर्वापण • न॰ निर्+वप, वा णिच् ल्युट् । मारणे, वधे, दाने च ।

निर्वासन • न॰ निर्+वस णिच् ल्युट् । नगरात् बहिष्करणे, मारणे, हिंसने, विसर्जने च । [च ।

निर्वाह • न॰ निर्+वह-घञ् । कार्यसम्पादने, निष्पत्तौ, समाप्तौ

निर्विकल्प • त्रि॰ निर्गतो विकल्पो ज्ञातृज्ञेयादिविभागो विशेष्यविशेषणतासम्बन्धो वा यस्मात् । वेदान्तोक्ते ज्ञातृज्ञानादिविभागशून्ये विशेष्यविशेषणतासम्बन्धरहिते च प्रत्यक्षे ज्ञान विषये अखण्डाकारके एकविषयके ज्ञाने, "ज्ञाताज्ञाना विविध रहितो निर्विकल्पः समाधि" इति वेदा॰ । वा कप । "लक्ष्यता नाप्यता नापि ज्ञान यन्निर्विकल्पकम् । प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्" इति न्यायोक्ते अलौकिके ज्ञानविशेषे ज्ञानभेदे ।

निर्विकार • पु॰ प्रकृतेरन्यथाभावः स निर्गतो यस्मात् । षड्भावविकाररहिते परमात्मनि । विकारशून्ये त्रि॰ ।

निर्वीरा • स्त्री॰ निर्गतं वीरं यस्याः । दाक्षाभेदे । अपत्यहीने, वीरशून्ये च त्रि॰ । कादम्बिके मद्यविशेषे पु॰ । [द्राक्षा च ।

निर्वृति • स्त्री॰ निर्+वृ-क्तिन् । सुखे, मुक्तौ, अस्तगमने, मोक्षे

निर्वृत्त • त्रि॰ निर्+वृत-क्त । निष्पन्ने । निर्गता वृत्तिर्यस्य । वृत्तिरहिते ।

निर्वेद • पु॰ निर्+विद-घञ् । अवमानने, तत्त्वज्ञानेन स्वविषये सदायां नित्यं दुःखानित्यत्वादि ज्ञानात्, वैराग्ये, खेदे, "तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इति गीता, शृङ्गारादेः व्यभिचारिभावे च ।

निर्वेश • पु॰ निर्+विश-घञ् । भोगे, वेतने, मूर्च्छायां, विवाहे च ।

निर्व्यूहन • न॰ [illegible] विस्तारे, [illegible]

निर्हरण • न॰ निर्+हृ-ल्युट् । नाशे, [illegible]

मध्यपूरेवापस्मारे सन्निरू च । यदा पत्रादीनां भग्नंधर्म च सम्यक्सत्वं पदेष्टानामापस्मारे इति च तस्य निर्मूद्गत्वं भवति च दीर्घिदादिः स्वत्वं सम्यगेव पर्यायमनस्तविसर्द्दनम् । [मित्रे च ।

निर्हरण • न॰ निर्निश्चितं हरणम् । दाहार्थे शवादिहरणे, निष्का-

निर्हार • पु॰ निर्+हृ-घञ् । निःशेषमपहारे उद्धरणे, मलमूत्रादित्यागे, "आहारनिर्हारविहारयोगाः" इति स्मृतिः । शवदेहस्य दाहार्थे बहिर्नयने, पदेष्टविनियोगे च । "न निर्हारं स्त्रियः कुर्युः" इति मनुः । [निर्हरणकर्त्तरि त्रि॰ ।

निर्हारिन् • पु॰ निर्हरति दूरं गच्छति निर्+हृ णिनि । दूरगामि-

निर्ह्राद • पु॰ निश्चयेन ह्रादः ह्राद-घञ् । शब्दे ।

निलय • पु॰ निलीयते यत्र ली-अच् । गृहे, आश्रयस्थाने च ।

निवचने • अव्य॰ वचनस्याभावे । निवचनेकृत्य इत्यं निवचनेसृत्य ।

निवपन • न॰ नितरां वपनम् । पितृाद्युद्देशेन दाने ।

निवर्त्तन • न॰ भूपरिमाणविशेषे "निवर्त्तनं विंशति-दण्डमात्रम्" इति कोष॰ । नि+वृत-ल्युट् । निवारणे ।

निवर्हण • न॰ नितरां वर्हणं बर्ह-हिंसायां ल्युट् । मारणे ।

निवसति • स्त्री॰ नि+वस वासार्थे अतिच् । गृहे ।

निवसथ • पु॰ [illegible] नि+वस-अथच् । ग्रामे । [ग्रामे ।

निवसन • न॰ [illegible] ल्युट् । गृहे । नि+वस [illegible] ल्युट् ।

निवह • पु॰ [illegible] वह च । समूहे । नि+वह अच् । सप्तवायुमध्ये वायुभेदे ।

निवात • पु॰ [illegible]

[illegible]

[illegible]

[illegible]

निश(शा)मन * न॰ नि+शम-णिच्-ल्युट्। वा ह्रस्वः। श्रवणे, दर्शने च।

निशा * स्त्री॰ निश्यति व्यापारान् शो-क। रात्रौ, हरिद्रायाम्, "पञ्चगोपतियुग्मञ्च कर्किधन्वमृगा निशाः" इति ज्योतिषोक्तेषु मेषादिराशिषु च।

निशाकर * पु॰ निशां करोति कृ-ट। चन्द्रे, कुक्कुटे च।

निशाचर * पु॰ निशायां चरति चर-ट। राक्षसे, शृगाले, पेचके, सर्पे, शिवायाम्, चक्रवाके, चौरे च। रात्रिचरमात्रे त्रि॰। ङीप्। राक्षस्याम्, कुलटायाम्, केशिनीनामगन्धद्रव्ये च स्त्री॰। [च।

निशा(शि)त * त्रि॰ नि+शो क्त वा इत्त्वम्। तेजिते, तीक्ष्णीकृते

निशान * न॰ नि+शो ल्युट्। तीक्ष्णीकरणे।

निशान्त * न॰ निशायामन्तोऽत्र अम-गतौ कर्मणि क्त। गृहे। निशान्तमात्रे त्रि॰।

निशापति * पु॰ ६त॰। चन्द्रे, कर्पूरे च।

निशिपुष्पा * स्त्री॰ निशि रात्रौ पुष्पति पुष्प-अच् अलुक् स॰। शेफालिकायाम्। निशिपुष्पोत्पलादयोऽप्यत्र।

निशीथ * पु॰ निशेरतेऽत्र नि+शी-थक्। अर्द्धरात्रे, रात्रिमात्रे च।

निशीथिनी * स्त्री॰ निशीथोऽस्त्यस्या इनि। रात्रौ।

निशुम्भ * पु॰ नि+शुम्भ-अच् घञ् वा। शुम्भासुरानुजे दैत्यभेदे, वधे च "[illegible]" इति वीरचरितम्।

निशुम्भमर्दिनी * स्त्री॰ निशुम्भं मर्दयति मृद-णिनि ६त॰। दुर्गायाम्

निश्चय * पु॰ निस्+चि अच्। असन्दिग्धज्ञाने, निर्णये, विश्वासे, [illegible] च।

निश्चल * त्रि॰ निस्+चल-अच्। स्थिरे, अचले, [illegible] च। भूमौ, [illegible] स्त्री॰ टाप्।

निश्वास * पु॰ नि+श्वस-घञ्। [illegible]

[illegible]

निषङ्ग * पु॰ [illegible] सञ्ज-घञ्। तूणीरे।

निषङ्गिन् * त्रि॰ निषङ्ग+अस्त्यर्थे इनि। धनुर्धरे।

[illegible]

[illegible]

[illegible]

[illegible]

निषिद्ध * त्रि॰ नि+सिध-क्त। प्रतिषेधके नञ्पदेन, लिङाद्यनुपक्रमनञ्पदेन वा बोधिते च। [illegible]

निषेक * पु॰ नि+सिच-घञ्। गर्भाधाने "निषेकादिश्मशानान्त [illegible]

निषेध * पु॰ नि+सिध-घञ्। निवृत्तौ, प्रतिषेधे, नञादिगम्ये तदर्थे च। [illegible]

निष्क * माने चुरा॰ आत्म॰ सक॰ सेट्। निष्कयते [illegible]

निष्क * पु॰ न॰ निश्चयेन कायति कै-क। [illegible] परिमितसुवर्णानामष्टाधिकशते, व्यावहारिकरूप्ये [illegible] (टाका), चतुर्भिः सुवर्णपरिमिते मानभेदे, षोडशमाष [illegible] परिमाणे, वक्षोभूषणे, हेममात्रे, पलपरिमाणे च।

निष्कण्ठ पु॰ निर्गतः कण्ठोऽस्मात्। स्कन्धशून्ये वरुणाख्ये वृक्षे।

निष्कर्ष * पु॰ निर्+कृष-घञ्। इयत्तापरिच्छेदे, निश्चये च।

निष्कल * त्रि॰ निर्गता कला यस्मात्। कलाशून्ये, नष्टवीर्ये, आधारे पु॰। कलाऽवयवस्तच्छून्ये ब्रह्मणि न॰। "निष्कल [illegible] द्वितीयस्य" इति पुराणम्। विगतार्त्तवायां वृद्धायां स्त्री॰ वा गौरा॰ ङीष्।

निष्कासित * त्रि॰ निस्+कास गतौ णिच्-क्त। निःसारिते।

निष्कुट * पु॰ निस्+कुट-क। गृहसमीपस्थे उपवने, केदारे, कपाटे, राज्ञाम् अन्तःपुरे च। [ङीप्। [illegible]

निष्कुटि(टी) स्त्री॰ कुट-इन् कौटिल्यम् निर्गता कुटिर्यस्याः [illegible]

निष्कुषित * त्रि॰ निर्+कुष-क्त। खण्डिते, निस्त्वचीकृते [illegible] निष्कुषितम्" इति गङ्गादासः। [illegible]

निष्कुह * पु॰ निःशेषेण कुहयति विस्मापयति कुह क। वृक्षे [illegible]

निष्कृति * स्त्री॰ निर्+कृ-क्तिन्। निस्तारे, निर्मुक्तौ, प्रायश्चित्ते, उद्धारे च "कृतघ्ने निष्कृतिः" इति स्मृतिः।

निष्कृष्ट * त्रि॰ निर्+कृष-क्त। सारांशे।

निष्कोषण * न॰ निर्+कुष ल्युट्। अन्तरवयवानां बहिर् [illegible]

निष्क्रम * पु॰ निर्+क्रम-घञ्। बुद्धिमत्त्वे, निर्गमे, दुष्कुले [illegible]

निष्क्रमण * न॰ निर्+क्रम-ल्युट्। बहिर्गमने, चतुर्थे मासि शिशोः कर्त्तव्ये संस्कारभेदे च "चतुर्थे मासि कर्त्तव्यं शिशोर् निष्क्रमणं गृहात्" इति मनुः।

निष्ठा * स्त्री॰ नि+स्था-अङ्। [illegible] निष्पत्तौ, नाशे, अन्ते, याच्ञायाम्, क्लमे, व्यवस्थायाम्, [illegible] गुरुशुश्रूषादौ, तत्परतायाम्, धारणे, श्रद्धायां च [illegible] द्विविधा निष्ठा" इति गीता। [illegible] निष्ठा तु मामकी" इति गीता।

[illegible]

[illegible]

[illegible]

मैथुनाश्रयम्" इत्युक्ते पञ्चीनवाक्ये न० । तत्तद्विशिष्टे त्रि० ।
निष्ठूत * त्रि० नि+ष्ठिव क्त । क्षिप्ते ।
निष्णात * त्रि० नितरां स्नातः पारं गतः शुद्धो वा नि+स्ना क्त षत्वम् । निपुणे, पारङ्गते च ।
निष्पक्व * त्रि० निरतिशयं पक्वम् । अतिशयेन पक्वे क्वथिते दग्धमूलादौ । पक्वं पाकः निरा० स० । पाकशून्ये त्रि० ।
निष्पत्ति * स्त्री० निर्+पद-क्तिन् । समाप्तौ, सिद्धौ च ।
निष्पत्राकृति * स्त्री० पत्रं पुङ्खमस्यास्ति अच् पत्रः शरः तस्यापरपार्श्वे निष्क्रामणं सपत्रं ततः कृञि । "सपत्रनिष्पत्राभ्यामत्यन्तव्यथने" इति डाच्-क्तिन् । अतिव्यथायाम् । [काटा) ।
निष्पत्रिका * स्त्री० निर्गतं पत्रं यस्याः ब० । करीरवृक्षे (टाकर-
निष्पन्न * त्रि० निर्+पद-क्त । सिद्धे, समाप्ते च ।
निष्परिग्रह * त्रि० निर्गतः कन्याकौपीनपुस्तकाद्यतिरिक्तः परिग्रहोऽस्मात् । परमहंसे परिव्राजके । त्यक्तदारे त्रि० ।
निष्पाव * पु० निष्पूयते तुषाद्यपनयनेन शोध्यतेऽनेन निर्+पू-करणे घञ् । सुर्पादिवायौ, तेन हि धान्यधान्यादिकं कडङ्गरादिशून्यं करोति । भावे घञ् । कडङ्गरे (पागडा), राजमाषे (बरबटी), श्वेतशिम्बिधान्ये, शिम्बीमात्रे च । निर्विकल्पे त्रि० । [दिवाङ्कशून्ये त्रि० ।
निष्पावक * पु० निर्+पू-ण्वुल् । श्वेतशिम्बायाम् (बरबटी) । शीता-
निष्पावी * स्त्री० निर्+पू-घञ् गौ० । श्वेतशिम्बीधान्ये (बरबटी) ।
निष्पृह * त्रि० निर्गता स्पृहा यस्य । वैषयिके सुखे इच्छाशून्ये ।
निष्पेष * पु० निर्+पिष-घञ् । सङ्घर्षे । [ष ।
निष्प्रतिभ * त्रि० निर्गतः प्रतिभायाः । जडे, अप्रे, प्रागल्भ्यरहिते
निष्प्रवाणि * त्रि० प्रोयतेऽस्यामनया वा प्र+वेञ्-ल्युट् ङीप् प्रवाणी तन्तुवायशलाका निर्गता प्रवाण्याः निरा० स० । नवाम्बरे, अभिनवे (तान्तकाटा) वसने च ।
निष्फल * त्रि० निर्गतं फलं यस्मात् । फलरहिते । वन्ध्यायां फलशून्ये धान्यकाण्डे (नाड़ा) पु० । विगतार्तवायां स्त्रियां स्त्री० ।
निस् * अव्य० निर्+सो-क्विप् द० । निषेधे, निश्चये, साकल्ये, अतीते च ।
निसर्ग * पु० नि+सृज-घञ् । स्वभावे, स्वरूपे, सृष्टौ च ।
निसिन्धु * पु० नितरां सिन्धुरिव बहुद्रवपत्रादिमत्त्वात् । सिन्धुवारे (निसिन्दा) ।
निसूदन * न० नि+सूद-ल्युट् । मारणे, वधे च ।
निसृता * स्त्री० नितरां सृता सृ-क्त । त्रिवृतायाम् (तेवोड़ि) ।
निसृष्ट * त्रि० नि+सृज क्त । अर्पिते, मध्यस्थे च ।
निसृष्टार्थ * पु० "उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् । सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः" इत्युक्ते दूतभेदे ।
निस्तरण * न० निर्+तॄ करणे ल्युट् । उपाये । भावे ल्युट् । निस्तारे, पारगमने, तरणे, निस्तीर्णे च ।

निस्तर्हण * न० नि+स्तृह-हिंसायां ल्युट् । मारणे ।
निस्तल * त्रि० निरस्तं तलं प्रतिष्ठा यस्य । वर्तुले, तलशून्ये, चले च । गौरा० ङीप् । वटिकायाम् स्त्री० । नितरां तलम् । तले न० । [अधोऽप्रपाते च ।
निस्तार * पु० निःशेषेण तारः पारगमनम् । उद्धारे, पारगमने,
निस्तुषक्षीर * पु० निस्तुषमन्तःशस्यं क्षीरमिव शुभ्रं यस्य । गोधूमे, तस्य हि चूर्णं क्षीरवत् शुभ्रम् ।
निस्तुषित * त्रि० निस्तुष+कृतौ णिच्-क्त । त्वग्विहीने कृते तण्डुलादौ, लघूकृते, त्यक्ते च ।
निस्त्रिंश * पु० निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्यः डच् समा० । खड्गे, त्रिंशदङ्गुल्यधिकस्यैव खड्गत्वात् ततो न्यूनत्वे क्षुरिका । तस्य हिंसकत्वात् निर्दये त्रि० । [क्षुद्रोऽपि भेदे ।
निस्त्रिंशपत्रिका * स्त्री० निस्त्रिंश इव पत्रमस्याः ठन् । (मनसा)
निस्त्रैगुण्य * त्रि० निष्क्रान्तः त्रैगुण्यात् त्रिगुणकार्यात् संसारात् त्रिगुणकार्येभ्यः कामादिभ्यो वा । कामनादिशून्ये, संसारातीते च "निस्त्रैगुण्यो भवार्जुन" इति गीता । [र्थाम् ।
निस्नेहफला * स्त्री० निर्गतं स्नेहशून्यं फलं यस्याः । श्वेतकण्टका-
निस्यन्द * पु० निस्(ष्)+स्यन्द-घञ् वा षत्वम् । स्यन्दे, क्षरणे च । निष्क्रान्तं स्यन्दनं यस्मात् । स्यन्दनशून्ये त्रि० ।
निस्र(स्रा)व * पु० नि+स्रु-अप्, संज्ञायां घञ् वा । भक्तमण्डे (माड़), स्रवणे च ।
निस्व(स्वा)न * पु० नि+स्वन-अप्, घञ् वा । शब्दे ।
निहनन * न० नि+हन-ल्युट् । वधे ।
निहव * पु० नि+ह्वे-अप् सम्प्रसारणञ्च । आह्वाने । [कायाम् ।
निहाका * स्त्री० नितरां जहाति भुवं हा-वुन् न कुत्वम् । गोधि-
निहित * त्रि० नि+धा-क्त । स्थापिते, न्यस्ते, क्षिप्ते, निक्षिप्ते च । नितरां हितः । अत्यन्तहिते ।
निह्नव * पु० नि+ह्नु-अप् । शाठ्ये, अपह्नवे, निजस्य ज्ञातस्यापि वस्तुनोऽन्यथाकथने, अपलापे च । ह्नु-क्विप् । अपह्नुनिह्नव ।
निह्राद * पु० नितरां ह्रादः नि+ह्राद घञ् । अव्यक्ते शब्दे ।
नीकाश * पु० नि+काश-घञ् दीर्घ । निकटे । [illegible] [illegible] किन्तु [illegible] [illegible] [illegible] इत्यादि । [illegible] पु० ।
नीच * त्रि० निकृष्टामीं [illegible] [illegible] । [illegible], [illegible] ।
नीचभोज्य * पु० कर्म० । पलाण्डौ । [illegible] पु० ।
नीचैस् * अव्य० निकृष्टं चीयते नि-चि-डैस् दीर्घः । नीचे, अल्पे, खर्वे च । [illegible], [illegible] च ।
नीड * पु० नि+ईड [illegible] [illegible] [illegible] पु० ।
नीडज * पु० नीडे जायते जन-ड । पक्षिणि । [illegible] ।
नीति * स्त्री० नीयते [illegible] [illegible] [illegible] । [illegible] [illegible], [illegible] [illegible] च ।

भावे क्तिन् । प्रापणे । [तन्मूलकमहाभारतच्छितोपदेशादौ शास्त्रे ।

नीतिशास्त्र न० नीतिबोधकं शास्त्रं शाक० । शुक्रकामन्दकप्रभृ०

नीध्र(व्र) * न० निश्चयेन धरति वृणोति वा जलादि-ध्र वृ वा मूल० क दीर्घः । पटलप्रान्तभागे, वने, नेमौ, चन्द्रे, रेवतीनक्षत्रे च ।

नीप * पु० नी-पक् । कदम्बे, बन्धूके, नीलाशोकवृक्षे च ।

नीर ० न० नी-रक्, निर्गतं रादग्नितो वा "अग्नेरापः" इति श्रुतेस्तस्याजन्यत्वम् । जले, रसे च ।

नीरज * न० नीरे जायते जन-ड । पद्मे, मुक्तायां, कुष्ठौषधौ च । जलजातमात्रे त्रि० । जलजन्तुभेदे पु० (उदविराल) ।

नीरद * पु० नीरं ददाति दा-क । मेघे, मुस्तके च । निर्गतो रदो दन्तोऽस्मात् । दन्तशून्ये त्रि० ।

नीरन्ध्र * त्रि० निर्गतं रन्ध्रं यस्मात् । सान्द्रे, घने च ।

नीरस ० पु० निःसरन् रसो यस्मात् । दाडिमे । रसहीने त्रि० "नीरसतरुरयम्" इत्युद्भटः ।

नीराजन * न० नीरस्य शान्त्युदकस्य अजनं क्षेपोऽत्र नि०, निःशेषेण राजनमत्र वा । दीपादिना सत्कारे निर्मञ्छने, "पञ्चनीराजनं कुर्यात् प्रथमं दीपमालया । द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा । चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् । पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि" इत्युक्तदिशा दीपादिभिः पञ्चवारसंस्कारे आरात्रिके, आश्विनमासादौ घोटकादेः पूजनविशेषे च ।

नीराजना ० स्त्री० निःशेषेण राजना राज-णिच्-युच् । दीपादिना सत्कारे "नीराजना जनयताम्" इति नैषधम् । "वाजिनीराजनाविधौ" इति रघुः । [रोगरहिते त्रि० ।

नीरुज् * स्त्री० निवृत्ता रुक् । स्वास्थ्ये । निर्गता रुक् यस्मात् ।

नीरुज ० न० निवृत्ता रुजा यस्मात् ५ब० । कुष्ठौषधौ (कुड़) ।

नील ० पु० नील+वर्णे क । इलावृतवर्षस्योत्तरस्थे रम्यकवर्षस्य मर्य्यादापर्वते, भारतवर्षस्थे पर्वतभेदे, वानरभेदे, निधिभेदे, लाञ्छने, वटवृक्षे, "चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः । लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत्" इत्युक्ते "लोहितो यस्तु वर्णेन पुच्छाग्रेण तु पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" इत्युक्ते च वृषभेदे, "नीलं वा वृषमुत्सृजेत्" इति वायुपुराणम् । कृष्णवर्णे च । तद्वति त्रि० । औषधौ स्त्री० ङीप् । नील्या रक्तम् । नीलीरक्ते त्रि० । इन्द्रनीलमणौ (नीलम), तालीशपत्रे, विषे, नीलीराञ्जने च (तुँत) न० ।

नीलक * न० नील इव कायति कै-क । (कालालवण) काचलवणे, नीलवर्णलोहादौ ... पृष्ठे, नीलभेदे च । असनवृक्षे पु० ।

नीलकण्ठ * पु० नीलः कण्ठोऽस्य । "नीलाभं कण्ठमासाद्य विषं ... नीलकण्ठस्ततो हरः" इत्युक्ते हरे, मयूरे, दात्यूहे, ग्रामचटके, खञ्जने, पीतसारे चन्दनभेदे च । मूलके न० ।

नीलकान्त * पु० नीलः कान्तो मूलमस्य । विष्णुकन्दे, ...

नीलकुरण्टक * पु० कर्म० । नीलझिण्टायाम् । नीलाम्लान...

नीलताल * पु० तालमेव तालं नीलं तालमस्य । हिन्ताले, वृक्षे च ।

नीलदूर्वा * स्त्री० कर्म० । हरितवर्णदूर्वायाम् ।

नीलध्वज * पु० नीलाकारो ध्वज इव । तालवृक्षे । नील०

नीलनिर्यासक * पु० नीलवर्णो निर्यासो यस्य कप् । ... वृक्षे । नीलवर्णनिर्यासे पु० । ६ब० । तद्वति त्रि० ।

नीलपत्र * न० नीलं पत्रं पत्रं पुष्पदलं वा (पातडि) यस्य । पद्मे कुमुदे, गुण्डतृणे, अश्मन्तकवृक्षे, नीलासनवृक्षे, दाडिमे । कर्म० नीलवर्णपर्णे न० । ६ब० । तद्वति त्रि० ।

नीलपुष्प * पु० नीलं पुष्पमस्य । नीलभृङ्गराजे, नीलाम्लाने ग्रन्थिपर्णे न० । अपराजितायां स्त्री० । अतस्यां (मसिना) स्वार्थे कन् तत्रैवार्थे ।

नीलफला * स्त्री० नीलं फलं यस्याः । जम्बूवृक्षे ।

नीलमणि * पु० कर्म० । (नीलम) इन्द्रनीलमणौ ।

नीलमाष * पु० कर्म० । माषभेदे (कालकलाइ) ।

नीललोहित * पु० नीलः कण्ठे लोहितः केशेषु । शिवे, ... व्रतभेदे, कृष्णरक्तमिश्रिते वर्णे च । तद्वति त्रि० कर्म० । स्त्री० । [तारा, कृष्णभेदे ।

नीलवर्षाभू * पु० वर्षायां भवति भू+क्विप् कर्म० । ...

नीलवल्ली * स्त्री० कर्म० । वन्दायाम् (परगाछा) ।

नील(ली)वस्त्र * नील्या रक्तं नीलं कर्म० नील्या वा रक्तं शाक० । नील्या रञ्जिते वस्त्रे "नीलीवस्त्रं न ... स्मृतिः । नीलवसनादयोऽप्यत्र । ६ब० । तद्वति त्रि० ।

नीलवृन्त * न० नीलं वृन्तमस्य । तूले ।

नीलवृषा * स्त्री० नीलवर्णं पत्रं पुष्पं फलं च वर्षति ... क । वार्त्ताकीभेदे । [सरस्वति" इति तन्त्रम्

नीलसरस्वती * स्त्री० द्वितीयविद्यायां तारायाम् । "नील...

नीलसार * पु० नीलः सारोऽस्य । तिन्दुवृक्षे (केँद) । [श्रेणी

नीलसिन्दुक * पु० कर्म० । कृष्णवर्णसिन्दुवारे । नीलसिन्दुवारे

नीलाञ्जन * पु० कर्म० । नीलीराञ्जने (तुँते) ।

नीलाम्बर * न० नीलमम्बरं यस्य । बलदेवे, शनैश्चरे च । कर्म० नीलीरक्ते वस्त्रे न० । ६ब० । तद्वति त्रि० ।

नीलाम्ला * पु० ... ... स्थायति स्था+म्ला-क कर्म० । नील... पटाम् । तस्या हि पुष्पमम्लानमेव गलति ।

नीलालु * पु० कर्म० । श्यामवर्णकन्दे आलुभेदे ।

नीलासन * पु० कर्म० । (पियासाल) वृक्षभेदे । [वृक्षे

नीलिनी * स्त्री० नीलो वर्णोऽस्त्यस्याः इनि । नीलीवृक्षे,

नीलोत्पल * न० कर्म० । इन्दीवरे, सौगन्धिके नीलवर्णे कुमुदे ।

नीवाक * पु॰ नियतं वाको वचनं वच-घञ् दीर्घः। महार्घेऽतो-धान्यसङ्ग्रहादौ।

नीवार * पु॰ नि+वृ-घञ् दीर्घः। तृणधान्यभेदे "नीवारपाकादि कडङ्गरीयैः" इति रघुः।

नीवि(वी) * स्त्री॰ निव्ययति निवीयते वा नि+व्ये-इन् यलोपः दीर्घो ङित्वा ङीप्। वणिजां मूलधने, कटीवस्त्रबन्धे च "नीविं प्रति प्रणिहिते तु करे" इति साहित्यदर्पणे धृतरि॰।

नीवृत् * पु॰ स्त्री॰ नियतं वर्त्ततेऽत्र नि+वृत क्विप् दीर्घः। देशे, जनपदे च।

नीशार * पु॰ नितरां शीर्य्यते हिमानिलादनेनेन वा नि+शॄ-घञ् दीर्घः। हिमानिलनिवारणे प्रावरणे, काण्डपटे च (कानात्)।

नीहार * पु॰ निह्रियते नि+हृ-घञ् दीर्घः। घनीभूते शिशिरे, हिमे च।

नु * अव्य॰ नुदति नौति वा मित॰ डु। विकल्पे, अनुनये, अतीते, प्रश्ने, हेतौ, वितर्के, अपमाने, अपदेशे, अनुतापे च। [णत्वम्।

नुड * वधे तुदा॰ कुटा॰ पर॰ सक॰ सेट्। नुडति अनुडीत्। न

नुति * स्त्री नु-क्तिन्। स्तवे, प्रणामे च।

नुत्त(न्न) * त्रि॰ नुद क्त तस्य वा नः। प्रेरिते, क्षिप्ते च।

नूतन * त्रि॰ नव एव नव+तन नवस्य नूः। अभिनवे ,नवीने। व।

नूत्नोऽप्यत्र। [हर्षे।

नूद * पु॰ नुदति पापं क पृ॰ दीर्घः। अश्वत्थाकारे ब्रह्मदारुणि

नूनम् * अव्य॰ नु+ऊन-अमि। वितर्के, निश्चिते, स्मरणे, वाक्य-पूरणे, अनुपेक्षायोजने च। [पादाङ्गदे।

नूपुर * न॰ नू-क्विप् शुचि पुरति पुर-अग्रगमने क। (नेपुर)

नृ * पु॰ नी-ऋन् डिच्च। मनुष्ये, पुरुषे च। जातौ ङीप्। नारी।

नृग * पु॰ इक्ष्वाकुवंश्ये नृपभेदे।

नृकरोटिका * स्त्री॰ ६त॰। नरकपाले।

नृचक्षस् * पु॰ नॄन् चष्टे पश्यति भक्षत्वेन चक्ष-असुन् न ख्यादेशः। राक्षसे। [नर्त्स्यति।

नृत * नर्त्तने दिवा॰ पर॰ अक॰ सेट्। नृत्यति अनर्त्तीत् नर्त्तिष्यति

नृत्त(त्य) * न॰ नृत-क्त क्यप् वा। तालमानयुक्ते सविलासाङ्गविक्षेपरूपे नर्त्तने। [भवेत्" इत्युक्ते राजविशेषे, राजमात्रे च।

नृप * पु॰ नॄन् पाति पा-क। "चतुर्योजनपर्य्यन्तमधिकारी नृपो

नृपकन्द * पु॰ कन्दानां श्रेष्ठः राजद॰। राजपलाण्डौ।

नृपति * पु॰ ६त॰। कुबेरे, राजनि च। [हस्त्यादयोऽप्यत्र।

नृपद्रुम * पु॰ द्रुमाणां नृपः राजद॰। राजवृक्षे, आरग्वधे च। राज-

नृपप्रिय * पु॰ ६त॰। (वेडशाल) वंशभेदे तस्य दुर्गवेष्टनकारित्वात्प्रियत्वम्। राजपलाण्डौ, शालिधान्ये, आम्रे च। राजवल्लभे त्रि॰। छिन्नकायां, राजतरुण्यां च स्त्री॰।

नृपप्रियफला * स्त्री॰ नृपप्रियं फलं यस्याः। वार्त्ताकुाम्।

नृपसभ * न॰ नृपाणां सभा शाला क्लीवतिर्वा। राजसमूहे, राजास्पदशालायाञ्च।

नृपोचित * पु॰ नृपेषु उचितः। राजमाषे। राजयोग्ये त्रि॰।

नृयज्ञ * पु॰ नृणां यज्ञः। अतिथिपूजने। नरयज्ञादयोऽप्यत्र।

नृवराह * पु॰ ना वराहः। अंशाभ्यां मनुष्यवराहाकृतौ भगवदवतारभेदे। [परद्रोहिणि च।

नृशंस * त्रि॰ नॄन् शंसति शंस+हिंसायाम् अण्। घातुके, क्रूरे,

नृसिंह * पु॰ ना सिंहः। अंशाभ्यां मनुष्यसिंहाकृतियुक्ते भगवतोऽवतारभेदे।

नॄ * नीतौ क्र्यादि॰ प्वादि॰ पर॰ सक॰ सेट्। नृणाति अनारीत्। अणोपदेशत्वान्न णत्वम्। [नरयति। न णत्वम्।

नॄ * नये भ्वादि॰ पर॰ सक॰ सेट् घटा॰। नरति अनारीत्। णिच्

नेजक * पु॰ निज-शुद्धौ ण्वुल्। रजके। शोधकमात्रे त्रि॰।

नेतृ * त्रि॰ नी-तृच् प्रभौ, निर्वाहके नायके, प्रवर्त्तके, प्रापके च। स्त्रियां ङीप्। निम्बवृक्षे पु॰।

नेत्र * न॰ नयति नीयते वाऽनेन ष्ट्रन्। मन्थनदामनि, वस्त्रभेदे, वृक्षमूले, रथे, जटायाम्, नाड्याम्, शलाकायाम्, चक्षुषि च। प्रापयितरि, नयनसाधने, प्रवर्त्तके च त्रि॰।

नेत्रच्छद * पु॰ नेत्रं छाद्यते अनेन छद+णिच्-घ ह्रस्वः। नेत्रपिधायके चर्म्ममये नेत्रपुटे।

नेत्रपर्य्यन्त * पु॰ नेत्रयोः पर्य्यन्तः कोणः सीमा। अपाङ्गे।

नेत्रमल * न॰ ६त॰। चक्षुर्मले, दूषिकायाञ्च (पिचुटि)।

नेत्ररञ्जन * न॰ नेत्रं रज्यते अनेन रन्ज-करणे ल्युट्। कज्जले।

नेत्ररोगहन् * पु॰ नेत्ररोगं हन्ति हन क्विप्। वृश्चिकालीवृक्षे तस्य हि नेत्ररोगनाशकत्वं वैद्यके प्रसिद्धम्।

नेत्राम्बु * न॰ ६त॰। चक्षुर्जले अश्रुणि। [वृक्षभेदे।

नेत्रोपमफल * पु॰ नेत्रे उपमा यस्य तादृशं फलमस्य। (बादाम)

नेत्रौष(धि)धी * स्त्री॰ ६त॰ वा ङीप्। अजशृङ्ग्याम् (माडरशिङ्गा)।

नेदिष्ठ * त्रि॰ अतिशयेनान्तिकः इष्ठन् नेदादेशः। अतिशयनिकटस्थे।

नेदीयस् * त्रि॰ अतिशयेनान्तिकः ईयसुन् नेदादेशः। अत्यन्तसमीपस्थे। [कादेरभिनयार्थकलाभूमौ च।

नेपथ्य * न॰ नी-विच् नयः नेतुः पथ्यम्। भूषणे, वेशे, वेशस्थाने, नाट-

नेपाल * पु॰ स्वनामख्याते "जटेश्वरं समारभ्य योगेशान्तं महेश्वरि। नेपालदेशो देवेशि" इत्युक्ते देशभेदे।

नेपालकम्बल * पु॰ ६त॰। कुथाख्ये चित्रकम्बले।

नेपालनिम्ब * पु॰ ६त॰। ज्वरान्तके तृणनिम्बे, निम्बभेदे च।

नेपालमूलक * न॰ ६त॰। हस्तिकन्दसदृशे मूलभेदे।

नेपालिका * स्त्री॰ नेपाले भवा ठन्। मनःशिलायाम्।

नेम * पु॰ नी-मन्। अवधौ, काले, अर्द्धे, प्राकारे, कैतवे, गर्त्ते, सायं, अन्यार्थेऽप्यर्थे च। अन्यार्थेऽस्य सर्वनामता।

नेमि * पु॰ नी-मि। तिनिशवृक्षे। कूपसमीपे रज्जुधारणार्थं त्रिकाष्ठयन्त्रे, चक्रान्ते च। (रथचक्रस्य भूमिसङ्घर्षणयोग्ये भागे) कूपान्तिकस्थे समानस्थलभागे स्त्री॰ वा ङीप्।

नैमिष * न॰ [illegible] नेमिः शीर्यतेऽत्र [illegible]। नैमिषारण्ये क्षेत्रे। [illegible]। नैमिषमप्यत्र।

नैकभेद * त्रि॰ न एकः एके भेदा [illegible] सुपसुपेति स॰ नैके भेदा यस्य। अनेकप्रकारे [illegible]।

नैगम * पु॰ निगम एव [illegible]। नीत्याम्, उपनिषदि ब्रह्म-विद्यायां, [illegible] वेदान्ते च। निगमे भवः अण्। वणि-[illegible] च। [उत्तमायां गति।

नैत्यकी * स्त्री॰ नैत्यिकम् चरति ठक् टित्वात् गौ॰ ङीप्।

नैत्यिक * न॰ नित्यमस्त्येषाम् कन् ठन् वा। नित्यानुष्ठेये, "नैत्यिकोपात्तं [illegible]" इति स्मृतिः।

नैपुण (न) * न॰ पु॰ निपुणस्य भावः ष्यञ् अण् वा। दक्षतायाम्।

नैमित्तिक * त्रि॰ निमित्तादागतम् ठञ्। पुत्रजन्मादिनिमित्तमा-[illegible] "नित्यं नैमित्तिकं चरेत्" इति [illegible]।

नैमित्तिकप्रलय * पु॰ [illegible] "[illegible] ब्राह्मो नैमित्तिको [illegible]" [illegible]। [लिम्।

[illegible]

नैसर्गिक * त्रि॰ निसर्गेण स्वभावेन निर्वृत्तः ठञ्। स्वाभा[illegible]

नैस्त्रिंशिक * त्रि॰ निस्त्रिंशः प्रहरणमस्य ठक्। [illegible]

नो * अव्य॰ नह-डो। अभावे।

नोचेत् * अव्य॰ नो च चेच्च द्व॰। निषेधे।

नोपस्थातृ * त्रि॰ न॰ उपतिष्ठति स्था+तृच्। दूरस्थे [illegible] "यादौ क्रियाद्वेषो नोपस्थाता निवृत्तः" इति [illegible] दिभेदे। [कन्। नौ[illegible]

नौ * स्त्री॰ नुद डौ। जलोपरि प्लवनसाधने तरिकायाम्।

नौकादण्ड * पु॰ ६त॰। नौकायाः चालनार्थे [illegible] (दाँड)। [illegible]

न्यक्कार * पु॰ न्यक्+कृ-घञ्। नीचकरणे, तिरस्कारे च।

न्यग्रोध * पु॰ न्यक् रुणद्धि रुध-अच्। वटवृक्षे, [illegible] हयविस्तारकृतव्यासरूपपरिमाणे (वांवो), शमी[illegible] स्थिते विष्णौ, विषपर्ण्यां, मोहनौषधौ च। [illegible] ङीप्।

न्यग्रोधपरिमण्डला * स्त्री॰ "स्तनौ सुकठिनौ यस्या नि[illegible] [illegible]। मध्ये क्षीणा भवेद् या सा [illegible] [illegible] मार्याम्। [illegible]

न्यङ्कु * पु॰ नितरामञ्चति नि+अन्च-उ कुत्वम्। मृगभेदे।

न्यङ्कुभूरुह * पु॰ न्यङ्कुरिव भूरुहः। श्योनाकवृक्षे। [illegible] [illegible]।

न्यच् * त्रि॰ निम्नमञ्चति नि-अन्च+क्विन्। नीचे निम्ने।

न्यञ्चित * त्रि॰ नि+अन्च-क्त। अधःक्षिप्ते।

न्यस्त * त्रि॰ नि+अस क्त। क्षिप्ते, त्यक्ते, विन्यस्ते, [illegible]

न्याद * पु॰ नि+अद-घञ् न घसादेशः। भोजने।

न्याय * पु॰ नि+इ-इण् वा घञ्। उचिते, गौतमोक्ते [illegible] [illegible] प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यविशेषे, नीतौ, [illegible] भोगे, युक्तौ, वृक्षिमूलद्वारभेदे च।

न्याय्य * त्रि॰ न्यायादनपेतं यत्। उचिते, युक्तियुक्ते च।

न्यास * पु॰ नि+अस कर्मणि, भावे वा घञ्। [illegible] [illegible] अर्पणे, निक्षेपे, सन्यासे च। [illegible]

न्युब्ज * पु॰ नि+उब्ज-अच्। [illegible]

न्यून * त्रि॰ नि+ऊन [illegible]। [illegible] [illegible] (दर्भमयस्रुचि) पु॰। [illegible]

न्यून * त्रि॰ [illegible] नि+ऊन-परिमाणे अच्। [illegible]

प

प * पु॰ [illegible]। पवने, पानीये, पर्णे, [illegible]

पक्व * पु॰ [illegible]

पक्ति * त्रि॰ [illegible]

क • त्रि॰ पच क्त तस्य वः। परिणते, दृढे, विनाशोन्मुखे, कृत-पाके च। [र्त्तरि क्ति॰।

कृत् • पु॰ पक्वं करोति कृ क्विप् तुक॰। निम्बवृक्षे। पाककर्तरि त्रि॰।

क्ष • परिग्रहे चुरा॰ उभ॰ सक॰ सेट्। पक्षयति ते अपपक्षत् त।

क्ष • परिग्रहे भ्वा॰ चुरा॰ उभ॰ सक॰ सेट् पक्षे भ्वादित्व पर॰। पक्षति पक्षयति ते अपपक्षत् त अपक्षीत्।

क्ष • पु॰ पक्ष-अच्। शुक्लकृष्णप्रतिपदादिपञ्चदश्यन्तपञ्चदशतिथ्यात्मके काले, खगानां पतत्रे (पाखा), शरस्य पुङ्खस्थे पत्रे। केशात् परः समूहार्थे, यथा केशपक्ष इत्यादि। पार्श्वे, पक्षे, न्यायोक्ते सन्दिग्धसाध्यवति पदार्थे, यथा पर्वतो वह्निमान्। विरोधे, बले, सहाये, सख्यौ, चुल्लीरन्ध्रे, राजकुञ्जरे, पक्षे, वलये, समूहे, पिच्छे, देहार्धे च। [सहाये।

क्षक • पु॰ पक्ष इव कायति कै-क। पार्श्वद्वारे (खिड़की)।

क्षता • स्त्री॰ पक्षस्य भावः। न्यायोक्ते अनुमितिकर्त्तृत्वाभावसमानाधिकरणे साध्यवत्ताविरहाभावे यत्र वह्न्यादिकं साध्यते तत्र धर्मिणि वह्निमत्त्वनिश्चयाभावे एव पक्षता तत्र तद्विषयकत्वे तु अनुमानेच्छाभावस्य एव पक्षता नैतावतेति न्याये स्थितम्।

क्षति • स्त्री॰ पक्षस्य मूलम् ति। पक्षारम्भके प्रतिपदि तिथौ, खगानां पक्षस्य मूले च (डाना)।

क्षद्वार • न॰ पक्षं पार्श्वं द्वारम्। (खिड़की) पार्श्वस्थे द्वारे।

क्षपात • पु॰ पक्षे अन्यायसाहाय्ये पातः अभिनिवेशः। अन्यायसाहाय्ये।

क्षपातिता • स्त्री॰ पक्षपात+अस्त्यर्थे इनि तस्य भावः तल्। साहाय्यकरणाभिनिवेशे, पक्षाभ्यां पतने च "न परं पथि पक्षपातिता" इति नैषधम्।

क्षान्त • पु॰ पक्षस्यान्तो यत्र। अमावास्यायां पूर्णिमायाञ्च तिथौ।

क्षिणी • स्त्री॰ पक्षतुल्ये अहनी विद्येते अस्या इनि। आगामिवर्त्तमानदिनाभ्यां युक्तायां रात्रौ।

क्षिन् • पु॰ पक्ष+अस्त्यर्थे इनि। खगे, विहङ्गमे च।

क्षिल • त्रि॰ पक्षः साहाय्यत्वेनास्त्यस्य इलच्। साहाय्यकारके। न्याय भाष्यकारे वात्स्यायनमुनौ पु॰।

क्ष्मन् • न॰ पक्ष-मनिन्। नेत्रावरके लोम्नि, पक्ष्मादेः केशे, पुष्पादेः सूक्ष्मांशे, पक्षादेः पक्षे च।

ङ्क • पु॰ न॰ पचि अच् नि॰ कुत्वम्। कर्दमे, पापे च।

ङ्क(ङ्ग)ज • न॰ पङ्के जायते जन-ड पङ्के अलुक् समा॰। पद्मे, सारसपक्षिणि च। पङ्कजन्मादयोऽप्यत्र। [सारसपक्षि च

पङ्केरुह • न॰ पङ्के रोहति रुह क अलुक् समा॰। पद्मे।

पङ्कजाख • पु॰ पङ्के जायते इव। [illegible]

पङ्कार • पु॰ पङ्कमृच्छति ऋ अण् उप॰ स॰। शैवाले, सेतौ च।

पङ्किल • त्रि॰ पङ्क+अस्त्यर्थे इलच्। कर्दमयुक्ते देशे।

पङ्क्ति • स्त्री॰ पचि-क्तिन्। श्रेण्याम् आलिः, [illegible]

पादके दशाक्षरपादके च छन्दोभेदे, दशसंख्यायाञ्च, तेन पङ्क्तिरथ इति दशरथसंज्ञा। पृथिव्यां, गौरवे, पाके, प्रपञ्चे च।

पङ्क्तिदूषक • पु॰ पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानां विप्राणामावलिं दूषयति दुषि-णिच्-ण्वुल् वा ष्यञ्॰ स॰। श्राद्धे भोजनार्थमुपविष्टेषु अयोग्ये ब्राह्मणे श्यावदन्तादौ। विस्तरस्तु वाचस्पत्ये।

पङ्क्तिपावन • पु॰ पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानामावलिं पुनाति पू-णिच्-ल्यु। श्राद्धभोजनार्थमुपविष्टानां पङ्क्तिपवित्रताकारके विद्याशिल्पादियुक्ते। विस्तरस्तु वाचस्पत्ये।

पङ्क्तिबीज • पु॰ पङ्क्तिभूतानि बीजानि यस्य। बर्बुरवृक्षे।

पङ्गु • त्रि॰ खजि-कु-पृषोदरा॰ गुक् च। गतिशक्तिहीने। खिञ्जे, खञ्जे। शनैश्चरे पु॰। [खञ्ज पङ्गुलः पथा।

पच • पाके भ्वादि॰ उभ॰ सक॰ अनिट्। पचति ते अपाक्षीत्

पच • व्यक्तीकारे भ्वादि॰ आत्म॰ अनिट्। पचते अपक्त। पेच।

पच • विस्तारे चुरा॰ उभ॰ सक॰ सेट् इदित्। पञ्चयति ते अपपञ्चत् त।

पचती • स्त्री॰ पच्यतेऽनया ल्युट्। वस्त्रीभर्जनार्थे कपालभेदे।

पचम्पचा • स्त्री॰ पचति पच+ अच् पृ॰ मुम् द्वित्वञ्च। दारुहरिद्रायाम्।

पज • स्पर्शने भ्वादि॰ पर॰ सक॰ सेट् इदित्। पञ्जति अपञ्जीत्।

पञ्च • पु॰ स्त्री॰ पञ्चसंख्यायां [illegible] च। मूले, "पञ्च यज्ञोपवीतानि" इति श्रुतिः। [illegible]

पञ्चक • न॰ पञ्चानामवयवम् कन्। पञ्चकम् [illegible]

पञ्चकषाय • पु॰ न॰ कर्म॰ "[illegible]" [illegible]

[illegible]

पञ्चकोल • न॰ "[illegible]"

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

पञ्चतन्मात्र * न० तदेव तन्मात्रं पञ्चानां तन्मात्राणां समाहारः। सांख्यादिसिद्धेषु महाभूतकारणीभूतेषु शब्दस्पर्शरूपरसगन्धमात्रात्मकेषु पञ्चसु सूक्ष्मभूतेषु।

पञ्चतय * न० पञ्चानामवयवः पञ्चावयवा येषां वा तयप्। पञ्चसंख्यायाम्। तत्संख्याते त्रि०।

पञ्चत्व * न० पञ्चानां पृथिव्यादिभूतानां भावः त्व। मरणे, तत्र हि देहारम्भकभूतानां स्वांशस्य स्वेषु स्वेषु प्रवेशः इति तस्य पञ्चरूपता। तल्। पञ्चताप्यत्र।

पञ्चदश * त्रि० पञ्चदशानां पूरणः डट्। येन पञ्चदशसंख्या पूर्य्यते तस्मिन्। स्त्रियां ङीप्। सा च चन्द्रस्य पक्षयोः पञ्चदशकलाक्रियारूपायां पूर्णिमायाममावास्यायाञ्च तिथौ, विद्यारण्यप्रणीते वेदान्तग्रन्थभेदे च।

पञ्चधा * अव्य० पञ्चप्रकारम् पञ्चन्+धाच्। पञ्चप्रकारे।

पञ्चन् * त्रि० पचि-विस्तारे कनिन्। (पाँच) संख्यायुक्ते।

पञ्चनख * पु० स्त्री० पञ्च नखा यस्य। हस्तिनि, व्याघ्रे च। पञ्चनखयुक्ते त्रि०। ते च शशकादयः "शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुः" इति मनुः।

पञ्चनद * पु० पञ्च नद्यो यत्र। "वितस्तैरावती चन्द्रभागा नदी [illegible]। शतद्रुश्च विपाशा च तेन पञ्चनदः स्मृतः" इत्युक्ते (पञ्जाब) इति ख्याते जनपदे। पञ्चानां नदीनां समाहारः। काशीस्थासु "किरणा धूतपापा च शुभतोया सरस्वती। गङ्गा च यमुना चैव पञ्चनद्यः प्रकीर्त्तिताः" इत्युक्तासु बिन्दुमाधवसमीपस्थासु पञ्चसु नदीषु।

पञ्चपर्णी * स्त्री० पञ्च पञ्च पर्णानि प्रतिपर्वं यस्याः। (गोरक्षपाकुलिया) क्षुपभेदे। स्वार्थे कन् अत्रैवार्थे।

पञ्चपल्लव * न० समा० द्विगुः। "आम्राश्वत्थवटप्लक्षोदुम्बराणां तु पल्लवाः। पञ्चपल्लवमित्युक्तम्" इत्युक्ते वैदिककर्मणि "पनसाम्र [illegible]" इति तन्त्रोक्ते तान्त्रिककर्मणि च [illegible] पल्लवपञ्चके।

[illegible] * न० पञ्च [illegible]। [illegible] पार्वणश्राद्धे। [illegible] पञ्चसु [illegible]। [illegible]भेदे।

[illegible] * पु० पञ्च [illegible] यत्र। [illegible] पञ्चनदीसङ्गमे।

[illegible] * पु० पञ्च [illegible]। "[illegible]" [illegible] भेदे।

[illegible] * न० पञ्च [illegible]। [illegible]

[illegible] * त्रि० पञ्चानां पूरणः पञ्चन्+डट्। येन पञ्चसंख्या पूर्य्यते तस्मिन्, स्त्रियां ङीप्। सा च चन्द्रस्य पञ्चमकलाक्रियारूपायां [illegible]। [illegible]

[illegible] * न० [illegible]।

पञ्चमहायज्ञ * पु० महान् यज्ञः महायज्ञः ततः कर्म०। नित्यं गृहस्थकर्त्तव्येषु स्वाध्यायपाठाग्निहोत्रयागातिथिपूजनपितृतर्पणबलिकर्माख्येषु पञ्चसु पञ्चसूनादोषापनोदकेषु कर्मसु। पञ्चयज्ञशब्दोऽप्यत्रार्थे।

पञ्चमास्य * पु० पञ्चमः स्वरभेदः आस्ये तदेकदेशकण्ठे यस्य। कोकिले, पञ्चमं रौति कोकिलः" इति हि श्रूयते।

पञ्चमूल * न० समा० द्वि०। "बिल्वश्योनाकगाम्भारीपाटलागणिकारिकाः। पञ्चमूलमिति ख्यातम्" इत्युक्ते पाचनभेदे।

पञ्चरत्न * न० समा० द्वि०। "विद्रुमं हीरकं नीलं पद्मरागश्च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तम्" इत्युक्तेषु पञ्चसु रत्नेषु।

पञ्चरात्र * न० "रात्रन्तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्। पञ्चरात्रमिति ख्यातम्" इत्युक्ते पञ्चज्ञानसाधने नारदाद्युक्ते ग्रन्थभेदे। [समस्तदानमध्ये महादानभेदे।

पञ्चलाङ्गलक * न० पञ्चभिर्लाङ्गलैः स्वर्णमयैः कायति कै-क। ग्रन्थ

पञ्चलौहक * न० लौहं धातुः समा० द्वि०। "सुवर्णं रजतं ताम्रं रङ्गं नागं तथैव च। पञ्चलौहमिति प्रोक्तम्" इत्युक्ते धातुगणे।

पञ्चवटी * स्त्री० वटो वृक्षः समा० द्वि०। "अश्वत्थो बिल्ववृक्षश्च वटधात्र्यशोककः। यात्रा पञ्चवटीत्युक्ता" इत्युक्तेषु अश्वत्थादिषु पञ्चसु वृक्षेषु, रामायणप्रसिद्धे जनस्थानस्थे वनभेदे च।

पञ्चवक्त्र * पु० पञ्च वक्त्राणि यस्य। शिवे, रुद्राक्षभेदे च। पचि विस्तारे अच् पञ्च वक्त्रमस्य। सिंहे। पञ्चास्यपञ्चमुखादयोऽप्यत्र।

पञ्चवल्कल * न० समा० द्वि०। "न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलम्। पञ्चवल्कलमित्युक्तम्" इत्युक्तेषु वटादिवल्कलेषु।

पञ्चबाण * पु० पञ्च बाणा यस्य। "सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा। स्तम्भनश्चेति कामस्य शराः पञ्च प्रकीर्त्तिताः" इत्युक्तशरपञ्चकयुक्ते कामे। पञ्चशरादयोऽप्यत्र।

पञ्चशस्य * न० समा० द्वि०। "धान्यमुद्गास्तिला माषा व्रीहयो वा। पञ्चशस्यमिति प्रोक्तम्" इत्युक्तेषु धान्यादिषु।

पञ्चशाख * पु० पञ्च शाखाकारा अङ्गुलयो यत्र। हस्ते।

पञ्चशिख * पु० मुनिभेदे, "वोढुः पञ्चशिखस्तथा" इति पुराणम्।

पञ्चसुगन्धिक * न० "कर्पूरकङ्कोललवङ्गपुष्पगुवाकजातीफल[illegible]। समांशभागेन च योजितेन मनोहरं पञ्चसुगन्धिकं स्यात्" इत्युक्तेषु मिलितसुगन्धिद्रव्येषु।

पञ्चसूना * स्त्री० पञ्चसूनाः प्राणिवधस्थानानि। 'पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च" इत्युक्तेषु पञ्चसु कौटम्बस्थानेषु।

[illegible] * पु० पञ्च [illegible] यस्य। [illegible] "[illegible]" इति [illegible]

…कं मर्दयितायां स्वर्णतिलादिषु पञ्चसु स्थानेषु अनिलतेलोपाम-
…मनपायां क्रियायाम् "पञ्चाग्नयो ये च त्रिणाचिकेताः" इति
श्रुतिः । पञ्चाग्निमति च ।

…ङ्ग * न० समा० द्वि० । "त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य
…शाखिन । एकवर्ष्यं तु पञ्चाङ्गम्" इत्युक्ते एकवृक्षस्य त्वगा-
दिषु पञ्चसु, "तिथिवारश्च नक्षत्रं योगः करणमेव च । पञ्चा-
ङ्गमितदिर्ष्टं यम्" इत्युक्तेषु तिथ्यादिषु च । पञ्च अङ्गानि यस्य ।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् । पञ्चाङ्गोपासनं
लोके पुरश्चरणमिष्यते" इति तन्त्रोक्तपुरश्चरणभेदे, पञ्च अङ्गानि
आयतानि यस्य । कूर्मे पु०, तस्य हि हस्तपादग्रीवारूपाङ्गप-
ञ्चकस्य यथेष्टं सङ्कोचविकाशयोः स्वेच्छया करणादायतत्वम् ।

पञ्चाङ्गुल * पु० पञ्च अङ्गुलय इव पत्राकारा यस्य अच् समा० । एर-
ण्डवृक्षे । पञ्चाङ्गुलयुक्ते त्रि० ।

पञ्चामृत * न० समा० द्वि० । "दुग्धं च शर्करा चैव घृतं दधि तथा
मधु । पञ्चामृतमिदं प्रोक्तम्" इत्युक्तेषु पञ्चसु दुग्धादिषु ।

…ञ्चाम्र * न० "अश्वत्थ एकः पिचुमर्द एको द्वौ चम्पकौ त्रीणि च
केशराणि । सप्ताथ ताला नव नारिकेलाः पञ्चाम्रवापी नरकं
न याति" इत्युक्तेषु अश्वत्थादिषु ।

पञ्चाल * पु० देशभेदे । तद्देशस्थे ब० व० ।

पञ्चाली * स्त्री० पञ्चं प्रपञ्चमलति पर्याप्नोति अल-अण् । वस्त्रकृत-
पुत्तलिकायां, गानभेदे च (पाञ्चाली) । [भेदे, तत्संख्यातेषु च ।

पञ्चाशत् * स्त्री० पञ्चदशतः परिमाणमस्य नि० । (पञ्चाश) सङ्ख्या-

पञ्चेन्द्रिय * न० समा० द्वि० "श्रोत्रत्वग्नेत्ररसनघ्राणं पञ्चेन्द्रियं
मतम्" इत्युक्तेषु ज्ञानेन्द्रियेषु, श्रोत्रादिषु, "वाक्पाणिपादपा-
यूपस्थानि कर्मेन्द्रियाणि च" इत्युक्तेषु वागादिषु कर्मेन्द्रियेषु च
पञ्चसु । [कङ्काले । विहङ्गादिवन्धनस्थाने न० ।

(प)ञ्जर * पु० न० पजि (पिजि) वा अरच् । शरीरास्थिवृन्दे

…ञ्जन * पु० पजि-अनच् । कोलकन्दे ।

…ञ्ज(ञ्जी) * स्त्री० पजि-इन् वा ङीप् । सूत्रसाधनतालिकायां
(पाइल) । स्वार्थे कन् । अत्र पाणिनीयसूत्रवृत्तिभेदे, तिथिवा-
रादिपञ्चाङ्गबोधिकायां पत्रिकायाञ्च (पाँजि) ।

पट * गतौ भ्वादि० पर० सक० सेट् । पटति अपाटीत् अपटीत् ।

पट * दीप्तौ चुरा० उभ० अक० सेट् । पाटयति ते अपीपटत् त ।

पट * वेष्टने अद० चु० उभ० सक० सेट् । पटयति ते अपपटत् त ।

पट * त्रि० पट्यते वेष्ट्यते पट+अच् । वस्त्रे । स्त्रियां गौ० ङीष् ।
पियालवृक्षे पु० । पुरस्कृते त्रि० ।

पटकार * पु० पटं करोति कृ-अण् । तन्तुवाये । [पटगृहादयोऽप्यत्र ।

पटकुटी * स्त्री० पटनिर्मिता कुटी शा० । पटमये गृहे (ताँबु) ।

पटचर * न० पट्यते आवेष्ट्यते पट-अति, भूतपूर्वे पटत्+चरट् ।
जीर्णवस्त्रे । पटमिव वेष्टित इव चरति चर-अच् । चौरे पु० ।

पटल * न० पट-वेष्टने कलन् । (चाल) छदिषि । क्लीबमप्यत्र गौ०
ङीष् । वृन्दे, नेत्ररोगभेदे च पु० । [वासके कुङ्कुमादिचूर्णे ।

पटवासक * पु० पटान् वासयति सुरभीकरोति वास-ण्वुल् । वसन-

पटह * पु० न० । पटेन हन्यते हन, पट इत्युच्चं शब्दं जहाति वा
हा-वाड । ढक्कावाद्ये । समारम्भे पु० ।

पटि(टी) * स्त्री० पट-इन् वा ङीप् । पटभेदे, कुम्भिकावृक्षे च ।

पटीर * न० पट-ईरन् । चालन्याम्, मूलके, केदारे, मेघे, वंशसारे,
खदिरे, उदरे, कन्दर्पे, चन्दने च । "परिपीतपटीररसेरलसः"
इत्युद्भटः । उच्चे, हरणीये च त्रि० ।

पटीयस् * त्रि० अतिशयेन पटुः ईयसु । अतिशयकार्यदक्षे ।

पटु * त्रि० पट-उ । निपुणे, नीरोगे, तीक्ष्णे, स्फुटे, निष्ठुरे, धूर्ते च ।
स्त्रियां वा ङीप् । पटोले पु० । लवणे, पांशुलवणे, छत्राके
च न० ।

पटुजातीय * त्रि० पटुप्रकारः जातीयर् । पटुप्रकारे ।

पटुपर्णी * स्त्री० पटूनि पर्णान्यस्याः । स्वर्णक्षीरिणीवृक्षे ।

पटुरूप * त्रि० प्रशस्तः पटुः प्राशस्त्ये रूपम् । अतिशयदक्षे ।

पटोल * पु० पट-ओलच् । स्वनामख्याते लताभेदे । वस्त्रभेदे न० ।

पटोली(लिका) * स्त्री० अपकृष्टः पटोलः ङीप् । (झिङ्गा) ख्यातायां
लतायाम् । स्वार्थे कन् । तत्रैवार्थे ।

पट्ट * न० पट+क्त नेट् ट वा तस्य नेत्त्वम् । नगरे । चतुष्पथे, राजा-
दिलेख्यपत्रे (पाट्टा), पीठे, "ललाटपट्टम्" इत्युद्भटः । फलके
(ढाल), राजसिंहासने, उत्तरीयवस्त्रे, कौषेये (रेशम), पेषणे
च । पाषाणे पु० ।

पट्टज * न० पट्टात् जायते । पट्टनिर्मिते वस्त्रे (रेशमिकापड़) ।

पट्टदेवी * स्त्री० पट्टे राजासने देवी कृताभिषेका स्त्री । राजमहि-
ष्याम् (पाटराणी) । पट्टमहिष्यादयोऽप्यत्र । [प्रधाननगरे ।

पट्ट(त्त)न * न० पट(त)न्ति जना यत्र पट-पत वा तनन् नेट् ।

पट्टरङ्ग * न० पट्टं रज्यतेऽनेन रन्ज+करणे घञ् । (बकम्) इति
ख्याते पदार्थे । ल्युट् । पट्टरञ्जनमप्यत्र ।

पट्टशाक * पु० कर्म० (नालिता) शाकभेदे ।

पट्टिकालोध्र * पु० पट्टिकाकारः लोध्रः । (पटियालोध) लोध्रभेदे
पट्टिलोध्रादयोऽप्यत्र ।

पट्टिन् * पु० पट्ट+अस्त्यर्थे इनि । रक्तलोध्रे ।

पट्टिल * पु० पट्ट+अस्त्यर्थे इलच् । पूतिकरञ्जे । [ठीत्-अपठी…

पठ * लिखिताक्षरवाचने भ्वादि० पर० सक० सेट् । पठति अ…

पड * गतौ भ्वादि० आत्म० सक० सेट् इदित् । पण्डते अपण्डि…

पड * संहतौ वा चुरा० उभ० पक्षे भ्वादि० अक० सेट् इ…
पण्डयति-ते पण्डति अपपण्डत्-त अपण्डीत् ।

पण * व्यवहारे (क्रयविक्रयादौ) स्तुतौ च भ्वादि० आत्म० …
सेट् । पणायति-ते पणते, व्यवहारे तु … स …
आयीत् अपणायिष्ट …वष्ट ।

पण * पु० पण्यतेऽनेन …-अच् ।

[illegible] दुर्गे च। [illegible] मृगौ, पुंसि, स्त्री, [illegible]
[illegible] "[illegible]"
[illegible]

[illegible]

[illegible] ख्यातं [illegible] "पताका-
[illegible]" इति [illegible]।

[illegible] "न थीट-
[illegible]" इति [illegible]।

[illegible]

[illegible]

[illegible] [वृद्धौ स्त्री॰ टाप्।

[illegible]

[illegible]

[illegible]

पट्टे, केतौ, छन्दोपन्योक्ते लघुगुरुक्रियानादे च स्त्री॰।
पताकिन् * त्रि॰ पताका+अस्त्यर्थे इनि। पताकायुक्ते। [illegible]
योधे महाकारगतिरिष्टसूचके चक्रभेदे पु॰।
पति * पु॰ पा-डति। भर्त्तरि। अधिपतौ त्रि॰। [illegible]
पतित * त्रि॰ पत+क्त। च्युते, गलिते, धर्मादिच्युते, [illegible]
द्रष्टव्यति जने च "पतितानां न दाहः स्यात्" इति स्मृतिः।
पतिंवरा * स्त्री॰ पतिं वृणीते वृ-खच्। स्वेच्छया पतिवरणकारिण्यां कन्यायाम्, कृष्णजीरके च। [स्वयंवरा इति
पतिव्रती * स्त्री॰ पतिरस्त्यस्याः मतुप् नि॰ नुक्, मस्य व, [illegible]
पतिव्रता * स्त्री॰ पतिः पतिसेवनं व्रतं यस्याः। सती [illegible]
पत्ति * पु॰ पद-क्तिन्। सेनायाम्। [illegible] गतौ, ([illegible] १ हस्ती, ३ अश्वाः) [illegible] सेनाभेदे च स्त्री॰।
पत्नी * स्त्री॰ पति+यज्ञसम्बन्धे ङीप् नुक् च। [illegible] विधिना ऊढायां योषिति।
पत्र * न॰ पत ष्ट्रन्। वाहनमात्रे, पर्णे, पक्षिणां पक्षे, [illegible] दले, धातुमयपत्राकारे द्रव्ये च। [illegible] स्त्री॰ ङीप्।
पत्रगुप्त * पु॰ [illegible]। ([illegible]) वृक्षे।
पत्रघना * स्त्री॰ पत्रैर्घना। सातलावृक्षे।
पत्रदारक * पु॰ पत्राकारः दारक [illegible]। [illegible]
पत्रपुष्प * पु॰ पत्रम् पुष्पमिव सुगन्धि [illegible] तुलस्याम्। [illegible]। तुलस्यां स्त्री॰ टाप्।
पत्रभङ्ग * पु॰ पत्रस्येव भङ्गः खण्डो यस्य। [illegible] [illegible] तिलकादौ। [illegible] पत्रभङ्गी [illegible]
पत्ररथ * पत्र पत्रः [illegible] गतिसाधनं यस्य। पक्षिणि।
पत्रलेखा * स्त्री॰ पत्रस्य लेखा। [illegible] [illegible]। [illegible] [illegible] तिलकादौ।
पत्रवल्ली * स्त्री॰ पत्रस्य वल्ली [illegible]। [illegible]
[illegible] तिलकाकार [illegible]।
[illegible]
[illegible]
[illegible] च।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पत्रोर्ण * न॰ पत्त्रजाता ऊर्णा (रेशम) यस्यस्य यत्र यात्रम्। पट्टवस्त्रे, कौषेये च। पत्रेषु ऊर्णा यस्य। श्योनाकवृक्षे पु॰।

पथ * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पथति अपथत्।

पथ * गतौ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् इदित्। पन्थयति ते पन्थति अपपन्थत् त अपन्थीत्।

पथ * पु॰ पथ-अच्। मार्गे, पथि च।

पथिक * त्रि॰ पन्थानं गच्छति पथिन्+कन्। देशान्तरयानाय यद्वाविःपत्य पथिगन्तरि। [कपिलद्राक्षायाम्।

पथिका * स्त्री॰ पथे पथिगमनाय हिता अनायासभक्ष्यत्वात् ठन्।

पथिद्रुम * पु॰ पथ+इन् कर्म॰। खदिरवृक्षे।

पथिन् * पु॰ पथ+इन्। (पथ) ख्याते अध्वनि।

पथ्य * त्रि॰ पथे चिकित्सानुसारिमार्गाय हितम्। चिकित्सोपयोगिनि रोगिनिषेव्ये वस्तुनि, हितकारके च। हरितकीवृक्षे, वन्ध्याकर्कोट्याञ्च स्त्री॰।

पथ्यशाक * पु॰ कर्म॰। तण्डुलीयशाके।

पद * स्थैर्ये भ्वादि॰ पर॰ अक॰ सेट्। पदति अपादीत् अपदीत्।

पद * गतौ दिवा॰ आत्म॰ सक॰ अनिट्। पद्यते अपादि।

पद * गतौ अद॰ चुरा॰ आत्म॰ सक॰ सेट्। पदयते अपपदत।

पद * न॰ पद+अच्। चिह्ने, स्थाने, पादे, व्यवसाये, त्राणे, वस्तुनि, शब्दभेदे (सुप्तिङन्तरूपे), पदार्थे, श्लोकपादे च।

पद् * न॰ पद-क्विप्। पादे। किरणे पु॰।

पदग * त्रि॰ पदेन गच्छति गम ड। पदातिके।

पदगाम * पु॰ पदस्य गोष्ठैकदेशस्य [illegible] तथाभावात् [illegible]। गोक्षुरक्षुपे। ६त॰। पदस्यार्थे।

पदवि(वी) * स्त्री॰ पद-अवि वा ङीप्। पथि। [गामिनि।

पदाजि * पु॰ पादाभ्यामजति इन् वीभावाभावः पदादेश। पाद-

पदाति * पु॰ पादाभ्यामतति अत-इन् पदादेशः। पदगामिनि।

पदार्थ * पु॰ पदस्यार्थः शाक॰। अभिधेये, वस्तुमात्रे सर्वदा [illegible]।

[illegible] * पु॰ पदा गच्छति गम-ड। पादेन गामिनि।

[illegible](वी) * स्त्री॰ पद+अव-क्तिन् वा ङीप्। पथि, पङ्क्तौ, पूजा[illegible] च।

पद्म * न॰ पद+मन्। कमले, गजमुखादिस्थे बिन्दुसमूहात्मे, कमलाकारेण सैन्यादेरवस्थानरूपे व्यूहभेदे, निधिभेदे, "पद्म[illegible]" इति [illegible], [illegible], [illegible], पुष्करमूले, सीसके धातौ, [illegible] च।

[illegible] * पु॰ ६त॰। [illegible]।

[illegible] * न॰ ६त॰। [illegible]। [illegible]।

[illegible] * पु॰ [illegible]।

[illegible] * पु॰ ६त॰। [illegible]।

पद्मगर्भ * पु॰ पद्मं विष्णुनाभिपद्मं गर्भमुत्पादकं यस्य। चतुर्मुखे ब्रह्मणि। कर्म॰। कमलमध्ये न॰।

पद्मचारिणी * स्त्री॰ पद्ममिव चरति स्थानं परित्यज्य दूरं गच्छति चिनि। स्थलपद्मिनी प्रसिद्धे लताभेदे।

पद्मनाभ * पु॰ पद्मं नाभौ यस्य अच्। विष्णौ। [मन्त्रे।

पद्मपत्र * न॰ ६त॰। कमलपत्रे। पद्मस्य पत्रं वाहनमिव। कम-

पद्मपुराण * न॰ पद्ममधिकृत्य कृतमत् तस्य पुरः कर्म॰। महापुराणान्तर्गते पुराणभेदे।

पद्मपुष्प * पु॰ पद्ममिव पुष्पं यस्य। कर्णिकारवृक्षे।

पद्मबन्ध * पु॰ पद्माकारो बन्धः सन्निवेशः। शब्दालङ्कारभेदे।

पद्मबन्धु * पु॰ ६त॰। सूर्ये, भ्रमरे च। पद्ममिवादयोऽप्यत्र।

पद्मभू * पु॰ पद्म विष्णोर्नाभिपद्मं भूरुत्पत्तिस्थानं यस्य। चतुर्मुखे ब्रह्मणि। पद्मयोन्यादयोऽप्यत्र।

पद्मराग * न॰ पद्मस्येव रागो यस्य। रक्तवर्णे मणिभेदे (माणिक)।

पद्मलाञ्छन * पु॰ पद्मं लाञ्छनमस्य। सूर्ये, ब्रह्मणि, नृपे, कुबेरे च।

पद्मवासा * स्त्री॰ कमलवासार्थं यस्य ६त॰। सरस्वती, लक्ष्मी, गङ्गा च। पद्म निवासो निलयो यस्याः। पद्मनिवासादयोऽप्यत्र।

पद्मबीज * न॰ ६त॰। कमलबीजे (कमलगट्टा)।

पद्मबीजाभ * न॰ पद्मबीजमिवाभाति आ+भा-क। (मखाना) जलजफलभेदे। [देव्यां, कृष्णचूर्णे च।

पद्मा * स्त्री॰ पद्ममस्त्यस्य अर्श आद्यच्। लक्ष्म्याम्, मनसा-

पद्माकर * पु॰ ६त॰। पद्मयुक्ते तडागे वा पद्मानां समूहे।

पद्माट * पु॰ पद्ममटति अट-अच्। चक्रमर्द्दवृक्षे (चाकवडेण)।

पद्मावती * पु॰ पद्म+मतुप् मस्य व दीर्घश्च। [illegible] नदी-भेदे, मनसादेव्याम्, पद्मावतीनगर्याञ्च।

पद्मासन * न॰ पद्ममिवासनम्। योगशास्त्रोक्ते आसनभेदे।

पद्मिनी * स्त्री॰ पद्म+अस्त्यर्थे इनि, [illegible] वा ङीप्। कमल-समूहे, पद्मयुक्तदेशे, [illegible], [illegible] च।

पद्मिनीकान्त * पु॰ ६त॰। सूर्ये। [illegible]।

पद्मिन् * पु॰ पद्मं बिन्दुजालकरूपमस्त्यस्य इनि। [illegible]

पद्मोद्भव * पु॰ पद्मे [illegible] कर्म॰। [illegible]।

पद्य * न॰ पद [illegible] पद+यत्। [illegible]

[illegible]

[illegible]

[illegible] [illegible]

पन * स्तुतौ भ्वादि॰ आत्म॰ सक॰ सेट्। [illegible]

पनस * पु॰ पन-असच्। [illegible] वृक्षभेदे। [illegible]

पन्न * त्रि॰ पद-क्त। पतिते, [illegible] च। [illegible]

पन्नग * पु॰ [illegible]

[illegible]

पन्नगाशन * न॰ पन्नगानश्नाति अश-ल्यु। गरुडे।

पदहा * स्त्री॰ पदि नद्धा बद्धा नह क्त। चर्मपादुकायाम्।

पदद्धी * स्त्री॰ पद् नंह्यतेऽनया नह+ष्ट्रन् षित्त्वात् ङीप्। चर्मपादुकायाम्। [यणम्।

पम्पा * स्त्री॰ नदीभेदे। "पश्य लक्ष्मण! पम्पायाम्" इति रामा-

पय * गतौ भ्वादि॰ आत्म॰ सक॰ सेट्। पयते अपयिष्ट।

पयःकन्दा * स्त्री॰ पयः क्षीरं कन्दे यस्याः। क्षीरविदार्य्याम्।

पयस् * न॰ पा-असुन् इकारस्यान्तादेशः। दुग्धे, जले च।

पयस्य * त्रि॰ पयसो विकारः यत्। दुग्धविकारे दध्यादौ। विडाले पु॰। क्षीरकाकोल्याम्, अर्कपुष्पिकायां, कुट्टुम्बिन्याञ्च स्त्री॰ ङीप्। आमिक्षायां स्त्री॰ टाप्।

पयस्विनी * स्त्री॰ पयस्+अस्त्यर्थे विनि। धेनौ, नद्यां, काकोल्याम्, क्षीरकाकोल्यां, दुग्धफेन्यां, क्षीरविदार्य्यां, छाग्यां, जीवन्त्यां, रात्रौ च।

पयोधर * पु॰ पयांसि धारयति धृ+णिच्-अच् ङसः। मेघे, स्त्रीस्तने, "प्रायः पयोधरमनुव्रतिरव हेतुः" इत्युद्भटः, नारिकेले, कशेरुणि, कोषकारे च। [निधावप्येव।

पयोधि * पु॰ पयांसि धीयन्तेऽत्र पयस्+धा-कि। समुद्रे। पयो-

पयोर * पु॰ पयो जलं रक्षति रक्ष+ड। खदिरे।

पयोलता * स्त्री॰ पयःप्रधाना लता शाक॰। क्षीरविदार्य्याम्।

पयोव्रत * न॰ पयोमात्रपानरूपं व्रतम्। द्वादशाह.साध्ये व्रतभेदे।

पर * त्रि॰ पृ अप्, [illegible] अन्यस्मिन् भिन्ने इत्यर्थे, [illegible], दूरे, [illegible], श्रेष्ठे च। मोक्षे, शत्रौ, ब्रह्मणि च न॰। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरञ्च" इति श्रुतिः। गतौ पु॰। [तेषु च।

[illegible] * न॰ [illegible] पृथ्व्यादौ, नमद्रा-

[illegible] * अव्य॰ [illegible] दिने [illegible]। [illegible] परस्मिन् दिने। [संख्यास्विपु च।

[illegible] * न॰ [illegible] [illegible], तम्-

[illegible] * त्रि॰ [illegible]। [illegible]

[illegible]।

[illegible] * पु॰ [illegible], "[illegible]" इत्यु-

[illegible]। [illegible] त्रि॰।

[illegible] * त्रि॰ [illegible] [illegible]।

[illegible] च। [स्यैव।

[illegible] * त्रि॰ [illegible]। [illegible]।

[illegible] * [illegible], [illegible] च।

[illegible] * पु॰ [illegible]।

[illegible]। [illegible]

[illegible]।

[illegible] * पु॰ [illegible] "[illegible]

ज्ञात्वा परान्नमुपजीवति। सततं प्रातरुत्थाय परकाकतरः" इत्युक्ते परपक्षाभक्षणे सततं प्रवृत्ते। [परान्नोपजीविनि।

परपिण्डाद * त्रि॰ परस्य पिण्डं ग्रासमत्ति अद+अण्। त्रि॰

परपुष्ट * पु॰ परया काक्या पुष्टः पुष+क्त सर्वनाम्नः पुंवत्। कोकिले, कोकिलया हि डिम्बस्फोटनादक्षया नीडस्थं काकडिम्बनाशार्थं स्वडिम्बे तत्र स्थापिते काक्या स्वडिम्बबुद्ध्याऽसौ पुष्टः इति लोकप्रसिद्धिः। परभृतादयोऽप्यत्र। अन्यपालिते त्रि॰। वेश्यायाम् स्त्री॰।

परपूर्वा * स्त्री॰ पर इतरः पूर्वो यस्याः। "पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते। परपूर्वेति सा प्रोक्ता" इत्युक्तायां पुनर्भूस्त्रियाम्।

परभाग * पु॰ भज्यते सेव्यतेऽनेन भागः उत्कर्षः कर्म॰। उत्कर्षे "लब्धपरभागतया" इति रघुः। भाग उत्कः कर्म॰। श्रेष्ठांशे, [illegible]। परस्य भागे अंशे। [काके।

परभृत् * पु॰ परं कोकिलडिम्बं स्वडिम्बबुद्ध्या बिभर्त्ति, भृ+क्विप्।

परम् * अव्य॰ पृ-अमि। नियोगे, क्षेपे, केवले च। [प्रभेदे च।

परम * त्रि॰ परं परत्वं माति मा-क। उत्कृष्टे, प्रधाने, आद्ये,

परमम् * अव्य॰ पर+मा-डमि। अनुज्ञायाम्, स्वीकारे च। [पु॰

परमर्षि * पु॰ परमं ब्रह्म ऋषति गच्छति जानाति वा ऋष-क। "ऋषति परम यस्मात् परमर्षिस्ततः स्मृतः" इति निरुक्तोक्ते वेदार्थ। कर्म॰। श्रेष्ठे मुनौ। [संन्यासिभेदे।

परमहंस * पु॰ कर्म॰। कुटीचकादिषु चतुर्षु सन्न्यासिषु सर्वे-

परमाणु * कर्म॰। वैशेषिकसिद्धे पृथिव्यादीनां चतुर्णां भूतानां द्व्यणुकरूपावयवारम्भके सूक्ष्मभूते।

परमात्मन् * पु॰ कर्म॰। "आत्माऽत्र जगतो यस्मात् सर्वात्मेति मतः। परमात्मा परं ब्रह्म तेन वेदे प्रकीर्त्तितः" इत्युक्ते परब्रह्मणि। [प्रतम्रक।

परमान्न * न॰ कर्म॰। पायसे, दुग्धपक्वौदने च देवादिप्रियत्वात् [illegible]

परमायुष * पु॰ परममायुर्यस्य पु॰। असनवृक्षे।

परमायुस् * न॰ परमं श्रेष्ठावधिकं आयुर्जीवितकाल। मनुष्यादीनां ज्योतिषोक्ते प्रमाणादिज्ञाने। विस्तरस्तु वाचस्पत्ये।

परमेश्वर * पु॰ कर्म॰। जगत्सृष्ट्यादिकारके सगुणे विभूतिब्रह्मणि, चक्रवर्त्तिनि नृपे च।

परमेष्ठिन् * पु॰ परमे ब्रह्मणि तिष्ठति जीवते स्था इनि [illegible] अलुक्। चतुर्मुखे ब्रह्मणि, शालग्रामभूर्त्तिभेदे च।

परम्परा * स्त्री॰ परम् अतिशयेन पृणाति पिपूर्त्ति वा पृ+अच्। पङ्क्तौ, [illegible], सन्ततौ, अविच्छिन्नधारायाम् "[illegible]" इति गीता, वधे, अनुक्रमे च।

[illegible] * न॰ परम् अतिशयेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

प्रत्युक्तमि। "या वेदविहिता हिंसा नियतास्मिंश्चराचरे। अहिं-
सामेव तां विद्यात्" इति मनूक्तेस्तस्या अहिंसात्वेन हि पाश-
स्यम्। [गते।

परम्परीण * त्रि॰ परम्परया आगतः ख। अविच्छेदसन्तत्या-

परवश * त्रि॰ परस्य वशः आयत्तः। पराधीने।

परवत् * त्रि॰ परः पराधीनताऽस्त्यस्य मतुप् मस्य वः। पराधीने।

परशु * पु॰ परं शृणाति शृ-कु डिच। परश्वधे (टाङ्गी) अस्त्रभेदे।
स्पृश-कुन् शु आदेशः पर्शुश्च, अस्त्रमात्रे च।

परशुराम * पु॰ परशुधारी रामः शाक॰। जमदग्निजे भगवदव-
तारभेदे, येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता।

परश्व(स्व)ध * पु॰ त्रि-ड म्नो हविः परस्य शं धयति, परस्य स्वं
स्वाङ्गं धयति वा धे-क। कुठारे अस्त्रभेदे।

परस्पर * त्रि॰ पर+वीप्सायां द्वित्वम् सुट् च। अन्योन्यस्मिन्
पदार्थे। स्त्रीनपुंसकयोस्तु सार्वविभक्तिक आसु असुप्। पर-
स्परा परस्परमिति सर्वविभक्तौ।

परस्मैपद * न॰ परस्मै परोद्देशेन पदं फलबोधकं यस्मात्। व्याक-
रणोक्तेषु तिबादिषु। स्वरितेतः, ञितश्च धातोरुत्तरतिबादि-
भिर्नवभिर्हि परमार्थमेव फलं बोध्यते।

परा * अव्य॰ पृ-आ। प्रातिलोम्ये, प्राधान्ये, धर्षणे, आभिमुख्ये,
त्यागे, विक्रमे, भृशार्थे, गतौ, भङ्गे, अनादरे, तिरस्कारे, प्रत्या-
वृत्तौ च। मन्त्राकर्णोक्ता "परा वागनपायिनी" इत्युक्ते मूला-
धारस्थे शब्दभेदे, "अथ परा यया तदक्षरमधिगम्यते" इति श्रुत्यु-
क्तायां ब्रह्मविद्यायाञ्च स्त्री॰।

पराक * पु॰ "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। व्रतं परा-
को नाम" इत्युक्ते द्वादशाहोपवाससाध्ये प्रायश्चित्तरूपे व्रतभेदे।

पराक्पुष्पी * स्त्री॰ पराक् पुष्पं यस्याः। अपामार्गे।

पराक्रम * पु॰ परा+क्रम घञ् न वृद्धिः। बले देहजसामर्थ्ये।

पराग * पु॰ परागच्छति परा+गम-ड। धूलिमात्रे, पुष्परजसि,
"स्फुटपरागपरागतपङ्कजम्" इति माघः। स्नानीयद्रव्ये कुङ्कुम-
चूर्णादौ, उपरागे, चन्दने च। [निवृत्तावृत्त्ये।

पराङ्मुख * त्रि॰ पराक् प्रत्यावृत्तं मुखं यस्य। विमुखे आरब्धकार्यात्

पराच् * त्रि॰ परा अञ्चति अन्च-क्विन् प्रत्यक्तत्त्वभिन्ने दृश्यत्व-
कारविषये बाह्ये वस्तुनि। [प्रतिपालिते सम्यगभ्यासे च।

पराचित * त्रि॰ परेणाचितः पुष्टः व्याप्तो वा आ+चि-क्त। परेण

पराचीन * त्रि॰ पराग्भवः पराच्+ख। पराङ्मुखे, परकालिके च।

पराजय * पु॰ परा+जि-अच्। पराभवे (हारि)।

पराधीन * त्रि॰ परोऽधि इति वाक्ये समासे अध्युत्तरपदात् ख,
परस्याधीनो वा। परायत्ते। [अन्यस्यान्ने न॰।

परान्न * त्रि॰ परस्यान्नमेवान्नमस्य। परान्नोपजीविनि। ६त॰।

पराभव * पु॰ परा+भू-अप्। तिरस्कारे, अभिभवे, विनाशे च।

परामर्श * पु॰ परा+मृश-घञ्। युक्तौ, विवेचने, न्यायादुक्ते व्याप्ति-
विशिष्टतया पक्षस्य ज्ञाने च। यथा वह्निव्याप्यधूमवान् पर्वत
इत्यादिज्ञानम्।

परायण * न॰ परमयनं कर्म॰। अत्यन्तासक्तौ, उत्तमाश्रये च।
६ब॰। अत्यासक्ते, यथा धर्मपरायणः धर्मे अत्यन्तासक्तः। तत्-
परे, अभीष्टे च त्रि॰।

परारि * अव्य॰ पूर्वतरे वर्षे पूर्वतर+अरि परादेशः नि॰। पूर्वतर-
वत्सरे गतहतीयवत्सरे। परोऽरिः। अत्यन्तशत्रौ पु॰।

पराक * पु॰ पराञ्चति परा+ऋ-उण्। कार+कारवेल्लवृक्षे (उच्छा)।

परार्द्ध * न॰ ऋध-अच् कर्म॰। चरमसंख्यायां "पारे परार्द्धं गणितं
यदि स्यात्" इति नैषधम्। कर्म॰। ब्रह्मण आयुषो द्वितीयार्द्धे।

परार्द्ध्य * त्रि॰ परार्द्धं चरमसंख्यामुपचारात् श्रेष्ठत्वमर्हति यत्।
श्रेष्ठे "परार्द्ध्यवर्णास्तरणा" इति रघुः।

परावर्त्त * पु॰ परा+वृत-घञ्। परीवर्त्ते, विनिमये च।

परावह * पु॰ परा+वहति परा+वह-अच्। सप्तवायुमध्ये परि॰
वहनायोर्द्ध्वस्थे वायुभेदे।

पराशर * पु॰ व्यासपितरि मुनिभेदे।

पराश्रया * स्त्री॰ परमाश्रयति आ+श्रि-अच्। वन्दायाम् (पर-
गाछा) अन्याश्रयलम्बिनि त्रि॰।

परासन * न॰ परा+अस-ल्युट्। मारणे।

परासु * त्रि॰ परागताः असवो यस्य। मृते।

परास्कन्दिन् * पु॰ परान् आस्कन्दति-णिनि। चौरे।

परास्त * त्रि॰ परा+अस-क्त। निरस्ते, पराजिते च।

पराह * पु॰ परमुत्तरमहः कर्म॰ टच् समा॰ पुंस्त्वञ्च। परदिने।

पराह्ण * पु॰ परमह्नः एकदेशिस॰ टच् समा॰ अह्नादेशः णत्वम्।
दिवसस्य चरमभागे, अपराह्णकाले च।

परि * अव्य॰ पृ-इन्। सर्वत इत्यर्थे, वर्जने, व्याप्तौ, शेषे, कञ्चित्
प्रकारं प्राप्ते, निरसने, पूजायां, भूषणे, उपरमे, शोके, सन्तोष-
भाषणे, अतिशये, त्यागे, नियमे च।

परिकर * पु॰ परि+कृ-अप्। पर्य्यङ्के, परिवारे, समारम्भे, समूहे,
प्रगाढगात्रबन्धे, विवेके, सहचारिणि च।

परिकर्मन् * न॰। कर्म संस्कारादि, तदस्याहा ६ब॰। देहसंस्कारे,
कुङ्कुमाद्यङ्गोद्वर्त्तनीयद्रव्ये, भूषणे, गणितानुगुणेषु सङ्कलनव्यव-
कलनगुणनभागकृतितत्पदघनतत्पदरूपेषु अष्टविधेषु संस्का-
रेषु च। ६ब॰। सेवके त्रि॰।

परिक्रम * पु॰ परि+क्रम घञ् न वृद्धिः। क्रीडादौ, पूजादौ, प्रद-
क्षिणीकरणार्थं पादेन गमने च। [वृत्ते।

परिक्रिया * स्त्री॰ परितः क्रिया वेष्टनम्। परिखादिना पुरादेर्वे-

परिक्षित् * पु॰ अर्जुनेन सुभद्रायामुत्पादिते कुरुवंश्ये नृपतिभेदे।
परीक्षितोऽप्यत्र।

परिखा * स्त्री॰ परितः खन्यते खन-ड। पुरादौ रिपुप्रभृतीनां
दुष्प्रवेशतासिद्धये गर्त्तरूपायां जलाधारस्थाने वेष्टनाद्यारभूमौ।

परिगत * त्रि० परि+गम-क्त। प्राप्ते, ज्ञाते, विस्मृते, चेष्टिते, वेष्टिते, गते च।

परिग्रह * पु० परि+ग्रह-अच्। स्वीकारे, सैन्यपश्चाद्भागे च। कर्मणि घ। भार्य्यायां, परिजने च। करणे अप्। मूले, शपथे च।

परिघ * पु० परि+हन-क नि०। परिघातास्त्रे लौहमुद्गरादौ, लौहमुखे लगुड़े मुद्गरे, शूले, काचघटे, गृहे, विष्कम्भावधिके ऊनविंशतितमे योगे च। [प्रणये च।

परिचय * पु० परि+चि-अच्। ज्ञातस्य पौनःपुन्येन ज्ञाने, संस्तवे,

परिचर्य्या * स्त्री० परिचर+क्यप्। सेवायाम्।

परिचाय्य * पु० परिचीयते संस्क्रियतेऽसौ चि-ण्यत्। यज्ञाग्नौ।

परिचारक * पु० परि+चर-ण्वुल्। सेवके, भृत्ये च।

परिच्छद * पु० परि+छद+घ ह्रस्वः। उपकरणे, हस्त्यश्वरथपदातौ, वस्त्रादिभूषणे, परिवारे च। "सेना परिच्छदस्तस्य" इति रघुः।

परिच्छेद * पु० परि+छिद-घञ्। विशेषरूपेण इयत्ताकरणे, सर्गादिस्थानीये ग्रन्थस्य विच्छेदस्थाने च।

परिजन * पु० परिगतो जनः। परिवारे, प्रतिपाल्ये जने च।

परिणत * त्रि० परि+नम-क्त णत्वम्। परिपक्वे, वृद्धिं गते, अवस्थान्तरं प्राप्ते, तिर्य्यग्दन्तावघातिनि गजे च।

परिणय * पु० परि+नी-अच्। विवाहे। [अर्थालङ्कारभेदे च।

परिणाम * पु० परि+नम-घञ्। प्रकृतेरन्यथाभावे, विकारे, शेषे,

परिणाह * पु० परि+नह-घञ्। विस्तारे।

परिणेतृ * पु० परि+नी-तृच्। विवाहकर्त्तरि भर्त्तरि।

परितस् * अव्य० परि-तसिल्। सर्वत इत्यर्थे, चतुर्दिक्षु च।

परिताप * पु० परितप्यते, अत्र वा भावादौ घञ्। दुःखे, उष्णतायाम्, शोके, भये, कम्पे, नरकभेदे च। [रणे च।

परित्राण * न० परि+त्रै-ल्युट्। रक्षणे, अनिष्टे प्रवृत्तस्य निवा-

परिदान * न० परिवर्त्तेन दानम् दा-ल्युट्। विनिमये द्रव्यान्तरग्रहणेन द्रव्यान्तरदाने।

परिदेवन * न० परि+दिव-ल्युट्। अनुशोचने, विलापे, कृतस्य कर्मणोऽनुचितत्वधियानुतापे च। णिच्+युच्। परिदेवनाप्यत्र, स्त्री०। [नाभेरधोधृतवसने च।

परिधान * न० परिधीयते परि+धा-कर्मणि ल्युट्। परिहितवस्त्रे,

परिधि * पु० परि+धा-कि। चन्द्रसूर्य्यसमीपस्थे मेघादिमण्डलविकारात् जायमाने वेष्टनाकारे मण्डले (सूर्य्यसभा) (चन्द्रसभा), यज्ञियवृक्षखण्डादौ निर्म्मितायां यज्ञियतरोः पलाशादेः शाखायाम्, गोलकवृत्तस्य परितो वेष्टनसूत्रमाने, परितः पार्श्वे च।

परिस्थ * त्रि० परितो तिष्ठति स्था+क। परिघातके, युद्धादौ रक्षार्थं परितः स्थिते सैन्यादौ च।

[illegible] * न० [illegible] हन-घञ्। मूषले।

[illegible] * पु० [illegible] दीर्घत्वात् [illegible], मन्नार्थ

वर्जयित्वा गच्छति वा अन् पृषोदरा०। शत्रौ।

परिपन्थिन् * पु० परि+पन्थ इनि। शत्रौ।

परिपाक * पु० परि+पच-घञ्। नैपुण्ये, उत्तमपाके च।

परिपाकिनी * स्त्री० परिपाक+अस्त्यर्थे इनि। त्रिवृत्(स्त्रि)

परिपाटि(टी) * स्त्री० परि+चु० पट-इन्। अनुक्रमे, [illegible]

परिपुष्करा * स्त्री० परितः पुष्करं मुखं यस्याः। (गोमुक्)। [illegible] स्थायाम्। [मानि मुस्ताकारे [illegible]

परिपेल * न० परि+पेल-अच्। कैवर्त्तीमुस्तके, [illegible]

परिपेलव * न० परितः पेलवं मृदुता यस्य। कैवर्त्तीमुस्तके।

परिप्लव * न० परि+प्लु-अच्। चञ्चले, अस्थिरे च।

परिबर्ह * पु० परि-बर्ह-घञ्। नृपयोग्ये हस्त्यश्वरथादिपरिच्छ[illegible]

परिभ(भा)व * पु० परि+भू-अप घञ् वा। अनादरे, तिरस्कारे

परिभाषण * न० परि+भाष-ल्युट्। निन्दया दुष्टवचने, [illegible] नियमे च। [अनादृत्य समुदायार्थे विशिष्टसंज्ञा[illegible]

परिभाषा * स्त्री० परि+भाष-अ। कृत्रिमसंज्ञायाम्,

परिभूत * त्रि० परि+भू-क्त। तिरस्कृते, अनादृते च।

परिमण्डल * त्रि० परितो मण्डलम्। वर्त्तुलाकारे।

परिमल * पु० परि-मल-अच्। कुङ्कुमचन्दनादिमर्द्दने, [illegible] सुगन्धौ, परितः सम्बन्धे च। "सतां परिमल" इत्युद्भट।

परिमाण * न० परिमीयतेऽनेन परि+मा-ल्युट्। (माप) [illegible] कुलप्रस्थादिभिर्द्रव्यस्य परिच्छेदे। [[illegible]

परिमित * त्रि० परि+मा-क्त। कृतपरिमाणे, युक्ते, यथार्ह[illegible]

परि(री)रम्भ * पु० परि+रभ-घञ् मुम् च वा दीर्घः। आलिङ्गने।

परिवत्सर * पु० संवत्सरपञ्चकान्तर्गते वत्सरभेदे।

परिवर्जन * न० परिवर्ज्यतेऽसुभिरनेन वृज-णिच्-ल्युट्। मारणे। वृज+भावे ल्युट्। त्यागे।

परि(री)वर्त्त * पु० परि+वृत-भावे घञ् वा दीर्घः। विनिमये। आधारे घञ्। युगान्ते काले, ग्रन्थविच्छेदे, अध्यायादौ। कर्त्तरि अच्। कूर्मराजे। भावे ल्युट्। परिवर्त्तनं विनिमये।

परिवह * पु० परि+वह-अच्। सप्तवायुमध्यपातिनि वायुभेदे।

परि(री)वाद * पु० परि+वद-घञ् वा दीर्घः। अपवादे "गुरोः परीवादः" इति मनुः।

परिवादिनी * स्त्री० परितो वदति स्फुटाक्षरमिव वदति [illegible] णिनि। सप्ततन्त्रीयुक्तायां वीणायाम्, अपवादकत्र्यां स्त्रि[illegible]

परि(री)वाप * पु० परि+वप-घञ् वा दीर्घः। वपने। वप-णिच् घञ्। मुण्डने। ल्युट्। परिवापणमप्यत्र।

परिवापित * त्रि० परि+वप-वा णिच्-क्त। मुण्डिते।

परि(री)वार * पु० परिव्रियतेऽसौ अनेन वा परि+वृ+घञ् [illegible] दीर्घः। परिजने, कुटुम्बादौ, खड्गकोषे (खाप), परिवादे च।

परि(री)वाह * पु० परि+वह-घञ् वा दीर्घः। जलोच्छ्वासे, [illegible] सप्तसमुद्रसमासमाहृत्य तयाख्यम्।

परिविन्न * त्रि॰ परिविद्यतेऽसौ कर्मणि क्त। अनुजस्य विवाहकाले अनूढे ज्येष्ठे। तादृश्यां भगिन्यां स्त्री॰। ज्येष्ठानूढताकालेऽनुजोद्वाहरूपः दोषः परिवेदनं तेन दुष्यत इति तस्य परिवेदनकर्मत्वम्।

परिवित्ति * पु॰ परिविद्यते परिवेदनजन्यदोषेण दृष्यतेऽसौ परि+विद+कर्मणि क्तिच्। प्रागूढानुजस्यानूढे ज्येष्ठे।

परिवृढ * त्रि॰ परि+वृह-क्त। अधिपे प्रभौ।

परिवेत्तृ * पु॰ परि+विद तृच्। ज्येष्ठेऽनूढे प्राग्विवाहरूपपरिवेदनकर्त्तरि अनुजे भ्रातरि।

परिवेदन * न॰ परि वर्जयित्वा उचितकालं वेदनं विवाहः लाभो वा। ज्येष्ठे अनूढे अकृताग्न्याधाने च कनिष्ठस्य विवाहकरणे, अग्न्याधानकरणे च दुरदृष्टजनके धूर्त्तत्वे दोषे।

परिवेदनी ● स्त्री॰ परिविद्यते यया परि+विद-करणे ल्युट् ङीप्। यामूढा परिवेदनदोषो भवति तस्यां स्त्रियाम्, "परिवेत्ता परिवित्तिः यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः" इति मनुः।

परिवेश ● पु॰ परि+विश-व्याप्तौ भावे घञ्। वेष्टने, मेघादिसम्पर्काज्जायमाने रश्म्यर्कमण्डलस्य वेष्टनाकारे "वाताद्यैर्मण्डलीभूताः सूर्याचन्द्रमसोः कराः। मालाभा व्योम्नि दृश्यन्ते परिवेषस्तु स स्मृतः" इत्युक्ते मण्डले पदार्थे। [पात्रे दाने।

परिवेषण * न॰ परि+विष-णिच् ल्युट्। भोजनार्थमन्नादेः भोजन-

परिव्याध * पु॰ परि+व्यध कर्त्तरि ण। अम्बुवेतसे।

परिव्राज् * पु॰ परि+व्रज-क्विप् नि॰। सर्वकर्माणि परित्यज्य आत्मसाक्षात्कारार्थमिपि चतुर्थाश्रमिणि यतौ।

परिव्राज(क) * पु॰ परित्यज्य सर्वकर्माणि व्रजति व्रज-घञ्-ण्वुल् वा। चतुर्थाश्रमिणि यतौ। [प्रतिपादके ग्रन्थे।

परिशिष्ट ● न॰ परि+शिष-क्त अवशेष+अस्त्यर्थे अच्। अवशिष्टार्थ-

परिश्रम ● पु॰ परि+श्रम-घञ् न वृद्धिः। व्यायामे, खेदप्रकारके आयासे च।

परिश्रय ● पु॰ परि+श्रि-आधारे अच्। सभायाम्।

परिषद् * स्त्री॰ परितः सीदन्त्यस्याम् सद+क्विप्। सभायां, धर्मोपदेशकपण्डितसमुदाये च। [परिच्छेदे च।

परिषद * पु॰ परितः सीदति गच्छति सद-अच्। अनुचरे, पार्षदे,

परिषद्वल * त्रि॰ परिषद्+अस्त्यर्थे वलच्। सभासदे।

परिस्क(स्क)न्द * त्रि॰ परिस्कन्दनं पुष्टं परि+स्कन्द-घञ् वा। अन्नम्। परपुष्टे। क्त। परिस्कन्नमप्यत्र वा षत्वे परिष्कन्न।

परिष्कार ● पु॰ परि+कृ-घञ् सुट् च। भूषणे, विद्यमानवस्तुनो गुणान्तरस्य सर्जनादौ संस्कारे च। [कादिसंस्कारे च।

परिष्कृत * त्रि॰ परि+कृ क्त सुट् च। भूषिते, वेष्टिते, कृतपाक-

परिष्वङ्ग * पु॰ परि+ष्वञ्ज घञ्। आलिङ्गने।

परिसर * पु॰ परि+सृ अप्। नदीनगरपर्वतादेः समीपस्थाने,

मृत्यौ, विधाने च। [व्याप्त गमने च।

परिसर्प * पु॰ परितः सृप्यते सृप-घञ्। परितोवेष्टने, सम-

परिसर्या * स्त्री॰ परि+सृ-यत्। सर्वतोगमने।

परिस्पन्द * पु॰ परि+स्पन्द-घञ्। समन्तात् चलने, कुसुमपत्रादेः रचनाभेदे, परिष्कारे, परिजने च।

परि(री)स्रुत् ● स्त्री॰ परिस्रवति पाकादिना निर्गलति स्रु-क्विप् वा दीर्घः। मदिरायाम्। क्त। परिस्रुताप्यत्र। [पलायने च।

परि(री)हार ● पु॰ परि+हृ-घञ् वा दीर्घः। त्यागे, दोषापकरणे,

परि(री)हास * पु॰ परि+हस-घञ् वा दीर्घः। केलौ।

परीक्षक * त्रि॰ प्रमाणेन परीक्षते परि+ईक्ष-ण्वुल्। प्रमाणोपन्यासेन विषयनिरूपके।

परीक्षण * न॰ परि+ईक्ष-ल्युट्। प्रमाणेन वस्तुनिरूपणे।

परीक्षा ● स्त्री॰ परि+ईक्ष-अ। दुष्टादुष्टत्वावलोकने, प्रमाणेन वस्तुनिरूपणे, धूर्त्तत्वे दुष्टादुष्टत्वसाधके तुलादिप्रमाणे च।

परीष्टि * स्त्री॰ परि+इष-क्तिन्। अन्वेषणायाम्, परिचर्यायाम्।

परीसार * पु॰ परि+सृ घञ्। सर्वतोगमने।

परुत् * अव्य॰ पूर्वस्मिन् वर्षे उत् पराभावादेशः। गतवत्सरे।

परुत्न ● त्रि॰ परुद्भवः त्न। गतवर्षभवे पदार्थे।

परुष ● न॰ पॄ-उषन्। निष्ठुरवचने। नीलीझिण्टायाम् पु॰। चित्रवर्णे, कठोरे च त्रि॰।

परुस् ● न॰ पॄ-उसि। ग्रन्थौ (गांट), पर्वणि च।

परेत * त्रि॰ परा+इण-क्त। मृते। [क्विप् वा। यमे।

परेतराज(ज्) * पु॰ ६त॰ टच् समा॰, परेतेषु राजते राज-अच्

परेद्यवि * अव्य॰ परस्मिन्नहनि नि॰। परदिवसे इत्यर्थे।

परेद्युस् * अव्य॰ परस्मिन्नहनि पर+एद्युस्। परदिने।

परेष्टुका * स्त्री॰ परैरिष्यते इष-तु स्वार्थे कन्। बहुप्रसवायां गवि।

परैधित * त्रि॰ परैरेधितः एध क्त। परपालिते।

परोक्ष * अव्य॰ अक्ष्णः परम् अव्य॰ टच्, नि॰। अदर्शने, अप्रत्यक्षे। तद्वति त्रि॰। [श्याम।

परोष्णी ● स्त्री॰ परा-उष्णा-कर्म॰ पौरा॰ ङीष्। तैलपायिका-

पर्कटि * स्त्री॰ पृच-अटि बाहुला॰ कुत्वम्। (पाकुड़ इत्यख्ये।

पर्कटिन् * पु॰ पृच अटिन् नि॰ कुत्वम्। प्लक्षवृक्षे (पाकुड़)।

पर्जन्य ● पु॰ पृषु+सेचने अन्य आद्यन्तादेशः। मेघे, इन्द्रे, "पर्जन्य इति परखेः" इति श्रुतेः, मेघध्वनौ च। [illegible]

पर्ण * हरितभावे अद॰ चुरा॰ उभ॰ अक॰ सेट्। पर्णयति-ते अपपर्णत्-त।

पर्ण ● न॰ पृ-न, पर्ण-अच् वा। पत्रे, पक्षे च "पूर्णेषु [illegible] इति। पलाशवृक्षे पु॰। ताम्बूले न॰। पर्णयुक्ते त्रि॰।

पर्णकृच्छ्र ● पु॰ पर्णैः [illegible] कृच्छ्रे [illegible] व्रतभेदे।

पर्णचीरक ● पु॰ पर्णे चीरमिव [illegible]

पर्णनर * पु॰ पर्णनिर्मितः नराकारः शरः। पत्यनाशादौ मृत्युके दाहे शवप्रतिनिधीभूते पर्णनिर्मिते नराकारे।

पर्णभेदिनी * स्त्री॰ पर्णानि भिनत्ति भिद णिनि। प्रियङ्गुवृक्षे।

पर्णलता * स्त्री॰ पर्णप्रधाना लता शाक॰। ताम्बूलीलतायाम्।

पर्णवल्ली * स्त्री॰ पर्णप्रधाना वल्ली शाक॰। पलाशीलतायाम्।

पर्णशाला * स्त्री॰ पर्णनिर्मिता शाला शाक॰। पर्णनिर्मिते कुटीरे।

पर्णाशन * पु॰ पर्णानि अश्नाति अश-ल्यु। मेघे, तस्य पवनचल- [illegible] इति प्रसिद्धिः।

पर्णास(सि) * पु॰ पर्णानि अस्यति अस-अच् इन् वा। तुलस्याम्।

पर्णिन् * पु॰ पर्ण+अस्त्यर्थे इनि। वृक्षे। मापपर्ण्यां स्त्री॰ ङीप्।

पर्द * कुत्सितशब्दे भ्वादि॰ आत्म॰ अक॰ सेट्। पर्दते अपर्दिष्ट।

पर्प * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पर्पति अपर्पीत्।

पर्प * न॰ पॄ+प। नवतृणे, पङ्गुगमनसाधने पीठादौ।

पर्पट * पु॰ पर्प+अटन्। (पित्तपापडा) क्षुपभेदे, मुद्गादिचूर्णकृते (पापड) इति ख्याते पिष्टकभेदे, [illegible] स्त्री॰ गौरा॰ ङीष्।

पर्ब * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पर्बति अपर्बीत्।

[illegible]

पामो, सामस्त्येन प्राप्तौ, न्यायमतसिद्धे समुदाये, [illegible] र्थानां सर्वत्र सम्बन्धभेदे च।

पर्याय * पु॰ परि+इण-घञ्। अनुक्रमे, प्रकारे, अवसरे, [illegible] द्रव्यधर्मभेदे, समानार्थबोधके शब्दे च। [illegible]

पर्यायशयन * न॰ पर्यायेण क्रमेण शयनम्। [illegible]

पर्युदसन * न॰ पर्युदस्यते उद्भियते कर्मणि ल्युट्। [illegible]

पर्युदस्त * त्रि॰ परि+उद्+अस-क्त। निराकृते, [illegible] शून्यतया भेदार्थकनञा निषिध्यमाने "यथा नारात्रौ श्राद्धं कुर्वीत" इति, अत्र हि रात्रौ श्राद्धेन फलं न वा [illegible] रात्रिः पर्युदस्ता तद्भिन्नायामावास्यायां श्राद्धम्।

पर्युदास * पु॰ परि+उद्+अस-घञ्। निराकरणे, [illegible] तया भेदार्थकनञा बोध्ये "प्राधान्यं हि विधेर्यत्र प्रति[illegible] धानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" [illegible] नञर्थे निषेधे च। विस्तरस्तु वाचस्पत्ये।

पर्युषित * त्रि॰ परिक्रम्य स्वकालमतिक्रम्य उषितम् [illegible] (वासि) यातयामादौ पदार्थे, "यातयामं गतरसं पूति [illegible] च यत्" इति मनुः। [पदार्थपरीक्षायाम्, [illegible]

पर्येषणा * स्त्री॰ परितस्तर्कादिना एषणा परीक्षा। [illegible]

पर्व * पूर्त्तौ भ्वादि॰ पर॰ सक॰ सेट्। पर्वति अपर्वीत्।

पर्वत * पु॰ पर्व-अतच्, पर्वाणि भागाः सन्त्यस्य तथा। [illegible] भूधरे, दानार्थं कल्पिते पर्वताकारे गुडादिधान्यादौ, [illegible] "नास्य विघ्नमनु तं ययौ यत् पर्वतस्य च" [illegible] मत्स्यभेदे (पावदा), वृक्षे, शाकभेदे च।

पर्वतमोचा * स्त्री॰ [illegible]। गिरिकदल्याम्। [illegible]

पर्वतवासिनी * स्त्री॰ पर्वते वसति वस-णिनि। [illegible]

पर्वतीय * पु॰ पर्वते भवः छ। (पाहाड़ीया) जातिभेदे "[illegible] र्भीरभूत्" इति रघुः। पर्वतजातमात्रे त्रि॰।

पर्वन् * न॰ पॄ-वनिप्। ग्रन्थौ, ग्रन्थौ (गांट), [illegible] चतुर्दश्यष्टम्याम, "चतुर्दश्यष्टमी चैव अमावास्या च पू[illegible] पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च" इति [illegible] उत्सव [illegible] कालभेदेषु च।

पर्वयोनि * पु॰ पर्व पर्वणि योनिरुत्पत्तिस्थानं यस्य। [illegible]

पर्वरुह * पु॰ पर्वणि रोहति रुह क्विप्। दाडिमे। [illegible]

पर्ववल्ली * स्त्री॰ पर्वप्रधाना वल्लीलता वल्ली। [illegible]

पर्वसन्धि * पु॰ पर्वणः सन्धिः। प्रतिपदा [illegible] काल [illegible]

पर्वा * स्त्री॰ [illegible]

[illegible]

पर्श * [illegible]

[illegible]

पल * गतौ भ्वादि॰ पर॰ सक॰ सेट् ज्वला॰। पलति अपालीत्।

पल * रक्षणे चुरा॰ उभ॰ सक॰ सेट्। पालयति-ते अपीपलत्-त।

पल * न॰ पल-अच्। मांसे, आमिषे, कर्षचतुष्टयपरिमाणे, शाली-चतोलकचतुष्टये, मौक्तिकमाष्टरत्तिमाषकाधिकतोलकत्रितयपरिमाणे, षष्टिगुर्वक्षरोच्चारणयोग्ये दण्डषष्टिभागे, विनाडिकाख्ये काले च। पलाले (तुच्छधान्ये) पु॰। [(दाम)।

पलगण्ड * पु॰ पलं मांसं गण्डति गण्डमिव करोति। लेपनकरे

पलङ्कष * पु॰ पलं मांसमुद्दिश्य कषति हिनस्ति अच्। राक्षसे, कणगुग्गुलौ च। रास्नायां, लाक्षायाम्, गुग्गुलौ, गोक्षुरे, महाश्रावण्यां, पलाशे, मक्षिकायाञ्च स्त्री॰ टाप्। [क। राक्षसे पु॰।

पलल * न॰ पल कलच्। मांसे, पङ्के, तिलचूर्णे च। पलं लाति ला-

पलाण्डु * पु॰ पल मांसमण्डति अण्ड उ। (पियाज) मूलभेदे "पलाण्डुं कवकानि च" इति मनुः। [भान्यस्यागमने।

पलायन * न॰ परा-अय-ल्युट् रस्य लः। भयादिना स्थानत्यागे

पलाल * पु॰ पल कालन्। शस्यशून्ये धान्यकाण्डे (नाडा) (पोयाल)

पलालदोहद * पु॰ पलालं दोहदं यस्य। आम्रवृक्षे, पलालवेष्टनेन हि तस्य वृद्धिः।

पलाश * न॰ पल गतौ घञर्थे क पलं पलनमश्नुते, पलं वियोगिनां मांसमिवाश्नाति शोषकत्वाद्वा अश-अण्। स्वनामख्याते वृक्षे "नवपलाशपलाशवनम्" इति माघः। पर्णमवर्णत्वात् हरिद्वर्णे पु॰। तद्वति त्रि॰। शाखायां, लताभेदे च स्त्री॰ गौ॰ ङीप्।

पलाशक * पु॰ पलं मांसमश्नाति अश्-ण्वुल्। शट्याम्, पलाशवृक्षे च।

पलाशपर्णी * स्त्री॰ पलाशवृक्षस्येव पर्णमस्याः। अश्वगन्धायाम्।

पलाशिन् * पु॰ पलाशानि सन्त्यस्य इनि। वृक्षे। [भिक्षौ गवि च।

पलिक्नी * स्त्री॰ पलित+ङीप् नि॰। वृद्धायां योषिति, बालगर्भिण्यां

पलित * न॰ पल-भावे क्त। केशादौ जरया जातायां श्वेततायाम्, मांसादेर्विपरीतभावे च। कर्त्तरि क्त। वृद्धे। स्त्रियां पलिता। योषिति तु पलिक्नीत्युक्तम्।

पल्यङ्क * पु॰ परिगतोऽङ्कं रस्य लः। शय्यायाम् (पालङ्क)।

पल्ययन * न॰ परि-इण-ल्युट् रस्य लः। घोटकसज्जाभेदे (जिन्)।

पल्यूल * छेदने, पूतौ च अद॰ चुरा॰ उभ॰ सक॰ सेट्। पल्यूलयति ते अपपल्यूलत् त। [लयति ते अपपल्यूलत् त।

पल्यूल * छेदने पवित्रताकरणे च अद॰ चु॰ उभ॰ सक॰ सेट्। पल्यू-

पल्ल * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पल्लति अपल्लीत्।

पल्ल * पु॰ पल्ल-अच्। स्थूलकुशूलके, इहति धान्यादिस्थापनस्थाने च (पालुइ) (मराइ)।

पल्लव * पु॰ पल्यते गम्य॰ क्विप् पल्, लूयते लू-अप् कर्म॰। अभिनवे पत्रविस्तारे, "लतोऽपि पल्लवैः" इति नैषधम्, तद्युक्तशाखायां, विस्तारे, बले, अलक्तकरागे, श्रमये, चापले च।

पल्लवद्रु * पु॰ पल्लवप्रधानः द्रुः। अशोकवृक्षे।

पल्लवित * त्रि॰ पल्लवं नूतनपत्रं विस्तारो वा जातः अस्य तारकादित्वात् इतच्। पल्लवयुक्ते, विस्तारयुक्ते च "द्विपविनतं पल्लवितञ्च विभ्रमम्" इति नैषधम्।

पल्लि(ल्ली) * स्त्री॰ पल्ल इन् वा ङीप्। क्षुद्रग्रामे, कुट्याम्, गेहे च। पल्लं गृहमाश्रयत्वेनास्त्यस्याः अच्। गृहगोधिकायाम् स्त्री॰ ङीप्।

पल्लिका * स्त्री॰ पल्ल्यां गृहे कायति कै+क। गृहगोधिकायाम्।

पल्वल * पु॰ न॰ पल्-वल। क्षुद्रे सरसि (डोबा)। "स पल्वलजलेऽधुना" इति भामिनीविलासः। [कर्त्तरि अच्। वायौ।

पव * पु॰ पू+अप्। धान्यादेः शोधने बहुलीकरणे च व्यापारे।

पवन * पु॰ पू+युच्। धान्यादेः शोधने बहुलीकरणे च व्यापारे। कर्त्तरि ल्यु। वाते। भावे ल्युट्। शोधने न॰। करणे ल्युट्। जले न॰। आधारे ल्युट्। आमघटादिपाकस्थाने (पोयान)। "पवनोपरि पङ्कलेपः" इत्युद्भटः।

पवनव्याधि * पु॰ पवनजनितो व्याधिर्यस्य शाक॰। उद्धवे, "संनयन् पवनव्याधेः" इति माघः। कर्म॰। वायुरोगे पु॰।

पवनात्मज * पु॰ ६त॰। हनुमति, भीमे, वह्नौ च "वायोरग्निः" इति श्रुतेस्तस्य वायुजातत्वात्तत्सुतत्वम्। पवनसुतादयोऽप्यत्र।

पवनाश * पु॰ पवनमश्नाति अश अण्। सर्पे। वायुभक्षके त्रि॰। युच्। पवनाशनोऽप्यत्र।

पवमान * पु॰ पूञ्-शानच्। वायौ।

पवि * पु॰ पू-इन्। वज्रे।

पवित * त्रि॰ पू+क्त। पवित्रे, शुचे च। मरिचे न॰।

पवित्र * स्त्री॰ न॰ पू-इत्र। यज्ञार्थे, कुशे "पवित्रासि वैष्णवी" इति यजुर्मन्त्रः। ताम्रे, जले, वर्षणे, घर्षणे, अर्घोपकरणे, यज्ञोपवीते, मधुनि, घृते, "अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं सर्वकर्मसु" इत्युक्ते कुशद्वये च न॰। व्रतादिना शुद्धे त्रि॰। तिलवृक्षे, पुत्रजीववृक्षे च पु॰। तुलस्यां, हरिद्रायां, नदीभेदे च स्त्री। [वृक्षे च।

पवित्रक * पु॰ पवित्र+स्वार्थे कन्। अश्वत्थे, उदुम्बरे, कुशे, दमनक-

पवित्रारोपण * न॰ पवित्रस्य यज्ञोपवीतस्य विष्णवे आरोपणं दानं यत्र। श्रावणशुक्लद्वादश्यां केशवोद्देशेन यज्ञोपवीतदानरूपे उत्सवे। पवित्रारोहणमप्यत्र।

पश(ष) * बाधे भ्वादि॰ उभ॰ आत्म॰ सक॰ सेट्। पश(ष)ति ते अपशी(षी)त् अपाशी(षी)त् अपशि(षि)ष्ट।

पश(ष) * स्पर्शे, गतौ, अनुपसर्गात् बन्धे, बाधे च अद॰ चुरा॰ उभ॰ सक॰ सेट्। पश(ष)यति ते अपपश(ष)त् त। [श(ष)त् त।

पश(ष) * बन्धे चुरा॰ उभ॰ सक॰ सेट्। पाश(ष)यति ते अपीप-

पशु * पु॰ सर्वमविशेषेण पश्यति दृश+कु पशादेशः। मृगादौ लोमवल्लाङ्गूलवति जन्तुभेदे, देवे च। दर्शनार्थेऽव्ययम्।

पशुपति * पु॰ पशूनां सर्वत्र समदर्शिनां देवानां पतिः। महादेवे।

पशुराज * पु॰ पशूनां राजा टच् समा॰। सिंहे।

पशुहरितकी * स्त्री॰ पशूनां हरीतकीव हितकारित्वात्। आम्रा-
तकफले।

पश्चात् * अव्य॰ अपर+प्रथमापञ्चमीसप्तम्यर्थे आति पश्चादेशः।
प्रथमाद्यर्थवृत्तेरपरशब्दस्यार्थे, चरमे, अधिकारे च।

पश्चात्ताप * पु॰ पश्चात् चरमस्तापः। अनुशये, कृतस्य कर्मणोऽनु-
चितत्वधिया अनुशोचने च।

पश्चार्द्ध * पु॰ अपरमर्द्धं पश्चादेशः। शेषार्द्धे, अपरभागे, "पश्चार्द्धेन
प्रविष्टः शरपतनभयात्" इति शकुन्तला।

पश्चिम * त्रि॰ पश्चात् भवः डिमच्। शेषभवे। प्रतीच्यामस्ताचल-
मविकृष्टायां दिशि स्त्री॰। [चौरभेदे।

पश्यतोहर * पु॰ पश्यन्तमनादृत्य हरति हृ-अच् अलुक् ६त॰।

पश्यन्ती * स्त्री॰ दृश-शतृ-ङीप्। परादिशब्दचतुष्टयमध्ये शब्द-
भेदे। विस्तारो वाचस्पत्ये।

पश्वाचार * पु॰ पशुर्द्वैतदर्शी तस्येवाचारः। तन्त्रोक्ते वैदिक-
मार्गानुसारिणि आचारे। [अपासीत् अपसिष्ट।

पस * बाधे, ग्रन्थे च भ्वादि॰ उभ॰ सक॰ सेट्। पसति ते अपसीत्

पंस * नाशने चुरा॰ उभ॰ सक॰ सेट् इदित्। पंसयति ते अपपंसत्
त। [पारदाः पह्लवास्तथा" इति मनुः।

पह्लव * पु॰ म्लेच्छधारिण्यो म्लेच्छजातिभेदे, "शका यवनकाम्बोजाः

पा * पाने भ्वादि॰ पर॰ सक॰ अनिट्। पिबति अपात्। णिच्
पाययति। [पालयति।

पा * रक्षणे अदा॰ पर॰ सक॰ सेट्। पाति अपासीत्। णिच्

पांशव * पु॰ पांशोर्विकारः अण्। (पाङ्गा) लवणभेदे। पांशुजादयो-
ऽप्यत्र। [त्रिंत शुष्कगोमये, कर्पूरभेदे च।

पांशु(सु) * पु॰ पश-पसि-वा कु॰ दृ॰। धूलौ, शस्यार्थचिरस-

पांशुचत्र * न॰ पांशुभिः सहितगोमये, पत्रमथ्य। वास्तूकशाके।

पांशुर * पु॰ पांशुं राति रा-क। खञ्जे, दंशके च (डांश)।

पांशुल * पु॰ पांशुः पांशुतुल्यं पापमस्त्यस्य। पापपति, पुंश्चले च।
कुलटायां स्त्री॰। "पांशुलानां धुरि कीर्त्तनीया" इति रघुः।
शिवमलिष्टे शिवे पु॰। धूलियुक्ते त्रि॰। "येथा निदधे पदं
समूढमस्य पांशुले" इति श्रुतिः।

पांशुर * त्रि॰ पांशु-र [illegible]। दूषके।

पाक * पु॰ पच+भावे घञ्। पचने, क्लेदने, क्लेदनेन निष्पादने,
[illegible], परिणामे च। आधारे घञ्। स्थाल्यादौ, पिचकै, शाङ्गा-
[illegible], वृद्धे च। [illegible] पा क। शिशौ। स्त्रियां पाका।

[illegible] * पु॰ [illegible] ([illegible]), कृष्णभेदे।

[illegible] * पु॰ पाके परिणामे [illegible] यस्य। (पानी-
[illegible]), वृक्षभेदे। [त्रि॰।

[illegible] * न॰ [illegible] [illegible]। [illegible]। [illegible]

[illegible] * पु॰ [illegible] [illegible]। [illegible] [illegible]
[illegible]।

पाकरञ्जन * न॰ पाकं पच्यमानं रञ्जयति रन्ज-णिच्-ल्युट्।
तेजपत्रे। [च पु॰। कर्कोट्यां स्त्री॰ गौरा॰ ङीष्।

पाकल * न॰ पाकं लाति ला-क। कुष्ठौषधौ (कुड़)। वह्नौ, वायौ

पाकशाला * स्त्री॰ ६त॰। पाकस्थाने। पाकगृहपाकस्थानादयो-
ऽप्यत्र।

पाकशासन * पु॰ पाकं तन्नामासुरं शास्ति शास ल्यु। इन्द्रे।

पाकिम * त्रि॰ पाकेन निर्वृत्तम् इमन्। पाकनिष्पन्ने। [पु॰

पाक्य * न॰ पच+ण्यत् कुत्वम्। विड्लवणे, पांशुलवणे च। यवक्षारे

पाक्षिक * त्रि॰ पक्षतः प्राप्तः ठक्। पक्षतः प्राप्ते, प्राप्यमाणैक-
भावनाविषये एकतरपक्षे इत्तहस्ते नियमे, "नियमः पाक्षिके
सति" इति मीमांसा।

पाचक * पु॰ पचति पच-ण्वुल्। वह्नौ। पाककर्त्तरि सूदादौ,
भुक्तान्नजारकौषधौ च त्रि॰। पित्ताख्ये धातुभेदे न॰।

पाचन * न॰ पच-णिच्-ल्युट्। पित्तादिदोषनाशके वैद्यकोक्ते क्वाथ
भेदे, प्रायश्चित्ते च। पच-णिच्-कर्त्तरि ल्यु। वह्नौ, अम्लरसे,
रक्तैरण्डे च पु॰। हरितक्यां स्त्री॰ ङीप्।

पाञ्चजन्य * पु॰ पञ्चजने दैत्यभेदे भवः यञ्। विष्णुशङ्खे "पाञ्चजन्यं
हृषीकेशः" इति गीता। [ङीप् पाञ्चाली।

पाञ्चाल * त्रि॰ पञ्चालदेशे भवः अण्। पञ्चालदेशभवे। स्त्रियां

पाटच्चर * पु॰ पटच्चर एव स्वार्थे प्रज्ञादित्वादण्। चौरे।

पाटल * पु॰ पाटयति पट-णिच्-कलच्। श्वेतरक्तवर्णे। तद्वति त्रि॰।
(पारुल) इति ख्याते वृक्षे स्त्री॰। तत्पुष्पे, आशुधान्ये च न॰।

पाटलि * स्त्री॰ पट+णिच् अलि वा ङीप्। (पारुल) इति ख्याते
वृक्षे "पाटलिसंसर्गसुरभिवनवाताः" इति शकुन्तला। अत्र
पाटली च।

पाटलिपुत्र * न॰ (पाटना) इति ख्याते नगरभेदे।

पाटव * न॰ पटोर्भावः अण्। पटुतायाम्, क्रियायोग्यतायाम्,
आरोग्ये च "अपाटवाच्चशौचाद्येः" इति स्मृतिः।

पाटी * स्त्री॰ पट-णिच्-इन्-ङीप्। धारायां, व्यक्तगणनायां लील-
वत्यादौ, (वाला) इति ख्याते क्षुपे च। [शाके च

पाठ * पु॰ पठ-घञ्। अक्षराणामुच्चारणे, गुरुमुखश्रवणपूर्वा

पाठक * पु॰ पठति पाठयति वा ण्वुल्। अध्येतरि, अध्यापके च

पाठशाला * स्त्री॰ ६त॰। पाठमन्दिरे।

पाठा * स्त्री॰ पठ+कर्मणि घञ्-टाप्। अम्बष्ठायाम् (आकनादि

पाठिन् * पु॰ पठ णिनि। चित्रवृक्षे। पाठके त्रि॰।

पाठिन् * पु॰ पठ-णिनि। चित्रवृक्षे। पाठके त्रि॰।

पाठीन * पु॰ पाठिं पृष्ठं नमयति नम ड दीर्घः। गुग्गुलुवृक्षे, मत्स्य-
भेदे च (बोयाल) "पाठीनरोहिताबाद्यौ" इति मनुः। पठ-
ईनण्। पाठके त्रि॰। पत्रशीर्ष्यां, वर्हे च स्त्री॰।

पाणि * पु॰ पण-इण् आयाभावः। करे, कूर्मिके हस्ते च (कुर्पिका

पाणिगृहीती * स्त्री॰ पाणिर्गृहीतो यस्याः ङीप्। भार्यायाम्।

पाणिग्रहण * न० पाणिर्गृह्यतेऽत्र ग्रह+आधारे ल्युट्। विवाहे। "पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते" इति मनुः। पाणिपीडनादयोऽप्यत्र।

पाणिघ * पु० पाणिं हन्ति, पाणिना वा हन्ति वादयति हन-टक् कुत्वम्। पाणिताडके, पाणिना मृदङ्गादिवादके च।

पाणिनि * पु० पणिन अपत्यं पाणिनः ततः अपत्यार्थे इञ् तदपत्यम् अण् तस्य लुक् इञ्। अष्टाध्यायीव्याकरणादिकारके दाक्षीपुत्रे शालातुरीयग्रामभवे मुनिभेदे। "सिंहो व्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिनेः" इति पञ्चतन्त्रम्।

पाणिनीय * त्रि० पाणिनिना प्रोक्तम्, तस्येदम् वा छ। पाणिनिना कृते अष्टाध्यायीरूपादौ व्याकरणादौ।

पाणिभुज् * पु० पाणिरिव भुज्यते मोट्यते भुज-मोटने क्विप्। उदुम्बरवृक्षे। पाणिना भुङ्क्ते भुज+क्विप्। हस्तेन भक्षके त्रि०।

पाणिवाद * पु० पाणिं पाणिना वा मृदङ्गादिकं वादयति वद-णिच्-अण् वा। हस्तताडके, हस्तेन मृदङ्गादिवादके च। ण्वुल्। पाणिवादकोऽप्यत्र।

पाणिसर्ग्या * स्त्री० पाणिना सृज्यतेऽसौ सृज ण्यत्। रज्जौ।

पाण्डर * पु० पडि-अर दीर्घश्च। मरुवकवृक्षे, श्वेतवर्णे च। तद्वति त्रि०। कुन्दपुष्पे, गैरिके च न०। [पुत्रे युधिष्ठिरादौ।

पाण्डव * पु० पाण्डोरपत्यम् अण्। चन्द्रवंश्यस्य नृपभेदस्य क्षेत्रजे

पाण्डु * पु० पडि-कु नि० दीर्घः। चन्द्रवंश्ये नृपभेदे, श्वेतवर्णे केतकीधूलिसन्निभे पीतवर्णार्द्धे वर्णभेदे च। तद्वति त्रि०। नागभेदे, श्वेतहस्तिनि, रोगभेदे, पटोलवृक्षे च पु०। माषपर्ण्यां स्त्री०।

पाण्डुकण्टक * पु० पाण्डुवर्णानि कण्टकानि यस्य। अपामार्गे।

पाण्डुकम्बल * पु० कर्म०। श्वेतवर्णप्रावारे। कम्बल इव पाण्डुः राज०। प्रस्तरभेदे। [वर्णकम्बलप्रावृते रथे।

पाण्डुकम्बलिन् * पु० पाण्डुकम्बल+अस्त्यर्थे इनि। पाण्डु-

पाण्डुतरु * पु० कर्म०। धववृक्षे। [हस्तिनि, श्वेतसर्पे च।

पाण्डुनाग * पु० नाग इव पाण्डुः राज०। पुन्नागवृक्षे, श्वेत-

पाण्डुफल * पु० पाण्डूनि फलान्यस्य। पटोले। चिर्भट्यां स्त्री०।

पाण्डुर * पु० पाण्डुवर्णोऽस्यास्ति र। श्वेतपीतमिश्रिते वर्णे। पडि-उर पृ० हरिः। श्वेतवर्णे च। तद्वति त्रि०। कामलाख्ये रोगे, श्वित्ररोगे च न०। माषपर्ण्यां स्त्री० टाप्।

पाण्डुरङ्ग * पु० पाण्डुरमङ्गमस्य शाक०। (पाटराङ्गा) शाके।

पाण्डुरद्रुम * पु० कर्म०। कुटजवृक्षे (कुडची)।

पाण्डुराग * पु० पाण्डुः रागो वर्णो यस्य। दमनकवृक्षे।

पाण्डुलोमशा * स्त्री० पाण्डूनि लोमानीवाङ्गानि सन्ति यस्याः श। माषपर्ण्याम्। श्वेतलोमवति त्रि०।

पात * पु० पत-घञ्। पतने। पा-क्त। रक्षिते त्रि०। पत-ण। ज्योतिषोक्ते क्रान्तिसाम्यसम्पादके राहुरूपे ग्रहभेदे।

पातक * न० पातयति अधो गमयति पत-णिच् ण्वुल्। पातित्यसम्पादके पापे, पापजनके प्राणिवधादौ च।

पातञ्जल * न० पतञ्जलिना प्रोक्तम् अण्। पाणिनिसूत्रवार्त्तिकव्याख्यानरूपे "अथ शब्दानुशासनम्" इत्यादिके महाभाष्ये, "अथ योगानुशासनम्" इत्यादिके योगशास्त्रे च।

पाताल * न० पत-आलञ्। धरायास्तलस्थे भुवने, ज्योतिषोक्ते लग्नाच्चतुर्थे स्थाने च।

पातालनिवास * पु० नि+वस-आधारे घञ्। पातालं निवासो यस्य। दैत्ये। पातालनिलयादयोऽप्यत्र। [पु०।

पातुक * त्रि० पत+उकञ्। पतनशीले। प्रपाते, जलहस्तिनि च

पात्र * न० स्त्री० पाति रक्षत्याधेयं, पिबत्यनेन वा पा-ष्ट्रन् स्त्रियां ङीप्। जलाद्याधारे भोजनयोग्ये अमत्रे, विद्यादियुक्ते दानयोग्ये ब्राह्मणे "ब्राह्मणं पात्रमाहुः" इति स्मृतिः, यज्ञिये स्रुवादौ तीरद्वयमध्यवर्त्तिनि जलाधारस्थाने, नाटकेऽभिनेये नायकादौ च न०। [योग्ये, "विप्रः पात्रीयतामियात्" इति स्मृतिः।

पात्रीय * त्रि० पात्रे यज्ञपात्रे योग्यः छ। यज्ञद्रव्ये। स्वार्थे छ।

पात्रेसमित * त्रि० पात्रे भोजनपात्रासादनकाले एव समितः सङ्गतः। भोजनादन्यत्र अनुपस्थिते कार्य्यादक्षे।

पाथ * न० पीयतेऽदः थ। जले। पाति रक्षति थ। अग्नौ, सूर्य्ये च।

पाथस् * न० पाति रक्षति, पीयते वा पा-पाने, रक्षणे वा असुन् थुक् च। जले, अन्ने च अन्नभोजने हि देहरक्षा।

पाथेय * त्रि० पथि हितं ढञ्। पथि भोजनोचिते द्रव्ये।

पाद् * पु० पद-णिच्-क्विप्। चरणे, पादे च। [देर्मूले च।

पाद * पु० पद्यते गम्यतेऽनेन करणे घञ्। चरणे, चतुर्थांशे, वृक्षा-

पादकटक * पु० पादस्य कटक इव। नूपुरे।

पादकृच्छ्र * पु० पादमितश्चतुर्थांशमितः कृच्छ्रः शाक०। "उपवासेन चैकेन पादकृच्छ्र उदाहृतः" इत्युक्ते व्रतभेदे।

पादग्रहण * न० पादयोः ग्रहणं यत्र। पादग्रहणपूर्वके प्रणामभेदे, "अमुष्य पादग्रहणं प्रत्यहञ्चाभिवादनम्" इति मनुः।

पादचारिन् * पु० पादेन चरति चर-णिनि ३त०। पदातौ। पद्भ्यां गन्तरि त्रि०।

पादत्राण * न० पादौ त्रायेते येन त्रै-करणे ल्युट्। पादुकायाम्।

पादप * पु० पादेन मूलेन पिबति निजं जलम् पा-क। वृक्षे। पादं पाति रक्षति पा-क। पादपीठे।

पादपरुहा * स्त्री० पादपं रोहति रुह-क। वन्दायाम् (परगाछा)।

पादपीठ * न० ६त०। पादस्थापनासने। "सिंहासनं यस्य सपादपीठम्" इति भट्टिः। पादकायां स्त्री० टाप्।

पादमूल * न० ६त०। चरणस्याधोभागे।

पादरोह * पु० पादेन मूलेन रोहति रुह-अच्। वटवृक्षे।

पादवल्मीक न० पादस्य वल्मीकमिव। श्लीपदरोगे (गोद)।

पादविक * त्रि० पदवीं धावति ठक्। पथिके, पथिधावके च।

पादविरजस् * स्त्री० पादौ विरजसौ धूलिशून्यौ यस्याः। ६ब०। पादुकायाम्। [दानादौ।

पादग्रस् * अ२० पादं पादं ददाति करोति वा शस्। (पोयापोया)

पादशैल * पु० पादाकारः शैलः। प्रत्यन्तपर्वते।

पादस्फोट * पु० पादौ स्फोटयति अण्। रोगभेदे।

पादाग्र * न० ६त०। चरणाग्रभागे, प्रपदे च।

पादाङ्गद * न० पादस्य अङ्गदमिव। नूपुरे।

पादात * न० पदातीनां समूहः अण्। सैन्यसमुदाये। पादाभ्यामतति गच्छति अच्। पदातौ सैन्ये। पादातिः पादातिकोऽप्यत्र।

पादुका * स्त्री० पद-णिच्-ऊ ततः स्वार्थे कन् ह्रस्वः। चर्ममये पादाच्छादने पदार्थे (जुता)। कनभावे पादूरप्यत्र।

पादुकाकार * पु० पादुकां करोति कृ अण् उप०। चर्मकारे। पादूकृत्पादुकाकृदादयोऽप्यत्र।

पाद्य * न० पादाय पादप्रक्षालनाय साधु यत्। पादप्रक्षालनार्थे जले। अर्घं क्लीबेन क्लीबमपि। "पाद्याः पाद्याः" इत्यादिः पाद्यदानमन्त्रः। [आधारे ल्युट्। पानभाजने।

पान * न० पा-ल्युट्। द्रवद्रव्यस्य गलाधःसंयोजने, रक्षणे च।

पानगोष्ठी * स्त्री० पानार्थं गोष्ठी सभा। (चक्र) पानार्थं सभायाम्।

पानभाजन * न० पीयतेऽस्मिन् पा+ल्युट् कर्म०। पानपात्रे। पानपात्रादयोऽप्यत्र। [च त्रि०।

पानीय * न० पीयते यत् पा-अनीयर्। जले। पातव्ये, रक्षितव्ये

पानीयकुक्कुट * पु० पानीयस्थे जलोपरि जायते जन-ड। (पाना) कुक्कुराम्।

पानीयफल * न० ६त०। (माखना) जलकन्दफलभेदे।

पानीयफल * न० ६त०। (माखना) जलकन्दफलभेदे।

पानीयमूलक * न० पानीये मूलं यस्य कप्। सोमराज्याम्।

पानीयशालिका * स्त्री० पीयतेऽस्याम् आधारे अनीयर् तादृशी पानीयशालिकरणार्थं वा या शाला स्वार्थे कन्। प्रपायाम् (जलसत्रादि)।

पानीयामलक * न० कर्म०। (पानि आमला) वृक्षभेदे।

पान्थ * पु० पन्थानं गच्छति पथिन्+अण् पन्थादेशः। पथिके।

पाप * न० पाति रक्षति आत्मानमस्मात् पा-अपादाने प। नरक-हेतौ दुरदृष्टे, तत्साधने हिंसादौ, योनिनिषिद्धेषु [illegible] दर्शनेषु [illegible]। [त्रिम्। पापमात्रे त्रि०।

पापक * पु० पाप वर्ति ठक्। निधि, तत्र हि दानेन पापनाशश्च

पापर्द्धी * स्त्री० पाप ऋद्धिः [illegible] वा अच् पापर्द्धी [illegible] [illegible] मृगयायाम्।

पापपुरुष * पु० पापात्मक पुरुषः पुरुषाकारः। तन्त्रोक्ते वामकुक्षिस्थे [illegible] कल्पिते पुरुषे।

ङीप्। शमीवृक्षे।

पापात्मन् * पु० पापयुक्त आत्मा अन्तःकरणं यस्य। पापाविष्टे जीवे "पापात्मा पापसम्भवः" इति पुराणम्।

पाप्मन् * पु० आप्नोति व्याप्नोति आप-मनिन् नि०। पापे।

पामन् * न० पा-मनिन्। विचर्चिकायां (खोस पाचडा) स्त्रीत्वमपि मनन्तात् ङीप्। पामाप्यत्र।

पामघ्न * पु० पाम हन्ति हन-ठक्। गन्धके। कटुक्यां स्त्री० ङीप्।

पामन * त्रि० पामास्त्यस्य अस्त्यर्थे न। पामरोगवति।

पामर * त्रि० पाति क्विप् पाः वर्णधर्मः स म्रियतेऽनेन मृ अच्। मूर्खे, नीचे, खले च। [टाप्। गुडूच्याम्।

पामरोद्धारा * स्त्री० पामरमुद्धरति उद्-हृ-अण् पचादित्वात्

पामारि * पु० ६त०। गन्धके तत्सेवने हि पामरोगनाशः।

पायस * पु० पयसि दुग्धे संस्कृतः अण्। परमान्ने। पयस्विनि त्रि० "पायसं दधिसक्तवः" इति स्मृतिः। चन्दने च।

पायु * पु० पा+उण्। अपानवायुस्थाने।

पाय्य * न० मीयतेऽनेन मा-ण्यत् नि० पादेशः। परिमाणे पानीये च। निन्दनीये त्रि०। [पारत्

पार * कर्मसमाप्तौ अद० चु० उभ० सक० सेट्। पारयति ते

पार * न० परमेव अण् पारं परं तीरं पृ+घञ् वा। नदीनां प्राप्ये परे तीरे। पार-अच्-घञ्। प्रान्तभागे।

पारक्य * त्रि० परलोकाय हितं ष्यञ् कुक् च। परलोकसाधने कर्मणि। [गन्तरि, शेषगामिनि

पारग * त्रि० पारं गच्छति गम+ड। कर्मसमाप्तिकर्त्तरि, पार

पारण * न० पार-ल्युट्। व्रतान्तभोजने। युच्। तदर्थे स्त्री० "तत्र पारणा स्यात्" इति रघुः। पॄ-णिच्-ल्यु। मेघे पु०।

पारतन्त्र्य * न० परतन्त्रस्य भावः ष्यञ्। पराधीनत्वे "पारतन्त्र्याद्विधेः श्रुतेः" इति मीमांसा। [कर्मणि, परलोकभीरु

पारत्रिक * त्रि० परत्र भवं, हितं वा ठञ्। परलोकहितकारी

पारद(त) * पु० पॄ णिच्-तन्, पृ० तस्य दः वा। धातुभेदे (पारा) पारं ददाति दा-क। पारदायिनि त्रि०। [गामिनि

पारदारिक * पु० परस्य दारान् गच्छति ठञ्। यद्वा

पारदार्य * न० परस्य दारा एव दारा यस्य तस्य भावः ष्यञ् परदारगमने। "पारदार्यं पारिवित्तम्" इत्युपपातकवर्णने स्मृतिः। [परमार्थपाथभूते श्रेयःसाधने धर्मे

पारमार्थिक * त्रि० परमार्थाय पारलौकिकधर्माय हितं ठञ्।

पारम्पर्य * न० परम्परैव स्वार्थे ष्यञ्। कुलादिपरम्परायाम्। "पारम्पर्यक्रमागत" इति स्मृतिः।

पारम्पर्योपदेश * पु० पारम्पर्येण पित्रादिपरम्परया [illegible] तु मातापित्रादिवाक्यम्। ऐतिह्ये "यथा इह वटे यक्ष इत्यादिवाक्यं पर मतेः, न तु तत्र यक्षः कश्चित् इत्येव

कन्यायामादौ द्विजे क्रमेण।

पारशव • पु० "निषादः शूद्रकन्यायां यः पारशव उच्यते। स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः" इति मनूक्ते शूद्रायां ब्राह्मणेनोत्पादिते निषादरूपे सङ्कीर्णवर्णे, परस्त्रीतनये, लोहे च। परशु+इदमर्थेऽण्। परशुसम्बन्धिनि त्रि०।

पारश्वध • पु० परश्वधः प्रहरणमस्य अण्। परश्वधेन युद्धकर्त्तरि। ठक्। पारश्वधिकोऽप्यत्र।

पारसीक • पु० देशभेदे, तद्देशस्थे जने ब० व०। "पारसीकांस्ततो जेतुम्" इति रघु०। तद्देशस्थे घोटके पु० (पारसियोड़ा)।

पारस्त्रैणेय • त्रि० परस्त्रिया अपत्यं ढक् इनङादेशः। जारजे परस्त्रियाः सुते। [(पायरा)।

पारापत • पु० पारादापतति प्रेम्णा पार+आ+पत अच्। पारावते।

पारावा(रा)र • न० पारञ्चावारञ्चास्त्यस्य अच्। समुद्रे पु०। तटद्वये। पारावारमप्यत्रोभयार्थे।

पारायण • न० पारं समाप्तिमयतेऽनेन अय-ल्युट्। साकल्ये, ग्रन्थादीनामाद्यन्तपाठे च। [रायणपाठके।

पारायणिक • त्रि० पारायणमध्ययनमावर्त्तयति ठक्। पुराणादे-

पारावत • पु० परं दूरमवति स्वामिसन्देशेन अव-अच परावत् स्वार्थे अण्। कपोते (पायरा)।

पारावतपदी • स्त्री० पारावतस्येव पादौ यस्याः ङीप् पदादेशः। काकजङ्घायाम्। [याम्।

पारावताङ्घ्रि • पु० पारावतस्याङ्घ्रिरिव मूलमस्य। ज्योतिष्मतीलता-

पारावारीण • त्रि० पारमवारञ्च गच्छति खञ्। तटद्वयगामिनि, समुद्रपारगे च। पारापारीणोऽप्यत्र।

पाराशर • पु० पराशरस्यापत्यम् शिवाद्यण्। वेदव्यासे। तेन प्रोक्तमित्यण्। पराशरोक्ते भिक्षुसूत्रे। तत्स्मृतौ स्त्री० ङीप्। "कर्मन्दी पाराशरः स्मृतः" इति स्मृतिः।

पाराशरिन् • पु० पराशरेण प्रोक्तं भिक्षुसूत्रमधीयते वाऽस्त्यस्य इनि। भिक्षुके, सर्वकर्मत्यागिनि सन्यासिनि च।

पाराशर्य • पु० पराशरस्यापत्यं गर्गादित्वात् यञ्। वेदव्यासे। अत इञ् पाराशरिरप्यत्र।

पारिकाङ्क्षिन् • पु० पारमस्त्यस्मिन् इति पारि ब्रह्मज्ञानं तत्काङ्क्षति णिनि। मौनव्रतधारिणि, ब्रह्मध्याने मुनिभेदे च।

पारिजात • पु० पारमस्त्यस्य पारी समुद्रस्तत्र जातः जन ड। देवतरुभेदे। स्वार्थे कन्। अत्रार्थे।

पारिणाय्य • न० परिणयकाले लब्धम् ष्यञ्। विवाहकाले लब्धे धने। "मातुः पारिणाय्यं स्त्रियो विभजेरन्" इति स्मृतिः।

पारि(री)न्द्र • पु० इन्दति हिनस्ति इनि पारी इन्द्र इव प्रकम्प्य-वा। सिंहे, अजगरसर्पे च।

पारिपन्थिक • पु० परिपन्थं गच्छति ठक् पन्थादेशश्च। चौरे।

पारिपा(या)त्र • पु० विन्ध्यपर्वतपश्चिमदेशे भारतवर्षस्य सीमापर्वते। स्वार्थे कन्। तत्रैवार्थे।

पारिपार्श्विक • पु० परिपार्श्वे वर्त्तते चरति वा ठक्। सूत्रधारस्य पार्श्वचरे नटे, "नटो विदूषको वापि पारिपार्श्विक एव वा" इति सा० द०।

पारिप्लव • न० परि+प्लु-अच् स्वार्थेऽण्। चञ्चले, आकुले च।

पारिभद्र(क) • पु० परितो भद्रमस्मात् प्रज्ञाद्यण्। (पालिदेमान्दार) वृक्षे। परिभद्राय कायति कै-क। देवदारुवृक्षे, निम्बवृक्षे च पु०। कुष्ठौषधौ न०।

पारिभाव्य • न० परिभवाय रोगसमूहनाशाय हितं ष्यञ्। कुष्ठौषधौ। परिभुवः प्रतिभुवो भावः ष्यञ्। प्रतिभूभवने "साक्षित्वं प्रातिभाव्यञ्च" इति स्मृतिः।

पारिमाण्डल्य • न० परितो मण्डलं यस्य, सर्वत्र विद्यमानत्वात् परिमण्डलः परमाणुस्तस्य भावः ष्यञ्। न्यायोक्ते कारणताशून्ये परमाणुपरिमाणे। [(निचुल) इति ख्याते वृक्षे।

पारिश • पु० विपूर्त्तिं पृ+णिनि पारी तं श्यति शो-क। (पलाश

पारिषद • त्रि० परिषदि भवः तिष्ठति वा अण्। सभास्थे सभ्ये। ण्य। पारिषद्योऽप्यत्र। [मन्त्रे, कटके च।

पारिहार्य • पु० परिह्रियतेऽसौ परि+हृ-कर्मणि घञ् स्वार्थे ष्यञ्।

पारीण • त्रि० पारं गच्छति पार-खञ्। पारगे, कर्मसमाप्तिकारके च। [हस्ते, पृथिवीपतौ च।

पार्थ • पु० पृथाया अपत्यम् अण्। पृथापुत्रे युधिष्ठिरादौ, अर्जुने

पार्थिव • पु० पृथिव्या ईश्वरः अण्। राजनि। पृथिव्या विकारः इदं वा अण्। भूमिमये त्रि०। सीतायां स्त्री०। तगरपुष्पे न०।

पार्वण • त्रि० पर्वणि पूर्णिमादौ भवः अण्। पूर्णिमादिभवे "न शारदः पार्वणशर्वरीश्वरः" इति नैषधम्। पर्वणि अमावास्यादौ विहितम् अण्। श्राद्धभेदे न०। पृ-वनिप् प्रज्ञाद्यण्। मृगभेदे पु०।

पार्वत • पु० पर्वते भवः अण्। (घोड़ानिम) निम्बभेदे। पर्वतजातमात्रे त्रि०। मलक्यां, गोपालपूतिकायां, जीवन्त्यां, सौराष्ट्रमृत्तिकायाम्, क्षुद्रपाषाणभेदायां, धातक्यां, दुर्गायाञ्च स्त्री० ङीप्।

पार्वतीनन्दन • पु० ६त०। कार्त्तिकेये। पार्वतीसुतादयोऽप्यत्र।

पार्वतेय • न० पर्वते भवं ढक्। सौवीराञ्जने। सप्लाशवृक्षे पु०।

पार्श्व • पु० न० स्पृश स्पर्शे धातोः श्व च। कक्षाधोभागे, समीपे, चक्रे, पार्श्वे च। पर्शूनां पार्श्वास्थ्नां समूहः पर्शु+अण्। पर्शुसमूहे न०।

पार्श्वपरिवर्त्तन • न० पार्श्वेन परिवर्त्तनम्। यत्पार्श्वमधः स्थापयित्वा शयितं तत्पार्श्वस्योर्ध्वोत्थापने (पाशमोड़ा), पार्श्वस्य परावृत्तौ, सुतस्य हरेः भाद्रशुक्लद्वादश्यां कर्त्तव्ये पार्श्वपरिवर्त्तनाख्ये उत्सवभेदे च।

पार्श्वास्थि • न० कर्म०। (पाजर) शरीरपार्श्वस्थिते अस्थि।

पार्षद * पु॰ पर्षदि भवस्तत्र स्थितो वा अण्। सभास्थे। व्यञ् पार्ष-द्योऽप्यत्र।

पार्ष्णि * पु॰ स्त्री॰ पृष-नि नि॰ वृद्धिः। पादग्रन्थेर्गुल्फस्याधोभागे (गोडालि)। पृष्ठे, सैन्यपृष्ठे, जिगीषायाञ्च पु॰।

पार्ष्णिग्राह * पु॰ पार्ष्णिं पृष्ठपदं गृह्णाति अण्। विजयार्थं जिग-मिषोः पश्चात्पदग्राहिणि पृष्ठस्थे शत्रौ।

पाल * रक्षणे चुरा॰ उभ॰ सक॰ सेट्। पालयति ते अपीपलत् त।

पाल * त्रि॰ पालयति पाल-अच्। रक्षके "पालदोषविनाशे च पाले दण्डो विधीयते" इति स्मृतिः।

पालक * पु॰ पालयति पाल+ण्वुल्। अश्वरक्षके, चित्रकवृक्षे च।

पालघ्न * पु॰ पालं छत्रं हन्ति हन-टक्। छत्राख्ये जलजतृणभेदे।

पालङ्क * पु॰ पाल सम्प॰ क्विप् पाला अङ्क्यते अङ्क-घञ्। (पालङ) शाकभेदे। स्त्रीत्वमपि ङीप्। पक्षे वार्थे। कुन्दुरुवृक्षे स्त्री॰ गौ॰ ङीष्। कर्मणि यत्। पालङ्क्याप्यत्र।

पालाश * न॰ पलाशं पर्णमस्त्यस्य प्रज्ञाद्यण्। तेजपत्रे। तद्वर्णो-ऽस्त्यस्य। हरिद्वर्णे पु॰। तद्वति, पलाशस्येदम् अण्। पलाशसम्ब-न्धिनि च त्रि॰। "ब्राह्मणस्य पालाशो दण्डः" इति स्मृतिः।

पालि स्त्री) पाल-इन् वा ङीप्। कोणे, पङ्क्तौ, यूकायाम्, सेतौ, प्रान्तभागे, प्रशंसायां, क्रोड़े च। स्वार्थे कन्। कोणे, कर्णपत्रे च। [लिताया स्त्री॰ गौरा॰ ङीष्।

पालिन्द * पु॰ पालिं ददाति दा+क पृ मुम्। कुन्दुरुवृक्षे। श्यामा-

पावक * पु॰ पुनाति पू ण्वुल्। वह्नौ, वैद्युताग्नौ च।

पावकि * पु॰ पावक+अपत्यार्थे इञ्। कार्त्तिकेये, स हि शिव-वीर्यात् वह्नौ निहिताज्जात इति पुराणम्।

पावन * पु॰ पावयति पू-णिच्-ल्यु। अग्नौ, व्यासे, सिह्लके, पीत-भृङ्गराजे च। गोमये, प्रायश्चित्ते, कृच्छ्रसाध्ये कर्मणि च न॰। पाव्यतेऽनया ल्युट् ङीप्। गङ्गायां, हरीतक्यां, तुलस्याञ्च स्त्री॰। पवित्रतासाधके त्रि॰।

पाश * पु॰ पश्यते बध्यतेऽनेन पश-घञ्। मृगविहगादिबन्धने रज्जु-भेदे (फाँद), रज्जुमात्रे च। केशादुत्तरं पाशः बह्वर्थः। यथा केशपाशः। कर्णात् परः शोभार्थः। यथा कर्णपाशः शोभनकर्ण इत्यर्थः। छात्रादिभ्यः पाशप्। अपकृष्टच्छात्र इत्याद्यर्थे।

पाशक * पु॰ पश-ण्वुल्। द्यूतक्रीड़ासाधने गुटिकादौ (पाशा)।

पाशपाणि * पु॰ पाशः पाणौ यस्य। वरुणे। पाशहस्तादयोऽप्यत्र। पाश+इनि। पाशीत्यप्यत्र।

पाशुपत * पु॰ पशुपतिरिदं, सोऽस्य देवता वा अण्। वकवृक्षे। तन्त्र-भेदे, अस्त्रभेदे च न॰। तद्भक्ते त्रि॰। [चित्रधर्मे।

पाशुपाल्य * न॰ पशून् पालयति अण् तस्य भावः ततः ष्यञ्।

पाश्चात्य * त्रि॰ पश्चाद् भवः त्यक्। पश्चिमदेशभवे।

पाश्या * स्त्री॰ पाशानां समूहः यत्। पाशसमूहे।

पाष(ख)ण्ड * पु॰ पाति रक्षति दुरितेभ्यः पा क्विप् पाः वेदधर्मस्त' पण्डयति निष्फलं करोति, खण्डयति वा। "ब्राह्मणाः धर्माः पाखण्डेन निगद्यन्ते (प)खण्डयन्ति तु तं यस्मात् ते पखण्डास्तेन कीर्तिताः" इत्युक्ते वेदाचारत्यागिनि।

पाषण्डिन् * पु॰ पां वेदधर्मं षण्डयति षण्ड+णिच्-णिनि।

पाषाण * पु॰ पिनष्टि पिष-संचूर्णने आनच् पृ॰। प्रस्तरे ... ङीप्। (बाटखारा) तुलामानपाषाणे।

पाषाणदारक * पु॰ पाषाणं दारयति दॄ ण्वुल्। टङ्के (पा-थर काटाछेनी)। युच्। पाषाणदारणोऽप्यत्र।

पाषाणभेदन * पु॰ पाषाणं भिनत्ति ल्यु। (हाड़जोड़ा) इत्यादि

पाषाणभेदिन् * पु॰ पाषाणं भिनत्ति भिद-णिनि। ... वृक्षभेदे।

पि * गतौ तु॰ सक॰ पर॰ अनिट्। पियति। अपैषीत्।

पिक * अपि-कायति कै-क अपेरतो लोपः। कोकिले।

पिकप्रिया * स्त्री॰ ६त॰। महाजम्ब्वाम्।

पिकबन्धु * पु॰ ६त॰। आम्रवृक्षे।

पिङ्ग * पु॰ पिजि-वर्णे अच् नङ्कोप॰ कुत्वम्। मूषके, दीप्तिमिश्रे पिङ्गलवर्णे च। तद्वति त्रि॰। हरिताले न॰। ... नालिकायां, दुर्गायाम्, हरिद्रायां, हिङ्गुनि, ... स्त्री॰ टाप्। शमीवृक्षे स्त्री॰ ङीप्।

पिङ्गल * पु॰ पिङ्ग लाति ला-क, पिजि-कलच् वा कुत्वम्। ... भेदे, रुद्रे, सूर्यपारिपार्श्विके, वानरे, निधिभेदे, ... मङ्गले षष्ठे, स्थावरविषभेदे, क्षुद्रोलूके, ... "चारुपशाचि! दुर्भिक्ष नर्मदातटे" इत्युक्तलक्षणे प्राकृतच्छन्दोग्रन्थकारके नागरूपे मुनिभेदे, ... वर्णे च। तद्वति त्रि॰। कुमुददिग्गजस्य योषिति, ... राजनीतौ, शिंशपावृक्षे, वामनाख्यदिग्गजस्य योषिति, ... भेदे च स्त्री॰ टाप्। "यथा संछिद्य कान्तायां सुप्त ... पिङ्गला।" इति पुराणम्।

पिङ्गललोह * न॰ लोह धातुः कर्म॰। पित्तले।

पिङ्गाक्ष * पु॰ पिङ्गे अक्षिणी यस्य षच् समा॰। शिवे, तस्य हि वैलक्षण्याग्निरूपत्वात्तथात्वम्। पिङ्गेक्षणोऽप्यत्र।

पिचण्ड * पु॰ अपि+चम-ड तस्य नेत्त्वम् अपेरल्लोपः। उदरे, ... रवयवे च। पृ॰ ह्रस्वम्। पिचिण्डोऽप्यत्र। [कुक्षौ

पिच(चि)ण्डिल * त्रि॰ पिच(चि)ण्ड+अस्त्यर्थे इलच्। तुन्दिले ...

पिचव्य * पु॰ पिचवे तूलाय साधु यत्। कार्पासवृक्षे।

पिचु * पु॰ पच-उ पृ॰। कार्पासतूले (तुला), कुष्ठभेदे, ... भेदे, गस्त्रभेदे च।

पिचुक * पु॰ पिचुरिव कायति कै-क। मदनवृक्षे (मयना)।

पिचुतूल * न॰ ६त॰। तूले (तुला)।

पिचुमन्द(र्द) * पु॰ पिचुं कुष्ठं मन्दयति, मर्दाति वा अच्। ...

पिचुल * पु॰ पिचुं लाति ला-क। ... (झाउ), ...

छकरादौ च।

पिच • छेदे चुरा• उभ• सक• सेट्। पिचयति ते अपिपिचत् त।

पिचट • न• पिच-अटन्। सीसके, रङ्गे, नेत्ररोगभेदे च।

पिच्छ • बाधे तुदा• पर• सक• सेट्। पिच्छति अपिच्छीत्।

पिच्छ • न• पिच्छ-अच्। मयूरपुच्छे, चूडायाञ्च। शाल्मली पु•। शाल्मलिवृक्षे, पूगे, परम्परायाम्, कोषे, मोचायां, भक्तसंभूतमण्डे, पङ्क्तौ, शिंशपावृक्षे, कोशिकायाम्, अश्वस्य चरणरोगभेदे च स्त्री• टाप्।

पिच्छल • त्रि• पिच्छ-कलच्। (पिछल) स्निग्धे, मसृणे च।

पिच्छलदला • स्त्री• पिच्छलं दलं यस्याः। बदरीवृक्षे। शिंशपायाम्। पिच्छलच्छदादयोऽप्यत्र। [शिंशपायाम्।

पिच्छितिका • स्त्री• पिच्छ-क्विप् इ• इट् ततः स्वार्थे कन्।

पिच्छिल • त्रि• पिच्छा+अस्त्यर्थे इलच्। (पिछल) मसृणे, स्निग्धे, "पिच्छिलानि च दधीनि" इति काव्यप्र•। भक्तमण्डे, सरसस्य जलप्लावादौ, मण्डयुक्तभक्ते च। श्लेष्मातकवृक्षे पु•।

पिच्छिलत्वच् • पु• पिच्छिला श्लक्ष्णा त्वक् यस्य। नागरङ्गवृक्षे।

पिच्छिलसार • पु• पिच्छिलः सारोऽस्य। मोचरसे।

पिञ्ज • दीप्तौ वासे बले च अक• हिंसायां दाने च सक• चुरा• उभ• सेट् इदित्। पिञ्जयति ते अपिपिञ्जत् त।

पिञ्ज • न• पिञ्ज अच्। बले। कर्पूरभेदे पु•। व्याकुले त्रि•। तूले, हरिद्रायां, अहिंसायां च स्त्री•। भावेऽच्। वधे पु•।

पिञ्जट • पु• पिञ्ज-अटन्। नेत्रमले (पिचुटि)।

पिञ्जर • न• पिञ्ज-अरन्। हरिताले, स्वर्णे, नागकेशरे, विहगादिबन्धनस्थाने, देहास्थिवृन्दे च। अश्वभेदे, पीतरक्तवर्णे च पु•। तद्वति त्रि•।

पिञ्जल • न• पिञ्ज-कलच्। हरिताले, कुशपत्रे च। अत्यन्ताकुलसैन्यादौ पु•। कुशान्तरवेष्टिते मापकुशपत्रद्वये स्त्री• ङीप्।

पिञ्जिका • स्त्री• पिञ्ज+ण्वुल् अत इत्वम्। तूलनालिकायां (पाइज)।

पिट • संहतौ ध्वनौ च भ्वादि• पर• सक• सेट्। पेटति अपेटीत्।

पिट(क) • पु• पिट+क। वंशपत्रादिनिर्मिते पात्रभेदे (पेटरा)। विस्फोटे त्रि•। स्वार्थे कन् अत्रैवार्थे।

पिठ • क्लेशे अक• वधे सक• भ्वादि• पर• सेट्। पेठति अपेठीत्

पिठर • पु• पिठ करन्। गृहभेदे। मुस्तायां, मन्थानदण्डे च न•। स्थाल्यां पु• स्त्री• स्त्रीत्वे ङीप्।

पिड • राशीकरणे भ्वादि• आत्म• सक• सेट् इदित्। पिण्डते अपिपिण्डत्। अयं चुरादिरपि उभ•। पिण्डयति ते अपिपिण्डत् त।

पिण्ड • त्रि• पिडि-घञ् अच् वा। संहते, घने च। देहे, देहैकदेशे, एकैकदेशे, सामगाना पितृभ्यो देये गोलाकारे अन्ने, गोले, सिह्लके, बोले, हस्ते, कवले, गजकुम्भे, मदनवृक्षे च पु•। आजीवने, भोज्ये, यजुर्वेदिभिः पितृभ्यो देये श्राद्धे पिण्डाकारेऽन्ने च न•। [सिह्लकगन्धद्रव्ये।

पिण्डक • पु• पिण्ड इव कायति कै क। पिण्डालौ। स्वार्थे कन्।

पिण्डकन्द • पु• पिण्डाकारः कन्दः। पिण्डालौ।

पिण्डखर्जूर • पु• स्त्री• पिण्डाख्यः खर्जूरः। स्वनामख्याते वृक्षे।

पिण्डपुष्प • न• पिण्डं संहतं पुष्पम्। अशोकपुष्पे, जवापुष्पे, पद्मपुष्पे, तगरपुष्पे च।

पिण्डपुष्पक • पु• पिण्डं पुष्पमिव कायति कै क। वास्तूकशाके।

पिण्डफला • स्त्री• पिण्डमिव फलं यस्याः। कटुतुम्ब्याम्।

पिण्डमुस्ता • स्त्री• पिण्डा संहता मुस्ता। नागरमुस्तायाम्।

पिण्डमूल • न• पिण्डमिव मूलमस्य। गर्जरे (गाजर)।

पिण्डबीजक • पु• पिण्डाकारं बीजं यस्य कप्। कर्णिकारवृक्षे।

पिण्डाभ • पु• पिण्डः भक्त इवाभाति अच्। सिह्लके।

पिण्डाभ्र • न• अभ्रभेदं अच् आभ्रं पिण्डमिवाभ्रम्। मेघजातकरकायाम्।

पिण्डायस • न• पिण्डं संहतमयः अच् समा•। तीक्ष्णायसे।

पिण्डार • पु• पिण्डं संघातमृच्छति ऋ अच्। विकङ्कतवृक्षे, क्षपणके, गोपे च। [व्याघ्र। स्वार्थे कन् अत्रैवार्थे।

पिण्डालु • पु• पिण्डाकार आलुः। (गोलआलु) कन्दभेदे, कन्दगुडूच्यां।

पिण्डि(ण्डी)का • स्त्री• पिडि-इन् वा ङीप् स्वार्थे कन् वा। सर्वकाष्ठाधारे रथचक्रमध्ये स्थाने रथनाभौ, पीठे, जानुनोऽधःस्थे मांसलप्रदेशे च। [पु•।

पिण्डित • त्रि• पिण्डि क्त। संहते, घनीभूते, गुणिते च। तुरुष्के

पिण्डिला • स्त्री• पिण्डं पिण्डाकारं फलमस्त्यस्याः इलच्। गोडुम्बायां (गोमुक)।

पिण्डीतक • पु• पिण्डीं स्वल्पपिण्डं फलद्वारा तकति अनुकरोति तक+हासे अच्। मदनवृक्षे, तगरे च। [वृक्षे।

पिण्डीतगर • पु• पिण्डया स्वल्पपिण्डेनोपलक्षितस्तगरः। तगर-

पिण्डीपुष्प • पु• पिण्डया उपलक्षितं पुष्पमस्य। अशोकवृक्षे।

पिण्डीर • पु• पिण्डं पिण्डाकारं फलमीरयति ईर+अण्। दाडिमवृक्षे। नीरसे त्रि•।

पिण्डीशूर • पु• पिण्डयां भोजने एव नान्यत्र शूरः। गेहेनर्दिनि युद्धाद्यसमर्थे। [ज्योतिष्मतीलतायाम्।

पिण्या • स्त्री• पण्यते स्तूयते रोगहन्तृत्वेन यत् पृ• इत्वम्।

पिण्याक • पु• न• पण-व्यवहारे आकन् नि•। तिलकल्के (खल), सिह्लके, वाह्लीके च। सिह्लके पु• स्त्री• स्त्रीत्वे ङीप्।

पितामह • पु• पितुः पिता पितृ+डामहच्। पितुः पितरि। पितृपितामहादयोऽप्यत्र। तत्पत्न्यां स्त्री• ङीप्।

पितृ • पु• पाति रक्षति पा-तृच् नि•। जनके। माता चकारान्तौ पित्रर्थः। मातापितरौ द्वि•।

पितृकानन • न• ६त•। श्मशाने। पितृवनपितृगृहादयोऽप्यत्र।

पितृतीर्थ * न॰ ६त॰ । गयायाम्, तर्जन्यङ्गुष्ठयोर्मध्यभागे च ।
पितृपति * पु॰ ६त॰ । यमे । पितृराजादयोऽप्यत्र ।
पितृप्रसू * स्त्री॰ पितॄणां प्रसूरिव श्राद्धादानयोग्यकालत्वात् । सायंसन्ध्याकाले, पितृमातरि च ।
पितृप्रिय * पु॰ ६त॰ । भृङ्गराजे ।
पितृभोजन * पु॰ पितृभिर्भुज्यते कर्मणि ल्युट् । माषे, श्राद्धे तदान्नस्य प्रशस्तत्वात् । भावे घञ् ६त॰ । पितृभक्षणे ।
पितृयज्ञ * पु॰ ६त॰ पितृद्देशेन यज्ञः । पितृतर्पणे । "पितृयज्ञन्तु तर्पणम्" इति मनुः ।
पितृयाण * पु॰ पितृभिर्यायतेऽनेन करणे ल्युट् पूर्व॰ णत्वम् । धूमादिचिह्निते मृते कर्मिभिर्गन्तव्ये पथिभेदे । [वाचस्पत्ये ।
पितृलोक * पु॰ ६त॰ । चन्द्रलोकस्योपरिस्थे लोकभेदे । विस्तरस्तु
पितृबन्धु * पु॰ ६त॰ । "पितुः पितृ. स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः" इत्युक्तेषु पितुः पितृष्वसृपुत्रादिषु । [भ्रातरि ।
पितृव्य * पु॰ पितुर्भ्राता पितृ+व्यत् । ज्येष्ठे कनिष्ठे वा पितृ-
पितृष्व(स्वो)सृ * स्त्री॰ ६त॰ वा षत्वम् । पितुर्भगिन्याम् ।
पितृष्वस्रीय * पु॰ स्त्री॰ पितुः स्वसुरपत्यम् छ । पितृष्वसुः पुत्रे ।
पितृसन्निभ * पु॰ पित्रा सन्निभा तुल्यता यस्य । पितृतुल्ये ।
पित्त * न॰ अपि+दो-क्त तादेशः अल्लोपः न दीर्घः । देहस्थे धातुभेदे ।
पित्तघ्नी + स्त्री॰ पित्तं हन्ति हन ठक् ङीप् । गुडूच्याम् ।
पित्तद्राविन् * पु॰ पित्तं द्रावयति द्रु-णिच्-णिनि । मधुरजम्बीरे ।
पित्तल * न॰ पित्तं लाति ला-क । ताम्रादिजाते धातुभेदे । तोयपिप्पल्यां स्त्री॰ ।
पित्तारि * पु॰ ६त॰ । पर्पटे (क्षेतपापडा), लाक्षायां, बर्बरे च ।
पित्र्य * त्रि॰ पितुः इदं, प्रियं वा पितृत आगतं वा यत् । पितृसम्बन्धिनि । पितृतीर्थे तर्जन्यङ्गुष्ठयोर्मध्यस्थाने, मधुनि, मघानक्षत्रे च । पितृप्रिये माषे पु॰ । अमावास्यायां तिथौ स्त्री॰ ।
पित्सत् * पु॰ पत-सन् शतृ । पक्षिणि । पतनेच्छावति त्रि॰ ।
पिधान * न॰ अपि+धा-ल्युट् अल्लोपः । छादने, उद्घाटने च ।
पिनद्ध * त्रि॰ अपि+नह-क्त अल्लोपः । परिहिते वस्त्रादौ ।
पिनाक * पु॰ न॰ पाति पा-आकन् नि॰ । शिवधनुषि, तच्छूलाग्रे, पांशुवर्षणे च ।
पिनाकिन् * पु॰ पिनाक+मत्वर्थे इनि । महादेवे ।
पिपासा * स्त्री॰ पातुमिच्छा पा+सन्-अ । पानेच्छायाम् ।
पिपासु * त्रि॰ पातुमिच्छुः पा-सन्-उ । पानेच्छावति, तृषिते च ।
पिपीतकी * स्त्री॰ वैशाखशुक्लद्वादश्याम् । विप्रभेदे पु॰ ।
पिपीलक * पु॰ अपि-पील-ण्वुल् अल्लोपः । (डेंयोपिंपड़ा) इति ख्याते कीटे, (सुडसुडेपिंपड़ा) इति ख्याते कीटे च स्त्री॰ टाप् ।
पिप्पल * न॰ पा-अलच् पृ॰ । जले, वस्त्रखण्डभेदे च । अश्वत्थवृक्षे, वस्त्रप्रान्ते, पक्षिणि च पु॰ । [illegible]
[illegible] । पिप्पलं पिप्पली [illegible] ।
पिप्पलीमूल * पिप्पल्याः इव मूलमस्य । (पिपुलमूल) [illegible]
पिप्लु * पु॰ अपि प्लु-क्विप् [illegible] । जतुके ।
पिप्पिका * पु॰ पी-पाने [illegible] । [illegible]
पिल * [illegible] पु॰ उभ॰ सक॰ सेट् । [illegible]
पिलुक * पु॰ पिल-कन् । पीलुवृक्षे ।
पिलुपर्णी * स्त्री॰ पिलु पर्णमस्याः ङीप् । [illegible]
पिश * न॰ [illegible] । [illegible]
पिश * [illegible] पर॰ सक॰ सेट् । [illegible]
पिश * अवयवे तु॰ मु॰ पर॰ सक॰ सेट् । पिंशति [illegible]
पिशङ्ग * पु॰ पिश-अङ्गच् किच्च । पीतरक्तमिश्रवर्णे, तद्वति त्रि॰ ।
पिशाच * पु॰ पिशितमश्नाति अश अण् पृ॰ । देवयोनिभेदे ।
पिशाचद्रु * पु॰ ६त॰ । शाखोटवृक्षे । पिशाचवृक्षादयोऽप्यत्र ।
पिशित * न॰ पिश-क्त । मांसे । जटामांस्यां स्त्री॰ वा ङीप् ।
पिशुन * न॰ पिश+उनन् किच्च । कुङ्कुमे । नारदे, काके, सूचके, क्रूरे च त्रि॰ । (पिङ्कड्) शाकभेदे स्त्री॰ टाप् ।
पिष * चूर्णने रुधा॰ पर॰ सक॰ अनिट् । पिनष्टि अपिषत् ।
पिष्ट * न॰ पिष क्त । सीसके, पिष्टके च । चूर्णिते त्रि॰ । [illegible]
पिष्टक * पु॰ न॰ पिष्टानां तण्डुलचूर्णानां विकारः कन् । [illegible]
पिष्टपचन * न॰ पिष्टं पच्यतेऽनेन पच-करणे ल्युट् । पिष्टपाके पात्रे कटाहादौ । [illegible]
पिष्टप * पु॰ न॰ । पिष्यते पिष्यते वात्र पिष-पिष-क्त [illegible]
पिष्टात * पु॰ पिष्टमतति अत-अण् । पटवासनार्थे चूर्णभेदे
पिष्टिक * न॰ पिष्टे भवः ठ । (पिटालि) तण्डुलचूर्णजात [illegible] कारे द्रवे पदार्थे । इदन्नपिष्टजाते स्त्री॰ टाप् । [illegible]
पिस * गतौ भ्वादि॰ पर॰ सक॰ सेट् । पेसति अपेसीत्
पिस * दीप्तौ वा चु॰ उभ॰ पक्षे भ्वा दि॰ पर॰ अक॰ सेट् । पिसयति ते अपिपिसत् त । पक्षे पिंसति अपिसीत् ।
पिस * बले बले च अक॰ वधे दाने गतौ च सक॰ चु॰ उभ॰ सेट् । पेसयति-ते अपीपिसत्-त ।
पिहित * त्रि॰ अपि+धा-क्त अल्लोपः । तिरोहिते, आच्छादिते [illegible]
पी * पाने दिवा॰ आत्म॰ अनिट् । पीयते अपेष्ट । [illegible]
पीठ * पु॰ न॰ पीयते पिव्यते वा अत्र पा-ठक् पिठ [illegible] दीर्घः । (पीडि) आसनभेदे, व्रतिनामासने च ।
पीठसर्पिन् * त्रि॰ पीठेन सर्पति सृप-णिनि । खञ्जे ।
पीड * वधे विलोडने च चु॰ उभ॰ सक॰ सेट् । पीडयति-ते अपीपिडत्-त अपीपिडत्-त ।
पीडन * न॰ पीड-ल्युट् । परराष्ट्रस्यन्दपादिनाऽभिभवे, प्रवृत्तादिना आक्रमणे, द [illegible] च ।

पीडा * स्त्री० पीड-अ। व्यथायां, दुःखे च।
पीडित * त्रि० पीड-क्त। मर्दिते, बाधिते, दुःखिते च।
पीत * न० पा-क्त। पाने, हरिताले च। हरिद्रावर्णे पु०। कर्मणि क्त। पानकर्मणि, पीतवर्णवति च त्रि०।
पीतक * न० पीत+स्वार्थे कन्। कुङ्कुमे, हरिताले च। अगुरुणि, पद्मकाष्ठे, पित्तले, माक्षिके, श्योनाकभेदे, किरातवृक्षे, माध्वी-वृक्षे, पीतशाले च पु०। आयकमानार्थे संग्रामभेदे न०।
पीतकदली * स्त्री० कर्म०। स्वर्णकदल्याम् (चांपाकला)।
पीतकन्द * न० पीतः कन्दो यस्य। (गर्जरे) (गाजर)।
पीतकावेर * न० कुत्सितं वेरं कावेरं पीतं कावेरं यस्मात् ५ब०। कुत्सिताङ्गं पीतं कुर्वति कुङ्कुमे, पित्तले च।
पीतकाष्ठ * न० कर्म०। पीतचन्दने, पीतागुरुणि च।
पीतघोषा * स्त्री० कर्म०। पीतपुष्पवत्यां घोषातक्याम्।
पीततण्डुल * पु० पीतस्तण्डुलो यस्य। (काङ्गनी) धान्यभेदे। चोरिकाहृदे स्त्री० टाप्।
पीततैला * स्त्री० पीतं तैलं यस्याः। ज्योतिष्मतीलतायाम्।
पीतदारु * न० कर्म०। सरलवृक्षे, देवदारुणि, हरिद्रुवृक्षे च।
पीतद्रु * पु० कर्म०। सरलवृक्षे, दारुहरिद्रायाञ्च।
पीतन * न० पीतं करोति पीत+णिच्-ल्यु। कुङ्कुमे, हरिताले, पीतदारुणि च। प्लक्षे, आम्रातके च पु०। स्वार्थे कन्। आम्रातके (आमडा) पु०।
पीतपर्णी स्त्री० पीतं पर्णं यस्याः। (विछिटी) लतायाम्।
पीतपुष्प * पु० पीतं पुष्पं यस्य। कर्णिकारवृक्षे। चाट्कयाम्, इन्द्रवारुण्याञ्च स्त्री० टाप्। गन्धपुष्पायां, सहदेव्यां, महाकोषातक्यां, [हृदि च। अपुष्पी (स्नुषा) च स्त्री० ङीप् वा टाप्।
पीतफल(क) * पु० पीतं फलं यस्य वा कप्। शाखोटवृक्षे, कर्मार-
पीतबालुका * स्त्री० पीता बालुकेव चूर्णनात्। हरिद्रायाम्।
पीतमुद्ग * पु० कर्म०। (सोनामुग) मुद्गभेदे।
पीतयूथी * स्त्री० कर्म०। स्वर्णयूथ्याम्।
पीतराग * न० पीतो रागो वर्णो यस्य। किञ्जल्के, सिक्थे च। कर्म० पीतवर्णे पु०। ६त०। तद्वति त्रि०। [दयोऽप्यत्र।
पीतवासस् * पु० पीतं वासो यस्य। श्रीकृष्णे, पीतवस्त्रपीताम्बरा-
पीतबीजा * स्त्री० पीतं बीजं यस्याः। मेथिकायाम्। पीतवर्णबीजयुक्ते त्रि०। [सार०।
पीतशाल * पु० पीतं फलं शालते शाल-अच्। असनवृक्षे। (पिया
पीतसार * न० पीतं सारं यस्य। पीतवर्णे चन्दनकाष्ठे, हरिचन्दने च। मलयजे, गोमेदमणौ, अङ्कोटवृक्षे, तुरुष्के, बीजके च पु०। स्वार्थे कन्। सिह्ले, अङ्कोटवृक्षे च पु०।
पीतसारक * पु० कर्म० स्वार्थे कन्। (पियाशाल) पियालवृक्षे।
पीताङ्ग * पु० पीतमङ्गमस्य। श्योनाकभेदे।
पीति(थि) * पु० पा-क्तिन् [illegible] वा घोटके [illegible]

क्तिन्। पाने, गतौ, शुण्डायाञ्च। [हरिद्रायाम्, स्वर्णयूथ्याञ्च।
पीतिका * स्त्री० पीतयति पीत+णिच्-ण्वुल्। हरिद्रायाम्, दारु-
पीतिन् * स्त्री० पीतमनेन इष्टादित्वादिनि। घोटके।
पीन * त्रि० प्याय-क्त सम्प्रसारणम्। स्थूले, दृढे, सम्पन्ने च।
पीनस * पु० पीनं पीनतां स्यति सो-क। नासिकारोगभेदे। कर्कट्यां स्त्री० ङीप्। [धेन्वायां गवि।
पीनोध्नी * स्त्री० पीनमूधोऽस्याः ङीप् अनङादेशः। पीवरो-
पीय * प्रीणने भ्वा० पर० सक० सेट्। पीयति अपीयीत्।
पीयूष * न० पीय-ऊषन्। देवानां पेयभेदे अमृते, दुग्धे च। नव-प्रसूतायाः गोः आसप्तरात्रभवे दुग्धे तत्र पेयूषमपि।
पील * रोधे भ्वादि० पर० सक० सेट्। पीलति अपीलीत्।
पीलु * पु० पील-उ। परमाणौ, पीलुपाक पिठरपाकः इति वैशेषिकभेदः। गजे, अस्थिखण्डे, तालकाण्डे, शमे, कुसुमे, खोड़-पदेन ख्याते गुडफले वृक्षे, कुसुमे च।
पीलुनी * स्त्री० पील+उन गौ० ङीप्। मूर्वायाम्।
पीलुपत्र * पु० पीलुतुल्यं कृमिजनितं पत्रं यस्य। मोरटालतायाम्।
पीलुपर्णी * स्त्री० पीलुजनितानि पर्णान्यस्याः ङीप्। मूर्वायाम्, बिम्बिकायाञ्च।
पीव * स्थौल्ये भ्वादि० पर० अक० सेट्। पीवति अपीवीत्।
पीवन् * त्रि० प्यै क्वनिप्। स्थूले, बलवति च। वायौ पु०।
पीवर * त्रि० प्यै-ष्वरच्। स्थूले। स्त्रियां ङीप्। शतावर्याम्, गवाश्वयोश्च स्त्री० टाप्। महत्यां गवि, प्रथमसूत्यां, शालपर्ण्याञ्च स्त्री० ङीप्।
पुंलिङ्ग * न० ६त०। पुंसश्चिह्ने अङ्गभेदे। पुंस इव लिङ्गमस्य ब०। व्याकरणोक्ते संस्कारविशेषयुक्ते शब्दविशेषे पु०।
पुंश्चली * स्त्री० पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छति अच् गौरा० ङीप्। असत्यां स्त्रियाम्।
पुंस * अर्दे चुरा० उभ० सक० सेट्। पुंसयति ते अपुपुंसत् त।
पुंसवन * न० पुमान् सूयतेऽनेन सू-ल्युट्। संस्कारभेदे, दुग्धे च।
पुंस्त्व * पु० पुंसो भावः त्व वा। पुंलिङ्गे अङ्गभेदे, शुक्रे, पुरुषत्वे, व्याकरणोक्ते शब्दगते संस्कारविशेषे च।
पुकस(श) * पु० पुक् [illegible] [illegible]
[illegible]। अधमे त्रि०।
पुङ्ख * पु० पुमांसं खनति खन-ड। वाणमूले शुभकर्मणि च।
पुङ्गव * पु० पुमान् गौः कर्म० [illegible]। वृषे, श्रेष्ठार्थको च। [illegible]
[illegible]
[illegible]
पुच्छ * [illegible]
पुञ्ज * न० [illegible]
पुञ्जि(ञ्जी) * [illegible]
पुञ्जिक * [illegible]

[illegible]। [illegible] [illegible]।

पुष्य • पु• [illegible] पुष्णाति [illegible]। [illegible], [illegible] च।

पुट • [illegible] पुटति [illegible]

[illegible]।

पुट • [illegible] पुटति [illegible] पुपोट।

पुट • [illegible] पुटति ते [illegible] न।

पुट • न• पुट [illegible]। [illegible], [illegible] सद्यादिकरा-

[illegible] च। [illegible] पु• न•।

[illegible], [illegible] च पु•। [illegible] दुग्धादिपान-

[illegible]।

पुटक • पु• [illegible]।

पुटकिन् • [illegible] जला-

[illegible] [जगरे।

[illegible] लुट्।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] सत्रभ्य-

[illegible]

[illegible] न।

[illegible] अपुण्यीत्।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

देशे "आ समुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। [illegible]रं गिर्य्योरार्य्यावर्त्तम्" इति मनुः तयोर्मध्यवर्त्तिनि [illegible]

पुण्यवत् • त्रि• पुण्य+भूमार्थे मतुप् मस्य वः। बहुपुण्ये।

पुण्यश्लोक • त्रि• पुण्यः पुण्यदायकः श्लोको यशो [illegible]

"पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। [illegible]

च वैदेही पुण्यश्लोको जनार्दनः" इत्युक्तेषु नलादिषु। [illegible]

रितपुरुषमात्रे च।

पुण्याह • न• पुण्यमहः टच् समा•। पुण्यजनके दिने।

पुण्याहवाचन • न• पुण्याहस्य पुण्यजनकदिनस्य वाचनं [illegible]

द्वारा वाचनम् वच-णिच्-ल्युट्। वैदिककर्मादौ [illegible]

तथा ब्राह्मणद्वारा वाचने। [पुत इत्यत्र। पुत्तलिका

पुत्तिका • स्त्री• पुत् इति शब्दं तनोति तन ड [illegible]

पुत्र • पु• पुन्नाम्नो नरकात् त्रायते पुत्+त्रै-क। "पुन्नाम्नो [illegible]

पितरं त्रायते सुतः। तस्मात् पुत्र इति ख्यातः" इत्युक्ते

पु-त्र [illegible]। [illegible] तनये। [illegible]

पुत्री। ज्योतिषोक्ते लग्नात् पञ्चमे स्थाने पु•। [illegible]

[illegible] पुत्र एव [illegible] तयोरर्थयोः त्रि•।

पुत्रक • पु• पुत्र+अल्पार्थे [illegible] कन्। पुत्रे, [illegible]

[illegible]भेदे, [illegible] च। कन्यायां टाप्, पुत्रिका।

पुत्रजीव • पु• पुत्रं जीवयति जीव+णिच्+अण्। [illegible]

[illegible]। [illegible]। पु• मुम्। पुत्रञ्जीवोऽप्यत्र।

पुत्रदा • स्त्री• पुत्रं ददाति सेवनात् गर्भं ददाति दा-क। [illegible]

[illegible], [illegible] च। गर्भदे पुत्रदे च त्रि•।

पुत्रभद्रा • स्त्री• पुत्रस्य भद्रं यस्याः ब•। [illegible]

पुत्रिका • स्त्री• "[illegible] प्रदास्यामि तुभ्यं [illegible]

[illegible] जायते पुत्रः स मे पुत्रो भवेत्" इति [illegible]

[illegible] कन्यायां, "पुत्रिकाधर्मशङ्कया" इति श्रुतिः।

पुत्रिकापुत्र • पु• पुत्रिकैव पुत्र पुत्रिकायाः पुत्र [illegible]

[illegible] पुत्रत्वेन [illegible] कन्यायां, तत्पुत्रे च।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॰ पु॰ [illegible] क्विप्, घञ् वा।
[illegible]।

[illegible] ॰ पु॰ [illegible]।

[illegible] ॰ वि॰ [illegible]।
[illegible] वि॰।

[illegible] ॰ पु॰ [illegible] धा-क।
[illegible]।

[illegible] ॰ [illegible] पर॰ सक॰ सेट्। [illegible]।

[illegible] ॰ [illegible] सक॰ सेट्। [illegible]।

[illegible] ॰ [illegible] पर॰ सक॰ सेट्।
[illegible]।

[illegible] ॰ [illegible] पर॰ सक॰ सेट्। [illegible]।

[illegible]

परिमितदीर्घविस्तारे जलाशयभेदे च।

पुष्करिन् ॰ पु॰ पुष्करं शुण्डाग्रमस्त्यस्य इनि। गजे।

पुष्कल ॰ वि॰ पुष-कलच् कस्य नेत्वम्। "[illegible]
[illegible] च पुष्कलम्" इत्युक्ते परिमाणभेदे। [illegible]
[illegible] च।

पुष्टि ॰ स्त्री॰ पुष+क्तिन्। पोषणे, वृद्धौ, [illegible]
[illegible], [illegible] मातृकाभेदे च।

पुष्टिदा ॰ स्त्री॰ पुष्टिं ददाति दा-क। [illegible],
[illegible] स्त्रियाञ्च।

पुष्प ॰ विकाशे दिवा॰ पर॰ अक॰ सेट्। पुष्पति [illegible]।

पुष्प ॰ न॰ पुष्प-अच्। कुसुमे, स्त्रीरजसि, विकाशे, [illegible]
नेत्ररोगभेदे च। स्वार्थे कन्। कुबेरस्य विमाने, [illegible]
रत्नमयकङ्कणे, रसाञ्जने, लोहकांस्ये, [illegible]
[illegible] च। [illegible]

पुष्पकरण्डक ॰ न॰ ६त॰। (कुनेर माजि) [illegible]

पुष्पकेतु ॰ पु॰ पुष्पनिर्मितः केतुरञ्जनम्। कुसुमाञ्जने।

पुष्पचाप ॰ पु॰ पुष्पमयं चापमस्य। कामदेवे। [illegible]

पुष्पचामर ॰ पु॰ पुष्पं चामर इव यस्य। मदनवृक्षे।

पुष्पदन्त ॰ पु॰ वायुकोणस्थे दिग्गजे, विद्याधरभेदे च।

पुष्पदन्तक ॰ पु॰ महिम्न इत्यादिस्तवकर्त्तरि गन्धर्वभेदे।

पुष्पपुर ॰ न॰ पाटलिपुत्रनगरे कुसुमपुरे (पाटना)।

पुष्पफल ॰ पु॰ पुष्पवृत्तं फलमस्य। कपित्थे।

पुष्पमास ॰ पु॰ पुष्पप्रधानो मासः शाक॰। चैत्रे, वसन्तर्त्तौ।

पुष्परस ॰ पु॰ ६त॰। मकरन्दे, कुसुमनिर्यासे च।

पुष्पराग ॰ पु॰ पुष्पस्येव रागो वर्णो यस्य। मणिभेदे [illegible]

पुष्परोचन ॰ पु॰ पुष्पं रोचनं यस्य। नागकेशरे। [illegible]

पुष्पलिह् ॰ पु॰ पुष्पं लेढि लिह-क्विप्। मधुकरे। [illegible]

पुष्पवती ॰ स्त्री॰ पुष्प [illegible]
[illegible] स्त्रियाम्। पुष्पविशिष्टे त्रि॰। [illegible]
[illegible] त्रि॰।

पुष्पवाटी ॰ स्त्री॰ ६त॰। पुष्पोद्याने। [illegible]
"[illegible]" [illegible]

[illegible]

[illegible]द * पु० स्त्री० कालं पुष्णाति पुष-कर्त्तरि [illegible] नि०। [illegible]-
[illegible] पक्षिभेदे, स्त्रीत्वे टाप्।

[illegible] * पु० कर्म० [illegible]।

[illegible]दन्त * पु० पुष इन् पुषि [illegible] दन्ता यस्य पर्याप्नोति अच्। [illegible] गणभेदे। "मौलिः पुष्पदन्तो गणः" इति।

[illegible]स्नान * न० पुष्पसाध्यस्नाने स्नानम्। शास्त्रोक्तविधानेन पुष्प-
[illegible]स्नानभेदे।   [ति अपुपुस्तत् त।

[पु]स्त * हर्षे, अनादरे, बन्धे च चु० उभ० सक० सेट्। पुस्तयति

[पु]स्त * न० पुस्त-अच्। "मृदा वा दारुणा वापि वस्त्रेणाप्यथ चर्मणा। लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते" इत्युक्ते
लिप्यादिनिष्पन्नकर्मणि। स्वार्थे कन्। लिप्याधारे द्रव्ये, पु०
स्त्री० स्त्रीत्वे ङीप्।

[पू] * शोधे दिवा० आत्म० सक० सेट्। पूयते अपविष्ट।

[पू] * शोधे भ्वादि० आत्म० सक० सेट्। पवते अपविष्ट।

[पू] * शोधे क्र्यादि० उभ० सक० सेट्। पुनाति पुनीते अपा-
वीत्। अपविष्ट।   [कण्टकिवृक्षे च।

पूग * पु० पू-गन् किच्च। (सुपारि) वृक्षे, समूहे, छन्दसि, भावे,

पूज * पूजने चुरा० उभ० सक० सेट्। पूजयति ते अपूपुजत् त।

पूजा * स्त्री० पूज+अ। अर्चने। ल्युट्। पूजनमप्यत्र न०।

पूजार्ह * त्रि० पूजामर्हति अच्। पूजनीये।

पूज्य * पु० पूज+यत्। श्वशुरे। पूजनीयमात्रे त्रि०।

पूण * राशीकरणे चु० उभ० सक० सेट्। पूणयति ते अपूपुणत् त।

पूत * न० पू-क्त। अपनीततुषे ([illegible]), बहुलीकृते धान्ये
च। शुद्धादिना शुद्धे त्रि०। सत्ये, शङ्खे, श्वेतकुशे, विकङ्कत-
वृक्षे च पु०। दूर्वायां स्त्री० टाप्।

पूतक्रतायी * स्त्री० पूतक्रतोरिन्द्रस्य पत्नी ङीप् ऐङ् च। शच्याम्।

पूतक्रतु * पु० क्रतुभिः पूतः, पूताः पवित्रतासम्पादकाः क्रतवो
यस्याः यस्य वा। इन्द्रे।

पूतगन्ध * पु० पूतो गन्धो यस्य। बर्बरे (बाबुइतुलसी)।

पूतकुश * न० कर्म०। श्वेतकुशे।

पूतना * स्त्री० पूतं करोति पूत+णिच्-युच्। हरीतक्यां, गन्धमांस्यां,
बकासुरभगिन्यां, या विषाक्तं स्तन्यं पाययन्ती कृष्णेन हता।
रोगभेदे, बालकग्राहकाभेदे च "पूतनाजम्भकादयः" इति।

पूतनारि * पु० ६त०। श्रीकृष्णे।

पूतफल * पु० पूतानि फलान्यस्य। पनसे (कांटाल)।

पूति * स्त्री० पू-क्तिच्। रोहिषतृणे। क्तिन्। पवित्रतायाम्। पूय+
विशरणे दुर्गन्धे च क्तिच्। दुर्गन्धवति त्रि०।

पूतिक * न० पूत्या दुर्गन्धेन कायति कै-क। विष्ठायाम्, पूतिकरञ्जे
च पु०। शाकभेदे स्त्री० (पुइ) "पूतिका वज्रवल्लिका" इति
स्मृतिः।

पूतिकरज(ञ्ज) * पु० पूतियुक्तः करजः कर्म०। (नाटाकरञ्ज)
करञ्जभेदे।   [इनि। संज्ञायां कन्। मार्जारे पु०।

पूतिकाष्ठ * पु० ६त० पूतिः पावनार्थं काष्ठम् चतुर्थ्यर्थे ६त०। देवदा-

पूतिगन्ध * पु० पूतिर्दुष्टो गन्धो यस्य। गन्धके, इङ्गुदीवृक्षे च।
कर्म०। दुर्गन्धे न०।

पूतिगन्धि * पु० पूतिर्दुष्टो गन्धो यस्य इत् समा०। दुर्गन्धवति।

पूतितैला * स्त्री० पूति दुर्गन्धं तैलं यस्याः। ज्योतिष्मत्याम्।

पूतिपत्र * पु० पूतीनि पत्राण्यस्य। श्योनाकभेदे।   [रुभेदे च।

पूतिपुष्पिका * स्त्री० पूतीनि पुष्पाण्यस्याः। मातुलुङ्गायाम्, जम्बीरे।

पूतिफला(ली) * पूतीनि फलान्यस्याः वा ङीप्। सोमराज्याम्।

पूतिमयूरिका * स्त्री० पूतिर्मयूरीव ततः स्वार्थे कन्। अजमोदा-
याम्।

पूतिमेद * पु० पूतिर्मेदोऽस्य। अरिमेदे, विट्खदिरे च।

पूतिवात * पु० पूयं पवित्रतायै वातोऽस्य। बिल्ववृक्षे। कर्म०।
दुष्टगन्धयुक्तवायौ पु०।

पूतिवृक्ष * पु० कर्म०। श्योनाकवृक्षे।

पूप * पु० पू पक्। पिष्टके (पिठा)।

पूपाष्टका * स्त्री० अष्ट परिमाणं यस्याः कन् अष्टका अष्टमी उप-
चारात् तत्कर्त्तव्यं श्राद्धम् पूपद्रव्यसाधनाष्टका। कर्म०। अग्र-
हायण्याः परतः कृष्णाष्टमीविहिते श्राद्धे।   [पूयते अपूयिष्ट।

पूय * दुर्गन्धे अक० भेदने विशरणे च सक० दिवा० आत्म० सेट्।

पूय * न० पूय-अच्। व्रणादिजाते रक्तविकारभेदे (पूँज)।

पूयारि * पु० ६त०। निम्बवृक्षे। पूयनाशकादयोऽप्यत्र।   [रिष्ट।

पूर * पूर्त्तौ प्रीणने च दिवा० आत्म० सक० सेट्। पूर्य्यते अपूरि अपू-

पूर * पु० पूर-क। जलसमूहे, खाद्यभेदे, व्रणशुद्धौ च।

पूरक * पु० पूर-ण्वुल्। बीजपूरे, जम्बीरभेदे (टावा लेबु), अङ्क-
शास्त्रप्रसिद्धे गुणके, तन्त्रादिप्रसिद्धे प्राणायामाङ्गे वायूत्कर्षण-
रूपे व्यापारभेदे च। पूरणकर्त्तरि त्रि०। मृतस्याशौचाहितक-
देहोत्तरं प्रेतदेहनिर्वाहकेऽशौचमध्ये देये पिण्डदशके न०।

पूरण * न० पूर+ल्युट्। अङ्कशास्त्रप्रसिद्धे गुणने, वृष्टौ, कुटन्नटे,
वापतन्तुषु च। ल्यु। सेतौ, समुद्रे च पु०। सङ्ख्यापूरणे, पूरयि-
तरि च त्रि०। यथा द्वयोः पूरणः द्वितीयः।

पूरणी * स्त्री० पूर्य्यतेऽनया। पूरणसङ्ख्यायाम् यथा द्वयोः पूरणी
द्वितीया। शाल्मलिवृक्षे च।

पूरित * त्रि० पूर-क्त। पूर्णे, गुणिते च।

पूरुष * पूर-उषन्। पुरुषे, नरे च।

पूर्ण * त्रि० पूर-क्त नि०। पूरिते, सकले, समर्थे च। ज्योतिषोक्तेषु
उभयपक्षयोः पञ्चमीदशमीपञ्चदशीषु च स्त्री।

पूर्णकोष्ठा * स्त्री० पूर्णं कोष्ठं यस्याः। नागरमुस्तायाम्।

पूर्णपात्र * न० कर्म०। हर्षकाले पुत्रजननोत्सवप्रभृतौ आकृष्य
वस्त्रादेर्ग्रहणे, होमान्ते ब्रह्मदक्षिणार्थतया देये "अष्टमुष्टिर्भवेत्
कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं

विधीयते" इत्युक्तमानवति तण्डुलादौ च।

पूर्णमास * पु॰ पूर्णमास्यां विहितः अण्। पूर्णिमायां कर्त्तव्ये याग-भेदे "दर्शपूर्णमासाभ्यां यजेत" इति श्रुतिः। [तिथौ।

पूर्णमासी * स्त्री॰ पूर्णो मासयन्द्रमा यया गौरा॰ ङीप्। पूर्णिमा-

पूर्णबीज * पु॰ पूर्णानि बीजान्यत्र। बीजपूरे (टावालेबु)।

पूर्णिमा * स्त्री॰ पूर-णिन् नि॰ पूर्णिं पूरणं चन्द्रकलापूरणं मिमीते मा-क। चन्द्रस्य पञ्चदशकलापूरण्यां तिथौ।

पूर्त्त * न॰ पूर-क्त नि॰। खातादिकर्मणि विश्वजनोद्देशेन जला-शयदानादौ। भावे क्त। पूरणे न॰। काले, छन्ने, पूरिते च त्रि॰

पूर्व(र्ब) * निवासे अक॰ निमन्त्रणे सक॰ चुरा॰ उभ॰ सेट् पक्षे भ्वादि॰ पर॰। पूर्व(र्ब)यति पूर्व(र्ब)ति अपुपूर्व(र्ब)त्। अपूर्वी-(र्बी)त्। [ज्येष्ठे भ्रातरि च। सर्वनामताऽस्य।

पूर्व(र्ब) * त्रि॰ पूर्व(र्ब)-अच्। प्रथमे, प्राचीदिग्देशकाले, समस्ते,

पूर्व(र्ब)ज * पु॰ पूर्व(र्ब) जायते जन-ड। ज्येष्ठभ्रातरि। ज्येष्ठभगिन्यां स्त्री॰ ङीप्।

पूर्व(र्ब)दिक्पति * पु॰ ६त॰। इन्द्रे।

पूर्व(र्ब)दिश् * स्त्री॰ कर्म॰। प्रथमसूर्योदयसम्बन्धायां दिशि।

पूर्व(र्ब)देव * पु॰ पूर्व(र्ब) देवः पश्चात् पापाचारात् भ्रष्टः, अथवा पूर्व(र्ब) श्रेष्ठो देवः। असुरे।

पूर्व(र्ब)देश * पु॰ कर्म॰। प्राच्यामवस्थिते जनपदे।

पूर्व(र्ब)पक्ष * पु॰ कर्म॰। अष्टादशविवादरूपे व्यवहारे प्रतिज्ञारूपे प्रथमविषये, "पूर्व(र्ब)पक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः" इति स्मृतिः। "विषयो विषयश्चैव पूर्व(र्ब)पक्षस्तथोत्तरम्। निर्णय-श्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" इति मीमांसोक्ते न्यायावयवभेदे सिद्धान्तविरुद्धकोटिप्रतिपादके वाक्ये।

पूर्व(र्ब)पद * न॰ कर्म॰। व्याकरणोक्ते उत्तरपदादव्यवहिते प्राग्-स्थिते, समासस्य प्रथमावयवे च सुप्तिङन्तरूपे पदे।

पूर्व(र्ब)पर्वत * पु॰ कर्म॰। उदयाचले, यत्र सूर्यस्य प्रथमदर्शनं तस्मिन् पर्वते। न चानियतस्थितिकोऽपि यतः स्थानात् प्रथमं सूर्यो दर्शनयोग्यो भवति तदेव स्थानं पर्वत इति व्यवह्रियते। पूर्व(र्ब)शैलादयोऽप्यत्र।

पूर्व(र्ब)फल्गुनी * स्त्री॰ द्वि॰। अश्विन्यादिषु एकादशे नक्षत्रे।

पूर्व(र्ब)भाद्रपद * पु॰ स्त्री॰। अश्विन्यादिनक्षत्रेषु पञ्चविंशतितमे नक्षत्रे।

पूर्व(र्ब)रङ्ग * पु॰ नाट्ये आदौ नटकर्त्तव्ये सङ्गीतादौ। "पूर्वरङ्ग [illegible] इति सा॰ दं॰।

पूर्व(र्ब)[illegible] * पु॰ [illegible] कर्म॰। [illegible] [illegible] "[illegible]" इति [illegible]। [illegible] [illegible] पूर्व(र्ब)[illegible] [illegible]" [illegible]।

पूर्व(र्ब)[illegible] * न॰ कर्म॰। [illegible]।

पूर्व(र्ब)वादिन् * पु॰ व्यवहारे पूर्व(र्ब) प्रथमं वदति ... प्रथमाभियोक्तरि वादिनि (फ़ैरादि)।

पूर्वा(र्बा)षाढा * स्त्री॰ अश्विन्यादिषु नक्षत्रेषु विंश...

पूर्वा(र्बा)ह्ण * पु॰ पूर्व(र्ब)मह्नः एकदेशिस॰ टच् समा॰ ... णत्वम्। त्रिधा विभक्तदिवसस्य प्रथमे भागे, "पूर्वाह्णो देवानाम्" इति श्रुतिः। प्रथमे प्रहरे च ... "नित्यं पूर्वा(र्बा)ह्णे प्रहरद्वये" इति पुराणम्।

पूर्व(र्ब)द्युस् * अव्य॰ पूर्व(र्ब)स्मिन् दिवसे पूर्व(र्ब)...

पूल * संहतौ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ पूलयति-ते पूलति। अपूपुलत् त अपूलीत्।

पूष * वृद्धौ अक॰ भ्वादि॰ पर॰ सेट्। पूषति अपूषीत्।

पूष * पु॰ पूष-क। ब्रह्मदारुवृक्षे (तुत)। स्त्रुल्। पूषकः...

पूषन् * पु॰ पूष-कनिन्। सूर्य्ये। [अदितेः...

पृ * व्यापारे तुदा॰ आत्म॰ अक॰ अनिट्। प्रियते...

पृ * प्रीतौ स्वादि॰ पर॰ सक॰ अनिट्। पृणोति अपार्षीत्।

पृ * पालने जुहो॰ पर॰ सक॰ अनिट् वा दीर्घः। ... पिपर्त्ति। अपार्षीत्-अपारीत्। पपार-पपरतुः।

पृ * पूर्त्तौ चुरा॰ उभ॰ सक॰ सेट्। पारयति-ते अपीपरत्...

पृका * स्त्री॰ पृच-क्विप् न्यङ्क्वा॰ कुत्वम्। (पिंडिङ) ख्याते...

पृच * सम्पर्के अदा॰ आत्म॰ अक॰ सेट्। पृक्ते अपर्चिष्ट। पपृचे।

पृच * सम्पर्के रु॰ पर॰ अक॰ सेट्। पृणक्ति अपर्चीत्।

पृच * संयमने सक॰ सम्पर्के अक॰ चुरा॰ उभ॰ पक्षे भ्वा॰ सेट्। पर्चयति-ते पर्चति। अपीपृचत्-त अपर्चीत्।

पृच्छा * स्त्री॰ प्रच्छ-अङ् सम्प्रसारणम्। प्रश्ने, ...

पृज * सम्पर्के अदा॰ आ॰ सक॰ सेट्। पृक्ते अपर्जिष्ट।

पृड * हर्षे तुदा॰ पर॰ अक॰ सेट्। पृडति। अपर्डीत्।

पृण * तर्पणे तुदा॰ पर॰ सक॰ सेट्। पृणति अपर्णीत्।

पृतना * स्त्री॰ पृ-तनन्-किच्। सेनायाम्, मनुष्यादिसैन्यभेदे च (रथाः २४३ गजाः २४३ अश्वाः ... पदातयः १२१५)। [प्रसङ्गे च ...

पृतनाषाह् * पु॰ पृतनां साहयते सह णिच् क्विप्। इन्द्रे।

पृथ * प्रक्षेपे चुरा॰ उभ॰ सक॰ सेट्। पार्थयति-ते अपपर्थत्-त।

पृथक् * अव्य॰ पृथ+अजि। भिन्ने, नानारूपे, विनार्थे ...

पृथक्त्व * न॰ पृथक् इत्यस्य भावः त्व। वैशेषिकोक्ते गुणभेदे।

पृथक्त्वचा * स्त्री॰ पृथक् त्वचा यस्याः। मूर्वायाम्।

पृथक्पर्णी * स्त्री॰ पृथक् पर्णान्यस्या ङीप्। (चाकुले...

पृथगात्मता * स्त्री॰ पृथक् आत्मा स्वरूपं यस्य तस्य भावः ... भेदे, विवेके च।

पृथगात्मिका * स्त्री॰ पृथक् भिन्न आत्मा यस्याः कप्। व्यक्तौ, सामान्यधर्मस्य यथा सर्वत्र समरूपतया सत्वेनानुगमकत्व नैवं व्यक्तेस्तस्याः भिन्नभिन्नास्पदत्वात्। [च।

पृथग्जन * पु॰ पृथक् भिन्नो जनो यस्मात्। नीचे, मूर्खे, पामरे

पृथग्विध * त्रि॰ पृथक् भिन्ना विधा यस्य। नानारूपे।

पृथग्बीज * पु॰ पृथक् बीजान्यस्य। भल्लातकवृक्षे (भेला)।

पृथा * स्त्री॰ कुन्तिभोजकन्यायां कुन्त्याम्।

पृथाज * पु॰ पृथाया जायते जन-ड। कुन्तीपुत्रे युधिष्ठिरादौ, अर्जुनवृक्षे च। पृथात्मजादयोऽप्यत्र।

पृथि(थ्)वी * स्त्री॰ प्रथते विस्तारमेति प्रथ-षिवन् (षवन्) वा नि॰ सम्प्रसारणं षित्त्वात् ङीप्। धरायाम्, क्षितौ च। [ऽप्यत्र।

पृथिवीपति * पु॰ ६त॰। नृपतौ, भूपतौ च। पृथिवीपालादयो-

पृथु * पु॰ प्रथ-कु। सूर्य्यवंश्ये वेनराजस्य दक्षिणबाहुमन्थनजाते नृपभेदे, कृष्णजीरके च। महति, स्थूले, दक्षे च त्रि॰। स्त्रियां ङीप् वा।

पृथुक * पु॰ न॰। पृथुवत् कायति कै-क। चिपिटके, “द्विः स्विन्नमथ पृथुकम्” इति स्मृतिः। बालके पु॰। “पृथुकार्त्तस्वरपात्रम्” इति। हिङ्गुपत्र्यां, बालिकायाञ्च स्त्री॰।

पृथुकोल * पु॰ कर्म॰। राजबदरे।

पृथुपत्र * पु॰ पृथूनि पत्राण्यस्य। रक्तलशुने। [कन्। मत्स्याम्।

पृथुपत्त्रात्मिका * स्त्री॰ पृथूनि पत्राण्यस्याः गौरा॰ ङीप् स्वार्थे

पृथुरोमन् * पु॰ पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य। मत्स्ये।

पृथुल * त्रि॰ पृथु+स्वार्थे लच्, पृथुः पृथुत्वमस्त्यस्य लच् वा। स्थूले। हिङ्गुपत्र्यां स्त्री॰।

पृथुशिम्ब * पु॰ पृथ्वी शिम्बा यस्य। श्योनाकभेदे।

पृथूदर * पु॰ पृथु उदरं यस्य। मेषे। वृहत्कुक्षौ त्रि॰।

पृथ्वी * स्त्री॰ पृथुत्वगुणयुक्ता स्त्री ङीप्। भूमौ, हिङ्गुपत्र्यां, स्थूलैलायाम्, पुनर्नवायां, कृष्णजीरके च। स्वार्थे कन्। पृथ्वीका। बृहदेलायाम्, हिङ्गुपत्र्यां, कृष्णजीरके च।

पृथ्वीकुरबक * पु॰ पृथ्व्यां भूमौ कुरबक इव शुभ्रत्वात्। श्वेतमन्दारके। [चित्रके, हर्षे च।

पृदाकु * पु॰ पर्द-नतौ काकु सम्प्रसारणम्। सर्पे, वृश्चिके, व्याघ्रे, गजे,

पृश्नि * त्रि॰ स्पृश-नि, प्रच्छ-नि वा पृ॰। खर्वदुर्बलाल्पके, अल्पे च। रश्मौ, देवक्याम्, रश्मौ च स्त्री॰। संज्ञायां कन्। पृश्निकायां (पाना) स्त्री॰ वा ङीप्।

पृश्निगर्भ * पु॰ ६त॰। देवकीगर्भे श्रीकृष्णे।

पृश्निपर्णी * स्त्री॰ पृश्नि अल्पं पर्णमस्याः ङीप्। (चाकुलिया) इति विख्यातायां लतायाम्।

पृष * सेके भ्वादि॰ आत्म॰ सक॰ सेट्। पर्षते अपर्षिष्ट।

पृषत् * न॰ पृष-अति क्विप्। बिन्दौ। सिक्तद्रव्ये त्रि॰।

पृषत * पु॰ पृष+अतच् क्विच। दशबिन्दुमति मृगभेदे, बिन्दौ च।

पृषताम्पति * पु॰ ६त॰ अलुक् स॰। वायौ।

पृषताश्व * पु॰ पृषतो मृगभेदोऽश्व इव गतिसाधनं यस्य। वायौ।

पृषत्क * पु॰ पृषत्+संज्ञायां कन्। बाणे।

पृषदश्व * पु॰ पृषतो बिन्दोरश्व इव वाहकत्वात्। वायौ।

पृषदाज्य * न॰ पृषद्युक्तं दधिबिन्दुयुक्तं दधिसेकयुक्तं वा आज्यम् शाक॰। दधिमिश्रे घृते।

पृषन्ति * पु॰ पृष+झिच् किच्च। बिन्दौ।

पृषोदर * त्रि॰ पृषदुदरे यस्य पृषो॰ नि॰। बिन्दुगर्भिते। [भेदे च।

पृष्ठ * न॰ पृष-थक् इडभावः। तनोः पश्चाद्भागे, वेदप्रसिद्धे स्तोत्र-

पृष्ठतस् * अव्य॰ पृष्ठ+तसिल्। पश्चाद्भागे इत्यर्थे।

पृष्ठदृष्टि * पु॰ पृष्ठे पश्चात् दृष्टिरस्य। भल्लूके।

पृष्ठवंश * पु॰ ६त॰। पृष्ठस्थे दण्डाकारेऽस्थ्नि। [हयादौ।

पृष्ठवाह * पु॰ पृष्ठेन वहति वह-ण्वि। पृष्ठेन शकटादिवाहके

पृष्ठ्य * न॰ पृष्ठानां स्तोत्राणां समूहः यत्। स्तोत्रसमूहे। तद्वति यागभेदे। पृष्ठेन वहति यत्। पृष्ठवाहकाश्वादौ त्रि॰। [च।

पृष्णि * स्त्री॰ प्रच्छ-निङ् सम्प्रसारणं षत्वम्। पश्चिमभागे, पार्ष्णौ

पॄ * पालने पूर्त्तौ च क्र्या॰ प्वा॰ पर॰ सक॰ सेट्। पृणाति अपारीत्।

पॄ * पूर्त्तौ जुहो॰ उभ॰ सक॰ सेट्। पिपर्त्ति-र्त्ते अपारीत्-ष्ट।

पेचक * पु॰ पच-वुन् इच। (पेंचा) उलूके, गजपुच्छमूलोपान्ते, पर्य्यङ्के, यूके, मेघे च।

पेचुली * स्त्री॰ पच-उलच् इच गौ॰ ङीष्। (कचु) शाकभेदे।

पेटक * पु॰ न॰ पिट-क्वुन्। पुस्तकादीनां स्थापनार्थे वेत्रादिनिर्मिते पदार्थे, समूहे च। [भयूरे हर्षे।

पेटिका * स्त्री॰ पेटीव कायति कै-क पृ॰। (टेपारी) पेटकाकारप-

पेटी * स्त्री॰ पिट-अच् गौरा॰ ङीष्। क्षुद्रपेटके।

पेल * गतौ पेषे च सक॰ चाले अक॰ भ्वादि॰ पर॰ सेट्। पेलति अपेलीत्। ऋदित् न कुत्सः। [ऋदित् न कुत्सः।

पेल * कम्पे अक॰ गतौ सक॰ भ्वादि॰ पर॰ सेट्। पेलति अपेलीत्

पेल * न॰ पेल-अच्। पुरुषचिह्ने अण्डभेदे (अण्डकोष)।

पेलव * त्रि॰ पेल-अच् पेलं वाति वा-क। कोमले, क्षुद्रे, विरले च।

पेव * सेवने भ्वादि॰ आत्म॰ सेट्। पेवते अपेविष्ट। ऋदित् न कुत्सः।

पेश(स)ल * त्रि॰ पिश(स) अलच्। सुन्दरे, दक्षे, कोमले च।

पेशि(शी) * स्त्री॰ पिश+इन् वा ङीप्। मांसे, मांसपिण्डे, अण्डकोषे, नदीभेदे, खड्गकोषभेदे, दामिनीभेदे च। [ऋदित् न कुत्सः।

पेष * सेवने निर्वृत्तौ च भ्वादि॰ आ॰ सक॰ सेट्। पेषते अपेषिष्ट

पेषण * न॰ पिष-ल्युट्। चूर्णने। ल्युट्। खले, शैलादिनिर्मितदृषदादौ च।

पेष्टवि * स्त्री॰ पिष्टवदाचरति अति वा ङीप्। पेष्टविक इत्यपि।

पेस * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पेसति अपेसीत्। ऋदित् न कुत्सः।

[illegible] • [illegible] पाठति पदामीत्।

पौटर • त्रि॰ [illegible] मांसादौ।

[illegible] • पु॰ [illegible]।

[illegible] • न॰ [illegible] ठञ्। [illegible] दाने।

[illegible] • पु॰ स्त्री॰ [illegible] ठक् [illegible] वा टकि [illegible]।

[illegible] • न॰ [illegible] [illegible] त्रि॰।

[illegible] • पु॰ [illegible]।

[illegible] • पु॰ [illegible] "[illegible] मनसा वा [illegible]" [illegible] त्रि॰।

[illegible]

पौनःपुनिक • त्रि॰ पुनःपुनः भवः ठक् टिलोपः। मुहुर्भवे।

पौनःपुन्य • न॰ पुनःपुनरित्यस्य भावः ष्यञ्। मुहुर्भावे।

पौनर्भव • पु॰ पुनर्भुवि द्विरूढायां भवः अण्। द्वादशपुत्रान्तर्गते पुत्रभेदे। पुनर्भुवोऽयम् अण्। पुनर्भूसम्बन्धिनि त्रि॰। "पौनर्भवेन भर्त्रा सा" इति स्मृतिः। [भवनार्थे ।

पौर • न॰ पुरे नगरे भवः अण्। रोहिषतृणे (रामकर्पूरे)। पु॰

पौरव • पु॰ पुरोर्गोत्रापत्यमण्। पुरुनामचन्द्रवंश्यनृपापत्ये।

पौरस्त्य • त्रि॰ पुरो भवः त्यक्। पूर्वदिग्भवे, प्रथमभवे च।

पौराणिक • त्रि॰ पुराणं वेत्त्यधीते वा ठक्। पुराणज्ञे।

पौरुष • न॰ पुरुषस्य भावः कर्म वा अण्। पुरुषत्वे, विक्रमे, [illegible] च। पुरुषस्येदम् अण्। ऊर्द्ध्वविस्तृतबाहुपाणिकमनुष्यपरिमाणे "गत्वेऽपि मानेऽपि च पौरुषाधिकम्" इति नैषधम्।

पौरोगव • पु॰ पुरोऽग्रे पाकस्थानेषु गौर्गतिः यस्य पुरोगुः तस्य अयम् अण्। पाकशालाध्यक्षे।

पौर्णमास • पु॰ पौर्णमास्यां विहितम् अण्। यागभेदे। [illegible] स्त्री॰। "पौर्णमास्यां पौर्णमास्यां यजेत" इति श्रुतिः। [पूर्णिमायाम्

पौर्णमासी • स्त्री॰ पूर्णो मासोऽस्याम् प्रज्ञादित्वात् अण् [illegible]

पौलस्त्य • पु॰ स्त्री॰ पुलस्त्यस्यापत्यम् यञ्। कुबेरे, रावणे च। शूर्पणखायां स्त्री॰ ङीप् यलोपः।

पौलि • पु॰ पुल+महत्त्वे [illegible] ततः इञ्। ईषत्पक्वे यवादौ।

पौलोमी • स्त्री॰ पुलोम्नोऽपत्यम् स्त्री अण्। शच्याम्।

पौष • पु॰ पौषी पुष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे [illegible] पुष्यनक्षत्रयुक्तपौर्णमासीघटिते चान्द्रे मासभेदे।

पौषी • स्त्री॰ पुष्यनक्षत्रेण युक्ता पौर्णमासी अण् ङीप्। पुष्यनक्षत्रयुक्तायां पौर्णमास्याम्। [रोहिषतृणे

पौष्प • न॰ पुष्पेण निर्वृत्तम् अण् ततः स्वार्थे कन्। [illegible]

[illegible]

[illegible]

प्रकरण * न॰ प्र+कृ-ल्युट् । प्रस्तावे, अभिनेयनायकादिके दृश्य-
　काव्यभेदे, ग्रन्थसन्धौ, एकार्थप्रतिपादकग्रन्थांशे च ।

प्रकर्ष * पु॰ प्र+कृष-घञ् । उत्कर्षे ।

प्रकाण्ड * पु॰ प्रकृष्टः काण्डः प्रा॰ । वृक्षस्य मूलादारभ्य शाखान्ते
　भागे । प्रशस्ते न॰ ।　　　　　[षम् । अत्यर्थेऽनुमतौ च अव्य॰ ।

प्रकाम * त्रि॰ प्रगतः कामम् प्रा॰ स॰ । यथेष्टे । प्र+कम-

प्रकार * पु॰ प्र+कृ-घञ् । भेदे, सादृश्ये च ।

प्रकाश * पु॰ प्र+काश-कर्त्तरि अच् घञ् वा । आतपे, विकाशे च ।
　कर्त्तरि अच् । विकाशके त्रि॰ ।

प्रकाशात्मन् * पु॰ प्रकाशः आतपः अवभासो वा आत्मा स्वरूपं
　यस्य । सूर्य्ये, परमेश्वरे च । प्रकाशरूपे त्रि॰ ।

प्रकीर्ण * न॰ प्र+कॄ-भावे क्त । चामरे, भिन्नजातीयानां मिश्रणे
　च । पूतिकरञ्जे पु॰ । कर्मणि क्त । विक्षिप्ते, विस्तृते, भिन्नजा-
　तीयैः मिश्रिते च त्रि॰ । स्वार्थे कन् । अत्र चामरे न॰ अश्वे पु॰ ।

प्रकीर्य्य * पु॰ प्रकीर्य्यतेऽसौ प्र+कॄ-यत् । (नाटाकरमञ्जा) करञ्ज-
　भेदे । व्याप्ते त्रि॰ ।

प्रकृत * त्रि॰ प्र+कृ-क्त । अधिकृते, आरब्धे, प्रकरणप्राप्ते च ।

प्रकृति * स्त्री॰ प्रकरोति प्र+कृ-क्तिच् । सांख्यमतसिद्धे जगदार-
　म्भके सत्वरजस्तमोरूपगुणत्रयात्मके प्रधाने उपादानकारणे,
　"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति शारीरकसूत्रम् । स्वभावे
　"प्रकृतिस्त्वां नियोक्ष्यति" इति गीता । लिङ्गे, स्वामिनि, अमा-
　त्ये, सुहृदि, कोषे, राष्ट्रे, स्वम्यादौ राज्याङ्गे, पौरश्रेणौ, "नृपतिः
　प्रकृतीरवेक्षितुम्" इति रघुः । दुर्गे, बले, शिल्पिनि, मन्त्रौ,
　योषिति, परमात्मनि, पञ्चभूतेषु, करणे, गुह्ये, जन्मनि, एक-
　विंशत्यक्षरपादके छन्दोभेदे, मातरि, व्याकरणोक्ते प्रत्ययोत्पत्ति-
　निमित्ते शब्दभेदे च ।

प्रकृष्ट * त्रि॰ प्र+कृष-क्त । उत्कर्षयुक्ते ।

प्रकोष्ठ * पु॰ प्रगतः कोष्ठं प्रा॰ स॰ । कूर्परस्याधोभागस्थे मणि-
　बन्धपर्य्यन्ते हस्तावयवे, अन्तर्द्वारपिण्डे च ।

प्रक्रम * पु॰ प्र+क्रम-घञ् न वृद्धिः । क्रमे, अवसरे, उपक्रमे च ।

प्रक्रिया * स्त्री॰ प्र+कृ-श । अधिकारे, प्रकरणार्थे, राज्ञां छत्रचाम-
　रधारणादिव्यापारे च ।

प्रक्व(क्वा)ण * पु॰ प्र+क्वण-अप् घञ् वा । वीणायाः शब्दे ।

प्रक्ष्वेडन * पु॰ प्र+क्ष्वेड-ल्यु । नाराचास्त्रे ।

प्रखर * त्रि॰ प्रकृष्टः खरः प्रा॰ स॰ । अत्यन्ततीक्ष्णे । हयसन्नाहे,
　कुक्कुरे, अश्वतरे च पु॰ ।

प्रख्या * स्त्री॰ प्र+ख्या-अ । सादृश्ये । ब॰ । उपमेयपदस्थः । तुल्यार्थे
　यथा पितृप्रख्य. एवं निभादयोऽप्यत्र ।

प्रगण्ड * पु॰ गडि+अटनैकदेशे अच् प्रकृष्टो गण्डः अवयवः । कूर्परो-
　परिकक्षपर्य्यन्तभागे । बहिःप्राकारे, दुर्गप्राकारभित्तौ, सैन्यानां
　निवेशनस्थाने च स्त्री॰ गौरा॰ ङीष् ।

प्रगल्भ * त्रि॰ प्र+गल्भ अच् । प्रत्युत्पन्नमतौ, प्रतिभान्विते च ।
　नायिकाभेदे स्त्री॰ ।

प्रगाढ * त्रि॰ प्रकर्षेण गाढम् गाह-क्त । अत्यन्तभृशे, दृढे च ।

प्रगुण * त्रि॰ प्रकृतो गुणः येन प्रकृष्टो गुणो यस्य वा । ऋजुतायुते,
　दक्षे च । प्रकृष्टगुणोऽप्यत्र ।　　　　　[पदे ।

प्रगृह्य * न॰ प्र+ग्रह-क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये

प्रगे * अव्य॰ प्रगीयतेऽत्र प्र+गै-के । अतिप्रातःकाले ।

प्रघण(न) * न॰ प्र+हन अप् नि॰ कुत्वणत्वे । बहिर्द्वारप्रकोष्ठके
　अलिन्दे । मतान्तरे प्रघणम् ।

प्रग्र(ग्रा)ह * पु॰ प्रगृह्यते प्र+ग्रह+अप् घञ् वा । ग्रहणे, अश्वा-
　दीनां रज्जौ, किरणे, तुलासूत्रे, बन्द्याम्, नियमने, भुजे, कर्णि-
　कारवृक्षे च ।

प्रचक्र * न॰ प्रगतचक्रं प्रा॰ स॰ । स्वचक्रात् परचक्रं प्रति चलिते ।

प्रचण्ड * त्रि॰ प्रकर्षेण चण्डः प्रा॰ । दुर्द्धर्षे, दुर्वहे, दुरन्ते, प्रतापा-
　न्विते च । श्वेतकरवीरे पु॰ । दुर्गाया नायिकाभेदे स्त्री॰ ।　[त्रि ।

प्रचण्डमूर्त्ति * पु॰ प्रचण्डा मूर्त्तिर्यस्य । वरुणवृक्षे । भयानकदेहे

प्रचय * पु॰ प्र+चि-अच् । समूहे, उपचये, तन्तुनके शिथिलसंयोगे
　च ।　　　　　[प्रचारे, गतौ च ।

प्रच(चा)र * पु॰ प्रचरत्यत्र प्र+चर-अप् घञ् वा । पथि । भावे घञ् ।

प्रचलायित * त्रि॰ प्रचलत्वदाचरितः प्रचल+क्यष्-क्त । निद्रादिना
　घूर्णिते ।

प्रचुर * त्रि॰ प्र+चुर-क । बहुले ।

प्रचेतकी * स्त्री॰ प्रकर्षेण चेतयति मूर्च्छितं चित+णिच्-ण्वुल्-
　ङीप् । कट्फले तच्चूर्णस्य हि मूर्च्छानाशकता वैद्यकसिद्धा ।

प्रचेतस् * पु॰ प्र+चित-असि । वरुणे, मुनिभेदे । प्रकृष्टहृदये
　त्रि॰ ।　　　　　[ङीप् । कण्टकारिकायाम् ।

प्रचोदनी * स्त्री॰ प्रचोद्यते अपसार्य्यते रोगोऽनया चुद-णिच् ल्युट्-

प्रच्छ * ज्ञिप्सायां तु॰ पर॰ द्विक॰ अनिट् । पृच्छति अप्राक्षीत् ।

प्रच्छदपट * पु॰ प्रच्छाद्यतेऽनेन प्र+छद-णिच् घ ह्रस्वः कर्म॰ ।
　(पाछुड़ि) प्रावरणवस्त्रे ।

प्रच्छन्न * न॰ प्र+छद क्त । गुप्तद्वारे अन्तर्द्वारे । आवृते त्रि॰ ।

प्रच्छर्दिका * स्त्री॰ प्रच्छर्दयति छर्द-णिच्-ण्वुल् । वमिरोगे ।

प्रच्छादन * न॰ प्रच्छाद्यतेऽनेन छद णिच् ल्युट् । उत्तरीयवस्त्रे ।

प्रजन * पु॰ प्रजायतेऽनेन प्र+जन-अप् । स्त्रीगव्यादिषु पुंगवस्य
　संयोजने (पालदेओया) ।

प्रजा * स्त्री॰ प्र+जन-ड । सन्ततौ, जने च ।

प्रजाता * स्त्री॰ प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच् ।
　प्रसूतायां स्त्रियाम् । प्र+जन क्त । जाते त्रि॰ ।

प्रजापति * पु॰ ६त॰ । चतुर्मुखे ब्रह्मणि, प्रजासर्जके दक्षादौ, नर-
　पतौ, जामातरि, सूर्य्ये, वह्नौ, त्वष्टरि च ।

प्रजावती * स्त्री॰ प्रजा विद्यतेऽस्याः मतुप् मस्य वः । भ्रातृजाया-

याम्, "सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत् सर्वांस्तांस्तेन पुत्रेण पुत्रिणः" इत्युक्ते भ्रातुष्पुत्रस्याप्यात्मनः पुत्रत्वात् भ्रातृजायायाम् आत्मपुत्रवत्त्वम्। सन्तानवत्यां स्त्रियाञ्च।

प्रज्ञा * स्त्री० प्र+ज्ञा-अ। बुद्धौ, सरस्वत्याञ्च।

प्रज्ञान * न० प्र+ज्ञा-भावे ल्युट्। बुद्धौ। करणे ल्युट्। चिह्ने, अर्थे आपद्य। पण्डिते त्रि०। [ज्ञने।

प्रज्ञु * त्रि० प्रगते विरले जानुनी यस्य जानुनी+ज्ञुः। विरलजानुके

प्रडीन * न० प्र+डी-क्त तस्य नः। पक्षिणां गतिभेदे।

प्रणय * पु० प्र+नी-अच्। प्रीतौ, तथा प्रार्थने, प्रसवे, स्नेहे, विश्वासे, निर्वाणे च। [भार्य्यायां स्त्री० ङीप्।

प्रणयिन् * पु० प्रणयः प्रेम अस्त्यस्य इनि। भर्त्तरि, नायके च।

प्रणव * पु० प्रकर्षेण नूयतेऽनेन प्र+नू-अप्। ओङ्कारे वेदादौ पाठ्ये शब्दभेदे। [कर्णरोगभेदे च।

प्रणाद * पु० प्र+नद-घञ्। अनुरागजे सीत्कृतादौ शब्दे, उच्चशब्दे,

प्रणाम * पु० प्र+नम-घञ्। प्रणतौ, स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ, "पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा। वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते" इत्युक्ते अष्टाङ्गव्यापारभेदे च। [प्रिये च।

प्रणाय्य * त्रि०। प्र+नी ण्यत्। असम्मते, द्वेष्ये, प्रीतिशून्ये, साधौ,

प्रणाली * स्त्री० प्र+नम घञ् गौरा० ङीप्। जलवहनमार्गे, परम्परायाञ्च।

प्रणिधान * न० प्रणिधीयते प्र+नि+धा-ल्युट्। प्रयत्ने, अभिनिवेशे, योगशास्त्रोक्ते चित्तस्य[illegible] समाधिभेदे च।

प्रणिधि * पु० प्रणिधीयते प्र+नि+धा-कि। चरे, अनुचरे, याचने, अवधाने च। [इति गीता।

प्रणिपात * पु० प्र+नि+पत घञ्। प्रणामे। "तद्विद्धि प्रणिपातेन"

प्रणिहित * त्रि० प्र+नि+धा-क्त। प्राप्ते, स्थापिते, समाहिते च।

प्रणीत * त्रि० प्र+नी क्त। पाकेन [illegible] पदार्थे, क्षिप्ते, निर्दिष्टे, निर्मिते च। [illegible] पु०। यज्ञपात्रभेदे स्त्री०।

प्रणेय * त्रि० प्र+नी-यत्। वश्ये, अधीने च।

प्रतति * स्त्री० प्र+तन क्तिन्। विस्तारे, लतायाञ्च। प्रतती वा ङीप्।

प्रतन * त्रि० प्र+तन् ट्युल् च। पुराणे वृद्धे।

[illegible]

[illegible] [कल्पनायाम्।

प्रतानिनी * स्त्री० प्रतान [illegible] इनि। विस्तारवत्यां

प्रताप * पु० प्र+तप घञ्। कोषदण्डजाते तेजसि, तापे, अर्कवृक्षे च। [त्रि०।

[illegible]

[illegible]

[illegible]

प्रति * अव्य० प्रथ+डति। व्याप्तौ, लक्षणे, कश्चित् प्रकारमात्र कथने, भागे, प्रतिदाने, प्रतिनिधीकरणे, स्तोत्रे, चेपे, निश्चये, व्यावृत्तौ, आभिमुख्ये, स्वभावे च। [इन्दिमभूयाथा

प्रतिकर्मन् * न० प्रति+कृ-मनिन्। विद्यमानस्य गुणान्तराधा

प्रति(ती)कार * पु० प्रति+कृ-घञ् वा दीर्घः। वैरनिर्यातने, इष्टस्यापकारस्य तुल्यरूपापकारकरणेन शोधने, रोगादिचिकित्साञ्च। [रो

प्रति(ती)काश * पु० प्रतिरूपं काशते काश-घञ् वा दीर्घः। तु

प्रतिकूल * त्रि० प्रतिरूपं कूलं यत्रोऽस्य। अननुकूले, विरुद्धाचलम्बिनि च। [

प्रतिकृति * स्त्री० प्रति+कृ-क्तिन्। प्रतिमायां, सादृश्ये, प्रतिनिधौ

प्रतिक्षण * अव्य० क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी०। अभीक्ष्ण

प्रतिक्षिप्त * त्रि० प्रति+क्षिप-क्त। प्रेषिते, अधिक्षिप्ते, वर्जिते, तिरस्कृते च। [ग्रहणे, सैन्यपृष्ठे, पतद्ग्रहे च।

प्रतिग्रह * पु० प्रति+ग्रह-अप्। स्वीकारे, अदृष्टार्थदत्तद्रव्य

प्रतिघ * पु० प्रति+हन-ड न्यङ्क्वा० कुत्वम्। प्रतिघाते, कोपे च।

प्रतिघातन * न० प्रति-हन+स्वार्थे णिच्-ल्युट्। मारणे।

प्रतिच्छन्दस् * न० छन्दोऽभिप्रायः प्रतिगतश्छन्दः। अभिप्रायानुरूपे, प्रतिरूपे, अनुरोधे च। [तायां, सादृश्ये च।

प्रतिच्छाया * स्त्री० प्रतिरूपा छाया प्रा०। प्रतिमायां, प्रति

प्रतिजागर * पु० जागरस्य प्रतिनिधिः। प्रश्नविषयाय यत्नोऽस्तीति नियोगे। [विषये (चार्वाकेः)

प्रतिजिह्वा * स्त्री० प्रतिरूपा जिह्वा। तालुमूलस्थे जिह्वाकारे

प्रतिज्ञा * स्त्री० प्रति+ज्ञा-अ। कर्त्तव्यतयोपदेशे, साध्यांशे पक्षनिर्देशे, यथा "पर्वतो वह्निमान्" इत्यादिवाक्यम् वह्निमत्त्वेन पर्वतस्य निर्देशः। व्यवहारे, पक्षाभिधायके "अमनेन मम गृहीतं न ददाति" इति वाक्ये च। ल्युट्। प्रतिज्ञानमप्यत्र न०।

प्रतिज्ञात * त्रि० प्रति+ज्ञा क्त। प्रागुक्तप्रतिज्ञाविषये "...विचयेत् मध्यः प्रतिज्ञातार्थसाधनम्" इति स्मृतिः।

प्रतिदान * न० प्रतिरूपं तुल्यरूपं दानम् प्रा० स०। विनिमये तुल्यरूपदाने, न्यस्तस्य द्रव्यस्य प्रत्यर्पणे च।

प्रतिध्वनि * पु० प्रतिरूपो ध्वनिः। प्रतिशब्दे "प्रतिध्वनीनाम् विततस्य" इति भट्टिः।

प्रतिध्वान * पु० प्रति+ध्वन-घञ्। प्रतिशब्दे।

प्रतिनप्तृ * पु० प्रतिनिहितो नप्ता पौत्रः प्रा०। प्रपौत्रे।

प्रतिनिधि * पु० प्रतिनिधीयते तुल्यरूपतया स्थाप्यते प्रति+नि+धा कि। प्रतिरूपे, प्रतिमादौ च।

प्रतिपक्ष * पु० प्रतिकूलः पक्षो यस्य। शत्रौ, व्यवहारे विवादिप्रतिवादिनि च। प्रा० स०। सादृश्ये।

प्रतिपत्ति स्त्री० प्रति+पद क्तिन्। प्रवृत्तौ, ज्ञानमात्रे, गौरवे

पदप्राप्तौ, कर्त्तव्यतायाज्ञाने च "विषादलुप्तप्रतिपत्तिविस्मितम्" इति रघुः।

प्रतिपन्नफला * स्त्री॰ प्रतिपन्नं फलं यस्याः। कुष्माण्डभेदे (छोट कद्दू)। [क्लिप्। पक्षारम्भके तिथौ।

प्रतिपद् * स्त्री॰ प्रतिपद्यते उपक्रम्यते पक्षोऽनया प्रति+पद-

प्रतिपन्न * त्रि॰ प्रति+पद-क्त। अवगते, स्वीकृते, "प्रतिपन्नं हि विरोधिनैरपि" इति कुमारः। विक्रान्ते च। [णि।

प्रतिपादन * न॰ प्रति+पद-णिच्-ल्युट्। दाने, बोधने, प्रतिपत्तौ

प्रतिप्रसव * पु॰ प्रति+प्र+सू-अप्। निषिद्धस्य पुनः प्राप्तिसम्भावनायाम्। [रोधके त्रि॰।

प्रतिबन्ध * पु॰ प्रति+बन्ध-घञ्। कार्यप्रतिघाते। अनुग्रहे। प्रति-

प्रतिबन्धि बन्दि) * पु॰ प्रति+बन्ध (बन्द) वा इन्। अनिष्टान्तरप्रसञ्जके वाक्ये।

प्रतिबल * पु॰ प्रतिकूलं बलं यस्य। शत्रौ "प्रतिबलजलधेः" इति वेणी॰। प्रतिरूपं बलं यस्य। तुल्यबले त्रि॰ "यो मे प्रतिबलो लोके" इति चण्डी।

प्रतिभय * त्रि॰ प्रतिगतं भयमस्मात्। भयङ्करे, भयदे च।

प्रतिभा * स्त्री॰ प्रति+भा-अ। बुद्धौ, प्रत्युत्पन्नबुद्धौ च।

प्रतिभू * पु॰ प्रतिनिधिर्भवति भू-क्विप्। लग्नके (जामिन)।

प्रतिमा * स्त्री॰ प्रति+मा-अ। गजदन्तस्य बन्धे, सदृशीकरणे, मृत्पाषाणसिकतादिमयदेवादिमूर्त्तौ। "प्रतिमायां शिलाबुद्धिः" इति पुराणम्। अ॰। सदृशपदस्थः। सदृशे त्रि॰। यथा देवप्रतिमः।

प्रतिमान * न॰ प्रतिमीयतेऽनेन प्रति मि मा-वा ल्युट्। प्रतिबिम्बे, प्रतिमायां, गजकुम्भयोरधोभागे, गजदन्तयोर्मध्यस्थाने च।

प्रतिमुक्त * त्रि॰ प्रति+मुच-क्त। परिहिते, परित्यक्ते च।

प्रतियत्न * पु॰ प्रति+यत-नङ्। वाञ्छायाम्, उपग्रहे, निग्रहादौ, बन्द्यां, सतो गुणान्तराधानरूपे संस्कारे, ग्रहणे, प्रतिघ्ने च। प्रतिरूपो यत्नो यस्य ब॰। प्रतियत्नयुक्ते त्रि॰।

प्रतियातना * स्त्री॰ प्रति+यात्यतेऽनया चु॰ यत-युच्। प्रतिमायाम् प्रा॰ स॰। तुल्यरूपयातनायाम्।

प्रतियोगिन् * त्रि॰ प्रतिरूपं युज्यते प्रति+युज+घिनुण्। प्रतिकूलताश्रयवति। यथा अभावस्य प्रतिकूलत्वसम्बन्धवत्त्वात् घटादिकस्य प्रतियोगी। विरुद्धपक्षे च।

प्रतिरूप * न॰ प्रतिगतं रूपम्। प्रतिच्छायायां, प्रतिबिम्बे च। प्रतिगतं रूपमस्य ब॰। सदृशे त्रि॰। स्वार्थे कन्। अत्रैवार्थे।

प्रतिरोध * पु॰ प्रति+रुध+रुध भावे घञ्। बाधे, प्रतिबन्धे, निरोधे, तिरस्कारे, चौर्य्ये च। कर्त्तरि अच्। चौरे। प्रतिबन्धकमात्रे। [रूद् कृता॰। बाधे, निरोधे च।

प्रतिलोम * त्रि॰ प्रतिगतं लोम अनुकूलत्वमस्मात् प्रति+लोमन्

प्रतिलोमज * पु॰ प्रतिलोमात् जातः जन-ड। उत्तमवर्णस्त्रियाम्, अधमवर्णात् जाते सङ्कीर्णवर्णे च।

प्रतिवचन * न॰ प्रतिरूपं वचनम्। प्रतिवाक्ये, उत्तरे, विरुद्धवाक्ये च।

प्रतिवात * त्रि॰ प्रतिगतो वातो यतः। यस्मात् प्रदेशात् वायुः प्रत्यागच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते च" इति मनुः।

प्रतिवादिन् * पु॰ त्रि॰ प्रतिकूलं वदति वद-णिनि। प्रतिपक्षे व्यवहारे प्रत्यर्थिनि अभियोज्ये (आसामी)। "कारणे प्रतिवादिनि" इति स्मृतिः।

प्रतिवासि(वेशि)न् * त्रि॰ प्रत्यासन्नं वसति (विशति) प्रति+वस-(विश) वा णिनि। (पड़सि) गृहासन्नवासिनि। स्त्रियां ङीप्। "दृष्टिं हि प्रतिवासि(वेशि)नि" इति साहि॰ द॰।

प्रतिविधान * न॰ प्रति+वि+धा-ल्युट्। प्रतीकारे।

प्रतिबिम्ब * न॰ प्रतिरूपं बिम्बम्। बिम्बसादृश्ये, प्रतिच्छायायाञ्च।

प्रतिविषा * स्त्री॰ प्रतिविद्धं विषं यया। अतिविषायाम् (आतइच्)

प्रतिशासन * न॰ प्रति+शास-ल्युट्। भृत्यादेर्निकृष्टस्य नियोगे।

प्रतिश्याय * पु॰ प्रति+श्यै-ण। पीनसरोगे।

प्रतिश्रय * पु॰ प्रतिश्रीयते प्रति+श्रि-अच्। यज्ञगृहे, सभायां, गृहे, आश्रये च।

प्रतिश्रव * पु॰ प्रति+श्रु-अप्। स्वीकारे। [च।

प्रतिश्रुत् * स्त्री॰ प्रतिरूपं श्रूयते श्रु-क्विप्। प्रतिशब्दे, प्रतिध्वनौ

प्रतिषेध * पु॰ प्रति+षिध घञ्। निषेधे "मा कुरु" इत्यादिना निवारणे। ल्युट्। तत्रैवार्थे न॰।

प्रतिष्टम्भ * पु॰ प्रति+स्तम्भ घञ् षत्वम्। प्रतिबन्धे।

प्रतिष्ठा * स्त्री॰ प्रति+स्था-अङ्। स्थितौ, ग्रहयागादेः समाप्तौ, चतुरक्षरपादके छन्दोभेदे, पृथ्व्यां, यशसि, मानुषं क्षणादौ [illegible] कर्मभेदे, गौरवे च "अतु पुत्र प्रतिष्ठा" इति [illegible]।

प्रतिसर * पु॰ प्रति सृ+अच्। मैत्रबन्धने, हस्तसूत्रे च।

प्रतिसर्ग * पु॰ प्रतिरूप प्रतिकूलो वा सर्गः। ब्रह्मणः [illegible] मरीच्यादिसृष्टौ, प्रलये च। [illegible]

प्रतिसीरा * स्त्री॰ प्रतिसिनोति सीयते वा रन् दीर्घश्च। जव[illegible]

प्रतिसूर्य्यक * पु॰ प्रतिरूपः सूर्यः इव कन्। [illegible] (सूर्य्यसमा), [illegible] च।

प्रतिहत * त्रि॰ प्रति+हन क्त। प्रत्याहते, [illegible] च।

प्रतिसीमा * स्त्री॰ प्रतिनियता सीमा सीमाद्वयी। [illegible]

प्रतिहत * त्रि॰ प्रति+हन क्त। रुद्धे, हते, [illegible], प्रतिहत[illegible] च।

प्रतिहार * पु॰ प्रति+हृ घञ् वा दीर्घः [illegible]। द्वारि, मायाकारे च त्रि॰ स्त्रियां ङीप्। अनुम॰ [illegible]। [illegible]

प्रतीक * पु॰ प्रति-कन् नि॰ दीर्घः। अवयवे, प्रतिरूपे, [illegible] च

प्रतीचा * स्त्री॰ प्रति+ईक्ष-अ। प्रतीक्षणे

प्रतीक्ष्य * त्रि॰ प्रति+ईक्ष ण्यत्। पूज्ये [illegible]

[illegible]

निष्पादक सूत्रादेः प्रेरके, व्याकरणोक्ते हेतुसंज्ञे कर्त्तरि।

प्रयोजन न० प्र+युज-ल्युट्। कार्य्ये, उद्देश्ये, हेतौ च।

प्रयोज्य त्रि० प्रयोक्तुं शक्यते प्र+युज-शक्यार्थे यत्। [illegible] नियोज्ये भृत्यादौ।

प्ररूढ त्रि० प्र+रुह-क्त। प्रवृद्धे, बद्धमूले जाते च।

प्ररोह पु० प्र+रुह-घञ्। अङ्कुरे "मुखप्ररोह इव" इति [illegible] प्ररोहे च।

प्रलम्ब पु० दैत्यभेदे। प्र+लम्ब-घञ्। [illegible]

प्रलम्बघ्न पु० प्रलम्बं हन्ति हन-टक्। बलदेवे। प्रलम्बारौ [illegible]

प्रलय पु० प्रलीयतेऽस्मिन् प्र+ली-अच्। [illegible] कारणे लये, ब्रह्मणो दिनावसाने च। भावे अच्। [illegible] "प्रलयाम्भोनिधिरिव निर्घोषणे" इति कुमार।

प्रलाप पु० प्र+लप-घञ्। अनर्थकवाक्ये, निद्रायोगे [illegible] दिवाक्ये च।

प्रलापहन् पु० प्रलापं हन्ति हन क्विप्। कुलत्थाख्येऽन्ने।

प्रवचन न० प्र+वच-ल्युट्। वेदार्थव्याख्याने, प्रकृष्टवाक्ये च।

प्रव(वा)ण पु० प्र+व(वा)ण-अच्। चतुष्पथे, निम्नस्थाने, [illegible] क्रमे, आयते, प्रगुणे क्षीणे, प्रह्वे, क्षिप्ते, आयत्ते, [illegible]

प्रवयस् त्रि० प्रकृष्टं वयोऽस्य। प्रवृद्धे।

प्रवर पु० प्र+वृ अप्। सन्ततौ, गोत्रे, गोत्रप्रवर्त्तक[illegible] मुनिगणे च। श्रेष्ठे त्रि०। [illegible]

प्रवर्ग पु० प्र+वृज घञ्। [illegible]

प्रवर्त्तक त्रि० प्रवर्त्तयति प्र+वृत णिच् ण्वुल्। प्रवृत्तिजनके।

प्रवर्त्तना स्त्री० प्र+वृत णिच् युच्। प्रवृत्तिजनकव्यापारे [illegible] "अस्ति प्रवर्त्तनाख्यम् [illegible]" इति [illegible]

प्रवृद्ध त्रि० प्र+वृध क्त। [illegible] प्रधान च।

प्रवाद पु० प्र+वद घञ्। [illegible]

[illegible]

प्रबाहु * पु॰ प्रकृष्टो बाहुः। कूर्परस्याधोभागे। [च।
प्रविदारण * न॰ प्र+वि+दृ-णिच्-ल्युट्। युद्धे, विदारणे, आकीर्णे
प्रविशेष * त्रि॰ प्रकर्षेण विशेषो यस्य। विधुरे, परमविशेषे च।
प्रविषा * स्त्री॰ प्रकृष्टं विषं यस्याः। अतिविषायाम् (आतइच्)।
प्रवीण * त्रि॰ वीणया प्रगायति प्र+वीणा+णिच् अच्। निपुणे।
प्रवृत्ति * स्त्री॰ प्र+वृत+क्तिन्। प्रवाहे, वार्त्तायाम्, अवन्त्यादिदेशे, हस्तिमदे, न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने प्रयत्नभेदे च।
प्रवृद्ध * त्रि॰ प्र+वृध-क्त। वर्द्धिते, प्रौढे च।
प्रवेक * त्रि॰ प्र+विच-घञ्। प्रधाने।
प्रवे(वि)णी * स्त्री॰ प्र+वेण इन् वा ङीप्। गजपृष्ठस्थे चित्रकम्बले।
प्रवेल * पु॰ प्र+वेल-अच्। पीतमुद्गे (सोनामुग)।
प्रवेश * पु॰ प्र+विश घञ्। अन्तर्गमने।
प्रवेशन * न॰ प्रविशत्यनेन विश-करणे ल्युट्। प्रधानद्वारे, सिंहद्वारे च। भावे ल्युट्। प्रवेशे।
प्रवेष्ट * पु॰ प्र+वेष्ट-अच्। बाहौ, बाहुनीचभागे, हस्तिदन्तमांसे, गजपृष्ठस्थाने च। [त्वाच स्त्री॰।
प्रव्रजित * पु॰ प्र+व्रज-क्त। सन्न्यासिनि। मांस्यां, मुण्डीर्यां, ताप-
प्रव्रज्या * प्र+व्रज-क्यप्। सन्न्यासे, सर्वकर्मत्यागेन विधानेनाश्रमान्तरगमने। [क्त। सन्न्यासभ्रष्टे।
प्रव्रज्यावसित * पु॰ प्रव्रज्यातः सन्न्यासात् अवसितः च्युतः अव+सो-
प्रशंसा * स्त्री॰ प्र+शन्स-अ। गुणाविष्कारेण स्तुतौ।
प्रशमन * न॰ प्र+शम-णिच्-ल्युट्। वधे, शान्तकरणे च। "लब्धप्रशमनस्वास्थ्याम्" इति रघुः। शान्तौ च "सर्वाबाधाप्रशमनम्" इति चण्डी।
प्रशस्त * त्रि॰ प्र+शन्स-क्त। प्रशंसनीये, श्रेष्ठे, क्षेमे च। [प्रिये।
प्रश्न * पु॰ प्रच्छ-नङ्। जिज्ञासायाम्, ज्ञातुमिच्छया कथनाय
प्रश्नी * स्त्री॰ प्रच्छ+निङ्-ङीप्। कुम्भिकायाम् (पाना)।
प्रश्रय * पु॰ प्र+श्रि-अच्। प्रणये।
प्रश्रित * त्रि॰ प्र-श्रि-क्त। विनीते।
प्रष्ठ * त्रि॰ प्र+स्था-क नि॰ षत्वम्। अग्रगामिनि, श्रेष्ठे च।
प्रष्ठौही * स्त्री॰ प्रष्ठं प्रथमगर्भं वहति वह+क्विप्। प्रथमगर्भिण्याम्।
प्रष्ठवाह् * पु॰ प्रष्ठं वहति ण्वि। युगपार्श्वस्थे वृषादौ, युगपार्श्वे प्रथमयोजिते, दम्ये च। [मिट्। णिच् प्रसयति।
प्रस * प्रसवे तनौ च सक॰ दिवा॰ आत्म॰ सेट् घटा॰। प्रस्यते अप्र-
प्रसक्त * त्रि॰ प्र+सन्ज-क्त। प्रसङ्गविषये।
प्रसक्ति * स्त्री॰ प्र+सन्ज-क्तिन्। प्रसङ्गे, आपत्तौ, अनुमितौ च।
प्रसङ्ग * पु॰ प्र+सन्ज-घञ्। आपत्तौ, सम्बन्धभेदे, रतस्त्रीपेक्षानर्हस्वरूपे सङ्गतिभेदे, उत्कृष्टे चान्योद्देशेन कृतकर्मणोऽन्यस्य सिद्धिरूपे तन्त्रान्तरकार्य्यनिर्वाहे, प्रसक्तौ, प्रस्तावे च।
प्रसत्ति * स्त्री॰ प्र+सद-क्तिन्। नैर्मल्ये, प्रसन्नतायाञ्च।

प्रसन्न * त्रि॰ प्र+सद-क्त। निर्मले, सन्तुष्टे, कृतानुग्रहभेदे च। सुरायां स्त्री॰।
प्रसन्नता * स्त्री॰ प्रसन्नस्य भावः तल्। प्रसादे, अनुग्रहभेदे च।
प्रसभ * न॰ प्रगता सभा सभाधिकारोऽस्मात्। बलात्कारे, "प्रसभोद्धृतारिः" इति रघुः।
प्रसर * पु॰ प्र+सृ-अप् अच् वा। प्रसवे, वेगे, समूहे, युद्धे, नीवारे, निकटाभिगमने, प्रणयादेर्विसरणे, सैन्यादेः सर्वतो व्याप्तौ च।
प्रसरण * न॰ प्र+सृप-ल्युट्। सैन्यानां सर्वतोव्याप्तौ। अस्य स्त्रीत्वञ्च तत्र ङीप्।
प्रसव * पु॰ प्र+सू-अप्। गर्भमोचने, उत्पत्तौ, कार्य्यरूपे फले च "उदयरागधरं शिखं प्रसवस्तस्य गीयते" इति कुमारः। [(बोंटा)
प्रसवबन्धन * न॰ प्रसवस्य पुष्पस्य बन्धनम् बन्ध+करणे ल्युट्। वृन्ते
प्रसविनी * स्त्री॰ प्र+सू-इन्। जनन्याम्।
प्रसव्य * त्रि॰ प्रगतं सव्यं वामत्वम्। प्रतिकूले।
प्रसहा * स्त्री॰ प्र+सह-अच्। हस्त्याम्।
प्रसह्य * अव्य॰ प्र+सह-ल्यप्। हठादित्यर्थे। "प्रसह्य तेजोभिरसंख्यतां गतैः" इति माघः।
प्रसह्यचौर * पु॰ प्रसह्य बलात्कारेण चौरः। (डाकाइत) प्रकाशचौरे। [प्रसत्तौ, देवनैवेद्ये, गुरुजनभुक्तावशिष्टे च।
प्रसाद * पु॰ प्र+सद-घञ्। नैर्मल्ये, अनुग्रहे, काव्यगुणभेदे, स्वास्थ्ये,
प्रसादना * स्त्री॰ प्र+सद-णिच्-युच्। सेवायाम्।
प्रसाधक * त्रि॰ प्रसाधयति भूषयति प्र+सिध-णिच्-ण्वुल्। निष्पादके, अलङ्कर्त्तरि च स्त्रियां टाप्। "प्रसाधिकालम्बितमग्रपादम्" इति रघुः। नीवारे स्त्री॰ टाप्।
प्रसाधन * न॰ प्र+सिध-णिच्-ल्युट्। कृत्रिमभूषणे वेशे। करणे ल्युट्। कङ्कतिकायाम् स्त्री॰ ङीप्।
प्रसाधित * प्र+सिध-णिच्-क्त। अलङ्कृते, निष्पादिते च।
प्रसारण * न॰ प्र+सृ-णिच्-ल्युट्। विस्तारकरणे, क्रियाभेदे च।
प्रसारणी * स्त्री॰ प्र+सृ+णिच्-ल्यु गौरा॰ ङीप्। (गन्धभादाल) लताभेदे।
प्रसारिणी * स्त्री॰ प्र+सृ णिनि। लज्जालुलतायाम्।
प्रसारिन् * त्रि॰ प्र+सृ णिनि। विस्तारकारके।
प्रसित * त्रि॰ प्र+षो-क्त। आसक्ते। [डाढो।
प्रसिति * स्त्री॰ प्र+सि-बन्धने करणे क्तिन्। बन्धनसाधने निग-
प्रसिद्ध * त्रि॰ प्र+सिध-क्त। भूषिते, ख्याते च।
प्रसू * स्त्री॰ प्र+सू-क्विप्। जनन्याम्, कदल्यां वीरुधि, घोटकाञ्च।
प्रसूति * स्त्री॰ प्र+सू-क्तिन्। प्रसवे, अपत्ये, उदरे, मातरि च।
प्रसूतिका * स्त्री॰ प्रसूतैव कन्। जातसन्तानायां स्त्रियाम्।
प्रसूतिज * न॰ प्रसूत्या जायते जन+ड। दुःखे, प्रसवादिजन्यं दुःखं हि सर्वलोकप्रसिद्धम्।
प्रसून * न॰ प्र+सू-क्त तस्य नः। पुष्पे, फले च। जातमात्रे त्रि॰।

प्रसृत * पु॰ प्र+सृ-क्त। प्रसाञ्जली। प्रवृद्धे, प्रसादिते, विनीते, वेगिते, गते, नियुक्ते च त्रि॰। जङ्घायां स्त्री॰।

प्रसेवक * पु॰ प्र+सिव-ण्वुल्। वीणाप्रान्तवक्रे काष्ठे।

प्रस्कन्द * पु॰ ऋषिभेदे। स्कन्द-क्त तस्य नः। अवस्कन्दयुक्ते त्रि॰।

प्रस्तर * पु॰ प्र+स्तृ-अच्। पाषाणे, मणौ च।

प्रस्तार * पु॰ प्र+स्तृ-घञ्। तृणवने, पल्लवादिरचितशय्यायां, छन्दोवर्णनाद्रौ व्यक्तिभेदसंख्याज्ञानार्थे "प्रस्तारे तु लघुं न्यस्य प्रथमस्य गुरोरधः। यथोपरि तथा शेषम्" इत्युक्ते प्रक्रियाभेदे च।

प्रस्ताव * पु॰ प्र+स्तु-घञ्। अवसरे, प्रकरणे, प्रसङ्गे च।

प्रस्तावना * स्त्री॰ प्र+स्तु-णिच्-युच्। आरम्भे, सूत्रधारेण नट्यादिभिः सह प्रस्तुताभिनेयकथाप्रसङ्गार्थं कथनीये वाक्यस्तोमे "नटी विदूषको वापि" इत्यादि साहित्यदर्पणे ६परि॰।

प्रस्तुत * त्रि॰ प्र+स्तु-क्त। प्रकरणप्राप्ते, प्रासङ्गिके, उपस्थिते, कृते, प्रतिज्ञाते, प्रकर्षेण स्तुते च।

प्रस्थ * पु॰ प्र+स्था-क। सानु[illegible], आढकचतुर्थांशे वा धान्यादेः परिमाणभेदे, विस्तारे च। पर्वतस्य सामप्रदेशभूमौ पु॰ न॰।

प्रस्थान * न॰ प्र+स्था-ल्युट्। [illegible]गमने, गमनमात्रे च।

प्रस्फोटन * न॰ प्र+स्फुट+णिच्-ल्युट्। शूर्पे। भावे ल्युट्। ताडने, विकाशने, च।   [ल्यु। प्रस्फुटति पर्वते पु॰।

[illegible] * न॰ [illegible]। [illegible], [illegible], खेदे च।

[illegible] * पु॰ प्र+[illegible]। [illegible]।   [इंश भागे।

[illegible] * पु॰ [illegible] प्र+[illegible]। [illegible]

[illegible] * न॰ [illegible] प्र+[illegible] ल्युट्। [illegible], [illegible] च।

[illegible]। [illegible]।

[illegible] * स्त्री॰ [illegible] ङीप्। हरिद्रायाम्।

[illegible]। [illegible]।

[illegible] * न॰ [illegible]। [illegible] च। प्रा॰

[illegible] * स्त्री॰ [illegible] ङीप्। [illegible]।

[illegible] पु॰ [illegible] [illegible]

[illegible]   [त्याम्।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मिधातरूपे ऐश्वर्य्ये, स्वाच्छन्द्यानुमतौ च। "प्राकाम्यं ते विभुषु" इति कुमारः।   [प्राकारे

प्राकार * पु॰ प्रकीर्य्यते कॄ-घञ् दीर्घः। इष्टकादिरचिते [illegible]।

प्राकृत * त्रि॰ प्रकृष्टमकृतमपकार्य्यं यस्य। नीचे। प्रकृतेः इदम् अण्। प्रकृतिसम्बन्धिनि। प्रकृत्या स्वभावेन निर्वृत्त स्वभावसिद्धे। प्रकृतेः संस्कृतशब्दात् आगतः अण्। नाटके प्रसिद्धे अपभ्रंशशब्दभेदे।   [प्रकृतौ लये, त्वयि।

प्राकृतप्रलय * पु॰ कर्म॰। कार्य्यब्रह्मणो नाशे, तेन [illegible]

प्राकृतमित्र * पु॰ कर्म॰। स्वभावसिद्धे मित्रे, [illegible] पात् प्राकृतशत्रोः अव्यवहितोत्तरविषयस्थे नृपे च।

प्राकृतशत्रु * पु॰ कर्म॰। विषयानन्तरवर्त्तिनि नृपे।

प्राक्तन * त्रि॰ प्राचि काले, देशे, प्राच्यां दिशि वा भवः ट्यु प्राग्भवे। "प्रपेदिरे प्राक्तनजन्मविद्या" इति कुमारः।

प्रागभाव * पु॰ प्राग्वर्त्ती अभावः। इह कपाले घटो भविष्यतीत्यादिप्रतीतिसिद्धे अभावभेदे।

प्रागुदीची * स्त्री॰ प्राच्या उदीच्याश्चान्तराला दिक् दिगन्तरालेति स॰। पूर्वोत्तरदिशि ईशानकोणे।

प्राग्ज्योतिष * न॰ कामरूपदेशे, तद्देशस्थे ब॰ व॰।

प्राग्भार * पु॰ प्रकृष्टो भारः। उत्कर्षे, परभागे, "मांसलप्रिमा प्राग्भार." इति प्रबोधचन्द्रोदयः। पर्वताग्रभागे च।

प्राघटक * त्रि॰ प्रकर्षेण अघे क्रियतेऽसौ अण्। श्रेष्ठे।

प्राघर * त्रि॰ प्रकर्षेणाघे भवः यत्। श्रेष्ठे।

प्राग्वंश * पु॰ प्राक् वंशः अपवर्गोऽस्य यजमानादिगृहादीनां[illegible] वंशात् पूर्वभागस्थे यजमानादिस्थित्यर्थं गृहे।   [तर्

प्राघार * पु॰ प्र+घृ-क्षरणे घञ् दीर्घः। यज्ञादौ घृतक्षरणे

प्राघुण * पु॰ प्र+आ-घुण क। अतिथौ।   [विवादे।

प्राङ्गण * न॰ प्रकृष्टमङ्गनं पृषो॰ णत्वम्। गृहभूमौ (उठान,

प्राड्न्याय * पु "आचारेणावसन्नोऽपि पुनर्लेखयते यदि। [illegible] पूर्वं प्राड्न्यायः स उच्यते" इत्युक्ते [illegible] उत्तरभेदे।

प्राच् * त्रि॰ प्र-अञ्चू-क्विन्। पूर्वस्मिन् काले देशे च। [illegible] प्राची। सा च पूर्वस्यां दिशि, तस्याः पृथक्पृथक् [illegible]

प्राचीन * त्रि॰ प्राक्+अर्थे ख। पूर्वदिग्देशादौ भवे। [illegible] [illegible] वनितिकाशाम, वात्यायाम् स्त्री॰ टाप्।

प्राचीनबर्हिस् * पु॰। इन्द्रे, नृपभेदे च।

प्राचीनामलक * न॰ कर्म॰। पानीयामलके।

प्राचीनावीत * न॰ "दक्षिणं बाहुमुद्धृत्य दक्षिणे [illegible] प्राचीनावीतिमित्युक्तं पैत्रे कर्मणि योजितम्" इत्युक्ते [illegible] [illegible]

प्राचीर * न॰ प्राचीयते प्र+आ+चि-क्रन् दीर्घश्च। [illegible] [illegible] (प्राचीर)।

प्राचेतस * पु॰ वाल्मीकिमुनौ, प्राचीनबर्हिषो सुतस्य पुत्रे, वरुणस्य पुत्रे च।

प्राच्य * पु॰ प्राचि भवः। शरावत्या नद्याः प्राग्वर्त्तिनि देशे।

प्राजक * पु॰ प्र+अज-ण्वुल् वीभावाभावः। सारथौ।

प्राजन * न॰ प्र+अज-ल्युट्। नोदने पश्वादेस्ताडनदण्डे (पाँचनी)।

प्राजापत्य * पु॰ प्रजापतिर्देवताऽस्य यञ्। अष्टविवाहमध्ये विवाहभेदे, "कार्यं पातिव्रतं भाव्यं गार्हस्थ्यादयापितम्। सार्द्धं चरस्व धर्मोदान् प्राजापत्यमिति स्मृतम्" इति स्मृत्युक्ते द्वादशाहसाध्ये व्रतभेदे न॰। प्रजापतिरधिदैवताके यज्ञादौ त्रि॰। प्रजापत्यादिमाह सर्वसदृशवित्रकेतिभेदे स्त्री॰।

प्राजिद * पु॰ प्र+अज-तृच् वीभावाभावः। सारथौ।

प्राज्ञ * पु॰ प्रकर्षेण जानाति प्र-ज्ञा-क स्वार्थे अण्। पण्डिते। राजशुके च। प्रज्ञाऽस्त्यस्य अण्। बुद्धिमति, दक्षे च त्रि॰ प्रज्ञा+स्वार्थे अण्। बुद्धौ। प्राज्ञस्य पत्नी ङीप्। प्राज्ञपत्नी स्त्री॰। [त्रि॰।

प्राज्य * न॰ प्रकर्षमाज्यं प्र+अन्ज-क्यप् वा। प्रकृष्टघृते। प्रचुरे

प्राञ्जल * त्रि॰ प्र+अन्ज-अलच्। सरले, सुबोधे च।

प्राड्विवाक * पु॰ अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ+क्विप् प्राट्, तयोर्वादः विरुद्धाविरुद्धतया विवेचयति वि+विच-घञ् कर्म॰। राजनियुक्ते व्यवहारदर्शके, "विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः। विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः" इति स्मृतिः। अत्र प्राड्विवाक इति केचित् पठन्ति।

प्राण * पु॰ प्र+अन-घञ्। हृदयस्थे नासाग्रवर्त्तिनि वायौ, काव्यजीवने रसे, वायुमात्रे, बले च। पञ्चवृत्तिके देहस्थे वायुभेदे, इन्द्रिये च ब॰ व॰।

प्राणद * पु॰ प्राणं ददाति दा-क। जले, रक्ते च। जीवकवृक्षे पु॰। हरितक्यां, ऋद्धिवृक्षे च स्त्री॰। प्राणदातरि त्रि॰ "प्राणदा यमदूतिका" इत्युद्भटः।

प्राणनाथ * पु॰ ६त॰। पत्यौ।

प्राणमयकोष * पु॰ वागादिकर्मेन्द्रियसहित. प्राणपञ्चकमयः कोषः आत्माच्छादकत्वात् कोष इव। वेदान्तोक्ते कोशस्वरूपाच्छादके कर्मेन्द्रियसहिते प्राणपञ्चके।

प्राणसंयम * पु॰ प्राणस्य प्राणवायोः वृत्तिभेदस्य नासाग्रवर्त्तिनो वायोः संयमो यत्र व्यापारे। प्राणायामे तेन हि व्यापारेण प्राणवायोर्बहिर्निःसरणप्रतिरोधेन प्राणसंयम इति योगशास्त्रादिप्रसिद्धम्।

प्राणसमा * स्त्री॰ प्राणैः समा तुल्या प्रियत्वात्। प्रियतमायां पत्न्याम्।

प्राणायाम * पु॰ प्राणः प्राणवायुरायम्यते संयम्यते येन आ+यम घञ्। योगादिशास्त्रप्रसिद्धे प्राणवायोर्निरोधसाधने व्यापारे। बहिःस्थवायोराकर्षणरूपपूरणेन, देहस्थस्य तस्य कुम्भवत् निश्चलतया रोधेन, निरुद्धस्य तस्य क्रमेण बहिर्निःसारणरूपरेचनेन च प्राणवायोर्देहस्थवित्तिदोषरूपपापनाशसम्पादनमित्यर्थो व्यापारसमुदायः प्राणायाम इत्युच्यते "प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत्। प्राणायामः स विज्ञेयः" इत्युक्तलक्षणे प्राणायामशब्दस्य पूरककुम्भकरेचकरूपव्यापारसमुदाये, रूढिरिति केचित् प्रत्येकस्मिन्नपि रूढिरित्यन्ये विस्तरो वाचस्पत्ये।

प्राणिद्यूत * न॰ प्राणिभिः मेषकुक्कुटादिभिः पणपूर्वं द्यूतं देवनम् दिव-भावे क्त। प्राणिभिः पणपूर्वके देवने।

प्राणिन् * पु॰ प्राण+अस्त्यर्थे इनि। जीवे, चेतने च। [प्राणादौ।

प्रातःकृत्य * न॰ प्रातः प्रभाते कृत्यं कर्त्तव्यम्। प्रभाते कर्त्तव्ये शौच-

प्रातःसन्ध्या * स्त्री॰ प्रातरुपास्या सन्ध्या। वैदिके तान्त्रिके च प्रातरुपास्ये सन्ध्यारूपे देवभेदे।

प्रातर् * अव्य॰ प्र+अत-अर। प्रभाते, "प्रातःकालो मुहूर्त्तांस्त्रीन्" इति स्मृत्युक्ते सूर्योदयावधित्रिमुहूर्त्तकाले च।

प्रातराश * पु॰ अश्यते भुज्यते अश-घञ् प्रातः प्रभाते आशो भोज्यम्। प्रातःकाले भोज्ये।

प्रातिका * स्त्री॰ प्र+अत-ण्वुल्-टाप्। जवावृक्षे।

प्रातिपदिक * पु॰ प्रतिपदि हूयते ठक्। अग्नौ, "इन्द्राग्नी यत्र हूयेते" इति श्रुतौ यत्र प्रतिपदोऽर्थः। व्याकरणोक्ते "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्याद्युक्ते प्रत्ययप्रत्ययान्तभिन्ने धातुभिन्ने कृत्तद्धितसमासनिष्पन्ने च शब्दभेदे न॰।

प्रातिभाव्य * न॰ प्रतिभुवो भावः। (जामिनी) प्रतिभुवो भावे "प्रातिभाव्यागतं सुत." इति स्मृतिः। [स्यासाधारणे धर्मे।

प्रातिस्विक * न॰ प्रतिस्वे एकैकस्मिन् भवः ठक्। प्रत्येकपदार्थ-

प्रातिहारिक * त्रि॰ प्रतिह्रियतेऽनेन प्रतिहारः कापट्यं माया सः प्रयोजनमस्य ठक्। मायाकारके। [व्ययनादौ।

प्राथमकल्पिक * त्रि॰ प्रथमकल्पे भवः ठक्। प्रथमारम्भोचिते वेदा-

प्राथमिक * त्रि॰ प्रथमे भवः ठञ्। प्रथमकालभवे। स्त्रियां ङीप्।

प्रादुर्भाव * पु॰ प्रादुस्+भू-घञ्। प्रकाशे, आविर्भावे च।

प्रादुस् * अव्य॰ प्र+अद-उसि। स्फुटत्वे, प्रकाशे, नाम्नि, सम्भावनायां, हतौ च।

प्रादेश * पु॰ प्र+दिश घञ् दीर्घः। तर्जनीसहितविस्तृताङ्गुष्ठे, देशमात्रे च "अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते" इत्युक्ते परिमाणभेदे च।

प्रादेशन * न॰ प्र+आ+दिश ल्युट्। दाने।

प्राध्व * पु॰ प्रगतोऽध्वानम् अच् समा॰। रथादौ। प्रकृष्टोऽध्वा प्रा॰ स॰। प्रकृष्टे पथि। नम्रे, बद्धे च त्रि॰। [याचे।

प्राध्वम् * अव्य॰ प्र+आ+ध्वन-डमि। आनुकूल्ये, दाने, नम्रता-

प्रान्त * पु॰ प्रकृष्टोऽन्तः। शेषसीमायाम्।

प्रान्तर * न॰ प्रकृष्टमन्तरं व्यवधानं यत्र। दूरगम्ये पथि। वृक्षादिच्छायाशून्ये पथि, वने, कोटरे च।

प्राप्तपञ्चत्व * त्रि॰ प्राप्तं पञ्चत्वं मरणं येन। मृते।

प्राप्तरूप त्रि॰ प्राप्तं रूपं येन। मनोज्ञे, पण्डिते च।

प्राप्ति * स्त्री० प्र+आप क्तिन्। हृद्धौ, लाभे, स्थानान्तरगतौ, संहतौ, अणिमाद्यैश्वर्य्यमध्ये ऐश्वर्य्यभेदे, उदरे च।

प्राप्य * त्रि० प्र+आप-ण्यत्। गम्ये, लभ्ये च। व्याकरणोक्ते "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते" इत्युक्ते कर्मभेदे न०।

प्राभृत * न० प्र+आ+भृ-क्त। उपढौकनद्रव्ये। स्वार्थे कन् अत्रैवार्थे।

प्रामाद्य * पु० प्रमादाय हितः अण्। वासकवृक्षे।

प्रामाणिक * त्रि० प्रमाणेन निर्वृत्तः सिद्धः ठक्। प्रत्यक्षादिप्रमाणसिद्धे। स्त्रियां ङीप्।

प्रामाण्य * न० प्रमाणस्य भावः। तद्वति तत्प्रकारकत्वरूपे ज्ञानधर्मे, तच्च न्यायमते परतोग्राह्यं मीमांसकादिमते स्वतः स्वसामग्रीग्राह्यमिति भेदः विस्तरो वाचस्पत्ये।

प्राय * पु० प्र+अय-इण्-वा घञ् अच् वा। मृत्यौ, अनशनमृत्यौ, बाहुल्ये च। "प्रायेण सामग्र्यविधौ" इति कुमारः।

प्रायश्चित्त * प्रायस्+चित-क्त "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपो निश्चयसंयुक्तम् प्रायश्चित्तमिति स्मृतम्" इत्युक्तलक्षणे पापक्षयमात्रसाधनत्वेन विधिबोधिते कर्मणि चान्द्रायणादौ। [कारणयोग्ये पापनिश्चयवति जने।

प्रायश्चित्तिन् * त्रि० प्रायश्चित्तं कर्त्तव्यतयास्त्यस्य इनि। प्रायश्चित्त-

प्रायस् * अव्य० प्र+अय असि। बाहुल्ये, तपसि च। "प्रायः पयोधरसमुच्छ्रितिरेव हेतुः" इत्युद्भटः। [अनशनेन मरणायोद्युक्ते।

प्रायोपविष्ट * त्रि० प्रायाय अनशनमृत्यवे उपविष्टः उप+विश क्त।

प्रायोपवेश * पु० प्रायाय अनशनमृत्यवे उपवेशः स्थितिः। सङ्कल्पपूर्वकं सकलकार्य्यत्यागेन अनशनमरणार्थमुद्यमे।

प्रारब्ध * न० प्र+आ+रभ-कर्मणि क्त प्रकृष्टमारब्धं स्वकार्य्यं जननाय कृतारम्भं येन। देहाद्यारम्भके अदृष्टभेदे, तस्य च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम्। कृतारब्धे त्रि०।

प्रार्थना * स्त्री० प्र+अर्थ-युच्। याच्ञायां, हिंसायाञ्च। ल्युट्। याचने, हिंसने च न०। [च।

प्रार्थित * त्रि० प्र+अर्थ क्त। याचिते, अभिहिते, हते, शत्रुसंयते

प्रालम्ब * न० प्रकर्षेणालम्बते प्र+आ+लम्ब-अच्। ऋजुनया लम्बमाने कण्ठात् स्तनान्तं लम्बमाने माल्यादौ।

प्रालेय * न० प्रकर्षेण लीयते प्र+आ+ली यत् धात्वे एत्वम्, प्रलयाय हितम् अण् नि० एत्वम् वा। हिमे। [शोऽप्यत्र पु०।

प्रावरण * न० प्राव्रियतेऽनेन ल्युट्। उत्तरीयवस्त्रे। घञ्। प्रावा-

प्रावृत * त्रि० प्र+आ+वृ+क्त। प्रकर्षेणावृते वस्त्रे। [रावृते।

प्रावृषा * स्त्री० प्रकर्षेण वर्षन्त्यत्र प्र+वृष+क्विप् वा टाप्। वर्षा-

प्रावृषायणी * स्त्री० प्रावृषायं पुनः प्रकाशः पूर्व० णत्वम्। कपिकच्छ्वाम् (आलकुशी)।

प्रावृषेण्य * पु० प्रावृषि भवः एण्य। कदम्बवृक्षे, धाराकदम्बे, कुटजवृक्षे च। तद्भवमात्रे त्रि० "प्रावृषेण्यैरिव" इति भट्टिः।

पुनर्नवायां, कपिकच्छ्वाश्च स्त्री०।

प्रावृष्य * प्रावृषि भवः यत्। कुटजे, कदम्बे च।

प्राश्निक * त्रि० प्रश्नं करोति ठक्। गुणदोषादिप्रश्नकारके। सभ्ये।

प्रास * पु० प्रकर्षेणास्यते अस-कर्मणि घञ्। कुन्तास्त्रे।

प्रासङ्ग * पु० प्रसजति प्र+सन्ज-घञ् दीर्घः। दम्यवत्सानां स्कन्धे शिक्षार्थमासज्यमाने काष्ठे।

प्रासङ्ग्य * पु० प्रासङ्गं वहति यत्। हलादिकाष्ठवाहके वृषादौ।

प्रासाद * पु० प्रसीदत्यस्मिन् प्र+सद घञ् पूर्वपददीर्घः। देवराज्ञाञ्च गृहभेदे।

प्रासिक * पु० प्रासः प्रहरणमस्य ठक्। कुन्तास्त्रेण योद्धरि।

प्रास्थिक * त्रि० प्रस्थं तत्परिमितं धान्यादिकं स्वस्मिन् समावेशयति, पचति वा ठञ्। प्रस्थमितधान्यसमावेशयोग्ये पात्रे, तन्मितधान्यादिपाचके च। स्त्रियां ङीप्।

प्राह्ण * पु० प्रकृष्टं, प्रथमं वा अहः टच् अह्नादेशः णत्वम्। पूर्वाह्णे।

प्राह्णेतन * त्रि० प्राह्णे पूर्वाह्णे भवः ट्युल् तुट् च निपातनादेत्वम्। पूर्वाह्णभवे। [अतिशयेन

प्राह्णेतराम् * अव्य० अतिशयेन प्राह्णे तर-आमु एत्वं नि०।

प्रिय * पु० प्रीणाति प्री तर्पणे क। भर्त्तरि, पत्यौ, मृगभेदे, जीवकनामौषधौ च। हृद्ये त्रि०। भार्य्यायाम्, एलायां, मल्लिकायां, मदिरायां, वार्त्तायाञ्च स्त्री०।

प्रियंवद * त्रि० प्रियं प्रियकरं मधुरं वदति खच् मुम् च। प्रियवादिनि। खेचरे गन्धर्वभेदे पु०।

प्रियक * पु० प्रिय+संज्ञायां कन्। पीतसाले वृक्षे, कदम्बे, चित्रमृगे, प्रियङ्गौ, भ्रमरे, कुङ्कुमे, असनवृक्षे च।

प्रियङ्कर * त्रि० प्रियङ्करोति खच् मुम् च। प्रियकारिणि। कण्टकार्य्यां, वृद्धजीवन्त्याम्, अश्वगन्धायाञ्च स्त्री० ङीप्।

प्रियङ्गु * पु० प्रिय+गम डु नि० मुम् च। स्वनामख्याते वृक्षे "प्रियङ्गुकलिकाकारम्" इति बुधमणामन्त्रः। राजिकायां, पिप्पल्याम्, कङ्गौ (काङ्गनी), कटुकायाञ्च।

प्रियजीव * पु० प्रियो जीवो यस्य। श्योनाकभेदे। [त्रि०।

प्रियतम * पु० अतिशयेन प्रियः तमप्। मयूरशिखावृक्षे।

प्रियता * स्त्री० प्रियस्य भावः तल्। प्रेम्णि, प्रियत्वे च।

प्रियदर्शन * पु० प्रियं दर्शनमस्य। क्षीरिकावृक्षे, गन्धर्वभेदे च।

प्रियवर्णी * स्त्री० प्रियो वर्णो यस्याः गौरा० ङीष्। प्रियङ्गौ।

प्रियव्रत * पु० स्वायम्भुवमनोः ज्येष्ठे पुत्रे।

प्रियश्री * स्त्री० कर्म०। प्रियङ्गौ। [प्रियाले।

प्रियसन्देश * पु० प्रियं सन्दिशति अण्। चम्पकवृक्षे।

प्रियसालक * पु० कर्म० स्वार्थे कन्। असनवृक्षे (पियाशाल)।

प्रियाम्बु * पु० प्रियं विमृणां प्रियमम्बु मूले सिक्तं जलमस्य। आम्रवृक्षे।

प्रियाल * पु० प्रियाय अलति पर्य्याप्नोति अल+अच्। प्रियाले (पियाशाल)। द्राक्षायां स्त्री०।

…तर्पणे भ्वादि॰ उभ॰ सक॰ अनिट्। प्रियति ते अप्रैषीत् अप्रैष्ट।
…प्रीतौ कान्तौ दिवा॰ आत्म॰ अक॰ अनिट्। प्रीयते अप्रेष्ट।
…तर्पणे सक॰ क्र्यादि॰ उभ॰ कान्तौ अक॰ अनिट्। प्रीणाति प्रीणीते अप्रैषीत् अप्रेष्ट।
…तर्पणे सक॰ चुरा॰ उभ॰ अनिट्। प्राययति ते अपिप्रयत् त।
…न * न॰ प्री+णिच् नुक् ल्युट्। तर्पणे। [त्रि॰।
…* त्रि॰ प्री-क्त वा नत्वाभावः। हृष्टे। तस्य नत्वे प्रीणोऽप्यत्र
…त * स्त्री॰ प्री-भावे क्तिन्। हर्षे, आमोदे, तृप्तौ च।
…सर्पणे भ्वादि॰ आत्म॰ सक॰ अनिट्। प्रवते अप्रोष्ट।
…* मर्दने भ्वादि॰ पर॰ सक॰ सेट्। प्रोटति अप्रोटीत्।
…* अभ्यीकरणे भ्वादि॰ पर॰ सक॰ सेट्। प्रोषति अप्रोषीत्। [अप्रोषीत्।
…क्षा सेट्।
…* स्नेहे पूर्त्तौ च सक॰ क्लेदे अक॰ क्र्यादि॰ पर॰ सेट्। प्रुष्णाति
…* त्रि॰ प्रुष-क्त। दग्धे।
…ा * स्त्री॰ प्रकर्षेण प्रमाणादिना ईक्षा। पर्य्यालोचनायाम्।
…ावत् * त्रि॰ प्रेक्षा अस्त्यर्थे मतुप् मस्य वः। समीक्ष्यकारिणि।
…ा * स्त्री॰ प्र+इङ्ख-अ। दोलायाम्, परिभ्रमणे, स्वार्थकगतौ, अश्वभेदे, नृत्ये च।
…ित * त्रि॰ प्र+इङ्ख-क्त। कम्पिते।
…ोल * दोलने अद॰ चुरा॰ उभ॰ सक॰ सेट्। प्रेङ्खोलयति ते अपप्रेङ्खोलत् त। प्रस्योपसर्गत्वमपीत्यन्ये तेन प्राञ्चिखोलत् त।
वर्जन * न० वृज-ल्युट्। त्यागे, आरम्भे, हिंसायां च।

वर्ण * स्तुतौ विस्तारे शुक्लादिवर्णकरणे उद्योगे दीपने च अद० चुरा० उभ० सक० सेट्। वर्णयति ते अववर्णत् त।

वर्ण * वर्णने चुरा० उभ० सक० सेट्। वर्णयति ते अववर्णत् त।

वर्ण * न० वर्ण-अच्। कुङ्कुमे। ब्राह्मणादिजातौ, शुक्लादिरूपे, वर्णे, अकाराद्यक्षरे च पु०। करणादौ घञ्। यशसि, गुणे, अङ्गरागे च। स्वर्णे, व्रतभेदे, विलेपनद्रव्ये च। भावे घञ्। निरूपणे, स्तुतौ, गीतक्रमे, चित्रे च।

वर्णक * न० वर्णयति वर्ण+ण्वुल्। हरिताले, अनुलेपनयोग्ये पिष्टे घृष्टे वा चन्दनादौ द्रव्ये च। विलेपनादौ पु० स्त्री०। मण्डने न०। एकस्यैव सूत्रादेः पश्चात्तरव्याख्यानरूपे ग्रन्थभेदे न० "लिखा-सूत्रे प्रतीयवर्णके" इति मिताक्षरा। [कन्। मल्लाधारे।

वर्णकूपिका * स्त्री० वर्णानामक्षराणां लेखनाय क्षुद्रः कूपः कूपी सेव

वर्णधारक * पु० वर्णं शुक्लादिरूपं धारयति धृ+णिच्-ण्वुल्। चित्रकरे।

वर्णज्येष्ठ * पु० वर्णेषु ज्येष्ठः प्रथमोत्पन्नत्वात्। अग्रजे, विप्रे। सत्त्वादिगुणा श्रेष्ठवर्णे त्रि० "वर्णज्येष्ठा च या नारी" इति स्मृतिः

वर्णतूलि(ली) * स्त्री० वर्णानां लेखनसाधनं तूलिः। लेखन्याम्। स्वार्थे कन्। अत्रैव। [त्रि०।

वर्णद * न० वर्णं ददाति दा-क। कालीयके गन्धद्रव्ये। वर्णप्रदे

वर्णदात्री * स्त्री० वर्णं रूप ददाति दा तृच्-ङीप्। हरिद्रायाम्। वर्णदातरि त्रि०।

वर्णदूत * पु० वर्णा एव दूतो यत्र। लिपौ।

वर्णधर्म * पु० न० इत०। विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादि, क्षत्रियस्य प्रजापालनादि।

वर्णसङ्कर * पु० संकीर्य्यते सम्+कॄ अप् वर्णतः सङ्करः। विप्रादिभ्यो वर्णेभ्योऽनुलोमप्रतिलोमजाते मूर्द्धाभिषिक्तादौ जातिभेदे "जायते वर्णसङ्करः" इति गीता।

वर्णा * स्त्री० प्रशस्तवर्णोऽस्त्यस्याः अर्शआद्यच्। आढक्याम्।

वर्णाङ्का * स्त्री० वर्णा अक्षराणि अङ्क्यन्तेऽनया अङ्क-अच्। लेख-न्याम्। [रात्मके शब्दभेदे।

वर्णात्मन् * पु० वर्ण आत्मा स्वरूपं यस्य। ध्वन्यात्मकाद्भिन्नरूपे अक्षा-

वर्णार्ह * पु० वर्णं स्तुतिमर्हति अर्ह अण्। मुद्गे। [न्याम्।

वर्णिका * स्त्री० वर्णा अक्षराणि लेख्यत्वेन सन्त्यस्याः ठन्। लेख-

वर्णित * त्रि० वर्ण-क्त। स्तुते, कृतवर्णने, रूपान्तरमापादिते च।

वर्णिनी * स्त्री० प्रशस्तवर्णः अस्त्यस्याः इनि ङीप्। हरिद्रायाम्।

वर्णिन् * पु० वर्णोऽस्त्यस्य इनि। चित्रकरे, लेखके, ब्रह्मचारिणि च "अथाह वर्णी विदितो महेश्वरः" इति कुमारः, विप्रादिजातौ च "वर्णिनां हि वधो यत्र" इति स्मृतिः। [दूरे च।

वर्त्तक * पु० वृत-ण्वुल्। (भारुइ) पक्षिभेदे। वर्त्तकाप्यत्र अश्वस्य

वर्त्तन * न० वृत-ल्युट्। वृत्तौ स्थितौ। णिच्-भावे ल्युट्। स्थापने। णिच्-करणे-ल्युट्। जीवनोपाये स्त्री०। ङीप्। तर्कुपीठे न०। ल्यु। वृत्तिमति, वर्त्तिष्णौ च त्रि०। वामने पु०।

वर्त्तनी * स्त्री० वर्त्तते पादाद्यत्र। वृत-णिच्-आधारे ल्युट्। पथि।

वर्त्तमान * पु० वृत-शानच्। कालभेदे शब्दप्रयोगाधारे आरब्धापरिसमाप्ते काले। तत्कालवृत्तौ त्रि०। [लोहभेदे।

वर्त्तलोह * न० वर्त्यते वृत णिच्-अच् कर्म०। आवर्त्तनयोग्ये

वर्त्ति(र्त्ती) * स्त्री० वृत-इन् वा ङीप्। लेखे, नयनाञ्जने, गात्रानुलेपने, दीपदशायाञ्च।

वर्त्तिक * पु० वृत-तिकन्। (वटेर) विहगभेदे। वर्त्मनि वर्त्तते वृत-अच् वर्त्तः तत्र साधुः हितो वा ठन्। भारे।

वर्त्तिन् * त्रि० वृत+णिनि। वर्त्तनशीले।

वर्त्तिष्णु * त्रि० वृत-इष्णुच्। वर्त्तनशीले। [काले। तद्वृत्तौ त्रि०।

वर्त्तिष्यमाण * पु० वृत+शानच् लृटः सदिति लृट्। भविष्यत्-

वर्त्तुल * त्रि० वृत-उलच्। गोलाकारे पदार्थे। सम्बरे न०। कलायभेदे पु०। तर्कुपीठाम् स्त्री० गजपिप्पल्याम् स्त्री० ङीप्।

वर्त्मन् * न० वृत-मनिन्। पथि, आचारे, "वा मनोवर्त्मन" इति रघुः। नेत्रच्छदे च।

वर्त्मनि * स्त्री० वृत-मनि मुट् च। पथि। [न।

वर्द्ध * छेदने, पूरणे च चुरा० उभ० सक० सेट्। वर्द्धयति ते अववर्द्धत्

वर्द्ध * पु० वृध-अच्। आच्छादाम् (बालनशाटि)। घञ्। पूरणे, छेदे च।

वर्द्धक * पु० वृध+ण्वुल्। आच्छादनपटी (बालनशाटी), पूरके, छेदके च।

[illegible] पु॰ [illegible] । त्वष्टरि (छुतार)। [भेदे।
[illegible] पु॰ [illegible] त्वष्टरि (छुतार) जाति॰
[illegible] न॰ [illegible]। छेदने, पूरणे च। [illegible]। [illegible]
[illegible] त्रि॰। "[illegible]" इति भट्टिः। [illegible]।
[illegible] त्रि॰। [पात्रभेदे च (बदना)।
[illegible] स्त्री॰ [illegible]। संमार्जन्याम्, मतान॰
[illegible] पु॰ [illegible]। [illegible] त्रि॰। [illegible]
[illegible], [illegible], [illegible] भेदे, देशभेदे, नगरभेदे च।
[illegible] त्रि॰।
[illegible] न॰ [illegible] + णिच्-घञ् च ततो भावे
[illegible]।

[illegible]

वर्षप्रिय + पु॰ वर्षः प्रियोऽस्य। चातकपक्षिणि।
वर्षवर * पु॰ वर्षं रेतोवर्षणं वृणोति आवृणोति वृ-अच्। "ये
त्वप्रमत्ताः प्रथमभाक्षीयाः स्त्रीस्वभाविनः। जात्या न दुष्टा
कार्येषु ते वै वर्षवराः स्मृताः" इत्युक्तलक्षणे राजामत्तपुरचरे
षण्डे (खोजा) "नष्टं वर्षवरैः" इति रत्नावली।
वर्षवृद्धि * पु॰ वर्षस्य वृद्धिरधिकता यस्मिन्। जन्मतिथौ, तद्दिन॰
कर्तव्ये पूजादौ च। "युगाद्या वर्षवृद्धिश्च" इति स्मृतिः।
वर्षा * स्त्री॰ ब॰ व॰। वर्षन्ति मेघा यत्र। श्रावणभाद्राख्ये
मासद्वये ऋतौ "वर्षासु च मघासु च" इति स्मृतिः।
वर्षाङ्गी * स्त्री॰ वर्षासु अङ्गमस्याः। पुनर्नवायाम्। [समासौ।
वर्षापगम * पु॰ वर्षाणामपगमो यत्र। शरत्काले। [illegible]। वर्षा॰
वर्षाभव * पु॰ वर्षासु भवति भू-अच्। रक्तपुनर्नवायाम्।
वर्षाभू * पु॰ वर्षासु भवति भू+क्विप्। भेके, इन्द्रगोपे, मण्डू॰
कतायाञ्च। पुनर्नवायां, भेक्याञ्च स्त्री॰। वर्षाभवमात्रे त्रि॰।
रक्तायां पुनर्नवायाम् स्त्री॰ ङीप्।
वर्षामद * पु॰ स्त्री॰ वर्षासु माद्यति मद-अच्। मयूरे।
वर्षिष्ठ * त्रि॰ अतिशयेन वृद्ध. इष्ठन् वर्षादेशः। अतिशयवृद्धे।
वर्षीयस् * त्रि॰ अतिशयेन वृ. । वृद्ध+ईयसुन् वर्षादेशः। अतिवृद्धे
स्त्रियां ङीप्।
वर्षुक * त्रि॰ वृष-उकञ्। वर्षणशीले।
वर्षोपल * पु॰ वर्षस्य वृष्टेरुपलः प्रस्तर इव। करकेषु (शिल)।
वर्ष्मन् * न॰ वृष् मनिन्। देहे। [प्र॰
वर्ह * अप भ्वा॰ दीप्तौ भ्वा॰ चुरा॰ उभ॰ सेट्। वर्हयति-ते अवरर्ह
वर्ह * भ्वा॰ आदि॰ आत्म॰ अक॰ सेट्। वर्हते अवर्हिष्ट।
वर्ह * न॰ वर्ह-अच्। मयूरपिच्छे, पत्रे, [illegible], [illegible], [illegible]
[illegible] च। [पर्णे। वर्हि पुष्पादयोऽप्यत्र।
वर्हि(र्हिः)कुसुम * न॰ वर्हिरिव कुसुममस्य पु॰ [illegible]। [illegible]

[illegible]

"वर्हिर्देवसदनम्" इति श्रुतिः। बर्ह-इसुन्। दीप्तियुक्ते त्रि०।

बल्ल * संवरणे भ्वादि० आत्म० सक० सेट् वा घटा०। बल्लते अव-
    ल्लिष्ट।

बल ० न० बल्यतेऽनेन बल क। सैन्ये, बलशब्दार्थे च।

बलक्ष * पु० बल-क्विप् अक्ष-अच् कर्म०। धवले वर्णे। तद्वति त्रि०।

बलभि(भी) * स्त्री० बल्यते आच्छाद्यते बल-अभि वा ङीप्। वडभी-
    शब्दार्थे, गोपानस्याम्।

बलय * पु० न० बल-अयन्। हस्तपादकटकादौ। उत्तरपदस्थः
    तदाकारवेष्टने यथा भूवलयम्। वेष्टनभूमौ, गोले च।

बलयित * त्रि० बलयमिव आचरितम् बलय-क्विप्-क्त। वेष्टिते।

बला ० स्त्री० बल-अच्। (वेडेला) ओषधिभेदे।

बलाक * पु० स्त्री० बल-आकन्। बकपक्षिणि। स्त्रियां टाप्।

बलाहक * पु० वारि वहति पृ०। बलाहकशब्दस्यार्थे मेघादौ।

बलिर * त्रि० बल-अच् बलं संवरणमक्ष्णस्य इरन्। केकरे।

बलिश * न० बलिना उपहारद्रव्येण श्यति मत्स्यान्। वडिशशब्दार्थे

बलीक * न० बल्यते संव्रियतेऽनेन ईकन्। वलीकशब्दार्थे पटले।

बलूल * त्रि० बल देशीत्यापनमक्ष्णस्य ऊलच्। बलविशिष्टे।

बल्क ० भाषणे चुरा० उभ० द्वि० सेट्। बल्कयति ते अवबल्कत् त।

बल्क * न० बल-संवरणे कक् कस्य नेत्वम्। वृक्षादीनां त्वचि,
    वल्कले, मत्स्यानां त्वचि शल्के (आंइस), खण्डे च।

बल्कतरु * पु० बल्काय तरुः। पट्टिकालोध्रे, गुवाकवृक्षे च।

बल्कद्रुम * पु० बल्कप्रधानो द्रुमः। भूर्जपत्रवृक्षे।

बल्कल * न० बल-कलन् कस्य नेत्वम्। त्वचि। (दारचिनि) इव
    त्वचि (छाल) पु० न०।

बल्कलोध्र * पु० बल्कप्रधानो लोध्रः। पट्टिकालोध्रे।

बल्ग * गतौ प्लुतगतौ च भ्वादि० पर० सक० सेट्। बल्गति अवल्गीत्

बल्गा * स्त्री० बल्ग-अ। (लागाम) अश्वमुखस्थे रज्जुभेदे।

बल्गित ० न० बल्ग-क्त। अश्वस्य गतिभेदे, गमने, बहुभाषणे च।

बल्गु ० पु० बल-संवरणे उ-गुक् च। छागे। मनोहरे त्रि०। संज्ञादा
    कन्। चन्दने, वने, पत्रे च न०। वाहनि, सुन्दरे च त्रि०।

बल्गुपत्र * पु० बल्गूनि पत्राणि यस्य। वनमुद्गे।

बल्भ * भक्षणे भ्वादि० आत्म० सक० सेट्। बल्भते अबल्भिष्ट।

बल्मिक * पु० बल-इकि मुट् च। }
बल्मीक ० पु० बल ईक मुट् च। } कीटविशेषकृते मृत्तिकास्तूपे (उइर ढिबि)।

बल्ल(ल्य)ल * छेदने पवित्रताकरणे च अद० चुरा० उभ० सक०
    सेट्। बल्लूलयति ते अबबल्लूलत् त।

बल्ल * संवरणे भ्वादि० आत्म० सक० सेट्। बल्लते अबल्लिष्ट।

बल्ल * पु० बल्ल अच्। गुञ्जात्रयपरिमाणे "[illegible]" इति [illegible]

बल्लकी * स्त्री० बल्ल क्वुन् गौरा० ङीष्। वीणायाम्, शल्लकीवृक्षे च।

बल्लभ * पु० बल्ल अभच्। दयिते, अध्यक्षे, कुलीनाश्वे च।

बल्लभनाय * पु० बल्लभे दासवर्गे नायकत्वात् [illegible]। [illegible]।

बल्लर * न० बल्ल-अरन्। कृष्णागुरुणि, गहने कुञ्जे च।

बल्लरि(री) * स्त्री० बल्ल+अरिन् वा ङीप्। मञ्जर्यां, मेथिकायां च।

बल्लव * पु० बल्ल अच् तं वाति वा-क। गोपे, पाचके, भीमसेने च।

बल्लि(ल्ली) * स्त्री० बल्ल-इन् वा ङीप्। लतायाम्, पृथिव्याम्, दीर्घा-
    ल्पम्। अजमोदायां, कैवर्त्तिकायाम्, वच्ये च।

बल्लीज ० न० बल्ल्यां जायते जन-ड। मरिचे।

बल्लीदूर्वा * स्त्री० बल्लीरूपा दूर्वा। मालादूर्वायाम्।

बल्लीबदरी * स्त्री० बल्लीरूपा बदरी। भूमिबदर्याम्।

बल्लीमुद्ग * पु० बल्लीप्रधानः मुद्गः। वनमुद्गे (मुगानि)।

बल्लीवृक्ष * पु० बल्लीव दीर्घो वृक्षः। शालवृक्षे। [गहने च।

बल्लूर * न० बल्ल-ऊरन्। शुष्के मांसखण्डे, क्षेत्रे, निर्जलप्रदेशे, शाद्वले,

बल्लूर * त्रि० बल्ल-ऊरन्। आतपादिना शुष्कमांसे, शूकरमांसे,
    वनक्षेत्रे, वाहने, ऊषरभूमौ च।

बल्ला * स्त्री० बल्ल-यत्। आमलक्याम्।

बल्वज * पु० वमने भुव वेष्टयति वल-क्विप [illegible] वज
    गच्छति वज-अच्। उलपे तृणभेदे। (वाबुइ) तृणभेदे स्त्री०।

बल्ह ० दीप्तौ चुरा० उभ० सक० सेट्। बल्हयति ते अवबल्हत्
    त।

बल्ह * [illegible] भ्वादि० आत्म० सक० सेट्। बल्हते अबल्हिष्ट।

बश * पु० वा-ड [illegible] [illegible]। [illegible] [illegible]
    [illegible]। [अवाशीत्।

बश * [illegible] अदा० पर० सक० सेट्। [illegible] [illegible]

बश * पु० न० वश अप्। आयत्तत्वे, प्रभुत्वे च। आयत्ते त्रि०।

बशगत * त्रि० [illegible] [illegible], [illegible]
    [illegible] च। [illegible], "[illegible]" इति
    [illegible] च।

बशक्रिया * स्त्री० [illegible] क्रिया [illegible]। [illegible]।

बशग * त्रि० [illegible]। [illegible]।

बशवर्त्तिन् * त्रि० [illegible]। [illegible]।

बशा * स्त्री० [illegible]। [illegible]
    [illegible]। स्त्री०।

बशिक * त्रि० [illegible]। [illegible], [illegible] च। [illegible]

बशित्व * न० [illegible]। [illegible]
    च। [illegible] स्त्री०।

बशिर * त्रि० [illegible]। [illegible], [illegible] च।

बशीर * न० [illegible]। [illegible] [illegible]

बशीकर * पु० [illegible] [illegible] [illegible]
    च। [illegible]।

बशीकार * न० [illegible] [illegible]
    [illegible]।

बशीर * पु० [illegible]। [illegible]।

वश्य * न॰ वश-यत्। लवङ्गे। आयत्ते त्रि॰।

वष * वधे भ्वादि॰ पर॰ सक॰ सेट्। वषति अवषीत् अवाषीत्।

वषट् * अव्य॰ वह-डषटि। देवोद्देश्यकहविस्त्यागे।

वषट्कार * पु॰ वषट्+कृ-घञ्। देवोद्देशकत्यागरूपे यज्ञे।

वषट्कृत * त्रि॰ वषट् इति कृतम् कृ-क्त। हुते।

वष्क * गतौ भ्वादि॰ आत्म॰ सक॰ सेट्। वष्कते। अवष्किष्ट।

वष्कय * पु॰ वष्क-अयन्। एकहायने वत्से।

वष्कयणी * स्त्री॰ वष्कयमेकहायनवत्सं नयति स्थानान्तरं नी-ड गौरा॰ ङीष् णत्वम्। चिरप्रसूतायां गवि।

वष्कयिणी * स्त्री॰ वष्कय एकहायनो वत्सोऽस्त्यस्याः इनि। चिरप्रसूताया गवि।

वस * नम्रतायां अक॰ वधे सक॰ चुरा॰ उभ॰ सेट्। वासयति ते अववसत् त।

वस * स्तम्भे दिवा॰ पर॰ सक॰ सेट्। वस्यति अवसत् अवासीत्।

वस * निवासे भ्वादि॰ पर॰ सक॰ अनिट् यजा॰। वसति अवात्सीत्।

वस * आच्छादने अदा॰ आत्म॰ सक॰ सेट् यजा॰। वस्ते अवसिष्ट।

वस * वासने अद॰ चुरा॰ उभ॰ सक॰ सेट्। वसयति ते अववसत् त

वसति(ती) * स्त्री॰ वस-अति वा ङीप्। वासे, यामिन्याम्, "वसतीरुषित्वा" इति रघु॰, निकेतने, स्थाने च।

वसन * न॰ वस-ल्युट्। वस्त्रे, छादने, निवासे, वस्त्रभूषणे च।

वसन्त * पु॰ वस-झ। मधुमाधवात्मके ऋतुभेदे, रागभेदे च।

वसन्तक * पु॰ वसन्ते कायति कै-क। श्योनाकवृक्षे।

वसन्तकुसुमाकर * पु॰ प्रमेहरोगनाशके औषधभेदे।

वसन्तजा * स्त्री॰ वसन्ते जायते जन-ड। माधवीलतायाम्।

वसन्ततिलक * न॰ चतुर्दशाक्षरपादके छन्दोभेदे।

वसन्तदूत * पु॰ वसन्तस्य दूत इव। कोकिले, आम्रवृक्षे, पञ्चमस्वरे च माधवीलतायाम्, पाटलीवृक्षे, गणिकारिकायाञ्च स्त्री॰ ङीप्।

वसन्तद्रु * पु॰ वसन्तस्य प्रधानः द्रुः। आम्रवृक्षे। वसन्तघातदयो-ऽप्यत्र।

वसन्तसख * पु॰ वसन्तस्य सखा अच् समा॰। कामदेवे।

वसा * स्त्री॰ वस+अच्। मांसजाते, देहस्थे धातुभेदे, मेदसि, मांसरोहिण्यां लतायाञ्च।

वसु * न॰ वस+उ। धने, रत्ने, वृद्धौषधे, श्यामे, स्वर्णे, जले च। वकवृक्षे, सूर्ये, वह्नौ, रश्मौ, गणदेवताभेदे, अष्टसङ्ख्यायाञ्च पु॰। मधुरे, शुष्के च त्रि॰। दीप्तौ, वृद्धौषधौ च स्त्री॰। वसुदेवताके धनिष्ठानक्षत्रे पु॰।

वसुक * पु॰ वसु इव कायति कै-क। अर्कवृक्षे, वकवृक्षे च।

वसुच्छिद्रा * स्त्री॰ वसूनि रत्नानि छिद्राण्यस्याः। महामेदायाम्।

वसुदेव * पु॰ वसुना दीव्यति दिव-अच्। श्रीकृष्णजनके यादवे शूरपुत्रभेदे। [सुतादयोऽप्यत्र।

वसुदेवभू * पु॰ वसुदेवात् भवति भू+क्विप्। श्रीकृष्णे। वसुदेव-

वसुधा * स्त्री॰ वसूनि धीयन्तेऽस्यां धा-अ। पृथिव्याम्।

वसुधारा * स्त्री॰ वसोर्वसोर्धारा... धारा घृतादिस्रवन्तिः। माङ्गल्येषु वेदिराजकुड्ये शेषेन दीयमानायां घृतादिधारायाम्।

वसुन्धरा * स्त्री॰ वसूनि धारयति धृ-अच् मुम् च। पृथिव्याम्।

वसुमती * स्त्री॰ वसूनि सन्त्यस्यां मतुप्। पृथिव्याम्।

वसुहट्ट * पु॰ वसूना हट्ट इव। बकवृक्षे।

वस्त * वधे गतौ च सक॰ याचने द्वि॰ चुरा॰ उभ॰ सेट्। वस्तयति ते अववस्तत् त

वस्त * पु॰ वस्यते बध्यते वस्त+घञ्। छागे।

वस्तक * न॰ वस्त इव कायति कै क। कृत्रिमलवणे।

वस्तकर्ण * पु॰ वस्तस्य कर्ण इव पत्रमस्य। शालवृक्षे।

वस्तगन्धा * स्त्री॰ वस्तस्येव गन्धोऽस्याः। अजगन्धायाम्।

वस्तमोदा * स्त्री॰ वस्तस्येव मोदो यस्याः। अजमोदायाम्।

वस्ति * पु॰ वस्ते आवृणोति मूत्रम् वस-तिच्। नाभेरधोभागे मूत्राधारे स्थाने, वासे च। वसनदशायां स्त्री॰ ब॰ व॰। [हृदे।

वस्तिकर्माढ्य * पु॰ वस्तिकर्मणा तच्छोधनव्यापारेणाढ्यः। अश्व...

वस्तिमल * न॰ ६त॰। मूत्रे।

वस्तु * न॰ वस-तुन्। द्रव्ये, पदार्थे, सत्यपदार्थे च। [वा।

वस्तुक * न॰ वस्तु+इवार्थे कन्। वास्तुके शाकभेदे, श्वेतवर्णमार्के

वस्त्य * न॰ वस्तौ साधु यत्। गृहे।

वस्त्र * न॰ वस-ष्ट्रन्। परिधानाद्युपयुक्ते कार्पासादौ वसने।

वस्त्रकुट्टिम * न॰ वस्त्रनिर्मितं कुट्टिम यत्र। वस्त्रगृहे (ताँबु)।

वस्त्रगृह * न॰ वस्त्रनिर्मितं गृहम् शाक॰। (ताँबु) वस्त्रनिर्मिते गृहे।

वस्त्रग्रन्थि * पु॰ ६त॰ नीव्याम्। [कायाम्।

वस्त्रपुत्रिका * स्त्री॰ वस्त्रनिर्मिता पुत्रिका। वस्त्रनिर्मितपुत्तलि

वस्त्रभूषणा * स्त्री॰ वस्त्रस्य भूषणं यस्याः. ५ब॰। मञ्जिष्ठायाम्। साकारण्डवृक्षे पु॰।

वस्त्ररञ्जन * पु॰ वस्त्रं रञ्जयति रन्ज णिच् ल्यु। कुसुम्भे। [

वस्न * न॰ वस-नन्। वेतने, द्रव्ये च। धने, त्वाच मूल्ये च।

वस्नसा * स्त्री॰ वस्न स्यति षो क। स्नायौ।

वस्वौकसारा * स्त्री॰ वसूनामोकस्य सारो यत्र। इन्द्रनगर्याम्, इन्द्रनद्या, कुबेरपुर्याञ्च।

वह * दीप्तौ चुरा॰ उभ॰ अक॰ सेट् इदित्। वंहयति ते अव...

वह * प्रापणे भ्वादि॰ उभ॰ द्विक॰ यजा॰ अनिट्। वहति ते अवाक्षीत् अवाढ। [सं

वह * पु॰ वहत्यनेन वह-अच्। वृषस्कन्धदेशे, घोटके, वायौ, प

वहल * पु॰ वह-अलच्। पोते। दृढे त्रि॰।

वहलगन्ध * न॰ वहलो दृढो गन्धो यस्य। शम्बरचन्दने।

वहलचक्षुस् * पु॰ वहलानि चक्षुंषीव पुष्पाण्यस्य। मेषशृ (लाहुरशिङ्गा)।

वातपोथ ० पु० वा+क्त समस्तस्य वातस्यैव पथ्य पत्रम्। पलाशे, प्रयोजनशून्ये पुरुषे, काण्डे, कपाले, कूटे मालद्रुमे च।

वातप्रमी * पु० वातेन प्रमीयते कथ-घञ्। वातूले, वल्मीके, इन्द्र-चापे च। [द्रुयो कि०।

वातल ० पु० वातं रोगभेदं लाति ला+क। चणके। वायुकारके

वातव्याधि * पु० वातेन कायस्थधातुभेदेन जनितो व्याधिः शाक०। वातरोगे। [फलवृक्षे।

वाताद ० पु० वाताय वातनिवृत्तये अत्यते अद+घञ् (बादाम)

वातापि * पु० अगस्त्यनाशिते असुरभेदे। "वातापिर्भक्षितो येन वातापिश्च महासुरः। समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु" इति भोजनान्ते पाठ्यमन्त्रः। [मुनौ।

वातापिसूदन * पु० वातापिं सूदयति हिनस्ति सूद-ल्यु। अगस्त्ये

वातामोदा ० स्त्री० वातेनामोदो यस्याः। कस्तूर्य्याम्।

वातायन ० न० वातस्यायनं गतिर्यत्र। गवाक्षे। वातस्येव शीघ्रमयनं गतिरस्य। अश्वे पु०।

वातायु * पु० वातमयते अय-उण्। हरिणे।

वातारि * पु० वातस्य रोगभेदस्यारिः। एरण्डवृक्षे, शतमूल्याम्, शेफालिकायाम्, यवान्याम्, भार्ग्याम्, स्नुह्याम्, विडङ्गे, शूरणे, भल्लातके, जतुकायाञ्च।

वाताश्व * पु० वात इव शीघ्रगोऽश्वः। वात्यनिये अश्वोत्तमे।

वाति * पु० वा-क्तिच्। वायौ।

वातिक * पु० वातादागतः ठक्। देहस्थवायुधातुजन्ये रोगभेदे।

वातिग * पु० वातिं वायुं गच्छति गम-ड। वार्त्ताकौ। गम+अच् वातिगमोऽप्यत्र। [मुम् च। वार्त्ताकौ।

वातिङ्गण * पु० वातिं देहस्थवातं सेवनात् गणयति गण अच्

वातीय * न० वाताय वातनिवृत्तये हित छ। काञ्जिके।

वातूल * पु० वातानां समूहः ऊलच्। वातसमूहे।

वातूल ० त्रि० वात+असह्यार्थे ऊलच्। वातरोगयुक्ते उन्मत्ते। समूहार्थे ऊलच्। वातसमूहे पु०। [गोमः। वायुरोगे त्रि०।

वातोमा * स्त्री० वातमूनयति ऊन-अण्। गोजिह्वाक्षुपे। वाति-

वात्या * स्त्री० वातानां समूहः यत्। वातसमूहे "पितस्य वात्या-मयवक्रेति मेघवत्।

वात्सक * न० वत्सानां समूहः वुञ्। वत्ससमूहे।

वात्सल्य * न० वत्सलस्य भावः ष्यञ्। पुत्रादिविषयकानुरागे रसभेदे।

वात्स्य * पु० वत्सस्यापत्यं यञ्। गोत्रप्रवर्त्तके मुनिभेदे।

वात्स्यायन * पु० वत्सस्य गोत्रापत्यं युवा वत्स+यञ् ततो यूनि फक्। वत्सगोत्रोत्पन्ने न्यायसूत्रभाष्यकारके पक्षिलाख्ये मुनौ।

वाद * पु० स्त्री० वद+घञ्। तत्त्वबुभुत्सया कथने, "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति गौतमोक्ते विचारात्मके वाक्यभेदे च।

वादन * न० वद-णिच्-करणे ल्युट्। मृदङ्गादिवाद्ये। भावे ल्युट्। मृदङ्गादिताडनरूपे व्यापारे।

वादर * न० बदरायाः कार्पास्याः विकारः अण्। कार्पाससूत्रनिर्मिते वस्त्रादौ। [स्त्रच् डित्। अश्वत्थवृक्षे।

वादरङ्ग * पु० वादरं बदरामलक्ष्यादिमाहात्म्यं गच्छति गम+

वादरत * त्रि० वादे विवादे रत. रम-क्त। अनुदिनविवादशीले।

वादरा * स्त्री० वातं वायुं राति ददाति रा-क पृ० तस्य दः। कार्पास्याम्।

वादरायण * पु० बदरीप्रधानं स्थानं बादरं तदयनं स्थानं यस्य। नित्यं बदरिकायामवस्थितिनि वेदव्यासे। स्वार्थे इञ्। बादरायणिरप्यत्र। अपत्ये इञ्। व्यासपुत्रे शुकदेवे।

वादल * न० वातं लाति गृह्णाति ला+क पृ० तस्य दः। मधुयष्टी।

वादाम ० न० वातमममति हिनस्ति अम-अण् पृ० तस्य दः। स्वनामख्याते फलभेदे।

वादित्र * न० वद-णिच्-इत्र। मृदङ्गादिवाद्ये।

वादिन् ० त्रि० वदति वद-णिनि। वक्तरि अर्थिनि, विवादकर्त्तरि, विचारस्थले प्रथमपक्षप्रतिपादके च।

वाद्य ० न० वद-णिच्-यत्। वादनीये मृदङ्गादौ।

वाद्यभाण्ड ० न० कर्म०। वादनीयपात्रे।

वा(बा)ध ० विघाते भ्वादि० आत्म० सक० सेट्। वा(बा)धते अवा(बा)धिष्ट। बाढि न क्षेप.।

वा(बा)ध * पु० वा(बा)ध-घञ्। प्रतिरोधे, प्रतिबन्धे, न्यायोक्ते साध्याभाववत्त्वेन ज्ञाने, अवा(बा)धाप्यत्र, पीडायाञ्च स्त्री०। ल्युट्। वा(बा)धनमप्यत्रार्थे न०।

वान * न० वन-घञ्। शुष्कफले। शुष्के त्रि०। वनस्येदं समूहो वा अण्। वनसम्बन्धिनि त्रि०। तत्सङ्घे न०।

वानप्रस्थ * पु० वाने वनसमूहे प्रतिष्ठति स्था क। मधूकवृक्षे, पलाशवृक्षे च। प्रस्थ एव स्वार्थे अण्। वनगमनस्याश्रमाप्युपदा पठितम् "अपत्यस्यापत्यं दृष्ट्वा... पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" इत्युक्ते आश्रमभेदे। [स्वनामख्याते पशुभेदे।

वानर * पु० स्त्री० वानसम्बन्धि फलादिकं राति गृह्णाति रा-क।

वानरप्रिय * पु० ६त०। क्षीरिवृक्षे।

वानराघात * पु० वानराणामाघातो यत्र। लोध्रवृक्षे।

वानरी * स्त्री० वानरस्य प्रिया भक्ष्यत्वात् अण् ङीप्। शूकशिम्ब्याम्। वानर+स्त्रियां ङीप्। वानरयोषिति।

वानरेन्द्र * पु० वानर इन्द्र इव। सुग्रीवे। ६त०। वानरनाथादयोऽप्यत्र। [भेदे।

वानल * पु० वानं वनभावं निविडतां लाति ला-क। (वाबुई तुल

वानस्पत्य * पु० वनस्पतेरिदम् प्रतिरूपः पुष्पात्फलजननात्। पुष्पजातफलके आम्रादौ वृक्षे।

वानायु ० पु० वनायुदेशे (काबुल)।

वानायुज * पु० वानायुदेशे जायते जन-ड। घोटकभेदे अश्वे)।

वारबाण * पु॰ न॰ वार्य्यते इ-षुस् वारो बाण्यो बाणो यस्य। कवचे।
वारवाणि ० स्त्री॰ वारं समूहं वणते वण-इण् वा ङीप्। वेश्यायाम्।
वारांनिधि * पु॰ वारां जलराशीनां निधिराधारः नि+धा-कि अलुक् समा॰। समुद्रे। [काशीनगरे। वराणस्यप्यत्र।
वाराणसी ० स्त्री॰ वरणा च असी च सीमात्वेनास्त्यस्याः अण् पृ॰
वाराह * पु॰ वराहस्येदं प्रियत्वात् अण्। महापिण्डीतक वृक्षे। वराहसम्बन्धिनि त्रि॰। [ङीप्। चर्मगन्धायाम्।
वाराहकर्णी * स्त्री॰ वराहस्यायं वाराह इव कर्णः पत्रमस्याः
वाराहपत्री * स्त्री॰ वाराहस्तत्कर्ण इव पत्रमस्याः ङीप्। अश्व-गन्धायाम्।
वाराहाङ्गी ० स्त्री॰ वाराहमिवाङ्गमस्याः ङीप्। दन्तीवृक्षे।
वाराही * स्त्री॰ वराहस्येयमण् ङीप्। अष्टमातृकामध्ये वराहमातरि, "वाराही नारसिंही च" इति श्यामास्तवः। वराहक्रान्तायाम्, वराहयोषिति च।
वारि ० न॰ वृ-इञ्। जले, ह्रीवेरे च। वार्य्यतेऽनया वृ-णिच्-इञ् वा ङीप्। गजबन्धन्याम् "वार्य्यर्गलाभङ्ग इव प्रवृत्तः" इति रघुः। वाचि, सरस्वत्याम् च स्त्री॰।
वारिकण्टक * पु॰ न॰ वारिणः कण्टक इव। शृङ्गाटके।
वारिकर्णी * स्त्री॰ वारिणि कर्ण इव पत्रमस्याः ङीप्। कुम्भ्याम् (पाना)। स्वार्थे कन्। तत्रैव। [कन् तत्रैव।
वारिकुब्ज * पु॰ वारिणि कुब्ज इव वक्राकारत्वात्। शृङ्गाटके। स्वार्थे
वारिचत्वर * पु॰ वारीव चत्वररूपमस्याधारत्वात्। कुम्भिकायाम्।
वारिचर ० पु॰ स्त्री॰ वारिषु चरति चर-अच्। मत्स्ये। जलचरज-न्तुमात्रे त्रि॰। [शैवाले।
वारिचामर ० न॰ वारिणश्चामरमिव शोभाहेतुत्वाकारत्वात्।
रिज * न॰ वारिणि जायते जन ड। पद्मे, लवङ्गे, गौरसुवर्णे, लवणभेदे च। शङ्खे, शम्बूके च पु॰।
रितस्कर * पु॰ वारिणस्तस्कर इवापहारकत्वात्। सूर्य्ये, मेघे च।
रित्रा * स्त्री॰ वारिणस्त्रायते त्रै-क। छत्रे।
रिद * न॰ वारि ददाति दा-क। मेघे, मुस्तके च। जलदातरि त्रि॰। [वारिनिध्यादयोऽप्यत्र।
रिधि * पु॰ वारीणि धीयन्तेऽस्मिन् धा कि इत॰। समुद्रे।
रिपर्णी ० स्त्री॰ वारिणि पर्णान्यस्याः ङीप्। कुम्भिकायाम् (पाना)। [लुच्। कुम्भिकायाम् (पाना)।
रिपालिका * स्त्री॰ वारीणि पालयति पालि-ण्वुल् पाल-
रिपृश्नी * स्त्री॰ वारिणि पृश्नि पर्णमस्याः ङीप्। कुम्भिकायाम् (पाना)।
रिबदरा * स्त्री॰ वारिसमीपभवा बदरीव। प्राचीनामलके।
रिबालक * न॰ वारिणो बालक इव। ह्रीवेरे।
रिभव * न॰ वारिणि भवति भू अच्। स्रोतोऽञ्जने।
रिमसि * पु॰ वारि जलं मसिरिव नीलवर्णोत्पादकं यस्य। मेघे।

वारिमूली * स्त्री॰ वारिणि मूलमस्याः ङीप्। कुम्भ्याम् (पाना)।
वारिरथ * पु॰ वारिणि रथ इव गमनसाधनम्। भेलके।
वारिराशि ० पु॰ वारीणां राशयोऽत्र। समुद्रे।
वारिरुह * न॰ वारिणि रोहति रुह-क। पद्मे। जलजातमात्रे त्रि॰। [हि मुखे वारिनिस्रावः।
वारिवदन * न॰ वारिपूर्णं वदनं यस्मात्। प्राचीनामलके तरौ फले
वारिवर * न॰ वारि वृणोति वृ+अच्। करमर्दके।
वारिवल्लभा * स्त्री॰ वारि वल्लभमस्याः उत्पत्तिहेतुत्वात्। विदार्य्याम्।
वारिवाह ० पु॰ वारीणि वहति वह-अण्। मेघे।
वारिश * पु॰ वारिणि समुद्रजले शेते शी+ड। विष्णौ।
वारीश * पु॰ ६त॰। समुद्रे, वरुणे च। वारिनाथादयोऽप्यत्र।
वारुण * न॰ वरुणस्येदमण्। जले। वरुणसम्बन्धिनि त्रि॰।
वारुणि * पु॰ वरुणस्यापत्यम् इञ्। अगस्त्यमुनौ कुम्भजातत्वात् मैत्रावरुणापत्यत्वाच्च तथात्वम्।
वारुणी * स्त्री॰ वरुणो देवताऽस्य वरुणस्येदं वा अण् ङीप्। पश्चिम-दिशि, मदिरायाम्, शतभिषानक्षत्रे, दूर्वायां, गण्डदूर्वायाम्, इन्द्रवारुण्यां, शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदश्यां, वरुण-स्त्रियाञ्च।
वारेन्द्री * स्त्री॰ देशभेदे (वारेन्द्रभूमि), (राजसाही) वङ्गदेशस्थदेशे।
वार्त्त * न॰ वृत्ति+अण्। आरोग्ये। निरामये, वृत्तिजीविनि च त्रि॰। दुर्गायां, कृषिकर्मणि, वृत्तौ, जनश्रुतौ, वृत्तान्ते, काम-वर्द्धके भूतनाशने च स्त्री॰ "अस्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन। मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता" इति भारतम्।
वार्त्ताक * पु॰ वार्त्तमारोग्यमाकयति गमयति आ-कक-णिच्-अण्। वार्त्ताकी। स्त्रियामपि गौरादि ङीष्। पु॰ स्वार्थे कन् वार्त्ताकुर-प्यत्र स्त्री॰ "वार्त्ताकुरेषा गुच्छफलद्रुमा" इति वैद्यकम्।
वार्त्तावह * पु॰ वार्त्तामावहति आ+वह-अच्। कृषिवाणिज्या-जीविनि वणिग्भेदे। संवादवाहके त्रि॰।
वार्त्तिक * न॰ वृत्तिग्रन्थेन कृतो ग्रन्थः ठञ्। "उक्तानुक्तदुरुक्तार्थ-व्यक्तकारि तु वार्त्तिकम्" इत्युक्ते सूत्रानुक्तादर्थादिप्रकाशके ग्रन्थभेदे।
वार्दर * न॰ वारि जलाय दीर्य्यते दॄ अप्। दक्षिणावर्त्तशङ्खे, वाक्यविशेषायाम्, कृष्णजीरके, कृमिजे, आम्रबीजे च। वारि दरम्। जले। [कृष्णमार्गे कर्पे च।
वार्द्धक ० न॰ वृद्धानां समूहः तस्य भावः कर्म वा वुञ्। वृद्धसमूहे,
वार्द्धक्य * न॰ वृद्धस्य भावः कर्म वा ष्यञ् वुञ् च। वृद्धत्वे।
वार्द्धि * पु॰ वारि धीयतेऽस्मिन् धा-कि उप॰। समुद्रे।
वार्द्धिभव * न॰ वार्द्धौ समुद्रे भवति भू-अच्। [illegible]।
वार्द्धुषि ० पु॰ वृद्ध्या जीवति इन् वृद्धेर्वार्द्धुषिभावः। वृद्ध्याजीवे। स्वार्थे कन्। तत्रैव।

स्थाने, वसतौ च पु०।

वास्तु * पु० वस-तुण्। वासयोग्यभूमौ, स्वनामख्याते शाके च। स्वार्थे कन्। शाकभेदे। [गौरा० ङीष्।

वास्तुक * न० वास्तु-कन् पु० दीर्घः। वास्तुशाके। चिल्लीशाके स्त्री०

वास्तेय * त्रि० वस्तेरिदं वस्तये हितं वा ढञ्। वस्तिसम्बन्धिनि, वासयोग्ये च।

वास्तोष्पति * पु० ६त० अलुक्समा०। इन्द्रे, वास्तुभूमिपतौ च।

वास्त्र * पु० वस्त्रेणावृतो रथः अण्। वस्त्रेण समावृते रथे।

वास्पेय ० पु० वास्पाय हितं ढक्। नागकेशरे। [पचादिच्।

वाह् * यत्ने भ्वादि० आत्म० अक० सेट् इदित् न ङ्खुः। वाहते

वाह * पु० उह्यतेऽनेन भूमौ वा गवादिना वा वह-घञ्। अश्वे, "वाहो भारचतुष्टयम्" इत्युक्ते परिमाणभेदे च।

वाहद्विषत् ० पु० वाह द्वेष्टि द्विष-शतृ ६त०। महिषे। वाहरिपवा-दयोऽप्यत्र।

वाहन * न० वाह्यतेऽनेन वह-णिच्-ल्युट्। रथादौ याने।

वाहस * पु० वाह गतिं स्यति षो-क। अजगरे, सुनिषण्णके (सुसनि) शाके च। [गजस्कन्धस्याधोभागे।

वाहित्थ ० न० वहन्तीति णिनि वाही तस्मिन् तिष्ठति स्था-क पु०।

वाहिनी * स्त्री० वाहोऽस्त्यस्याः इति ङीप्। सेनायाम्। वहति वह-णिनि। नद्याम् "वाहिन्या पार्श्वमेता न स्रवति" इति काव्य-प्रकाशः।

वाहिनीपति * पु० ६त०। सेनापतौ, समुद्रे च।

वाहीक * पु० वह-ईकण्। जातिभेदे (जाट)। गोबलीवर्द इति अलङ्कारः। देशभेदे च। [भुजाकारे रेखाभेदे च।

वाहु ० पु० वह-उण्। भुजे, शङ्कुरभेदे, क्षेत्रस्थरेखायाम् समकोणस्थरेखारूपे

वाहुमूल * न० ६त०। भुजद्वयस्य मूले कक्षरूपे अङ्गे।

वाहुवार ० पु० वाहुं वारयति वृ णिच् अण्। श्लेष्मातकवृक्षे।

वाह्य * न० वाह्यतेऽनेन वह ण्यत्। बहिर्भवः। अश्वादौ याने, यानके च। बहिर्भवः ष्यञ् टिलोपः, बहिर्भवे त्रि०।

वाह्येन्द्रिय * न० बाह्यपदार्थानां शब्दादीनां ग्रहणयोग्यमिन्द्रियम्। शब्दादिग्राहके श्रोत्रादौ इन्द्रिये। [कुङ्कुमे, हिङ्गुनि न०।

वाह्लि(ह्ली)क * पु०। वह-लिक् स्वार्थे कन्। देशभेदे। तद्देशजाते

वि * अव्य० वा-क्वि। नियोगे, विशेषे निश्चये, असहने, निग्रहे, हेतौ, अध्यासे, ईषदर्थे, परिभवे, दृष्टौ, अवलम्बने, ज्ञाने, गतौ, आलस्ये, पालने च। विहगे पु०। [पूर्णे तत्सिन्।

विंश * त्रि० विंशतेः पूरणः विंशति+डट्। येन विंशतिसङ्ख्या

विंशक * न० विंशतिरवयवाः कन्। विंशतिसङ्ख्यायाम्। विंशति-रधिका दीयतेऽस्मिन् शते आदौ मासौ डेविंशकम्। अतिशते विंशत्यधिकमासादौ "आमुद्रा विंशकं शतम्" इति स्मृतिः।

विंशति * स्त्री० द्वे दशतौ नि०। विंशतिसङ्ख्यायां, तत्सङ्ख्यावति च। एक व०

विंशमय इति।

विंशतिक * त्रि० विंशतेर्योग्यः। विंशतियोग्ये। [ङीप्।

विंशतितम * त्रि० विंशतेः पूरणः तमट्। विंशशब्दार्थे स्त्रियां

विकङ्कट * पु० वि+ककि-अटन्। गोक्षुरे।

विकङ्कत * पु० वि+ककि-अतच्। (वइँची) वृक्षे, ग्रन्थिलाख्यायाम्।

विकच * पु० विगतः कचो यस्य। क्षपणे बुद्धसन्न्यासिनि। विशिष्टः कचो यत्र। ध्वजे केतौ। वि+कच-अच्। विकसिते ६० केशशून्ये त्रि०। महाश्रावणिकायां स्त्री०।

विकट ० पु० वि+कट अच्। विस्फोटके, भाक्षरण्डवृक्षे च। वि+कटच्। विशाले, विकृते, सुन्दरे, दन्तुरे च त्रि०।

विकण्टक ० पु० विगतः कण्टकोऽस्य। यवासे। तद्धीने त्रि०।

विकत्थन ० न० वि+कत्थ-ल्युट्। आत्मश्लाघायाम्। युच्। तत्क-र्तरि त्रि०।

विकर्त्तन ० पु० वि+कृत-ल्यु। सूर्ये, अर्कवृक्षे च।

विकर्मस्थ * पु० त्रि० विकर्मणि निन्दिताचारे तिष्ठति स्था+क। कुत्सिताचाररते। [हीने च।

विकल * त्रि० विगता कला यस्य। विह्वले, स्वभावहीने, कला-

विकलाङ्ग * त्रि० स्वभावहीनमङ्गमस्य। स्वभावतो न्यूनाधिकाङ्गे।

विकल्प * पु० विभिन्नः कल्पः। भ्रान्तिज्ञाने कल्पने, विविधकल्पने, संशयारोपणे, पक्षतः प्राप्तौ च। [वाचाले।

विकस्व(श्व)र ० त्रि० वि+कस(श)-वरच्। प्रकाशशीले, स्पष्टकण्ठ-

विकषा * स्त्री० विशेषेण कषत्यसौ कष-अच् टाप्। मञ्जिष्ठायाम्।

विक(शि)सित * त्रि० वि+कस(श)+क्त। प्रकाशयुक्ते।

विकार * पु० वि+कृ-घञ्। प्रकृतेरन्यथाभावे परिणामे।

विकाल * पु० विरुद्धः देवपैत्रादिकर्मानर्हः कालः। दिवसे काल-चतुर्थभागे, दिनावसानकाले।

विकाश * न० विरुद्धः काशः। रहसि, विशिष्टे काशे, प्रकाशे च।

विकाशिन् * त्रि० वि+काश-णिनि। प्रकाशशीले विकस्वरे।

विकिर * पु० वि+कॄ-क। विहगे, कूपे च। विकीर्यते यद्भुवं च। विघ्नोपशमनार्थे अन्नादिप्रक्षेपणसाधने।

विकिरण * न० वि+कॄ+ल्युट्। वि० इतस्ततः प्रसरणम्। क्षेपणे, हिंसने, ज्ञाने च। अर्कवृक्षे पु०। ६त० विक्षेपके त्रि०।

विकीर्ण * त्रि० वि-कॄ-क्त। विक्षिप्ते। [विक्षिप्तार्थे च।

विकुर्वाण * त्रि० वि+कृ शानच्

विकुक्षि * पु० कुक्षिः वंशे इक्ष्वाकुपुत्रभेदे शशादे।

विकृत * त्रि० वि+कृ क्त। रोगिणि, अनिर्वाच्ये, वीभत्से च।

विकृति * स्त्री० वि+कृ+क्तिन्। विकारशब्दार्थे।

विकृष्ट * पु० वि+कृ णिच्-ईष्ट्। रोगे, विकारे च।

विक्रम * पु० विशेषेण क्रमणं वि+क्रम विष्णौ, विक्रमादित्यनृपे।

चरणे, शौर्य्यातिशये, सामर्थ्ये च। पद्धतिमध्ये "लवणं मधु गव्यञ्च मद्यार्घं विक्रमे प्रिये"। इत्युक्तलक्षणे वत्सरभेदे च।
विक्रमादित्य * पु॰ विक्रमेणादित्य इव। स्वनामख्याते नृपभेदे। विक्रमार्कोऽप्यत्र। [त्रि॰।
विक्रमिन् * पु॰ वि+क्रम+णिनि। सिंहे, विष्णौ च। विक्रमयुक्ते
विक्रय * पु॰ वि+क्री+अच्। मूल्यग्रहणेन परस्वत्वापादके व्यापारे।
विक्रयानुशय * पु॰ विक्रयस्यानुशयः पश्चात्तापः। विक्रीतपदार्थस्य परावृत्तिफलके अनुतापे।
विक्रयिक * पु॰ विक्रयः अस्त्यस्य ठन्। विक्रेतरि।
विक्रयिन् * त्रि॰ वि+क्री-णिनि। विक्रयकर्त्तरि।
विक्रान्त * पु॰ वि+क्रम+क्त। सिंहे, शूरे च। भावे क्त। विक्रमे।
विक्रिया * स्त्री॰ वि+कृ-श। विकारे, अन्यथास्थितस्य वस्तुनोऽन्यथापरिणामे च।
विक्रेय * त्रि॰ वि+क्री-यत्। विक्रययोग्ये पदार्थे।
विक्लव * त्रि॰ वि+क्लु-अच्। व्याकुलीभावे।
विक्लिन्न * त्रि॰ वि+क्लिद-क्त। आर्द्रे, शीर्णे, जीर्णे च।
विक्षाव * पु॰ वि+क्षु-घञ्। शब्दे, कासादिरोगक्षतशब्दे च।
विक्षीर * पु॰ विशिष्टं क्षीरमस्य। अर्कवृक्षे। विगतक्षीरे त्रि॰।
विक्षेप * पु॰ वि+क्षिप-घञ्। त्यागे, प्रेरणे, दूरीकरणे च।
विक्षेपशक्ति * स्त्री॰ विक्षेपस्य दूरीकरणस्य जनिका शक्तिः। वेदान्तोक्ते अविद्याशक्तिभेदे। [विख्योऽप्यत्र त्रि॰।
विख * त्रि॰ विगता नासिका यस्य खादेशः। गतनासिके। ख्यादेश।
विख्यात * त्रि॰ विशेषेण ख्यातः प्रसिद्धः वि+ख्या-क्त। प्रसिद्धे।
विगणन * न॰ विशेषेण गणनम् गण-ल्युट्। ऋणशोधनार्थे सङ्ख्यापने।
विगत * त्रि॰ वि+गम-क्त। प्रभादरहिते विशेषगते, अपगते, च।
विगतार्त्तवा * स्त्री॰ विगतमार्त्तवं रजो यस्याः। गतरजस्कायां स्त्रियाम्।
विगन्धक * पु॰ विरुद्धः गन्धोऽस्य कप्। इङ्गुदीवृक्षे। त्वपुत्रायां (गन्धा) स्त्री॰ गौ॰ ङीप्। स्वार्थे कन् तत्रैव।
विगम * पु॰ वि+गम-घञ्। नाशे, अपाये च।
विगर्हण * न॰ वि+गर्ह+ल्यु। निन्दने। [निन्दायाम्।
विगर्हित * त्रि॰ वि+गर्ह-क्त। निन्दिते, निषिद्धे च। भावे क्त।
विगाढ * त्रि॰ वि+गाह-क्त। स्नाते, कृतावगाहने च।
विगान * न॰ वि+गै+ल्युट्। निन्दायाम्।
विगीत * त्रि॰ वि+गै-क्त। निन्दिते।
विगीति * स्त्री॰ वि+गै क्तिन्। निन्दायाम्।
विगुण * त्रि॰ विरुद्धा गुणोऽस्य। गुणरहिते।
विगूढ * त्रि॰ वि+गुह क्त। गर्हिते, गुप्ते च। [वाक्यस्थे पदे च।
विगृहीत * त्रि॰ वि+ग्रह-क्त। गृहीते, व्याकरणोक्ते विग्रह-
विग्र * त्रि॰ विगता नासिकाऽस्य ग्रादेशः। विगतनासिके।

विग्रह * पु॰ वि+ग्रह-अप्। देहे, विभागे, युद्धे, समासादिवृत्ति समानार्थकवाक्यभेदे, विशेषज्ञाने च। [अत्र शा
विघटिका * स्त्री॰ विभागः घटिकायाः। घटिकाषष्टिभागे इ
विघटित * त्रि॰ वि+घट-क्त। वियोजिते विशेषेण रचिते च।
विघट्टित * त्रि॰ वि+घट्ट-क्त। चालिते, वियोजिते च। [त्रि
विघस * पु॰ वि+अद-घञ्। भोजनशेषे, आहारे च। विघ
विघसाशिन् * त्रि॰ विघसं देवतादिदत्तावशेषमश्नाति अश-णिनि देवपैत्रकार्य्यानन्तरं तदवशिष्टभोजिनि।
विघात * पु॰ वि+हन-क्त। व्याघाते, आघाते च।
विघातिन् * त्रि॰ वि+हन घिनुण। निवारके, नाशके, नष्ट "नित्यवाय बल् निमित्तौ विघाती" इति व्याकरणम्। क विघातकोऽप्यत्र।
विघ्न * वि+हन-क। व्याघाते, अन्तराये, कर्म्मपाकफलनाशके।
विघ्ननाशक * पु॰ ६त॰। गणेशे। विघ्नविनाशनादयोऽप्यत्र।
विघ्नराज * पु॰ विघ्ने राजते अच्। गणेशे। विघ्नेशादयोऽप्यत्र।
विघ्नहारिन् * पु॰ विघ्नं हरति हृ-णिनि। गणेशे।
विघ्नित * त्रि॰ विघ्नो जातोऽस्य इतच्। जातविघ्ने।
विघ्नेशानकान्ता * स्त्री॰ ६त॰। श्वेतदूर्वायाम्।
विच * पृथक्करणे रु॰ जु॰ च उ॰ सक॰ अनिट्। विनक्ति विवि विङ्क्ते विविक्ते। अविचत् अवैचीत्।
विचकिल * पु॰ विच+क किल-क कर्म॰। मदनवृक्षे।
विचक्षण * पु॰ वि+चक्ष+ल्यु। पण्डिते। नागदन्त्यां स्त्री॰ टाप्
विचयन * न॰ वि-चि-ल्युट्। अन्वेषणे, पुष्पादिचयने च।
विचर्चिका * स्त्री वि+चर्च+ण्वुल्। पामनि रोगभेदे।
विचार * पु॰ वि+चर-घञ्। तत्त्वनिर्णये, तदनुगुणे वाक्यस्तोमे च
विचारण * न॰ वि+चर-णिच्-ल्युट्। मीमांसायाम्। युच्। त स्त्री॰।
विचि(ची) * पु॰ स्त्री॰ विच-इक्। तरङ्गे। स्त्रीत्वपक्षे वा ङीप्।
विचिकित्सा * स्त्री॰ वि+कित स्वार्थे सन्-अ। सन्देहे।
विचित्र * न॰ विशेषेण चित्रम्। कर्बुरवर्णे। तद्वति, आश्चर्य त्रि॰। स्वार्थे कन्। भुजङ्गवृक्षे पु॰।
विचित्रवीर्य * पु॰ शान्तनुनृपात्मजे नृपभेदे। [दिवे त्रि॰।
विचित्राङ्ग * पु॰ विचित्रमङ्गं यस्य। (चिते) व्याघ्रभेदे, मयूरे
विचेतस् * त्रि॰ विरुद्ध दुष्ट विशिष्टं वा चेतो यस्य। दुष्टचित्ते विशिष्टचित्ते च। [क्त। विशेषेण चेष्टायाम्
विचेष्टित * त्रि॰ विगतं चेष्टितमस्य। चेष्टाशून्ये। वि+चेष्ट+भावे
विच्छ * दीप्तौ चुरा॰ उभ॰ सक॰ सेट्। विच्छयति ते अविविच्छ त।
विच्छ * गतौ तुदा॰ पर॰ आयपक्षे उभ॰ सक॰ सेट्। विच्छति विच्छायति विच्छति। अविच्छायीत् अविच्छायिष्ट अविच्छीत्।
विच्छन्दक * पु॰ विशिष्टः छन्दो यत्र कप्। ईश्वरगृहभेदे।

विच्छाय * न॰ वीनां पक्षिणां छाया नपुंसकत्वम्। पक्षिसमूहच्छायायाम्। विगता छाया यस्य। छायारहिते त्रि॰।

विच्छित्ति * स्त्री॰ वि+छिद क्तिन्। अङ्गरागे, हारभेदे, छेदे, विनाशे, विच्छेदे, स्त्रीणां चेष्टाभेदे च। [छेदने न॰।

विच्छिन्न * त्रि॰ वि+छिद-क्त। विभक्ते, समालब्धे च। भावे-क्त।

विच्छेद * पु॰ वि+छिद-घञ्। वियोगे, सन्ततिराहित्ये, विभागे च।

विज ॰ पृथक्करणे जु॰ उभ॰ सक॰ अनिट्। वेवेक्ति वेविक्ते अविजत् अविक्षीत् अविक्त।

विज * भये कम्पे च रु॰ पर॰ अक॰ सेट्। विनक्ति अविजीत्।

विज * भये कम्पे च तु॰ आत्म॰ अक॰ अनिट्। विजते अविजिष्ट। क्त विग्नः।

विजन * त्रि॰ विगतो जनो यस्मात्। निर्जने।

विजनन * न॰ वि+जन-ल्युट्। गर्भमोचने, प्रसवे, उद्भवे च।

विजय * पु॰ वि+जि+कर्त्तरि अच्। अर्जुने, विमाने, यमे च। भावे अच्। जये, परिभवपूर्वकग्रहणे च।

विजयकुञ्जर ॰ पु॰ विजयाय कुञ्जरः। राजवाहनगजे।

विजया * स्त्री॰ आश्विनशुक्लपक्षीयदशम्याम्, उमायाः सखीभेदे, "कथयतु विजया" इति मुद्राराक्षसम्। दुर्गायां, जयन्त्यां, शेफालिकायां, मञ्जिष्ठायां, शमीभेदे, अग्निमन्थे, भङ्गायाम् (सिद्धि), श्रवणद्वादशीमध्ये "यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत्। तदा सा तु महापुण्या द्वादशी विजया स्मृता" इत्युक्ते द्वादशीभेदे, "शुक्लपक्षस्य सप्तम्यां सूर्यवारो यदा भवेत्। सप्तमी विजया नाम" इत्युक्ते सप्तमीभेदे च। [लक्ष्मणि।

विजातीय * त्रि॰ विभिन्नां जातिं धर्ममर्हति छ। विभिन्नधर्मावि-

विजिगीषा ॰ स्त्री॰ विजेतुमिच्छा वि+जि-सन्-अ। स्वोदरपूरणेच्छया निन्दनीयकर्मादौ प्रवृत्तौ सतिस्वापकर्षणे, विजयेच्छायाञ्च। उ। विजिगीषुः। जयेच्छावति त्रि॰।

विजिन * न॰ विज-इन किच्च। वने हृक्षसमूहे।

विजुल * पु॰ विज-उलच् किच्च। शाल्मलीकन्दे।

विजृम्भण * न॰ वि-जृम्भि-ल्युट्। विकाशे, मुखविकाशहेतुभूते वायुव्यापारभेदे (हाइतोला)।

विजृम्भित * त्रि॰ वि+जृम्भि-क्त। विकसिते। भावे क्त। प्रकाशे।

विज्जुल * न॰ विज+उलच् जुट् च। त्वचि (दारचिनि)।

विज्ञ * पु॰ विशेषेण जानाति ज्ञा क। प्रवीणे, पण्डिते च।

विज्ञात * त्रि॰ वि+ज्ञा-क्त। ख्याते, ज्ञाते च।

विज्ञान ॰ न॰ वि+ज्ञा ल्युट्। ज्ञाने, कर्मणि, शिल्पादिज्ञाने, वेदान्तोक्ते चित्तवृत्तिभेदे च। [निश्चयनामके बुद्धिवृत्तिभेदे।

विज्ञानमयकोष * पु॰ विज्ञानात्मकः कोष इवावरकत्वात्। ज्ञाने-

विज्ञानिक * त्रि॰ विज्ञानमस्त्यस्य ठन्। विज्ञानयुक्ते।

विट * आक्रोशे सक॰ स्वने अक॰ भ्वादि॰ पर॰ सेट्। वेटति अवेटीत्।

विट * पु॰ विट-क। षिड्गे, जारे, शृङ्गाररसनायकानुचरे धूर्त्ते, "विट! विटपममुम्" इति माघः। पर्वतभेदे, लवणभेदे, खदिरभेदे, नारङ्गवृक्षे, मूषिके च।

विटङ्क * न॰ वि-टकि-घञ्। कपोतपालिकायां, प्रासादाग्रस्थे काष्ठनिर्मिते कपोतावासस्थाने (पायरावोप)।

विटप * पु॰ न॰। विटं विस्तारं पाति पा-क। शाखायां, पल्लवविस्तारे, स्तम्बे, पल्लवे च। विटपालके त्रि॰ "विट! विटपममुं ददस्व" इति माघः।

विटपिन् * पु॰ विटप+अस्त्यर्थे इनि। वृक्षे, वटवृक्षे च।

विट्लवण ॰ न॰ विडिव लवणम् पृ॰। विड्लवणे।

विटि(टी) * स्त्री॰ विट-कि वा ङीप्। पीतचन्दने।

विट्खदिर * पु॰ विडिव दुर्गन्धः खदिरः। (गुयेबावला) वृक्षे।

विट्चर * पु॰ विषि विष्ठाया चरति चर-अच्। ग्राम्यशूकरे।

विट्पति ॰ पु॰ विशते विश-क्विप् विशः कन्यायाः पतिः। जामातरि। [भेदे।

विट्सारिका ॰ स्त्री॰ विडिव दुर्गन्धः सारिका। (गुयेसालिक) पक्षि-

विड ॰ आक्रोशे भ्वादि॰ पर॰ सक॰ सेट्। वेडति अवेडीत्।

विड ॰ न॰ विड+क। लवणभेदे।

विडङ्ग * पु॰ न॰ विड-अङ्गच्। स्वनामख्याते औषधभेदे। अभिज्ञे त्रि॰।

विडम्बन * न॰ वि-डवि ल्युट्। तिरस्करणे अनुकरणे, च। युच्। विडम्बनाप्यत्र स्त्री॰। "इयञ्च तस्या पुरतो विडम्बना" इति कु॰।

विडाल * पु॰ विड-कालन्। स्वनामख्याते पशुभेदे, नेत्रपिण्डे, नयनौषधभेदे च। विडाली स्त्री॰ ङीप्। स्वार्थे कन्। हरिताले न॰। स्वार्थे कन्। विडाले पशौ पु॰।

विडीन * न॰ वि+डी-क्त। पक्षिणां गतिभेदे।

विडुल ॰ पु॰ विड कुलच्। वेतसवृक्षे। [पौत्। इन्द्रे।

वि(डौ)डोजस् ॰ पु॰ विष क्विप् विट् व्यापकमोजो यस्य पृ॰ वा

विड्गन्ध * न॰ विष इव गन्धोऽस्य। विड्लवणे।

विड्लवण * न॰ विडिव दुर्गन्धं लवणम्। स्वनामख्याते लवणभेदे। [विड्वराहवत्" इति मनुः।

विड्वराह * पु॰ विट्प्रियो वराहः शाक॰। ग्राम्यशूकरे "श्वसृग

वितंस * पु॰ वि+तसु-घञ्। पक्षिणां बन्धनसाधने रज्ज्वादौ।

वितण्डा * स्त्री॰ वि-तडि-अच्। स्वपक्षस्थापनराहित्येन परपक्षमात्र-निराकरणे कथाभेदे, करवीरशाके च। [तथैव।

वितथ * त्रि॰ वि+तन-क्थन्। मिथ्याभूते पदार्थे। स्वार्थे यत्।

वितद्रु * स्त्री॰ वि+तन-रु द्रुङ् च। पञ्जाबदेशस्थे नदीभेदे।

वितरण * न॰ वि+तॄ-ल्युट्। दाने।

वितर्क * पु॰ वि+तर्क घञ्। सन्देहे, ऊहे च।

वितर्दि * स्त्री॰ वि+तर्द इन् वा ङीप्। वेदिकायाम्। पृ॰।

वितर्द्दिरप्यत्र स्त्री॰ वा ङीप्।

वितल * न॰ विशेषेण तलम्। पातालभेदे।

वितस्ति * पु॰ स्त्री॰ वि+तस-क्तिच्। द्वादशाङ्गुलपरिमाणे विस्तृतमकनिष्ठावध्यङ्गुष्ठान्तपरिमाणे। [चन्द्रातपे पु॰ न॰।

वितान * न॰ वि+तन-घञ्। वृत्तिभेदे, अवसरे, यज्ञे, विस्तारे च।

वितानमूलक * न॰ वितानं विस्तीर्णं मूलमस्य कप्। उशीरे।

वितुन्न * न॰ वि-तुद क्त। सुनिषण्णके। संज्ञायां कन्। धान्ये।

वित्त * त्यागे अद॰ चुरा॰ उभ॰ सक॰ सेट्। वित्तयति ते अवि-वित्तत् त। [विचारिते, ज्ञाते, लब्धे च त्रि॰।

वित्त * न॰ वित्यते त्यज्यते वित्त-घञ्। धने। विद+क्त। ख्याते,

वित्ति * स्त्री॰ विद-क्तिन्। ज्ञाने, लाभे, विचारे च।

वित्तेश * पु॰ ६त॰। कुवेरे। [अवेविष्ट।

विथ * याचने भ्वादि॰ आत्म॰ द्विक॰ सेट् ऋदित् न ह्रस्वः। वेथते

विद * सुखाद्यनुभवे आख्याने वादे च सक॰ वासे अक॰ चुरा॰ उभ॰ सेट्। वेदयति ते अवीविदत् त। [अवित्त।

विद * लाभे तुदा॰ उभ॰ सक॰ अनिट्। विन्दति ते अविदत्

विद * मीमांसे रुधा॰ आत्म॰ सक॰ अनिट्। विन्त्ते अवित्त।

विद * भावे, दिवा॰ आत्म॰ अक॰ अनिट्। विद्यते अवित्त।

विद * ज्ञाने अदा॰ पर॰ सक॰ सेट्। वेत्ति वेद। अवेदीत्।

विदग्ध * त्रि॰ वि+दह-क्त। नागरे, निपुणे, पण्डिते च। नायिका-भेदे स्त्री॰। विशेषेण दग्धे त्रि॰।

विद् * पु॰ विद+क्विप्। पण्डिते, बुधग्रहे च।

विद * पु विद-क। पण्डिते, बुधग्रहे च।

विदथ * पु॰ विद-कथन्। योगिनि, कृतिनि च।

विदर * न॰ वि+दृ अप। (फणिमनसा) वृक्षे। विदलीकरणे पु॰।

विदर्भ * पु॰ स्त्री॰ विगताः दर्भाः कुशा यतः। कुण्डिननगरे (नागपुर)।

विदल * न॰ विशेषेण दल्यते दल-घञर्थे क। द्विधाभूते दाडिम-वल्के, वंशादिपात्रे च। कनायादौ, रक्तकाञ्चने, पिष्टके च पु॰। विदलि (निर्लोहि) स्त्री॰। दलशून्ये त्रि॰।

विदा * स्त्री॰ विद अङ्। ज्ञाने, बुद्धौ च।

विदार * पु॰ वि+दृ घञ्। विदारणे, जलोच्छ्वासे च।

विदारक * पु॰ वि+दृ ण्वुल्। जलमध्यस्थलनकमिलादौ। विदारण-कर्त्तरि त्रि॰। [illegible] गर्भे न॰।

विदारण * न॰ वि+दृ णिच् ल्युट्। भेदने, मारणे, विडम्बे च। युद्धे पु॰ स्त्री॰। कर्णिकारवृक्षे पु॰।

विदारी * स्त्री॰। विदारयति अच् गौ॰ ङीष्। शालपर्ण्याम्। (शालपान) भूमिकुष्माण्डे च। [शालपर्णीम् (शालपान)।

विदारीगन्धा * स्त्री॰ विदार्या भूमिकुष्माण्डस्येव गन्धो यस्याः।

विदारित * त्रि॰ वि+दृ णिच् क्त। [illegible]।

विदित * त्रि॰ विद क्त। ज्ञाते, वार्त्तिके च। भावे क्त। विख्यातौ, उपगमे, ज्ञाने च। तदस्यास्ति अच्। ज्ञातरि। "विदितः समाययौ" इति भारविः।

विदिश् * स्त्री॰ विगता दिशम्। दिशोर्मध्ये (कोण)।

विदु * पु॰ विद+कु। हस्तिकुम्भमध्यभागे।

विदुर * त्रि॰ विद+कुरच्। नागरे, धीरे, ज्ञातरि च। कौरवाणां मन्त्रिणि दासीगर्भजाते धर्मावतारभेदे पु॰।

विदुल * पु॰ विद-कुलच्। वेतसे, जलवेतसे, गन्धद्रव्ये च।

विदूर * न॰ विशिष्टं दूरम्। अतिदूरे। तद्वति पदार्थे त्रि॰ "विदूरे केयूरे, कुरु" इति साहि॰ दर्प॰। वैदूर्य्यमणिसम्भवस्थाने पु॰ "विदूरभूमिर्नवमेघशब्दात्" इति कुमारः।

विदूरज * न॰ विदूरे देशभेदे जायते जन+ड। वैदूर्य्यमणौ।

विदूरथ * पु॰। सूर्य्यवंश्ये नृपभेदे। [मणिरुत्पद्यते।

विदूराद्रि * पु॰ विदूरे देशेऽद्रिः पर्वतः। पर्वतभेदे। यत्र वैदूर्य्य॰

विदूषक * पु॰ विदूषयति वि+दूष-णिच्-ण्वुल्। शृङ्गाररससहाय-भेदे। परनिन्दके त्रि॰। [सज्जनाना विदेशे" इत्युद्भटः।

विदेश * पु॰ विभिन्नो देशः। देशान्तरे, "भृत्याभावे भवति मरणं

विदेह * पु॰ विगतो देहः देहसम्बन्धो यस्य। जनकाख्ये नृपे, तद्देश्ये च। कैवल्यमुक्तियुते, देहसम्बन्धशून्ये च त्रि॰। मिथि-लायां स्त्री॰।

विदेहकैवल्य * न॰ कर्म॰। "न तस्य प्राणा ह्युत्क्रामन्ति इहैव सम-वलीयन्ते" इत्याद्युक्ते जीवन्मुक्तस्य देहपातनान्तरं निर्वाण-मोक्षे। [स्त्रीत्वमपि तत्रैव ङीप्।

विद्ध * त्रि॰ व्यध-क्त। छिद्रिते, क्षिप्ते, तुल्ये, बाधिते, ताडिते च।

विद्धकर्ण * पु॰ विद्धः कर्ण इव पत्रमस्य। (पाकनादि पाठायाम्।

विद्यमान * पु॰ विद-शानच्। वर्त्तमानकाले। तद्वृत्तौ पदार्थे त्रि॰।

विद्या * स्त्री॰ विद क्यप्। ज्ञाने। तत्त्वसाक्षात्कारे "विद्यया ऽमृतमश्नुते" इति श्रुतिः। दुर्गायां, गणिकारिकावृक्षे, तन्त्रोक्ते देवीमन्त्रे च। "तस्य विद्या न सिध्यति" इति शास्त्रान्तरः।

विद्याचन(ण) * त्रि॰ विद्यया ख्याते चन(ण)। विद्यया विख्याते।

विद्याचुञ्चु * पु॰ विद्यया विख्यातः चुञ्चु। विद्यया ख्याते।

विद्यादन * पु॰ विद्यायै ज्ञानाय दम्यतेऽसौ। भूर्जवृक्षे।

विद्यादान * न॰ ६त॰। अध्यापने, पुस्तकदाने च।

विद्याधन * न॰ विद्यया लब्धं धनम्। विद्यया लब्धं "उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकम्। विद्याधनन्तु तद्विद्यात्" इति "शिष्यादार्त्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्। विद्याधनन्तु तत् प्राहु"रिति "शिल्पेष्वपि हि धर्मोऽयम्" इत्युपक्रम्य "परं निरस्य यल्लब्धं विद्यया द्यूतपूर्वकम्। विद्याधनं तु तद्विद्यात्" इत्युक्ते धने।

विद्याधर * पु॰ विद्यां मन्त्रादिकं धरति धृ अच्। देवयोनिभेदे।

विद्युत् * स्त्री॰ विद्योतते वि+द्युत-क्विप्। तडिति, सन्ध्यायाम्।

विद्युद्दाम * न॰ ६त॰। विद्युदाकर्षके काष्ठे धातौ।

विदुन्मामा * स्त्री॰ चतुरक्षरपादके छन्दोभेदे। [रोगभेदे।

विद्रधि * पु॰ मेध्यतेन विद् हृदयं रुणद्धि रुध+कि पु॰। हृदय-

विद्रधिनाशन * पु॰ विद्रधिं नाशयति नश-णिच्-ल्यु। शोभाञ्जने।

विद्र(द्रा)व * पु॰ वि+द्रु-अप् घञ् वा। पलायने, क्षरणे, युद्धे च।

विद्रुत ० त्रि॰ वि+द्रु-क्त। प्राप्तद्रवे, पलायिते च।

विद्रुम * पु॰ विशिष्टो द्रुमः। प्रवालाख्यरत्ने। विशिष्टो द्रुमो यतः।

किसलये। [कन् तत्रैव।

विद्रुमलता * स्त्री॰ विद्रुमस्य लतेव। नलीनामगन्धद्रव्ये। स्वार्थे

विद्वत्कल्प * त्रि॰ ईषदसमाप्तो विद्वान् विद्वस्+कल्पप। ईषदूने

विदुषि। [तरप् विद्वत्तरोऽप्यत्र।

विद्वत्तम * पु॰ अतिशयेन विद्वान् विद्वस्+तमप्। अतिपण्डिते।

विद्वद्देशीय * त्रि॰ ईषदसमाप्तो विद्वान् विद्वस्+देशीयर्।

विद्वत्कल्पे।

विद्वस् * त्रि॰ विद+क्वसु। प्राज्ञे, पण्डिते, आत्मज्ञानयुक्ते च।

विद्विष् * पु॰ विशेषेण द्वेष्टि द्विष-क्विप्। शत्रौ। क। विद्विषोऽप्यत्र।

विद्वेष * पु॰ वि+द्विष-घञ्। वैरिभावे शत्रुतायाम्।

विद्वेषण * न॰ वि+द्विष-णिच्-ल्युट्। तन्त्रोक्ते अभिचारकर्मभेदे

येन शत्रूणां परस्परविद्वेषो भवति तस्मिन् व्यापारे। वि+

द्विष-ल्युट्। विद्वेषे।

विध * विधाने. तु॰ पर॰ सक॰ सेट्। विधति अवेधीत्।

विध * पु॰ स्त्री॰ विध-क अङ् वा। विधाने, गजभक्ष्ये, प्रकारे,

वेधे, ऋद्धौ च। वेतने, कर्मणि च स्त्री॰।

विधवा * स्त्री॰ विगतो धवो यस्याः। मृतपतिकायां स्त्रियाम्।

विधातृ * पु॰ वि+धा-तृच्। प्रजापतौ, ब्रह्मणि, कामदेवे, मदि-

रायां, भृगुमुनिपुत्रभेदे। विधानकर्त्तरि त्रि॰। स्त्रियां ङीप्

सा च मिथ्यन्याय।

विधान * न॰ वि+धा-ल्युट्। करणे, विधौ, गजभक्ष्ये च।

विधानज्ञ * पु॰ विधानं जानाति ज्ञा-क। पण्डिते। विधिज्ञे त्रि॰।

विधायक * त्रि॰ वि+धा ण्वुल्। विधानकर्त्तरि।

विधि * पु॰ वि+धा-कि। जगत्स्रष्टरि ब्रह्मणि, भाग्ये, क्रमे,

"चिकीर्षाकृतिसाध्यत्वहेतुधीविषयो विधिः" इत्युक्ते प्रवर्त्तना-

रूपे नियोगे, तज्जनके वाक्ये, विष्णौ, कर्मणि, गजभक्ष्ये, वैद्ये,

अप्राप्तप्रापकरूपे वाक्यभेदे, "संज्ञा च परिभाषा च विधिर्नियम

एव च। अतिदेशोऽधिकारः" इति व्याकरणोक्ते सूत्रभेदे।

विधिज्ञ * त्रि॰ विधिं क्रमं जानाति ज्ञा-क। विधानक्रमज्ञे।

विधित्सा * स्त्री॰ विधातुमिच्छा वि+धा-सन्-अ। विधानेच्छायाम्।

विधिदेशक * पु॰ विधिं विधानं दिशति दिश+ण्वुल्। विधि-

दर्शिनि सदस्ये, गुरौ च।

विधिवत् ० अव्य॰ विधिमर्हति विधि+वति। विध्यनुसारे। [च।

विधु * पु॰ व्यध कु। चन्द्रे, कर्पूरे, विष्णौ, ब्रह्मणि, राक्षसे, वायौ

विधुत * त्रि॰। वि+धु क्त। कम्पिते, त्यक्ते च।

विधुनन * न॰ वि+धु-णिच्-नुक् च। चालने।

विधुन्तुद * पु॰ विधुं तुदति तुद-खश्-मुम् च। राहौ।

विधुर ० त्रि॰ विगता धूर्यस्य अच् समा॰। विश्लिष्टे, विकले च।

विगता धूः। वैकल्ये, विश्लेषे च न॰।

विधूनन * न॰ वि+धु-ल्युट्। कम्पने। [धान्ति" इति श्रुतिः।

विधूत ० त्रि॰ वि+धू-क्त। कम्पिते, त्यक्ते च। "विधूतपाप्मा

विधेय * त्रि॰ वि+धा-यत्। विधातुं योग्ये, वचनस्थे, आयत्ते,

विधिना बोधिते च।

विध्वंस ० पु॰ वि+ध्वन्स घञ्। नाशे।

विनत * त्रि॰ वि+नम-क्त। प्रणते, भुग्ने, शिक्षिते च। गरुड-

मातरि कश्यपपत्नीभेदे, पिटकीभेदे च स्त्री॰। [भयव।

विनतासुत * पु॰ ६त॰। अरुणे, गरुडे च। विनताङ्गजादयोऽप्यु-

विनद * पु॰ विशेषेण नदति नद+अच्। (छातियान) वृक्षे।

विनम्रक * न॰ विशेषेण नम्रमिव स्वार्थे कन्। तगरपुष्पे।

विनय * पु॰ वि+नी-अच्। शिक्षायां, प्रणामे, अनुनये च। वि+

नी कर्त्तरि अच्। विनययुक्ते जने, निभृते, क्षिप्ते, जितेन्द्रिये

च। [क्षिप्ते आयत्ते।

विनयग्राहिन् * त्रि॰ विनयं शिक्षां गृह्णाति ग्रह-णिनि। वचन-

विनयस्थ * त्रि॰ विनये तिष्ठति स्था-क। वचनग्राहिणि आयत्ते।

विनशन ० न॰ वि+नश-ल्युट्। विनाशे, कुरुक्षेत्रस्थे तीर्थभेदे।

विना ० अव्य॰ वि+ना। वर्जने, अन्तरेणेत्यर्थे।

विनाकृत * त्रि॰ विनेति कृतम् विना+कृ-क्त। त्यक्ते, रहिते च।

विनायक * पु॰ वि+नी-ण्वुल्। गणेशे, गरुडे, विघ्ने, गुरौ च।

विनययुक्ते त्रि॰।

विनाश * पु॰ वि+नश-घञ्। ध्वंसे, अदर्शने च।

विनाशोन्मुख * त्रि॰ विनाशाय उन्मुख उद्यतः। नष्टप्राये। [धाने।

वि(वी)नाह * पु॰ वि+नह-घञ् वा उपसर्गदीर्घः। कूपमुखपि-

विनिद्र * त्रि॰ विगता निद्रा यस्य। प्रकाशिते, निद्राहीने च।

विनिपात * पु॰ वि+नि+पत-घञ्। निपाते, दैवादिकृते व्यसने,

अपमाने च। [नरकपतने, वधदंडे च।

विनिमय * पु॰ वि+नि+मि-अच्। परिवर्त्ते, तुल्यद्रव्यदानेन द्रव्या-

विनियोग * पु॰ वि+नि+युज-घञ्। क्रियासु प्रवर्त्तने "कर्मणे

इदम् कर्त्तव्य विनियोगः प्रकीर्त्तितः" इत्युक्ते अनुष्ठानक्रम

विधाने च "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च" इति

स्मृतिः। [नीते, निभृते च। सुशिक्षिताश्वे, दमनवृक्षे च पु॰।

विनीत * त्रि॰ वि+नी-क्त। विनययुक्ते, कृतदण्डे, क्षिप्ते, अप-

विनोद * पु॰ वि+नी अप्। कल्के, पापे च।

विनेतृ * त्रि॰ वि+नी-तृच्। शिक्षके। नृपे पु॰।

विनेय ० त्रि॰ वि+नी-यत्। शिक्षणीये, माप्ये च।

विनोक्ति ० स्त्री॰ अर्थालङ्कारोक्ते अर्थालङ्कारभेदे।

विनोद * पु॰ वि+नुद-घञ्। कौतुहले, क्रीडायां, अपनोदने च।

[illegible] * पु० वि+[illegible] घञ्। [illegible]। (न०) [illegible]।

[illegible] * पु० वि+[illegible]-णिनुन्। [illegible]। [illegible]-
वर्त्तिनि त्रि०।

[illegible] * त्रि० वि+[illegible]-क्त। [illegible], विरते च।

[illegible] * पु० वि+[illegible] घञ्। [illegible]।

[illegible] * त्रि० वि+[illegible]-क्त। [illegible], [illegible] च।

[illegible] * त्रि० [illegible]। [illegible]।

[illegible] * स्त्री० [illegible]। [illegible]
[illegible] त्रि०। [illegible] च।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

हृद्दे, श्योनाकहृद्दे, घृतकरञ्जे च पु०। रुचिकरे त्रि०।

विरोध * पु० वि+रुध-घञ्। वैरे, विरुद्धतायाम्, न्यायोक्ते साध्य-
सामानाधिकरण्याभावरूपे हेतुदोषे, यथा वह्निमान् जलादित्य-
त्रत्रत्यहेतोर्वह्निना सामानाधिकरण्यं नास्ति।

विरोधन न० वि+रुध-ल्युट्। वैरे।

विरोधिन् * पु० वि+रुध णिनि। रिपौ, षष्टिसंवत्सरमध्ये "शरदि
मानुषे कष्टं विरोधिनि न संशयः" इत्युक्तलक्षणे वत्सरभेदे च।

विरोधोक्ति * स्त्री० अर्थालङ्कारभेदे, परस्परविरोधिवचने च।

विल * भेदे तु० पर० सक० सेट्। विलति अवेलीत्।

विल * न० विल-क। छिद्रे, गुहायाञ्च। विलमुत्पत्तिकारण-
त्वेनास्त्यस्य अच्। घोटकोत्तमे, "वाजिनो विलयोनयः" इति
कुमारः। वेतसे च पु०।

विलक्ष * पु० वि+लक्ष-अच्। विस्मययुक्ते।

विलक्षण * त्रि० विशिष्टं लक्षणमस्य। विभिन्ने, विशेषयुक्ते च।
निष्प्रयोजनस्थितौ च न०। दानार्थे [illegible]
[illegible]भेदे स्त्री०। "प्रतोषात्प्रात् द्वितीयेऽह्नि यस्यां स्यात्
विलक्षणाम्" इति स्मृतिः।

विलग्न * त्रि० विशेषेण लग्न सम्बन्ध-क्त तस्य न, जस्य गः। अवलग्ने
मध्यभागे, कटौ, उदितमेषादिराशौ च न०। "लोके ह
विलग्ने वा" इति ज्योतिषम्। [कार्श्ये च।

विलङ्घ * पु० वि+लघि घञ्। विलङ्घने, अतिक्रमे, प्रतोलने। [illegible]

विलङ्घित * त्रि० वि+लघि-क्त। अतीते, सन्दे च। अपकृष्टे न०।

विलय * पु० वि+ली-अच्। प्रलये, नाशे च।

विलज्जा * स्त्री० वि+लज्ज-अच। अंलज्जायाम्।

[illegible] * पु० [illegible]+घञ् वा [illegible] सर्पे, मूर्खे,
[illegible] च।

[illegible] * पु० वि+[illegible] घञ्। परिदेवने।

[illegible] * पु० वि+[illegible] घञ्। "[illegible]
[illegible]" [illegible] [illegible], [illegible]
[illegible] च।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

न॰। मर्दे, कुक्कुरे। वरुणे च पु॰।
विलोमजिह्व * पु॰ विलोमा विपरीता जिह्वा यस्य। गजे।
विलोमवर्ण * पु॰ विलोमत्र अननुक्रमतया व्युत्क्रमतो वर्णः। उत्त-
मस्त्रियामधमवर्णेन जनिते सङ्कीर्णे वर्णे। [कामलक्षाम्।
विलोमी * स्त्री॰ विशिष्टं लोम केशो यस्याः ब॰ अच् गौरा॰ ङीष्।
विलोल ० त्रि॰ वि+लुल-अच्। चपले विशेषचलचे च।
विल्ल * न॰ बिल-ल कित् तस्य नेत्वम्। आलवाले। [कल्के।
विल्लमूला * स्त्री॰ विल्लमालवालमिव वेष्टितं मूलमस्याः। वाराही-
विल्व * पु॰ बिल-वन् कित्। श्रीफलवृक्षे। तत्फलादौ, परिमाणे
च न॰। [दुष्कविल्वोऽप्यत्र।
विल्वपेशिका * स्त्री॰ विल्वस्य पेशोऽस्त्यस्य ठन्। (बेलशुठा) पदार्थे।
वि(वी)वध * पु॰ वि+वध-अप् वा दीर्घः। धान्यतण्डुलादेराहरणे
भारे, स्कन्धवहनयोग्ये (बांक) काष्ठभेदे च।
विवर * न॰ वि+वृ-अप्। छिद्रे, दोषे च।
विवरण * न॰ वि+वृ-ल्युट्। व्याख्याने, तज्ज्ञापके ग्रन्थभेदे च।
विवरनालिका * स्त्री॰ विवरयुक्तं नालमस्त्यस्याः ठन्। वेणौ (बांस)
विवर्ण * त्रि॰ विरुद्धो वर्णोऽस्य। अधमे, नीचे च।
विवर्त * पु॰ वि+वृत-घञ्। नृत्ये, समुदाये, परिवर्त्तने, वेदान्तोक्ते
कारणात् विषमसत्ताकतया सम्पन्नानि कार्ये च। यथा
रज्ज्वाः सर्पः, ब्रह्मणो जगत्।
विवश * त्रि॰ विगतो वशः आयत्तता यस्य। अस्वतन्त्रे, व्याकुले च,
"विवशा कामवधूः" इति कुमारः, कृतवीर्ये च।
विवस्वत् * पु॰ वि+वस-क्विप् अस्त्यर्थे मतुप् मस्य वः। सूर्ये, अर्क-
वृक्षे, अरुणे, देवे च।
विवाद * पु॰ विरुद्धो वादः। "ऋणादिदायकलहे द्वयोर्बहुत-
रस्य वा। विवादो व्यवहारश्च" इत्युक्तलक्षणे व्यवहारे, कलहे
च।
विवाह * पु॰ वि+वह घञ्। दारपरिग्रहे, तत्साधके व्यापारे च।
विवाहित * पु॰ विवाहो जातोऽस्य तार॰ इतच्। जातविवाहे।
विवाह्य * त्रि॰ वि+वह-ण्यत्। विवाहयोग्ये, विशेषेण वाह्ये च।
विविक्त * त्रि॰ वि+विच क्त। निर्जने, पवित्रे, असंयुक्ते च।
कर्त्तरि क्त। विवेकिनि त्रि॰। दुर्भगायां स्त्रियां स्त्री॰।
विविध * त्रि॰ विभिन्ना विधा यस्य। नानाप्रकारे।
विवीत * पु॰ विशिष्टं वीतं गवादिप्रचारस्थानं यत्र। प्रचुरतृणघा-
सादियुक्ते देशे।
विवृत * त्रि॰ वि+वृ-क्त। विस्तृते, व्याख्याते च।
विवृति * स्त्री॰ वि+वृ-क्तिन्। विस्तारे, व्याख्याने च।
विवेक * पु॰ वि+विच-घञ्। याथार्थ्येन वस्तुस्वरूपावधारणे,
प्रकृतिपुरुषयोर्भेदज्ञाने च।
विवोढृ * पु॰ वि+वह-तृच्। भर्त्तरि।
विव्वोक * पु॰ वि+वा-कु तस्य ओकः स्थानम्। "गर्वाभिमानादि-
हेऽपि विव्वोकोऽनादरक्रिया" इत्युक्तलक्षणे स्त्रीणां शृङ्गार-
चेष्टाभेदे।
विश् * प्रवेशे तुदा॰ पर॰ सक॰ अनिट्। विशति अविशत्।
विश ० पु॰ विश-क्विप्। मनुजे, वैश्ये च।
विशङ्कट * त्रि॰ वि+शङ्क-टच्। विशाले। [त्रि॰।
विशद * पु॰ वि+शद-अच्। शुक्लवर्णे। तद्वति, विमले, व्यक्ते च
विशय * पु॰ वि+शी अच्। संशये "विशयो विषयश्चैव" इति
मीमांसा।
विशर * पु॰ वि+शॄ-अच्। वधे। [क्विप्। (शापरमाली) वृक्षे।
विशल्यकृत् * पु॰ विशल्यं तत्प्रहारवेदनानिवृत्तिं करोति कृ-
विशल्या * स्त्री॰ विगतं शल्यं तत्प्रहारवेदना यस्याः ब॰। अग्नि-
शिखावृक्षे, दन्तीवृक्षे, गुडूच्याम्, त्रिपुट्यां, अजमोदायाञ्च।
विगतशल्ये त्रि॰।
विशसन * न॰ वि+शस-हिंसने ल्युट्। मारणे।
विशसन * पु॰ विशस्यतेऽनेन ल्युट्। खड्गे, "असिर्विशसनः खड्गः"
इति, खड्गस्तोत्रम्। [मारिते।
विशस्त * त्रि॰ वि+शस-क्त। मारिते, धौते च। वा इट्। तत्र,
विशाख * पु॰ विशाखायामभवं भवः अण्। कार्त्तिकेये, धन्विनां
वितस्त्यन्तरालपादावस्थाने, पुनर्नवायां, याचने च।
विशाखज * पु॰ विशिष्टा शाखा यस्य तथा सन् जायते जन-ड।
नारङ्गे। विशाखानक्षत्रजाते त्रि॰।
विशाखा * स्त्री॰ विशिष्टा शाखा प्रकारो यस्याः। बहुमनख्या-
कृतेऽश्विन्यवधिके षोडशे नक्षत्रे, कठिल्ले च।
विशारण * न॰ वि+शॄ-स्वार्थे णिच्-ल्युट्। मारणे।
विशारद * पु॰ विशारं ददाति दा-क तस्य रः। वकुलवृक्षे। वृद्-
धुदारमायां स्त्री॰। पण्डिते, प्रगल्भे, श्रेष्ठे च त्रि॰।
विशाल ० त्रि॰ वि+शालच्। विस्तीर्णे, महति च। मृगभेदे,
नृपभेदे च पु॰। इन्द्रवारुण्याम्, महेन्द्रवारुण्यां, नदीभेदे च
स्त्री॰ "विशालां विशालां नदीं" इति पुराणम्।
विशालता * स्त्री॰ विशालस्य भावः तल्। दार्घ्ये विस्तारे।
विशालनेत्रगर्भ ० पु॰ विशालं विस्तीर्णं तेन गर्भं अभ्यन्तरं यस्य।
कपोतवृक्षे।
विशालत्वच् * पु॰ विशाला त्वक् यस्य। सप्तच्छदे वृक्षे।
विशालफल ० पु॰ विशालं फलमस्य। आम्राणी, नारङ्गे च
सप्तसप्ति * पु० सप्त सप्तयोऽश्वा यस्य। सूर्य्ये, अर्कवृक्षे च। सप्ताश्वा-
 दयोऽप्यत्र।
सप्तसागर * पु० ब० व०। सप्तसंख्याताः सागराः। "लवणेक्षुसुरा-
 सर्पिर्दधिदुग्धजलात्मकाः" इत्युक्तेषु सप्तसु सागरेषु। सप्त
 लवणादिकल्पिताः सागरा इव देयपदार्था यत्र। पुराणोक्ते
 अन्नाख्याते महादानभेदे। तत्क्रमं वाचस्पत्ये।
सप्तार्च्चिस् * पु० सप्त अर्च्चिषो ज्वाला यस्य। "काली कराली च" इत्या-
 द्युक्ते सप्तज्वालायति वह्नौ।
सप्ताश्ववाहन * पु० सप्त अश्वाः वाहनान्यस्य। सूर्य्ये, अर्कवृक्षे च।
सप्ति * पु० सप-ति। अश्वे। ["अजनफरोविचहितोव" इति माघः।
सफर * पु० सप-अरन् पृ० पस्य फः। (पुँटी) मत्स्ये। स्त्रीत्वमप्यत्र
सफल * त्रि० सह फलेन सहस्य सः। अमोघे, फलयुक्ते च।
सबल * त्रि० सह बलेन सामर्थ्येन सैन्येन वा। सामर्थ्यान्विते,
 सैन्ययुक्ते च।
सब्रह्मचारिन् * पु० समानं ब्रह्म वेदग्रहणकालिकं व्रतं चरति चर-
 णिनि। एकगुरुकुलवासात् वेदाध्ययनकाले तन्नियमव्रतसमानब्र-
 ताचारत्वात्।
सभर्तृका * स्त्री० सह भर्त्रा पत्या। विद्यमानपतिकायां स्त्रियाम्।
सभा * स्त्री० सह भान्ति अभीष्टनिश्चयार्थमेकत्र गृहे यत्र। बहूनां
 समावेशनस्थाने, तदधिष्ठायिजनसमूहे च।
सभाज * सेवने दर्शने च सक० प्रीतौ अक० चुरा० उभ०
 सेट्। सभाजयति ते असभाजत् त।
सभाजन * सभाज-ल्युट्। गमनागमनादिकाले सुखानन्दप्री-
 तिसाधने सम्भाषणे, पूजने च।
सभासद् * पु० सभायां सीदति-क्विप्। सामाजिके सभ्ये।
सभास्तार * पु० सभां स्तृणाति स्तृ-अण्। सभ्ये।
सभिक * पु० सभा द्यूतसभाऽस्त्यस्य ठन्। द्यूतकारके।
सभीक * पु० सभा द्यूतं प्रयोजनमस्य ईकन्। द्यूतकारे।
सभोचित * पु० सभा उचिता परिचिता यस्य। पण्डिते। सभा-
 योग्ये त्रि०। [त्रि०।
सभ्य * पु० सभायां साधुः यत्। सामाजिके, द्यूतकारे च। विश्वस्ते
सम् * अव्य० सो-क्विप्। सम्यगर्थे, प्रकर्षे, सङ्गतौ, शोभने, समु-
 च्चये च।
सम * त्रि० सम-अच्। समाने, तुल्ये, सर्वे, साधौ च, (योड़) युग्मे,
 "समेऽर्द्धिते वर्गः" इति लीलावती। समतयाख्यातेषु द्वितीय-
 चतुर्थषष्ठादिषु राशिषु च। अतुल्योऽस्य सर्वनामता। गीतवाद्य-
 योर्मिलितकालभवे गायकवक्त्रादिवादनरूपे ताले न०।
समक्ष * अव्य० अक्ष्णः समीपम् अव्ययी० अच्। अक्षु सन्निकर्षे,
 तदस्यास्ति अच्। प्रत्यक्षविषये त्रि०।
समगन्धक * पु० समास्तुल्यभागेन निवेशिता गन्धा गन्धयुक्तद्रव्या-
 ण्यत्र कप्। कृत्रिमधूपभेदे। [(बिनाह मूल)।
समगन्धिक * पु० समः सर्वदा तुल्यरूपः गन्धोऽस्त्यस्य ठन्। उशीरे
समग्र * त्रि० सर्वं सकलं यथा स्यात्तथा गृह्णाति ग्रह+ड। सकले।
समज्ञा * स्त्री० समज्यतेऽनया सम्+अज्ञ घञ्। सत्कीर्त्तौ।
समचित्त * त्रि० समं सर्वत्र समभावं चित्तं यस्य। सर्वत्र सुख-
 दुःखे तुल्यज्ञानिनि। [पशूनां सङ्घे, युद्धे च।
समज * न० समजन्त्यत्र सम्+अज अप् घञभावः। वने, समूहे,
समज्या * स्त्री० समजन्ति सर्वे आयान्त्यत्र अज क्यप् कीर्त्तौ।

समज्या • स्त्री० सम्+अज-क्यप् न वीभावः। सभायाम्, कीर्त्तौ च। [शा०। समचौचित्ये न०।

समञ्जस • त्रि० सम्यक् अञ्जः औचित्यं यत्र। उचिते, युक्ते च।

समदर्शिन् • त्रि० समम् सर्वत्र ब्रह्मभावेनाभिन्नतया पश्यति दृश+णिनि। सर्वत्र समदर्शके तत्त्वज्ञानिनि। "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति गीता। [त्रि०।

समदृष्टि • स्त्री० कर्म०। सर्वत्र तुल्यदर्शने। ब०। समदर्शिनि

समधिक • त्रि० सम्यक् अधिकः प्रा०। अत्यन्ताधिके।

समन्त • पु० सम्यक् अन्तः यस्य वा। सम्यगन्ते, सीमायाञ्च।

समन्ततस् • अव्य० समन्त+तसिल्। सर्वत्र विस्तारे।

समन्तदुग्धा • स्त्री० समन्ततो दुग्धमस्याः। स्नुहीवृक्षे।

समन्तभद्र • न० समन्तात् भद्रं यत्र। [illegible]

समन्तभद्र • पु० समन्तात् भद्रमस्य। बुद्धे।

समन्तभुज् • पु० समन्तात् भुङ्क्ते भुज-क्विप्। वह्नौ। [च।

समन्तात् • अव्य० [illegible] समन्ततः इत्यर्थे, सर्वत्र विस्तारे

[illegible]

समल • न० सम्यक् मलम्। विष्ठायाम्। सह मलेन। कलुषे त्रि०।

समवतार • पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ्। जलावतरणसोपाने।

समवर्त्तिन् • पु० समं वर्त्तते वृत-णिनि। यमे धर्मराजे।

समवकार • पु० सम्+अव+कृ-घञ्। नाटकभेदे।

समवाय • पु० सम्+अव+इण-अच्। समूहे, मेलने, न्यायोक्ते नित्यद्रव्यादिषु ज्ञानादीनां सम्बन्धभेदे च।

समवेत • त्रि० सम्+अव+इण-क्त। मिलिते, समूहान्विते, न्यायोक्ते समवायसम्बन्धेन स्थिते च।

समष्टि • स्त्री० सम्+अश-क्तिन्। सम्यग्व्याप्तौ, समस्तानाञ्च कर्त्तरि क्तिच्। सङ्घीभूते समस्ते पदार्थे। [(गुड़िया) ख्याते

समष्ठि(ष्ठी)ल • पु० समे तिष्ठति स्था+इलच् पृ० वा दीर्घ [illegible]

समसन • न० सम्+अस-ल्युट्। समासे, संक्षेपे च।

समस्त • त्रि० सम्+अस-क्त। संक्षिप्ते, सकले, व्याकरणोक्ते समासे शब्दभेदे च।

समस्थ • त्रि० समे तिष्ठति स्था-क। समभावेन तुल्यतया स्थिते।

समस्थली • स्त्री० कर्म०। गङ्गायमुनयोर्मध्यस्थे अन्तर्वेदिदेशे।

समस्या • स्त्री० समस्यते संक्षिप्यतेऽनया सम्+अस-क्यप्। [illegible]

समा • स्त्री० समयति विक्लवयति भावान् सम-अच्-टाप्। वर्षे। [illegible]

समांसमीना • स्त्री० समांसमां विजायते [illegible]

समाकर्षिन् • पु० सम्+आ+कृष-णिनि। [illegible]

समाख्या • स्त्री० समाख्यायतेऽनया सम्+आ+ख्या अङ्। कीर्त्तौ।

समाघात • पु० समाहन्यतेऽत्र सम्+आ+हन घञ्। युद्धे।

समाज • पु० सम्+अज घञ् [illegible]

समाधि • स्त्री० सम्+आ+धा-कि। नियमे, [illegible]

[illegible]

[illegible] "[illegible]" इत्युक्ते एकादशावधिपत्यु-[illegible] [समादौ। अमिन्द्री स्त्री०।

[illegible] • पु• [illegible]। पक्षोदर-

[illegible] • पु• [illegible] त्रि•। ईषदूनवत्सरे।

समाघ्राण • न• सम्+आ+घ्रा ल्युट्। आघ्राणे, परिष्वङ्गे, शिंघे च।

समाचित • त्रि• सम्+आ+चि क्त। व्याप्ते, प्राप्ते, सिद्धे च। भावे क्त। समाप्तौ न•।

समाज्ञ • त्रि• सम्+आ+ज्ञा क। सम्यग्ज्ञानवति, सम्यग्ज्ञाते च।

समाज्ञा • स्त्री• सम्+आ+ज्ञा-क्विप्। सम्यग्ज्ञाने, समर्थने, ख्यातौ च।

[illegible] • पु• सम्+आ+[illegible]। सर्वोत्तमसत्त्वाद्यवाप्तिम-[illegible] "[illegible]" इति पुराणम्, प्रयोजने च।

समाकर्षिन् • पु• समाकर्षति सम्+आ+कृष-णिनि। सुगन्धे। आकर्षणकर्तरि त्रि•।

समालम्भ • पु• सम्+आ+लभ घञ् मुम् च। कुङ्कुमादिना गात्रलेपने। ल्युट्। तत्रार्थे न•।

समावर्तन • न• समावर्तते गुरुकुलादनेन सम्+आ+वृत-ल्युट्। वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके संस्कारभेदे।

समाविष्ट • त्रि• सम्+आ+विश-क्त। युक्ते, मनोऽभिनिवेशवति, [illegible], चित्तैकाग्र्यादिसंयुक्ते च।

समावृत्त • पु• सम्+आ+वृत-क्त। कृतसमावर्तनसंस्कारे।

समावेश • पु• सम्+आ+विश-घञ्। बहूनामर्थानामेकत्र वाक्यादौ अवस्थापने, मनसोऽभिनिवेशे च।

समावेशित • त्रि• सम्+आ-विश-णिच्-क्त। कृतसमावेशने।

समास • पु• सम्+अस-घञ्। संक्षेपे, समर्थने, समाहारे, व्याकरणोक्ते द्व्यादिपदानामेकपदताप्रापके पदसाधुत्वार्थे संस्कारभेदे च। [अभिनिविष्टे च।

समासक्त • त्रि• सम्+आ+सञ्ज-क्त। संयुक्ते, अत्यन्तासक्ते,

समासङ्ग • पु• सम्+आ+सञ्ज-घञ्। संयोगे, सम्यगभिनिवेशे च।

समासवत् • पु• समास+अस्त्यर्थे। मतुप् मस्य व.। व्याकरणोक्ते समासयुक्ते शब्दे समासयुक्ते च त्रि•। समासेन तुल्यं वति। समा समतुल्ये अव्य•। [निकटस्थिते च।

समासादित • त्रि• सम्+आ+सद+णिच्-क्त। आहृते, प्राप्ते,

समासार्था • स्त्री• समासेन संक्षेपेणार्थोऽभिहितो यस्याः। समस्यायाम्। [प्राप्ते, निष्पन्ने, युक्ते च।

समाहित • त्रि• सम्+आ+धा क्त। कृतसमाधौ, आहिते, प्रति-

समाहृत • त्रि• सम्+आ+हृ-क्त। संगृहीते, एकत्रस्थीकृते च।

समाहृति • स्त्री• सम्+आ+हृ-क्तिन्। संक्षेपे, संग्रहे, समुच्चये च।

समाह्वय • पु• समाह्वयति सम्+आ+ह्वे-अच् आत्वाभावः। युद्धे आह्वाने, प्राणिकरणकद्यूते च। "प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" इति स्मृतिः।

समाह्वा • स्त्री• समा आह्वा यस्याः। गोजिह्वावृक्षे। समाह्वयायाम्।

समित् • स्त्री• समीयतेऽत्र सम्+इण्-आधारे क्विप्। युद्धे।

समिता • स्त्री• सम्+इण् क्त। गोधूमचूर्णे। सङ्गते त्रि•।

समिति • स्त्री• सम्+इण आधारे क्तिन्। सभायां, युद्धे च।

समिध् • स्त्री• समिध्यतेऽनया सम्+इन्ध-करणे क्विप्। काष्ठे, होमीयकाष्ठभेदे च। विस्तरो वाचस्पत्ये।

समिध • पु• समिध्यते सम्+इन्ध क। काष्ठे, वह्नौ च।

समिन्धन • न• सम्+इन्ध-करणे ल्युट्। काष्ठे, सम्यग्दीप्तौ च।

समीक • न• सम्+ईकक्। युद्धे।

समीकरण • न• असमः समः क्रियतेऽनेन सम+च्वि+कृ ल्युट्। बीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावतां सङ्ख्याज्ञानार्थे प्रक्रियाभेदे, तुल्यरूपतापादने च।

समीक्ष • न• सम्यगीक्ष्यतेऽनेन घञ्। साङ्ख्यदर्शने। भावे घञ्। पर्यालोचने, सम्यग्ज्ञाने च पु•। च। समीक्षाप्यत्र तत्त्वे, बुद्धौ, मीमांसाशास्त्रे, यत्ने च। स्त्री• टाप्।

समीक्ष्यकारिन् • त्रि• समीक्ष्य पर्यालोच्य करोति कृ-णिनि उप•। वस्तुस्वरूपपर्यालोचनपूर्वककार्यकारके।

समीचीन • त्रि• सम्यगञ्चति सम्+अन्च+क्विप् ततः ख समः समिः अचेरकारलोपे पूर्वपददीर्घः। यथार्थे, साधौ च। सत्ये न•। सत्यवति त्रि•।

समीप • त्रि• सङ्गता आपोऽत्र अच् समा• अत ईत्त्वम्। निकटे।

समीर • पु• सम्यक् ईरयति नोदयति सम्+ईर-अच्। वायौ। समीरणे। पु• समिरोऽप्यत्र।

समीरण • पु• सम्+ईर-ल्यु। वायौ, मरुबकवृक्षे, पथिके च।

समीरित • त्रि• सम्+ईर-क्त। कथिते, उच्चारिते "चतुर्मुख-समीरिता" इति कुमारः।

समीहित • त्रि• सम्+ईह-क्त। अभीष्टे। सम्यक् चेष्टिते न•।

समुख • त्रि• सह मुखेन मुखव्यापारेण वा सहस्य सादेशः। वावदूके, वाग्मिनि च।

समुचित • त्रि• सम्+उच-क्त। सम्यगुपयुक्ते, समञ्जसे च।

समुच्चय • पु• सम्+उद्+चि-अच्। द्रव्यादीनां राशौ, परस्पर-निरपेक्षाणामनेकेषामेकस्मिन् क्रियादावन्वये च। यथा देवदत्तो यज्ञदत्तश्च गच्छतीत्यत्र देवदत्तयज्ञदत्तयोः परस्परसापेक्षता-भावेऽपि एकस्मिन् गमने अन्वयः। तद्वाचकश्च प्रायेण चकारः क्वचित् तथादिशब्दोऽपि। समाहारे च।

समुच्चित • त्रि• सम्+उद्+चि-क्त। कृतसमुच्चये "समुच्चितफल-कामनानाम्" इति विधिस्वरूपे गदाधरः। [सम्यक्कृते च।

समुच(चा)र • पु• सम्+उद्+चर अप् घञ् वा। सम्यगुच्चारे,

समुच्छेद • पु• सम्+उद्+छिद-घञ्। विनाशे। समूलोत्पाटने च।

समुच्छ्र(च्छ्रा)य • पु• सम्+उद्+श्रि-अच् घञ् वा। उच्चतायां, विरोधे, उत्सेधे च।

[illegible]

[illegible]

समुन्नति * स्त्री० सम्+उद्+नम-क्तिन्। उच्छ्रायाम् "प्रायः पयोधरसमुन्नतिरस्य हेतुः" इत्युद्भटः।

समुन्नद्ध * त्रि० सम्+उद्+नह-क्त। गर्विते, पण्डितमन्ये, प्रभौ, समुद्धृते च। कर्मणि क्त। उत्तोल्य बद्धे। [ऽधिपत्ये, समुद्भावने च।

समुन्नय * पु० सम्+उद्+नी-अच्। ऊर्द्ध्वनयने, सम्यग्नीतौ, उत्-

समुपचित * त्रि० सम्यक् उपचितम् उप+चि-क्त। सुबहुलीकृते, संवर्द्धिते च।

समुपजोषम् * अव्य० सम्+उप+जुष-अमु। अत्यन्तानन्दे।

समुपेयिवस् * त्रि० सम्+उप+इण-क्वसु। समीपगते।

समुपोढ * त्रि० सम्+उप+वह क्त। अद्भुते, संजाते च।

समुल्लेख * पु० सम्+उद्+लिख-घञ्। पादादिना भूम्यादेः खनने।

समूढ * त्रि० सम्+ऊह-वा वह-क्त। राशीकृते, भग्नप्रभृते "समूढमस्य पांसुरे" इति ऋग्वेदः, भुग्ने, दमिते, सद्यःशिशौ, शोधिते च। सह मूढेन। मूढसहिते त्रि०।

समूरु * पु० सङ्गतौ सन्धिहीनौ ऊरू यस्य। मृगभेदे।

समूल * त्रि० सह मूलेन। मूलसहिते "समूलघातं न्यवधीत्" इति भट्टिः।

समूह * सम्+ऊह-घञ्। समुदये।

समूहनी * स्त्री० समूह्यतेऽनया ल्युट्। सम्मार्जन्याम् भावे ल्युट्। संमार्जने, सम्यगूहकरणे च न०।

समूह्य * पु० सम्+ऊह-ण्यत्। यज्ञियाग्नौ। सम्यक् तर्क्ये त्रि०। [च।

समृद्ध * त्रि० सम्यक् ऋद्धः ऋध+क्त। अधिकसम्पत्तियुक्ते, अतिवृद्धे

समृद्धि * स्त्री० सम्यक् ऋद्धिः सम्+ऋध-क्तिन्। अतिसम्पत्तौ, वृद्धौ "मधुमत्समृद्धिसमेधितमेधया" इति माघः।

समेत * त्रि० सम्+आ-इण क्त। समागते, सङ्गते च।

समेधित * त्रि० सम्+एध-णिच्+क्त। संवर्द्धिते "मधुमत्समृद्धिसमेधितमेधया" इति माघः।

समोदक * न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। अर्द्धाम्बुमथितेन मथितदधिजाते तक्रभेदे। सह मोदकेन। मोदकसहिते त्रि०। [विश्व यदृच्छया लब्धेन तत्र तदाश्रये च।

सम्पत्ति * स्त्री० सम्+पद+क्तिन्। अतिविभवे, अनुरूपत्वाद्भावे

सम्पद् * स्त्री० सम्+पद सम्प० क्विप्। विभवे, सम्पत्तौ च।

सम्पन्न * त्रि० सम्+पद-क्त। साधिते, सम्पद्युक्ते च।

सम्पराय * पु० सम्+परा+इण-अच्। युद्धे, आपदि उत्तरकाले च।

सम्परायिक * न० सम्परायाय आपदे हितम् ठञ्। युद्धे। ठक्। स परायिकमप्यत्र।

सम्पर्क * पु० सम्+पृच-घञ्। सम्बन्धे।

सम्पर्किन् * त्रि० सम्+पृच घिनुण्। सम्बन्धयुक्ते।

सम्पा * स्त्री० सम्यक् पतनशीलं पतति इति ड। विद्युति।

सम्पाक * पु० सम्यक् पाको यस्मात् ५ब०। आरग्वधवृक्षे महीपते हि भुक्तादेः सम्यक् पाको भवतीति वैद्यके तस्य तथात्वम्। घृष्टे, धर्ष्टे, कामुके, लम्पटे च त्रि०।

सम्पात * पु० सम्+पत-घञ्। पक्षिगतिभेदे, सम्यक्पतने च।

सम्पाति * पु० सम्+पत-णिच्-इन्। जटायुषो ज्येष्ठभ्रातरि, पक्षिभेदे। स्वार्थे कन्। तत्रैव।

सम्पुट * पु० सम्+पुट-क। कुक्कुरकरण्डे। सम्यक् पुटमिव उभयपार्श्वे वर्त्मं यस्य। एकजातीयपदार्थे भिन्नजातीयस्य उभयतो व्याप्त्या स्थिते त्रि० "मकारैः सम्पुटो जाप्यः" इति तन्त्रम्।

सम्पुटक * पु० सम्पुटयति सम्+पुट-णिच् स्वार्थे वुन्। समुद्गके मञ्जूषाख्ये (पिटरा) पदार्थविशेषे।

सम्पूर्ण * त्रि० सम्+पूर-क्त। परिपूर्णे, समग्रे च "आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता एकादशी हि सम्पूर्णा" इति कृत्यप्रोक्ते एकादशीभेदे।

सम्पृक्त * त्रि० सम्+पृच-क्त। मिश्रिते, सम्बद्धे च।

सम्प्रणयन * न० सम्+प्र+नी ल्युट्। सम्यगग्निप्रणयनादेः होमार्थाय संस्कारविशेषे, विधाने च।

सम्प्रति * अव्य० सम्+प्रति+समाहारद्वन्द्व। इदानीमित्यर्थे।

सम्प्रतिपत्ति * स्त्री० सम्+प्रतिपद-भावे क्तिन्। वादप्रतिवादिस्वीकारे "पूर्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। सा तु सम्प्रतिपत्तिः स्यात्" इति व्यवहारोक्ते व्यवहारे, ज्ञानभेदे च।

सम्प्रदाय * त्रि० सम्+प्र+दा-तृच्। दानकर्त्तरि।

सम्प्रदान * न० सम्+प्र+दा-भावे ल्युट्। सम्यक् प्रदाने। सम्प्रदीयतेऽस्मै ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति पाणिन्युक्ते दानकर्मोद्देश्ये। तच्च त्रिविधम् "अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्। प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम्" इति। तत्र [illegible] अनिराकर्तृसम्प्रदानम्, [illegible] प्रेरकसम्प्रदानम्, [illegible] अनुमन्तृसम्प्रदानम्।

सम्प्रधारणा * स्त्री० सम्+प्र+धृ णिच् युच्। युक्तायुक्तविवेचनाद्यवधारणे।

सम्प्रबोध * पु० सम्+प्र+बुध घञ्। [illegible] "[illegible] सम्प्रबोधः" इति [illegible], सम्बन्धे च।

सम्प्रमोदिन् * त्रि० सम्+प्र+मुद-णिनि। [illegible], [illegible] च।

सम्प्रवाद * पु० सम्+प्र+वद-घञ्। [illegible] [illegible]।

सम्प्रसादन * न० सम्+प्र+सद+णिच् भावे ल्युट्। [illegible]। [illegible] ल्युट्। [illegible]।

सम्प्रसारण * न० सम्+प्र+सृ+णिच-ल्युट्। [illegible], [illegible] च।

सम्प्रहार * पु० [illegible] सम्+प्र+हृ घञ्। युद्धे। [illegible]।

सम्यक्प्रहरणे, गमने च। [रोमापचयभेदे च।

सम्प्राप्ति * स्त्री॰ सम्+प्र+आप-क्तिन्। सम्यक् प्राप्तौ, वैद्यकोक्ते

सम्प्रैष * पु॰ सम्+प्र+इष घञ् वा वृद्धिः। नियोगे।

सम्प्रोक्षण * न॰ सम्+प्र+उक्ष-ल्युट्। जलादिसेचनेन संस्कारभेदे।

सम्प्रोक्षित * त्रि॰ सम्+प्र+उक्ष-क्त। जलादिसेचनेन कृतसंस्कारे पदार्थे।

सम्फाल * पु॰ सम्+फल घञ्। मेषे।

सम्फुल्ल * त्रि॰ सम्+फुल्ल-अच्। विकसिते। सम्+फल-क्त अत इत्वम्। सम्फुल्त इति तकारमध्योऽपि तत्रैव।

सम्ब * अर्दने भ्वादि॰ पर॰ सक॰ सेट्। सम्बति असम्बीत्।

सम्ब * सम्बन्धे चुरा॰ उभ॰ सक॰ सेट्। सम्बयति ते असमम्बत् त

सम्ब * न॰ सम्ब+अच्। कृष्टचेत्रस्य प्रतिलोमकर्षणे। [न॰।

सम्बद्ध * त्रि॰ सम्+बन्ध क्त। सम्बन्धिनि। भावे क्त। सम्यग्बन्धने

सम्बन्ध * पु॰ सम्+बन्ध घञ्। संसर्गे, संयोगादौ, न्याये, सदृशे, सम्यग्बन्धने च। सम्यग्बध्यो यस्मात्। समर्थे, हिते च त्रि॰।

सम्बर * न॰ सम्ब+अरन्। जले, बौद्धव्रतभेदे च। सेतौ, दैत्यभेदे, मृगभेदे, मीनभेदे, पर्वतभेदे च पु॰।

सम्बरारि * पु॰ सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे।

सम्बरी * स्त्री॰ सम्ब-अरन्-ङीप्। मूषिकपर्ण्याम्, शतावर्य्याञ्च।

सम्बल * न॰ सम्ब+कलच्। जले। पाथेये पु॰ न॰।

स(श)म्बाकृत * त्रि॰ स(श)म्बेन प्रतिलोमेन कृष्टं क्षेत्रं स(श)म्ब+डाच्+कृ-क्त। प्रतिलोमकृष्टे क्षेत्रादौ। भावे घञ्। प्रतिलोमकर्षणे। [घञ्। अन्योन्यमर्द्दे पु॰।

सम्बाध * न॰ सम्यक् बाधा यत्र। नरकवर्त्मनि। सम्+बाध-भावे

सम्बुद्धि * स्त्री॰ सम्+बुध-क्तिन्। सम्बोधनार्थे।

सम्बोध * पु॰ सम्+बुध-घञ्। बोधे, नाशे, सम्यग्ज्ञाने च।

सम्बोधन * न॰ सम्+बुध ल्युट्। सम्यग्ज्ञाने। बुध-णिच्-ल्युट्। सम्यग्ज्ञापने "इहतस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति व्याकरणोक्ते अवधानाभिमुखीकरणाय अभीष्टक्रियासु विनियोगाय आमन्त्रणादिरूपे व्यापारे च।

[illegible] * स्त्री॰ सम्यक् भजते सम्+भज-अच् गौरा॰ ङीष्। कुट्टिन्याम्, परपुरुषेण सह अन्यस्त्रिया योजयित्र्याम्।

सम्भव * पु॰ सम्+भू-अप्। उत्पत्तौ, आधेयस्याधारे समावेशनयोग्यत्वरूपे व्यापारे, उत्पत्तिस्थाने च। अपादाने अप्। हेतौ। कर्त्तरि अच्। मिलके त्रि॰।

सम्भाव्य * पु॰ सम्+भू-कर्त्तरि यत्। [illegible] सम्भावनीये त्रि॰।

[illegible] * पु॰ सम्+भू-घञ्। परिपूर्णतायाम्, समूहे, ग्रामाद्याम्।

[illegible] * न॰ सम्+भू+णिच्-ल्युट्। [illegible] [illegible]

[illegible]

सम्भावित * त्रि॰ सम्+भू-णिच्-क्त। सम्भवयुक्ते पदार्थे।

सम्भाषण * न॰ सम्+भाष ल्युट्। सम्यक्कथने, परस्परकथने

सम्भिन्न * त्रि॰ सम्+भिद-क्त। विदलिते, मिलिते, मिलिते च। "सम्भिन्नमुकुल" इति वेणीसंहारः।

सम्भूति * स्त्री॰ सम्+भू क्तिन्। विभवे, इश्वरशक्तिभेदे "सम्भूतिं च उपासते" इति श्रुतिः।

सम्भूयसमुत्थान * न॰ सम्भूय मिलित्वा सम्यगुत्थानं मिलित्वा वणिजां वाणिज्यादिकर्मकरणे विवादभेदे।

सम्भृति * स्त्री॰ सम्+भृ क्तिन्। सम्यक्पोषणे।

सम्भेद * पु॰ सम्भिद्यते संश्लिष्यतेऽत्र सम्+भिद-आधारे घञ्। नद्यादिसङ्गमस्थाने। भावे घञ्। तत्सङ्गमे, सम्यग्भेदने, स्फुटने, ऐकरूप्ये च। "सम्भेदे नान्यतरवैयर्थ्यम्" इति मीमांसा।

सम्भोग * पु॰ सम्+भुज-घञ्। सम्यग्भोगे, सुरते, हर्षे, "दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। सम्भोगः समुदाहृतः" इत्युक्तलक्षणे शृङ्गाररसावस्थाभेदे।

सम्भ्रम * पु॰ सम्+भ्रम-घञ् न वृद्धिः। भयादिजनिते वेगे, तद्धेतुके भये, आदरे, अतिशयभ्रमे, त्वरे च।

सम्मति * स्त्री॰ सम्+मन-क्तिन्। अनुमतौ, आत्माभीष्टे

सम्मद * पु॰ सम्+मद-घञर्थे क। हर्षे। अच्। हर्षयुक्ते त्रि॰।

सम्मर्द * पु॰ संमृद्यतेऽत्र सम्+मृद आधारे-घञ्। युद्धे। भावे घञ् अन्योन्यसंघर्षे।

सम्मान * पु॰ सम्+मन-घञ्। आदरे।

सम्मानित * त्रि॰ सम्+मन-णिच्-क्त। कृतगौरवे, समादृते च।

सम्मार्जन * न॰ सम्+मृज-ल्युट्। संशोधने।

सम्मार्जनी * स्त्री॰ संमृज्यतेऽनया सम्+मृज-ल्युट् ङीप्। धूल्याद्यपसारणार्थे पदार्थे (झाटा)।

सम्मित * त्रि॰ सम्+मा-क्त। सदृशे, तुल्यपरिमाणे च।

सम्मुख * त्रि॰ सङ्गतं मुखम् प्रा॰। अभिमुखागते।

सम्मुखीन * त्रि॰ सम्मुख पतति ख। अभिमुखे पातिनि।

सम्मूर्च्छज * न॰ सम्मूर्च्छात् जायते जन-ड। तृणभेदे।

सम्मूर्च्छन * न॰ सम्+मूर्च्छ-ल्युट्। सम्यग्विस्तारे, उच्छ्राये।

सम्मृष्ट * त्रि॰ सम्+मृज-क्त। मार्जनयुक्ते, शोधितेऽन्नादौ च।

सम्मोद * पु॰ सम्+मुद-घञ्। हर्षे, प्रीतौ च।

सम्यच् * अव्य॰ सम्+अञ्च-क्विप् सम्यादेशः। शोभने, मनोज्ञे च त्रि॰। सत्यवाक्ये न॰। तद्वति त्रि॰।

सम्राज् * पु॰ सम्यक् राजते राज क्विप् मानुस्वारः। यज्ञे सर्वभूमीश्वरे नृपतौ।

सर * न॰ सरति सृ अच्। सरोवरे, जले च। लवणे, दध्नः सरे, तस्मात् मज्जनीते, वाणे च। निर्झरे स्त्री। [illegible] ऋदने गमने च।

सरक * पु॰ न॰ सृ-वुन्। मद्यपानपात्रे, मद्यपरिवेशने, इक्षुजमद्ये तत्पाने, पथिकसमूहे, आकाशे च। गतिशीले त्रि॰।

सरघा * स्त्री॰ सर मधुभेदे हन्ति हन-ड नि॰। मधुमक्षिकायाम्।

सरज * न॰ सरात् जायते जन-ड। नवनीते।

सरजस् * स्त्री॰ सह रजसा। ऋतुमत्यां स्त्रियाम्। रजोयुक्ते त्रि॰। अव्ययी॰ अच् समा॰। रज:साहित्ये अव्य॰।

सरट * पु॰ स्त्री॰ सृ-अटन्। कृकलासे (काँकलास)। [ग्रास।

सरण * न॰ सृ ल्युट्। गमने, लौहमले च। (गन्धभादाल) लता-

सरणि(णी) * स्त्री॰ सृ-अनि वा ङीप्। पथि पङ्क्तौ प्रसारण्याम्।

सरणिका * स्त्री॰ सरे जले पत्रमस्त्यस्याः ठन्। पद्मे। पद्मपत्रे च।

सरमा * स्त्री॰ सह रमते रम-अच्। कुक्कुरयोषिति, विभीषणपत्न्याञ्च। [स्त्री॰।

सरयु * पु॰ सृ-अयु। वायौ। ऊङ्। अयोध्यान्तिकवाहिनदीभेदे

सरल * पु॰ सृ-अलच्। पीतदारुणि धूपकाष्ठभेदे। उदारे, ऋजौ च त्रि॰। त्रिपुटायां स्त्री॰। [टायाञ्च।

सरलद्रव * पु॰ ६त॰। सरलवृक्षनिर्यासे (टारपीन), नदीभेदे, त्रिपु-

सरलाङ्ग * पु॰ सरलो हर्षाऽङ्गं साधनं यस्य। श्रीवेष्टे गन्धद्रव्ये।

सरस् * न॰ सृ-असुन्। जले, सरोवरे च। गौरा॰ ङीष्। सरसी अप्यत्र स्त्री॰ "सरसीः परिशीलितुम्" इति नैषधम्।

सरस * न॰ सह रसेन जलेन आस्वादेन च। सरोवरे। रसान्विते, आर्द्रे च त्रि॰। "सरसां सरसां परिशुष्य" इति भट्टिः। खेल-मिहृतायां स्त्री॰।

सरसम्प्रत * न॰ सरसमिव निर्यासं सम्प्रतनोति सम्+प्र+तन-ड। विकङ्कतवृक्षे (नकाँटासिजु)। [जमनुविद्धम्" इति शकुन्तला।

सरसिज * न॰ सरसि जायते जन-ड अलुक् स॰। पद्मे, "सरसि-

सरसीरुह * न॰ सरस्यां सरोवरे रोहति रुह-क। पद्मे। सारस-पक्षिणि च पु॰ स्त्री॰।

सरस्वत् * पु॰ सरांसि जलानि सन्त्यस्य मतुप् मस्य वः। सरोवरे सागरे च। नद्याम्, नदीभेदे, वाण्यां, गवि, ज्योतिष्मत्यां, ब्राह्म्याम्, शक्तौ, देवीभेदे, सोमलतायाञ्च स्त्री॰ ङीप्।

सरा * स्त्री॰ सृ-अच्। निर्झरे।

सराव * पु॰ सरं जलमवति अव-अण्। जलाधारे मृन्मये पात्रभेदे (सरा)। सह रावेण। सशब्दे त्रि॰।

सरि * पु॰ स्त्री॰ सृ इन्। स्त्रीत्वपक्षे वा ङीप्। निर्झरे।

सरिका * स्त्री॰ सरोऽस्त्यस्याः ठन् सृ-वुन् वा। हिङ्गुपत्रिकायाम्।

सरित् * स्त्री॰ सृ-इति। नद्याम्, सूत्रे च।

सरित्पति * पु॰ ६त॰। समुद्रे। [न तस्य दः। समुद्रे।

सरित्वत् * पु॰ सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः पदत्वाभावात्

सरित्सुत * पु॰ ६त॰। गङ्गापुत्रे भीष्मे। [ऽप्यत्र।

सरिताम्पति * पु॰ ६त॰ अलुक् स॰। समुद्रे. सरितां नाथादयो-

सरिद्वरा * स्त्री॰ सरित्सु वरा श्रेष्ठा। गङ्गायाम्।

सरिल * न॰ सृ-इलच्। जले।

सरीसृप * पु॰ स्त्री॰ वक्रं सर्पति। सृप-यङ् तस्य लुक्, अच्। सर्पे, वृश्चिकादौ, ज्योतिषोक्ते वृश्चिकादिराशौ च।

सरु * पु॰ सृ-उन्। खड्गादिमुष्टौ।

सरूप * त्रि॰ समानं रूपमस्य समानस्य सः। तुल्यरूपे सदृशे। मारसपक्षिणि पु॰ स्त्री॰।

सरोज * न॰ सरसि जायते जन-ड। पद्मे। सरोजातमात्रे त्रि॰।

सरोजन्मन् * न॰ सरसि जन्म यस्य। पद्मे। तडागजातमात्रे त्रि॰।

सरोजिनी * स्त्री॰ सरोजानां समूहः तत्सन्निकृष्टदेशो वा इनि। पद्मसमूहे, तद्युक्तदेशरूपायां पद्मलतायाम्, पद्माधारदीर्घिकायाञ्च।

सरोरुह्(ह) * न॰ सरसि रोहति रुह-क्विप् क वा। पद्मे।

सरोवर * पु॰ सरोभिर्जलैर्व्रियतेऽसौ वृ-अप्। तडागे।

सर्ग * पु॰ सृज-घञ्। स्वभावे, सृष्टौ, निर्मोक्षे, काव्यादेः परिच्छेदे "सर्गोऽयमादिर्गत" इति नैषधम्। निश्चये, "यदि सर्ग एव ते" इति रघुः। मोक्षे, उत्साहे, अनुमतौ च। [वाचस्पत्ये।

सर्गबन्ध * पु॰ सर्गैर्बध्यतेऽसौ बन्ध-घञ्। महाकाव्ये। लक्षणं

सर्ज्ज * अर्ज्जने भ्वादि॰ पर॰ सक॰ सेट्। सर्ज्जति असर्ज्जीत् षोप-देशत्वाभावान्न षत्वम्।

सर्ज्ज * सृ-अच्। शालवृक्षे, तद्रसे (धुना), पीतशाले च।

सर्ज्जक * पु॰ सृज-ण्वुल्। पीतशाले, शालवृक्षे च।

सर्ज्जगन्धा * स्त्री॰ सर्ज्जस्येव गन्धो यस्याः। रास्नायाम्।

सर्ज्जन * न॰ सृज+ल्युट्। सैन्यपश्चाद्भागे. सृष्टौ च।

सर्ज्जनिर्यासक * पु॰ सर्ज्जस्य निर्यास इव कायति कै-क। रात्रे।

सर्ज्जमणि * पु॰ सर्ज्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्ज्जरसे।

सर्ज्जरस * पु॰ ६त॰। शालवृक्षरसे (धुना)।

सर्ज्जि(र्ज्जी) * स्त्री॰ सृज-इन् वा ङीप्। नदीभेदे, तत्कूलजे सर्ज्जिकाक्षारे (साजिमाटि)। [नदीभेदे च।

सर्ज्जिका * स्त्री॰ सृज-ण्वुल्-टाप् अत इत्वम्। सर्ज्जिकाक्षारे,

सर्ज्जिकाक्षार * स्त्री॰ सर्ज्जिकायाः क्षारः। स्वनामख्याते क्षारभेदे (साजिमाटि)।

सर्ज्जिक्षार * पु॰ ६त॰। (साजिमाटि) सर्ज्जिकाक्षारे।

सर्ज्य * पु॰ सर्ज्जस्येदं यत्। सर्ज्जरसे। सृज+ण्यत्। सर्ज्जनीये त्रि॰।

सर्प * पु॰ सृप-अच्। नागकेसरे, भुजङ्गमे च "सर्पापसर्पं भद्रम्" इति भारतम्। तज्जातिस्त्रियां ङीष्। भावे घञ्। गमने।

सर्पकङ्काली * स्त्री॰ सर्पस्येव कङ्कालमस्थिश्रेणी यस्याः गौरा॰ ङीष्। सर्पविषघातिन्यां लतायाम्।

सर्पगन्धा * स्त्री॰ सर्पाणां विषस्य गन्धो गन्धनं हिंसनं यस्याः ४ब विषहारिण्यां लतायाम्। [ददौन्नाटाम्।

सर्पघातिनी * स्त्री॰ सर्पं सर्पविषं हन्ति [illegible] नि। सर्पविष

सर्पदण्ड * पु॰ सर्पस्तम्भसिरालायामध्ये [illegible] अङ्गे।

सर्वर्त्तुपरिवर्त्त * पु० सर्वर्त्तूनां परिवर्त्तो यत्र। वत्सरे।
सर्वसाती * स्त्री० सर्वं साति सा क वा गौरा० ङीप्। सोमराजे
सर्वलिङ्गिन् * पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि। वेदविरुद्ध-धारिणां बौद्धादीनां लिङ्गतम् पाषण्डेषु।
सर्वलोह * पु० सर्वं लोहमयोऽवयवो यस्य। लोहमये बाणे।
सर्ववर्णिका * स्त्री० सर्वं वर्णयति वर्ण-ण्वुल् अत इत्वम्। गाम्भारीवृक्षे।
सर्ववित् * पु० सर्वं वेत्ति विद-क्विप्। परमेश्वरे। सर्वज्ञातरि त्रि०।
सर्ववेद * पु० सर्वं वेदा अधीतत्वेन सन्त्यस्य अच्। सर्ववेदाध्ययनकर्त्तरि। विद-अच् उप०। सर्वज्ञे त्रि०।
सर्ववेदस् * पु० सर्वाणि धनानि वेदयते लम्भयति पात्राय ददाति विद-लाभे णिच्-असि। सर्वस्वदक्षिणकविश्वजिन्नामकयागकर्त्तरि।
सर्ववेशिन् * पु० सर्वेषां वेशो धार्यत्वेनास्त्यस्य इनि। नटे।
सर्वसङ्गत * पु० सर्वं सङ्गतमुचितं यस्य। षष्टिधान्ये। सर्वोचिते त्रि०। [सैन्यसज्जीकरणेन युद्धयात्रायाम्।
सर्वसन्नहन * न० सर्वेषां सन्नहनं युद्धाय सज्जीकरणं यत्र। सर्व-
सर्वसह * पु० सर्वं सहते अच्। गुग्गुलौ। सर्वसहिष्णौ त्रि०।
सर्वसिद्धि * पु० सर्वदा सिद्धिरस्मात्। श्रीफले। सकलसाधने त्रि०।
सर्वस्व * न० कर्म०। सकलधने।
सर्वस्वदक्षिण * पु० सर्वस्वं दक्षिणा यत्र। विश्वजिन्नामकयागभेदे।
सर्वहित * न० सर्वेषां हितम्। मरिचे ६त०। सकलहितहेतौ त्रि०।
सर्वाङ्गीण * त्रि० सर्वाङ्गाणि व्याप्नोति ख। सर्वावयवव्यापके "सर्वाङ्गीणे तरत्वचे" इति भट्टिः। [णत्वम्। दुर्गायाम्।
सर्वाणी * स्त्री० सर्वेषां आनयति मोक्षं आ-नी-ड पूर्वपदादिति
सर्वानुकारिणी * स्त्री० सर्वमनुकरोतीति अनु+कृ-णिनि। शालपर्ण्याम्। [ज्ञानिनि त्रि०।
सर्वानुभूति * स्त्री० सर्वेषामनुभूतिर्यत्र। श्वेतत्रिवृतायाम्। तत्त्व-
सर्वान्नभोजिन् * त्रि० सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-णिनि। सर्वान्नभक्षके। [भक्षके।
सर्वान्नीन * त्रि० सर्वेषामन्नं सर्वमन्नं वा भुङ्क्ते ख। सर्वान्न-
सर्वाभिसन्धिन् * पु० सर्वत्र आचरणे अभिसन्धानमस्त्यस्य इनि। सर्वाभिसन्धिमति खले। [चतुरङ्गसैन्यसर्वाङ्गेन युद्धयात्राभेदे।
सर्वाभिसार * पु० अभिसरति अत्र अभि+सृ-भावे घञ् ६त०।
सर्वार्थसिद्ध * पु० सर्वेषु अर्थेषु सिद्धः। बुद्धे। सकलाभीष्टसिद्धिमति त्रि०।
सर्वाह * पु० सर्वमहः टच् समा० अह्नादेशः णत्वम्। सकलदिने।
सर्वौघ * पु० सर्वेषां चतुरङ्गसैन्यानामोघो हस्त्यभिसारो यत्र। ओघीभूतसर्वसैन्याभिसारे। कर्म०। सर्वजलवेगे।
सर्वौषधि * स्त्री० कर्म०। "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः। मुरामुस्तकर्पूरैर्मुस्ता सर्वौषधिः स्मृत." इत्युक्ते कुष्ठादिद्रव्य-वर्गे।
सर्वौषधिगण * पु० सर्वासामोषधीनां गणः। "मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्। शठीचम्पकमुस्ताश्च सर्वौषधिगणः स्मृत." इत्युक्ते द्रव्यगणे।
सर्षप * पु० सृ-अप सुक् च। (सरिषा) शस्यभेदे। [तैलभेदे।
सर्षपतैल * न० सर्षपस्य स्नेहे सर्षप-स्नेहार्थे तैलच्। सर्षपस्नेहरूपे
सल * न० सल+अच्। जले।
सलिल * न० सल-इलच्। जले।
सलिलकुन्तल * पु० सलिलस्य कुन्तल इव। शैवाले।
सलिलराशि * पु० ६त०। समुद्रे। सलिलनिध्यादयोऽप्यत्र।
सलिलेन्धन * पु० सलिलमिन्धनमिव दाह्यं यस्य। वाडवानले।
सल्लकी * स्त्री० शल-वुन् सुक् च पृ० गौरा० ङीष्। शल्लक्याम्।
सव * पु० सूयते सू-अप्। यज्ञे, सन्ताने च। अच्। सूर्य्ये, पर्णहवे च
सवन * न० सु-ल्युट्। यज्ञाङ्गे स्नाने, सोमनिष्पादनव्यापारे, सोमपाने, यज्ञे, सोमनिष्पीडने, प्रसवे च। [न्वितः" इति रघुः।
सवयस् * त्रि० समानं वयो यस्य समानस्य सः। वयस्ये "सवयोभिर-
सवर्ण * पु० समानो वर्णो यस्य। तुल्यरूपे, एकजात्यन्वये यथा-विप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः। "तुल्यास्यप्रयत्नं सवर्णम्" इति व्याकरणोक्ते स्थानप्रयत्नाभ्यां तुल्यवर्णे च यथा ककारस्य स्थानेन तुल्यो गकारादिः, प्रयत्नसाम्येन चकारस्य छकारादिः जकारस्य झकारः झकारस्य जकारः ङकारस्य वर्गीयचतुर्थो वर्णः। सह वर्णेन। वर्णसहिते त्रि०।
सवहा * स्त्री० सह वहेन। त्रिवृतायाम्।
सवासस् * त्रि० सह वाससा। वस्त्रत्यागविनास्नानाचमने वेगवति।
सविकल्पक * न० सह-विकल्पेन कप्। वेदान्तोक्ते ज्ञातृज्ञेयभेदादि-कल्पनासहिते ध्यानभेदे, न्यायोक्ते एकस्मिन् धर्मिणि परसंसर्गा-वगाहिनि ज्ञानभेदे च।
सविकाश * त्रि० सह विकाशेन। प्रफुल्ले, विकसिते, सप्रकाशे च।
सवितृ * पु० सू तृच्। जगत्प्रसवितरि परमेश्वरे "तत् सवितुर्वरेण्यम्" इति श्रुतिः। सूर्य्ये च।
सविध * त्रि० सह विधया विध+क सहस्य सः। निकटे "सविधेऽपि न सूक्ष्मसाक्षिणी" इति नैषधम्।
सविस्मय * त्रि० सह विस्मयेन विस्मयान्विते। [च।
सवेश * त्रि० विशन्त्यत्र वेशो देशः सह वेशेन। निकटे, वेशान्विते
सव्य * त्रि० सू+कर्मणि यत्। वामे, दक्षिणे, प्रतिकूले च। विष्णौ पु०।
सव्यसाचिन् * पु० सव्येन वामेन सचति सच+णिनि। अर्जुने।
सव्येष्ठ * पु० सव्ये तिष्ठति स्था क अलुक् स० अम्बष्ठादि० षत्वम्। सारथौ।
ससत्त्वा * स्त्री० सह सत्त्वेन। आपन्नसत्त्वायाम्। सत्त्वयुक्ते त्रि०।
ससला * स्त्री० सह फलेन। गर्भवत्यां स्त्रियाम्। फलयुक्ते त्रि०।

"न ममलेव गर्त्तेषु" इति मनुः।
समन * न० सम-हिंसने ल्युट्। यज्ञार्थं पशुहनने।
सस्य * न० सस-यत्। वृक्षादीनां फले, क्षेत्रगते धान्ये च।
सस्यसंवर * पु० सस्यं संवृणोति सम्+वृ-अच्। शालवृक्षे।
सस्यसंवरण * पु० सस्यं संवृणोति सं+वृ-ल्यु। अश्वकर्णवृक्षे।
सह * अव्य० सह-अच्। साहित्ये, साकल्ये, सादृश्ये, यौगपद्ये, विद्यमानत्वे, समृद्धौ, सम्बन्धे, सामर्थ्ये च। [त्रि०।
सह * पु० सहते सह-अच्। अग्रहायणमासे। भारादिसहिष्णौ
सहकार * पु० सह युगपत् किरति सौरभम् दूरादौ कॄ-अण्। अतिदूरगामिसौरभान्विते आम्रे। भावे घञ्। सहकर्मकरणे पु०।
सहकारिन् * त्रि० सह सम्भूय करोति कार्यं कृ+णिनि। हेतुभेदे स्वभिन्ने स्वकार्यकारके हेतौ।
सहगमन * न० सह+गम-ल्युट्। सहमरणे, सहगमने च।
सहचर * पु० सह चरति चर-अच्। पीतझिण्ट्यां, नीलझिण्ट्याञ्च। वयस्ये, प्रतिबन्धके, सहाये, अनुचरे च त्रि० "सहचरमधुहस्तेति" कुमारः। स्त्रियां ङीप्। [चरति धर्मम् चर-ट। धर्मपत्न्याम्।
सहचरी * स्त्री० सह चरति चर+ट ङीप्। पीतझिण्ट्याम्। सह
सहज * पु० सह जायते जन-ड। सहोदरे, निसर्गजे च। स्वभावसिद्धे "सहजमाकृतावपि" इति माघः, सहोत्थिते च त्रि०। ज्योतिषोक्ते जन्मलग्नात् तृतीयस्थाने न०। [यादौ।
सहजमित्र * न० सहजं स्वभावसिद्धम् प्राकृतं मित्रम्। भागिने-
सहजारि * पु० सहजः स्वभावसिद्धः अरिः। सापत्नभ्रातृपितृव्यपुत्रादौ।
सहदेव * पु० सह दीव्यति दिव-अच्। माद्रीसुते पाण्डवभेदे। बलायाम्, दण्डोत्पले, शारिवौषधौ च स्त्री० गौ० ङीप्। सर्पाक्ष्याम्, पीतदण्डोत्पलायाञ्च स्त्री० टाप्।
सहधर्मिणी * स्त्री० सह समानो धर्मोऽस्त्यस्याः इनि। पत्न्याम्।
सहन * न० सह-ल्युट्। क्षमायां, तितिक्षायाम्, शीतोष्णादिद्वन्द्वधर्मसहने। सह-ल्यु। सहिष्णौ, क्षमाशीले च त्रि०।
सहपान * न० सह पानम्। एकत्र मद्यादिपाने।
सहभाविन् * त्रि० सह भवति भू-णिनि। सहाये।
सहभोजन * न० सह एकत्र भोजनम्। एकत्रस्थाने अशनादौ।
सहमरण * न० सह मृतेन पत्या सह एकचितारोहणेन मरणम्। मृतपतिचितारोहणेन तत्सहितमरणे।
सहरसा * स्त्री० सह रसेन। मुद्गपर्ण्याम्। रसान्विते त्रि०।
सहस् * न० सह असि। बले, ज्योतिषि च। मार्गशीर्षे मासे पु०। "सहसा सहसा कृतवेपथुः" इति माघः।
सहसा * अव्य० सह+सो डा। हठादित्यर्थे, अकस्मादित्यर्थे च।
सहस्य * पु० सहसे बलाय हितः यत्। पौषमासे।
सहस्र * न० समानं हसति हस+र। दशशतसंख्यायां, बहुसंख्यायां, तत्संख्यान्विते च।

सहस्रकर * पु० सहस्रं कराः किरणा यस्य। सूर्ये। किरणादयोऽप्यत्र।
सहस्रकाण्डा * स्त्री० सहस्रं काण्डा यस्याः। श्वेतदूर्वायाम्।
सहस्रदंष्ट्र * पु० स्त्री० सहस्रं बहुसंख्या दंष्ट्रा यस्य। पाठीन (बोयाल)।
सहस्रदंष्ट्रिन् * पु० सहस्रं दंष्ट्राः सन्त्यस्य इनि। पाठीनमत्स्ये
सहस्रधारा * स्त्री० सहस्रगुणिता धारा। देवतास्नानार्थं बहु यन्त्रनि सृतबहुजलादिधारायाम्। [
सहस्रनयन * पु० सहस्रं नयनान्यस्य। इन्द्रे। सहस्रनेत्र
सहस्रपत्र * न० सहस्रं बहुसंख्यानि पत्राणि यस्य। पद्मे सपर्णादयोऽप्यत्र।
सहस्रपाद् * पु० सहस्रं बहवः पादा अस्य पादाग्रः। परमेश्वरे च। "सहस्राक्षः सहस्रपाद्" इति पुरुषसूक्तम्।
सहस्रपाद * पु० सहस्रं पादाः किरणाश्चरणा वा सन्त्यस्य विष्णौ, सूर्ये, अर्कवृक्षे च। [वीर्यांश्
सहस्रभुज * पु० सहस्रं बहवो भुजा यस्य। विष्णौ,
सहस्रमूर्द्धन् * पु० सहस्रं बहवो मूर्द्धानोऽस्य। विष्णौ। शीर्षादयोऽप्यत्र। [विष्
सहस्रबाहु * पु० सहस्रं बाहवोऽस्य। बाणासुरे, कार्त्तवीर्य
सहस्रवीर्य्या * स्त्री० सहस्रं बहूनि वीर्य्याण्यस्याः। दूर्वायां महाशतावर्य्याञ्च।
सहस्रवेध * न० सहस्रं बहवो वेधा अस्य। चुक्रे। काञ्जिभेदे
सहस्रवेधिन् * न० सहस्रं विध्यति विध-णिनि। हिङ्गौ। वेतसे, कस्तूर्य्याञ्च पु०। सहस्रवेधकर्त्तरि त्रि०।
सहस्रशिखर * पु० सहस्रं बहूनि शिखराण्यस्य। विन्ध्यपर्वते
सहस्रा * स्त्री० सहस्र बलानि सन्त्यस्याः अच्। अम्बष्ठायाम्
सहस्रांशु * पु० सहस्रमंशवो यस्य। सूर्ये, अर्कवृक्षे च।
सहस्राक्ष * पु० सहस्रमक्षीणि यस्य षच् समा०। इन्द्रे, विष्णौ,
सहस्रार * न० सहस्रमाराः कोणा अस्य। शिरःस्थिते सुषुम्ना मध्यस्थे सहस्रदलकमले। [नृपादौ, पाठीन
सहस्रिन् * पु० सहस्रं सैन्यानि सन्त्यस्य इनि। सहस्रसैन्
सहा * स्त्री० सहते सह अच्। मुद्गपर्ण्यां, घृतकुमार्य्यां, दण्ड पलायां, पृथिव्यां, शुक्लझिण्ट्याम्, रास्नायां, स्वर्णचीर्य्यां, कट्टाल्यां, नारीपुष्पे च।
सहाचर * पु० सह आचरति आ+चर-अच्। पीतझिण्ट्याम्
सहाय * पु० सह एति इण-अच्। सहचरे, अनुकूले, "अशक्त ऽपि सहाय एव" इति कुमारः। [सहायसमुदाये
सहायता * स्त्री० सहायानां समूहः तभावो वा तल्। सादृ
सहार * पु० सह एकदैव ऋच्छति दूर गच्छति सौरभेण ऋ अण् आम्रे। क्वचित् हरणं सह हारेण। महाप्रलये।
सहारोग्य * त्रि० सह आरोग्येण। रोगशून्ये।

सहासन * न० सह आस्यतेऽत्र आस-ल्युट्। एकासने।

सहित * त्रि० सह-इत (पा-क्त) पु० समो(?)त्प्रेरणेऽप०। सम्यग्हिते। सह-
सार्थे इट, सह इतम् वा। सहाभिव्याहृते। [स्त्रियां ङीप्।

सहितृ * त्रि० सह तृच् वा इट्। सहनशीले। इडभावे सोढाप्यत्र।

सहित्र * न० सह्यतेऽनेन सह-इत्र। सहनसाधने धर्मभेदे।

सहिष्णु * त्रि० सह-इष्णुच्। सहनशीले। [विरुद्धधर्मद्वयसहने।

सहिष्णुता * स्त्री० सहिष्णोर्भाव: तल्। क्षमायाम् शीतोष्णादि-

सहृदय * त्रि० सह हृदयेन। प्रसन्नचित्ते, काव्यार्थभावनाधीन-
परिपक्वबुद्धौ "सहृदयधुरीणा कतिपये" इति रसगङ्गाधर:।

सहृल्लेख * पु० हृदयस्य लेख कालुष्यकरणं हृल्लेख: सह हृल्लेखेन।
"सर्वविधिका तु हृदये स्थिते यस्मिन् प्रजायते। सहृल्लेखस्तु
विज्ञेयम्" इत्युक्ते दूषितार्थे।

सहोक्ति * स्त्री० सह उक्ति:। सहकथने, एकोक्तौ, सहशब्दयो-
गेन। अर्थालङ्कारभेदे। [पर्णशालायाम्।

सहोटज * पु० न० सहते आतपादिक सह-अच् कर्म०। मुनीनां

सहोढ * पु० सह ऊढया। "या गर्भिणी संस्क्रियते ज्ञाताऽज्ञा-
तापि वा सती। वोढु: स गर्भो भवति सहोढ इति चोच्यते"
इति मनूक्ते अज्ञातगर्भाया: परिणीताया: स्त्रिया गर्भे। तज्जाते
पुत्रभेदे सहोढज:। सहोढात् जायते जन-ड।

सहोदर * त्रि० तुल्य समानमुदरं यस्य। एकगर्भजाते भ्रातरि।
भगिन्यां स्त्री०।

सह्य * न० सहतस्य भाव: यत् नि०। साहाय्ये, "तवार्थे सह्यम-
करोत्" इति पुराणम्। सह भावे यत्। आरोग्ये, साम्ये,
माधुर्ये च। कर्मणि यत्। सोढव्ये त्रि०। पुनाख्यदेशसमीपस्थे
पर्वतभेदे पु०।

सा * स्त्री० सो-ड। गौर्यां, लक्ष्म्यां च।

सांख्य * न० सम्यक् ख्यायतेऽत्र संख्या सम्यग्ज्ञानं सास्त्यत्र अण्। सम्य-
ग्ज्ञाने "एषा तेऽभिहिता सांख्ये" इति गीता। संख्या मूलप्रकृ-
त्यादिपदार्थानां गणनमत्र प्राधान्येन। कपिलप्रणीते दर्शन-
शास्त्रे, परस्वर्णे सांख्यमप्युभयत्र सांख्ययोगिनि पु०।

सांघातिक * त्रि० संघाताय हितम् ठञ्। सङ्घातकारके, ज्योति-
षोक्ते जन्मनक्षत्राद्धियोडशनक्षत्रे च "देहद्रविण बन्धूनां नाम:
साङ्घातिकं तथा" इति ज्योतिषम्। परसवर्णे साङ्घातिकमपि
उभयत्र।

सांदृष्टिक * न० संदृष्टं प्रत्यक्षदृष्टमनुसरति ठक्। दृष्टानुसारिन्याय-
भेदे। संदृष्टे दृष्टमात्र: फलति ठञ्। सद्य:फले। परसवर्णे
साम्दृष्टिकमप्युभयत्र। [कारके।

सांयात्रिक * पु० सम्यक् यात्रायै अलम् ठक्। पोतेन वाणिज्य-

सांयुगीन * त्रि० संयुगे युद्धे साधु: खञ्। रणकुशले।

सांराविण * न० सम्+रु-भावे णिनि तत: स्वार्थे अण्। व्याप्ते शब्दादि-
के। [illegible]।

सांवत्सर * पु० संवत्सरं तज्ज्ञानोपयोगिशास्त्रं वेत्ति अधीते वा
अण्। ज्योतिर्वित्तरि गणके। वर्षसम्बन्धिनि त्रि०।

सांवत्सरिक * त्रि० संवत्सरे भव: ठञ्। प्रतिवर्षकर्त्तव्ये श्राद्धे।

सांवादिक * पु० सम्यग्वादायालं ठञ्। नैयायिके। [विषये च।

सांशयिक * त्रि० संशयमापन्न: ठञ्। सन्दिग्धाने, संशययुक्ते, संशय-

सांसारिक * त्रि० संसाराय हितं तत्र भवो वा ठञ्। संसारभवे,
संसारोपयोगिनि वा पदार्थे।

सांसिद्धिक * त्रि० संसिद्धि: स्वभावसिद्धि: तया निर्वृत्तं ठञ्।
स्वभावसिद्धे "सांसिद्धिकमुदाहृतम्" इति भाषापरिच्छेद:।

साकम् * अव्य० सह अकति अक-अम् सादेश:। साहित्ये।

साकल्य * न० सकलस्य भाव: ष्यञ्। समुदाये। स्वार्थे ष्यञ्। सकले,
होमार्थे मिश्रितेषु तिलादिद्रव्येषु च। [कात्यायनोक्ते पदभेदे च।

साकाङ्क्ष * त्रि० सहाकाङ्क्षया। साभिलाषे, शाब्दबोधोपयोग्या-

साकार * त्रि० सह आकारेण मूर्त्या। मूर्त्तिविशिष्टे, सावयवे च।

साकुरुण्ड * पु० सकुरुण्ड एव स्वार्थेऽण्। सकुरुण्डवृक्षे।

साकेत * न० आकिल्यते आकेत: सहाकेतेन। अयोध्यापुरे "जनस्य
साकेतनिवासिन:" इति रघु:।

साक्तुक * पु० सक्तवे हित: ठञ्। यवे। सक्तूनां समाहार:
तस्येदं वा ठञ्। सक्तुसमूहे न०। तत्सम्बन्धिनि त्रि०।

साक्षात् * अव्य० सह अक्षति अक्ष-आति सादेश:, सह अक्षमतति
अत-क्विप् लौकिक वा। प्रत्यक्षे, तद्रूपे चैतन्ये च "यत्साक्षात्
अपरोक्षाद् ब्रह्म" इति श्रुति:।

साक्षात्कार * पु० साक्षात्+कृ-घञ्। प्रत्यक्षे।

साक्षिन् * त्रि० सह-अक्षि अस्य इनि साक्षात्द्रष्टा इति वा नि०।
साक्षाद्द्रष्टरि। स्त्रियां ङीप्। परमेश्वरे पु० "साक्षी चेता:
केवलो निर्गुणश्च" इति श्रुति:। अयमेव साक्षिचैतन्यत्वेन
वेदान्तपरिभाषादौ स्वीकृत:।

साक्ष्य * न० साक्षिणो भाव: कर्म वा ष्यञ्। साक्षिकर्मणि,
व्यवहारविषयवृत्तान्तकथनरूपे तद्भावे च। "य साक्ष्यमनृतं
वदेत्" इति स्मृति:।

सागर * पु० सगरेण निर्वृत्त: अण्। समुद्रे, मृगभेदे, सङ्ख्याभेदे
च। [नद्या, सुरभेलायाच।

सागरगामिनी * स्त्री० सागरं गच्छति गम+णिनि म बलम्।

सागरनेमि * स्त्री० सागर: नेमिरिव वेष्टनाकारो यस्या:। पृथि-
व्याम्।

सागरमेखला * स्त्री० सागरो मेखलेव यस्या:। पृथिव्याम्।

सागरालय * पु० सागर आलयो यस्य। वरुणे।

सागरोत्थ * न० सागरात् उत्तिष्ठति उद्+स्था क। सामुद्रलवणे।

साग्निक * पु० सहाग्निना अग्निहोत्रेण वा वर्त्त०। श्रौतस्मार्त्ताग्नि-
युक्ते, अग्निहोत्रिणि द्विजे च।

सादृश्य * न० सदृशस्य भाव: ष्यञ्। परम्पराभावसमानाधिकरण

[illegible]

[illegible] परं कुलं [illegible]

[illegible] पुरीषयोनिर- [illegible]

[illegible] स्रजु [illegible]

[illegible] दीर्घः । [illegible] इति कुमारः ।

[illegible] साहयति [illegible]

[illegible] नगरे, शिकडे च । [illegible]

[illegible] सातयति [illegible]

[illegible] दक्षे, कडे च ।

[illegible] समाने, दाने, तीव्रदीर्घ [illegible]

[illegible] [illegible] शिवेलपति [illegible]

[illegible] [illegible]

[illegible]

मध्यदिनम् ।

साधक * त्रि॰ [illegible] साधादेशः वा । [illegible] [illegible] [illegible] सिधे च । "[illegible]" इति [illegible] ।

साधन * क्लो॰ [illegible] सिध-णिच्-ल्युट् साधादेशः । [illegible] [illegible] [illegible] [illegible] । [illegible] तमदा स्तुनम्" इत्युक्ते [illegible] करणे, सैन्ये, पुरीषकरणे, पुंचिह्ने, [illegible] [illegible], [illegible], हेतौ च । भावे ल्युट् । मारणे, [illegible] [illegible], [illegible], निष्पादने, अनुगमने, सिद्धौ च । [illegible] । द्रव्ये, धने, मेढ्रे च ।

[illegible] * क्लो॰ [illegible] समानधर्मस्य भावः ष्यञ् । [illegible] [illegible] "[illegible] यस्य साधर्म्यम्" इति भाषापरि- [illegible] । समानो धर्मो यस्य तस्य भावः ष्यञ् । समानधर्मे यथा [illegible] सुन्दरं मुखमित्यादौ सौन्दर्यम् ।

साधारण * त्रि॰ सह धारणया वर्त्तते [illegible] । सदृशे, अनेकस्वत्वास्पदे [illegible] धने "साधारणं समाश्रित्य यत्किञ्चिद्वाहनादिकम्" इति स्मृतिः । स्त्रियां गौरा॰ ङीष् । सा च कुञ्चिकायां, वेश्यादिनायिकायाञ्च । न्यायोक्ते "यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः" इत्युक्ते हेत्वाभासभेदे पु॰ । यथा वह्निमान् धूमादित्यादौ द्रव्यत्वहेतुः । सपक्षे पर्वते, विपक्षे ह्रदादौ च [illegible] इति साधारणः ।

साधारणधर्म * पु॰ कर्म॰ । "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । दमः क्षमार्जवं दानं धर्मं साधारणं विदुः" इत्युक्ते [illegible] [illegible] धर्मे । न्यायादुक्ते संशयहेतौ समानधर्मे च । यथा रजतं न वेति संशये शुक्तिरजतयोः सामान्यधर्मः [illegible] ।

साधित * त्रि॰ सिध+णिच्-क्त । दापिते, प्रमाणादिना [illegible] च "साधितात् दशकं शतम्" इति स्मृतिः, निष्पादिते, शोधिते च ।

साधिदैव * त्रि॰ सह अधिदैवेन वर्त्तते [illegible] । अधिदैवसहिते । साधिभूताधियज्ञमपि । परमेश्वरे ।

साधिष्ठ * त्रि॰ अतिशयेन साधु बाढो वा इष्ठन् साधादेशः [illegible] वा । अत्यन्तदृढे, अतिसाधौ, अतिशोभने च ।

साधिष्ठान * त्रि॰ सह अधिष्ठानेन । [illegible] । तन्त्रोक्ते षट्चक्रमध्ये [illegible] चक्रभेदे न॰ ।

साधीयस् * त्रि॰ अतिशयेन साधुः बाढो वा साधादेशः [illegible] वा । अत्यन्तदृढे, साध्वे, साधुतरे च । स्त्रियां ङीप् ।

साधु * त्रि॰ साध+उन् । [illegible], सुन्दरे, मनोहरे, [illegible] [illegible] ङीप् । मुनौ, जिने च "न [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] च पु॰ ।

साधुपुष्प * न० साधु पुष्पं यस्य। स्थलपद्मे। कर्म०। उत्तमकुसुमे।

साधुवाह * पु० कर्म०। विनीते सुशिक्षिते घोटके।

साधुवाहिन् * पु० साधु यथा तथा वहति णिनि। विनीतेऽश्वे। सुन्दरवहनकर्त्तरि त्रि०।

साधुवृक्ष * पु० कर्म०। कदम्बवृक्षे, वरुणवृक्षे, शोभनवृक्षमात्रे च।

साध्य * पु० सिध-णिच्-यत्। "मनोमन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान्। निर्भयो नरकश्चैव दंशो नारायणो वृषः। प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" इत्युक्ते द्वादशसंख्यके गणदेवताभेदे, विष्कम्भादिषु योगेषु एकविंशे योगे च। साधनीये त्रि०। अष्टादशविवादेषु प्रमाणादिना उद्भाव्ये पदार्थे। "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः" इत्युक्ते व्यवहारे साधनार्हे प्रतिज्ञेये पक्षे पु०। अनुमित्या साधनीये वह्न्यादौ च यथा "वह्निमान् धूमात्" इत्यादौ सिषाधयिषितः वह्निः साध्यः। साध्यमस्यास्ति अर्श आद्यच्। साध्यवति पक्षे पु० "साध्यनिर्देशः प्रतिज्ञा" इति न्यायसूत्रम् "साध्यवत्तया पक्षनिर्देशः" इति दीधितिकारः। कर्त्तव्ये, तन्त्रोक्ते मन्त्रमात्रे, साधकस्य आनुकूल्यताप्रदर्शकस्ये द्वितीयपञ्चमादिके "सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् ज्ञेया मनीषिभिः" इत्युक्ते मन्त्रभेदे च। विस्तरो वाचस्पत्ये।

साध्यता * स्त्री० साध्यस्यानुमितिविधेयस्य भावः तल्। अनुमितिविधेयताऽऽख्ये न्यायोक्ते विषयताभेदे।

साध्यतावच्छेदक * पु० साध्यतामवच्छिनत्ति विशेषयति अव+छिद-ण्वुल्। येन रूपेण यस्य साध्यताख्या विषयता तस्मिन् धर्मे। "यथा वह्निमान् धूमात्" इत्यत्र वह्निः साध्यः तस्य साध्यता वह्नित्वमवच्छिनत्तीति वह्नित्वं साध्यतावच्छेदकम्।

साध्यसिद्धि * स्त्री० साध्यस्य सिद्धिः विनिर्णयः सिध-क्तिन्। साध्यस्य वह्न्यादेः अनुमित्यादिना साधनाधीने निर्णये, निष्पत्तौ च। साध्यस्य प्रतिज्ञेयार्थस्य सिद्धिः निर्णयो यत्र। व्यवहारे, प्रतिज्ञार्थस्य साक्षिपत्रादिभिः विनिर्णयरूपे व्यवहारपादे च।

साध्वस * न० साधु अस्यति अस-अच्। भये।

साध्वी * स्त्री० साधु-ङीप्। मेदायां, "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" इत्युक्तलक्षणायां स्त्रियाञ्च।

सानन्द * त्रि० सह आनन्देन। आनन्दयुक्ते "सानन्द नन्दि-हस्त" इति सामनीमाधवम्।

सानु * पु० न० सन-ञुण्। पर्वतस्य समभूमिदेशे, प्रस्थे, वने, वातसमूहे, पथि, अग्रे, कोविदे, अर्के, पल्लवे च।

सानुज * न० सानौ जायते जन+ड। प्रपौण्डरीके। तुम्बुरुवृक्षे पु०। सहानुजेन। अनुजसहिते त्रि०।

सानुमत् * पु० सानुरस्त्यस्य मतुप्। पर्वते।

सान्तपन * न० सन्तापयति सम्+तप-णिच्-ल्युट् स्वार्थे अण्। "गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः" इत्युक्ते द्व्यहसाध्ये व्रतभेदे।

सान्तर * न० सह अन्तरेण साहेत्य। विरले, व्यवधानसहिते त्रि०।

सान्तानिक * त्रि० सन्तानः प्रयोजनमस्य ठक्। सन्तानसाधने विधानभेदे। [असमान्त्वत् त सान्त्वयतीत्यन्ये।

सान्त्व * आनुकूल्यकरणे अद० चुरा० उभ० सक० सेट्। सान्त्वयति ते

सान्त्व * न० सान्त्व+घञ्। अत्यर्थमधुरे, आनुकूल्ये, स्त्रीजनःप्रीतिदवाक्ये, प्रियवाक्यादिना क्रोधोपशमनरूपे, सान्त्वने च।

सान्त्वन * न० सान्त्व-ल्युट्। आनुकूल्यकरणे, प्रियवादादिना क्रोधाद्युपशमने च। युच्। अत्रैव स्त्री०।

सान्दीपनि * पु० सन्दीपनस्यापत्यम् इञ्। रामकृष्णयोराचार्य्ये अवन्तिपुरवासिनि मुनिभेदे। [प्रमोदे च। घने न०।

सान्द्र * त्रि० अदि-रक् सह अन्द्रेण। निबिडे, मृदौ, स्निग्धे,

सान्द्रपुष्प * पु० सान्द्रं पुष्पमस्य। विभीतकवृक्षे।

सान्द्रस्निग्ध * त्रि० सान्द्र स्निग्ध। अतिस्निग्धे, अतिमनोहरे च।

सान्धिक * पु० सन्धा सुराभाण्डं शिल्पं वेत्ति ठक्। शौण्डिके। सन्धिः प्रयोजनमस्य ठञ्। सन्धिकर्त्तरि त्रि०।

सान्ध्य * त्रि० सन्ध्यायां भवः अण्। सन्ध्याकालिके।

सान्नाय्य * न० सम्यक् नीयते सम्+नी-ण्यत् नि०। मन्त्रादिना संस्कृते घृतादौ। [इति दुर्गादासमतम्।

सान्निध्य * न० सन्निधिरेव ष्यञ्। नैकट्ये, "सान्निध्यमिह कल्पय"

सान्निपातिक * त्रि० सन्निपातात् त्रिदोषविकारात् आगत [illegible] जातो वा ठञ्। सन्निपातादागते [illegible] "[illegible] सान्निपातिकं" इति कुमारः।

सान्यासिक * पु० सन्न्यासः प्रयोजनमस्य ठक्। सन्न्यासिनि।

सापत्न * पु० सपत्न एव स्वार्थे अण्। शत्रौ। [illegible] अपत्यं [illegible] वा ठञ्। [illegible]

सापिण्ड्य * न० सपिण्डस्य भावः ष्यञ्। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सामन् * न॰ सो-मनिन्। "अग्निं दूतं हणीमहे" इत्यादिके वेदभेदे, तदोक्तासु ऋक्षु गानभेदे "ऋच्यध्यूढं साम गीयते" इति छान्दोग्यम्। साम्नां "सामभेदस्तथा दानं दण्डश्च" इत्युक्ते शत्रुवशीकरणोपायभेदे, प्रियवाक्यादिना सान्त्वने च। अस्य वत्यन्तत्वात् स्त्री॰ ङीप्।

सामन्त ० पु॰ समीपदेशान्तः एकदेशो यस्य समन्तस्तस्येश्वरः अण्। स्वविषयानन्तरवर्त्तिदेशाधिपे नृपे। समन्ताद्भवः अण् टिलोपः। "श्रेष्ठमजासु (मडल) यं परम्परया मौलाः सामन्ता वा" इति स्मृतिः। [चिते च।

सामयिक * त्रि॰ समये भवः उचितो वा ठञ्। समयभवे, कालो-

सामयोनि ० पु॰ साम योनिरुत्पत्तिस्थानं यस्य। हस्तिनि, तेषाञ्च सामयोनित्वमुक्तं पालकाव्ये "सूर्यस्याण्डकपाले द्वे समानीय प्रजापतिः। हस्ताभ्यां परिगृह्याथ सप्त सामान्यगायत। गायतो ब्रह्मणस्तस्मात् समुत्पेतुर्मतङ्गजाः" इति। चतुर्मुखे ब्रह्मणि च।

सामर्थ्य * न॰ समर्थस्य भावः ष्यञ्। टेवर्जे बले शक्तौ योग्यतायां, सङ्गतार्थतायाञ्च। [ठञ्। समवायसम्बन्धिनि त्रि॰।

सामवायिक * पु॰ समवाये प्रसृतः ठञ्। मन्त्रिणि। तस्येदम्।

सामाजिक * पु॰ समाजः समाजनं मर्यादनमस्य। सभ्ये।

सामान्य * समानस्य भावः ष्यञ्। साधारणधर्मे। यथा मुखं चन्द्रमिव सुन्दरमित्यादौ सौन्दर्यादि। समानमेव स्वार्थे ष्यञ्। द्रव्यगुणकर्मसु तुल्यतया स्थितायां जातौ।

सामान्यलक्षणा * स्त्री॰ सामान्यं साधारणधर्मः लक्षणं यस्याः। न्यायोक्ते अलौकिकप्रत्यक्षसाधने [illegible]। यथा एकघटज्ञाने घटत्वरूपसामान्यधर्मज्ञानात् सकलस्य घटस्यैतो ज्ञानम्।

सामान्या * स्त्री॰ समानैव स्वार्थे ष्यञ् स्त्रीत्वा॰ टाप्। साधारणस्त्रियां वेश्यायाम्।

सामि * अव्य॰ साम इन्। अर्द्धे "सामिभुक्त्वा..." इति नैषधम्।

सामिधेनी * स्त्री॰ सम्-इन्ध करणे ल्युट् नि॰। अग्निसमिन्धनसाधने ऋग्भेदे, समिधाहुते च।

सामीप्य * न॰ समीपस्य भावः स्वार्थे वा ष्यञ्। नैकट्ये, निकटे च "सामीप्यादि[illegible]" इति व्याकरणम्।

साम्ब [illegible]

[illegible]

[illegible]

[illegible]

साम्प्रतम् * अव्य॰ सम्+प्र+तन-डमु। युक्ते उचिते।

साम्बर * न॰ सम्बरदेशे भवम् अण्। साम्बरदेशोद्भवे लवणे।

साम्भवी * स्त्री॰ सम्भवः अस्त्यस्य प्रज्ञाद्यण् गौरा॰ ङीप्। रक्तलोध्रे।

साम्य * न॰ समस्य भावः ष्यञ्। तुल्यत्वप्रयोजके साधारणधर्मे।

साम्राज्य * न॰ सम्राजः भावः ष्यञ्। सार्वभौमत्वे "भेजे साम्राज्यदीक्षितम्" इति रघुः "नृपाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके" इत्युक्ते दशलक्षयोजनाधिराज्ये च।

साय * पु॰ सो-घञ्। दिनान्ते, बाणे च।

सायंसन्ध्या * स्त्री॰ सायं दिनान्ते सन्ध्या, तत्र सन्ध्यायते सम्+ध्यै-घञर्थे क वा। दिनान्तसन्ध्यायाम्, दिनान्ते उपास्यदेवताभेदे च। भावे अङ्। तत्रोपासनायाम्।

सायक * पु॰ सो-ण्वुल्। बाणे, खड्गे च।

सायकपुङ्खा * स्त्री॰ सायकस्य पुङ्खो यस्याः ५ब॰। शरपुङ्खावृक्षे।

सायन्तन * त्रि॰ सायम्भवः सायम् ट्युल् तुट् च। दिनान्तभवे। स्त्रियां ङीप्। "सायन्तनीं तिथिप्रणाः" इति भट्टिः।

सायम् * अव्य॰ सो अमु। दिनान्ते "सायं सम्प्रति वर्त्तते" इत्युद्भटः।

सायाह्न * पु॰ सायोऽह्नः एकदे॰ त॰ टच् अह्नादेशः। दिनान्ते, "सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्" इति स्मृत्युक्ते पञ्चधा विभक्तदिनस्य त्रिमुहूर्त्तात्मके पञ्चमे भागेऽपि च।

सायुज्य * न॰ सह युनक्ति युज-क्विप् सादेशः सयुक् तस्य भावः ष्यञ्। सहयोगे, पञ्चविधमुक्तिमध्ये एकत्र समवस्थानरूपे मुक्तिभेदे च। [सारत्।

सार * दौर्बल्ये अद॰ चुरा॰ उभ॰ सक॰ सेट्। सारयति ते असारत्।

सार * न॰ सृ-घञ्, सार-अच् वा। जले, धने, न्याय्ये, नवनीते, श्रेष्ठे, वने च। बले, स्थिरांशे, मज्जनि, मज्जसारे, वायौ, रोगे, पाशकदे, दध्यग्रे च पु॰ न॰। श्रेष्ठे, वरे च त्रि॰। [द्रव्ये त्रि॰।

सारक * पु॰ सारयति रेचयति वा णिच्-ण्वुल्। जयपाले। रेचक॰

सारखदिर * पु॰ कर्म॰। विट्खदिरे।

सारगन्ध * पु॰ सारः श्रेष्ठो गन्धो यस्य। चन्दने।

सारघ * न॰ सरघाभिर्निर्वृत्तम् अण्। मधुनि क्षौद्रे।

सारङ्ग * पु॰ स्त्री॰ सृ-अङ्गच्। चातकपक्षिणि, हरिणे, गजे, भृङ्गे, छत्रे, राजहंसे, चित्रमृगे, वाद्यभेदे, वस्त्रे, नानावर्णे, मयूरे, कामदेवे, धनुषि, केशे, आभरणे, पद्मे, शङ्खे, चन्दने, कर्पूरे, पुष्पे, कोकिले, मेघे, सिंहे, वायौ, भूमौ, दीप्तौ च। नानावर्णयुक्ते त्रि॰। सारङ्गी। चित्रमृगादौ।

सारङ्गज * पु॰ सारङ्गे जले जायते ड॰। [illegible]

सारण * न॰ सारात् दध्यग्रात् जायते अन् ड। नवनीते।

सारण * न॰ सृ णिच्-ल्युट्। गन्धभेदे, क्लेशापसारणे, रावणमन्त्रिणि च। अतिसारे, आम्रातके च पु॰।

सारणी * स्त्री॰ सृ णिच्-ल्युट् वा ङीप्। क्षुद्रनद्यां, प्रसारिण्याम्

सान्, सह वेन चरणन्यादिबोधके ज्योतिषप्रसिद्धे च।

सारमद * पु० सारप्रधानः जनपधानमद। कदलीवृक्षे।

सारथि * पु० स-अथिण, सह रथेन सरथः घोटकः तत्र नियुक्तः इञ् वा। रथादिवाहनार्थं तर्के नियन्तरि।

सारदा * स्त्री० सारं ददाति दा-क। सरस्वत्याम् "लिपाति यदि पर्यसा सारदेति" मिश्रमाय। सारदातरि त्रि०।

सारद्रुम * पु० सारात्मो द्रुमः। खदिरवृक्षे।

सारमण्ड * न० कर्म०। श्रक्तिसपात्रे, तैलपात्रे च। [द्रवे।

सारमूषिका * स्त्री० सारे मूषिकेवापहारकत्वात्। देवदाली-

सारमेय * पु० स्त्री० सरमायाः कामपपत्नाः अपत्यम् ढक्। कुक्कुरे। तद्योषिति स्त्री०।

सारलौह * न० लोहेषु सारः राज०। लौहसारे (इस्पात)।

सारव * त्रि० सरय्वां भवः अण् नि०। सरयूनदीभवे।

सारस * न० सरोऽस्मिन्नो नियतवसतिरस्य अण्। पद्मे, काव्या-मरणे च। सह रसेन स्वार्थे अण्। चन्द्रे, स्वनामख्याते पक्षिणि च पु०। तद्योषिति स्त्री०। सरस इदम् अण्। सरोवरसम्बन्धिनि त्रि०।

सारसन * न० सार स रोति सन-यत्। स्त्रीकट्यामरणे, काञ्चाम्, कंचुकाद्याकार्य मध्यकाये निबद्धे पटिकादौ च।

सारस्वत * पु० सरस्वती देवतास्य, सरस्वत्या इदं वा अण्। विन्ध्य-दक्षे देशभेदे, पञ्चगौडमध्ये ब्राह्मणभेदे, सरस्वतीप्रतिपालित-मुनिभेदे, ब्राह्मादिमहाये कल्पभेदे च "सारस्वतस्य कल्पस्य" इति पुराणम्। सरस्वतीसम्बन्धिनि "तस्यां पूर्वाह्णसमये कुर्यात् सारस्वतोत्सवम्" इति पुराणम्। सरस्वतीदेवताके च त्रि० "तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः" इति स्मृतिः।

सारस्वतकल्प * पु० कर्म०। तन्नोक्ते सरस्वत्या उपासनार्थके विधानभेदे, तन्नामके ग्रन्थादिके च। [राग।

सारा * स्त्री० सारयति सृ-णिच्-अच्। कृष्णत्रिवृतायाम्, दूर्वा-

साराल * पु० सारमालाति आ+ला क। तिलवृक्षे।

सारि(री) * पु० स्त्री० सृ-इञ् स्त्रीत्वपक्षे वा ङीप्। पाशके "सारीं चरन्तीं सखि! मारय" इति नैषधम्, पक्षिभेदे च।

सारिका * स्त्री० सरति मन्दति सृ-ण्वुल्। पक्षिभेदे (शालिक)।

सारिणी * स्त्री० सृ-णिनि। सहदेवीलतायाम्, कार्पास्याम्, दुराल-भायां, कपिलशिंशपायां, प्रसारिण्यां, रक्तपुनर्नवायाञ्च।

सारिवा * स्त्री० सारिरिव वाति वा-क। (अनन्तमूल) लताभेदे।

सारोष्ट्रिक * पु० सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदस्तत्र भवः ठक्। विषभेदे।

सार्थ * पु० सृ-थन् स्वार्थे अण्। समूहे, जन्तुसमूहे "स जयत्यरि-सार्थसार्थकी" इति नैषधम्। सह अर्थेन वाच्येन वा। वणिक्-समूहे। धनिनि त्रि०। कन्। सार्थकः। अर्थसहिते जने त्रि०। शब्दे पु० "सार्थकः स्वार्थबोधकत्" इति शब्दार्थप्रकाशि-का"।

सार्थवाह * पु० सार्थं वहति वह-अण्। वणिग्जने।

सार्द्र * त्रि० सह आर्द्रेण। आर्द्रतायुक्ते। [सार्द्रः। अर्द्रयुक्ते त्रि०।

सार्द्धम् * अव्य० सह+ऋध-अम्। साहित्ये। सह अर्थेन।

सार्प * न० सर्पो देवतास्य अण्। अश्लेषानक्षत्रे।

सार्पिष्क * त्रि० सर्पिषा संस्कृतम् ठक्। घृतसंस्कृते व्यञ्जनादौ।

सार्वजनीन * त्रि० सर्वेषु जनेषु विदितः खञ् द्विपदवृद्धिः। सर्व-लोकविदिते।

सार्वत्रिक * त्रि० सर्वत्र भवम् ठक्। सर्वस्मिन् कालादौ भवे।

सार्वधातुक * न० सर्वधातून् व्याप्नोति ठञ्। व्याकरणोक्ते सर्व-धातुप्रकृतिके तिङादौ प्रत्यये। [सर्वभूतव्यापके।

सार्वभौतिक * त्रि० सर्वाणि भूतानि व्याप्नोति ठञ् द्विपदवृद्धिः।

सार्वभौम * पु० सर्वस्या भूमेरीश्वरः सर्वासु भूमिषु विदितो वा अण्। चक्रवर्त्तिनि नृपे, उत्तरदिक्स्थे गजे च। सकलभूमि-सम्बन्धे त्रि०।

सार्वलौकिक * त्रि० सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धि। सर्वलोकेषु विदिते "स रामः सार्वलौकिकः" इति भट्टिः।

सार्वविभक्तिक * त्रि० सर्वासु विभक्तिषु तदर्थे भवः ठञ्। सर्व-विभक्त्यर्थे विहिते तसिलादौ प्रत्यये।

सार्षप * त्रि० सर्षपस्य विकारः अण्। सर्षपविकारतैलादौ "अदुष्टं सार्षपं तैलम्" इति, स्मृतिः।

साल * पु० सल-घञ्। वृक्षमात्रे, "तमालः सालः समदृश्यत" इति नैषधम्। स्वनामख्याते वृक्षभेदे, प्राकारे च। [निर्यासे (धुना)।

सालन * पु० सालः कारणत्वेनास्त्यस्य पामादित्वात् न। साल-

सालनिर्यास * पु० ६त०। (धुना) सर्जरसे। [वृक्षे।

सालपर्णी * स्त्री० सालस्येव पर्णान्यस्याः ङीप्। (शालपानि)

सालपुष्प * न० सालस्येव पुष्पं यस्य। स्थलपद्मे।

सालभञ्जिका * स्त्री० सालं भनक्ति भञ्ज ण्वुल्। काष्ठादिनिर्मिते कृत्रिमक्रीडासाधने पुत्तलिकायाम्, वेश्यायाञ्च।

सालरस * पु० ६त०। (धुना) रासे।

सालवेष्ट * पु० सालं वेष्टयति वेष्ट+अण्। रासे (धुना)।

साला * स्त्री० सालः प्राकारोऽस्त्यस्याः अच्। शाखे।

सालावृक * पु० सालायां वृक इव। कुक्कुरे।

सूरि * पु॰ सू-क्रिन्। सूर्य्ये, अर्कवृक्षे, यादवभेदे, पण्डिते च "सदा पश्यन्ति सूरयः" इति श्रुतिः। राजसर्षपे स्त्री॰ ङीप्।

सूरिन् * पु॰ सूर-णिनि। पण्डिते।

सूर्क्ष(र्क्ष्य) * अनादरे भ्वादि॰ पर॰ सक॰ सेट्। सूर्क्ष(र्क्ष्य)ति असूर्क्षी(र्क्ष्यी)त् षोपदेशत्वात् ष।

सूर्क्ष(र्क्ष्य)ण * न॰ सूर्क्ष(र्क्ष्य)-ल्युट्। अनादरे।

सूर्प * पु॰ न॰। शूर्प-पृ॰ शस्य सः। शूर्पशब्दार्थे। [णत्वम्। रा-

सूर्पणखा * स्त्री॰ शूर्प इव नखा यस्याः पृ॰ शस्य सः णत्वम्।

सूर्मि * स्त्री॰ शूर्मि+पृ॰ शस्य सः। शूर्मिशब्दार्थे वा ङीप्।

सूर्य्य * पु॰ सृ-क्यप् नि॰ दीर्घश्च। दिवाकरे, अर्कवृक्षे, दानवभेदे च। [कान्ते यत्राग्निसम्भवस्तस्मिन् मणौ च (आतसी)।

सूर्य्यकान्त * पु॰ सूर्य्यस्य कान्त प्रियः। स्फटिकमणौ, सूर्य्यगत-

सूर्य्यग्रहण * न॰ सूर्य्यस्य राहुणा तदाक्रान्तभूच्छायया इन्द्वना आक्रमणम्। ज्योतिषोक्ते राहुप्रविष्टभूमिच्छायया सूर्य्यमण्डलस्याक्रमणरूपे धर्मे।

सूर्य्यज * पु॰ सूर्य्यात् जायते जन ड। शनिग्रहे, यमे, वैवस्वतमनौ, सुग्रीववानरे च। सूर्य्यपुत्रादयोऽप्यत्र। यमुनायां स्त्री॰

सूर्य्यभक्त * पु॰ सूर्य्यस्य भक्त इव प्रियः। बन्धूकवृक्षे।

सूर्य्यमणि * पु॰ सूर्य्यप्रियः मणिः। सूर्य्यकान्तमणौ।

सूर्य्यलता * स्त्री॰ सूर्य्यभक्ता लता। आदित्यभक्तायाम्।

सूर्य्यवल्ली * स्त्री॰ सूर्य्यमनुवर्त्तिका वल्ली। अर्कपुष्पिकायाम्।

सूर्य्यसारथि * पु॰ ६त॰। अरुणे गरुडाग्रजे। सूर्य्यसूतादयोऽप्यत्र।

सूर्य्या * स्त्री॰ सूर्य्यस्य भार्य्या टाप्। अमावृषी संज्ञायाम्। सूर्य्यभार्य्यायाम्। आसुर्य्यां कृष्णायाम् ङीप्। सूर्य्या।

सूर्य्यालोक * पु॰ ६त॰। आतपे रौद्रे।

सूर्य्यावर्त्त * पु॰ सूर्य्यं इवावर्त्तते आ+वृत-अच्। (हुड़हुड़े) क्षुपभेदे, (कुलिक्षा) शाके च आदित्यभक्तायां स्त्री॰।

सूर्यांशुक * पु॰ सूर्यां शवः अश्मा। सूर्यकान्तमणौ।
सूर्योढ * पु॰ सूर्येण सूर्यास्तकालेन ऊढः प्रापितः वह-क्त।
सूर्यास्तसमये आगतातिथौ।
सृकाल * पु॰ सृ-कालन् कस्य नेत्वम्। शृगाले।
सृक्क(न्) * न॰ सृज-क्कन् कनिन् वा कस्य नेत्वम्। ओष्ठप्रान्त-
भागे "सृक्वणी परिलेढि च" इति स्मृति॰। "महासृक्काय
लोभिनो सृकिंदश्च" इति। सृक्वाणाविति कमध्यमापस्य।
सृक्विन् * न॰ सृज-क्वनिप्। ओष्ठप्रान्तभागे। पु॰ सृक्विन् अप्यत्र।
सृगाल * पु॰ सृ गकन् कस्य नेत्वम्। भिन्दिपालास्त्रे।
सृगाल * पु॰ स्त्री॰ सृ गालन् गस्य नेत्वम्। जम्बुके, दैत्यभेदे च।
सृज * विसर्गे स्वादि दिवा॰ आत्म॰ अनिट् सक॰। सृज्यते असृष्ट।
अर्थुत्तास्य दोषदेशः। [ससर्जिथ ससष्ठ स्रष्टा स्रक्ष्यति।
सृज * विसर्गे तुदा॰ पर॰ सक॰ अनिट्। सृजति असाक्षीत्
सृणिकाधार * पु॰ सृजति वर्षस्थित्वं सृज-क ततः स्वार्थे कन् कर्म॰।
कर्णिकाधारे। [सृणीत्यपि।
सृणि * पु॰ सृ-निक्। अङ्कुशे। अङ्कुशास्त्रे स्त्री॰ तत्र वा ङीप्।
सृणीका * स्त्री॰ सृणि +कन् ईकन् वा। मालायाम्।
सृति * स्त्री॰ सृ-भावे क्तिन्। गमने। करणे क्तिन्। पथि। [च।
सृत्वर * त्रि॰ सृ-क्वरप्। गमनकर्त्तरि। स्त्रियां ङीप् सा च मातरि
सृप * गतौ भ्वादि॰ पर॰ सक॰ अनिट्। सर्पति असृपत्। अयोप-
देशत्वात् षः। [पूर्व इत्येव धातुः अयोपदेशत्वमस्य चिन्त्यम्।
सृभ * हिंसे भ्वादि॰ पर॰ सक॰ सेट् क्त्वा वेट्। सर्भति असर्भीत्।
सृमर * पु॰ सृ-क्मरच्। मृगभेदे। गमनशीले त्रि॰। [च।
सृष्ट * त्रि॰ सृज-क्त। निर्मिते, युक्ते, निश्चिते, बहुले, भूषिते, त्यक्ते
सृष्टि * स्त्री॰ सृज-क्तिन्। निर्माणे, विश्वस्य निर्माणे, स्वभावे च।
कर्मणि क्तिन्। सृज्यमाने "या सृष्टिः स्रष्टुराद्या" इति शकु-
न्तला। [स्रीक्षुपे।
सृष्टिप्रदा * स्त्री॰ सृष्टिं सर्जनं गर्भं प्रददाति प्र+दा-क। गर्भदा-
सेक * सेचने शब्दे च? भ्वादि॰ पर॰ सक॰ सेट्। सेकति असेकीत्
...पीनः मौलि॰।
सेक * पु॰ सिच् घञ्। सेचने जलादिना आर्द्रीकरणे। [पात्रभेदे।
सेकपात्र * न॰ सिच्यतेऽनेन सिच-करणे घञ् कर्म॰। (सेचनी)
सेक्तृ * पु॰ सिञ्चति रेतः सिच-तृच्। पत्यौ। सेचके त्रि॰।
सेचक * पु॰ सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल्। मेघे। सेक्-
र्त्तरि त्रि॰।
सेचन * न॰ सिच भावे ल्युट्। जलादिना आर्द्रीकरणे। करणे
ल्युट्। सेचन्या, क्षुद्रसेकपात्रा स्त्री॰ ङीप्।
सेटु * पु॰ सिट्-उन्। (तरमुज) वृक्षे।
सेतु * पु॰ सि-तुन्। सेत्वादेर्जलधारणार्थे (बाल) (जाङ्गाल) पदार्थे,
वरुणवृक्षे, तन्त्रोक्ते प्रणवात्मके मन्त्रे च। स्वार्थे कन्। वरुणवृक्षे।
सेतुबन्ध * पु॰ ६त॰। लङ्कागमनार्थे श्रीरामेण नलकपिद्वारा कारिते
समुद्रोपरि आलीबन्धे, क्षेत्रादेरालीबन्धे च।
सेतुभेदिन् * पु॰ सेतुं भिनत्ति भिद-णिनि। दन्तीवृक्षे।
सेतुवृक्ष * पु॰ सेतुनामको वृक्षः। वरुणवृक्षे, सेतूपरिस्थे वृक्षे च।
सेल * न॰ सि-इलन्। (वेडि) निगडे।
सेना * स्त्री॰ सि-न, सह इनेन प्रभुणा वा सैन्ये। [च।
सेनाङ्ग * न॰ ६त॰। हस्त्यश्वरथपदातिसंघाते, सेनाया उपकरणे
सेनाचर * पु॰ सेनायां चरति चर-ट। सेनानुगामिनि "सेनाचरी-
भवदिभानन" इति नैषधम्। [सेनापतौ च।
सेनानी * पु॰ सेनां देवसेनां वा नयति नी-क्विप्। कार्त्तिकेये,
सेनापति * पु॰ ६त॰। कार्त्तिकेये, सेनाध्यक्षे च।
सेनामुख * न॰ ६त॰। सैन्याग्रे, हस्त्यश्वादिसंख्याविशेषे "हस्तिनः
त्रयः रथाः त्रयः अश्वा नव पदातयः पञ्चदश एतत् समुदाये"।
सेनारक्ष * पु॰ सेनां रक्षति रक्ष अण्। सेनारक्षाकारके यामिके
सैन्ये।
सेफ * पु॰ सि-फ। शेफे पुंसोऽसाधारणचिह्ने।
सेमन्ती * स्त्री॰ सिम-झि गौरा॰ ङीप्। (सेओती) पुष्पवृक्षे।
सेलु * पु॰ सि+लु। श्लेष्मातकवृक्षे।
सेवक * पु॰ सीव्यति सिव-ण्वुल्। सीवनकर्त्तरि (दरजी)। सेव
ण्वुल्। भृत्ये, दासे, अनुचरे च त्रि॰।
सेवधि * पु॰ सेवं सेवनं दधाति धा-कि। पद्मप्रभृतौ निधौ।
सेवन * न॰ सिव-सेव-वा ल्युट्। सूच्यादिना वस्त्रादेर्योजने आश्र-
यणे, उपभोगे, बन्धने, पूजने, भजने च। सीव्यतेऽनया ल्युट्।
सूच्यां स्त्री॰ ङीप्।
सेवा * स्त्री॰ सेव-अ। भजने, आराधने, उपभोगे, आश्रयणे च।
सेवित * त्रि॰ सेव-क्त। पूजिते, आराधिते, आश्रिते, उपभुक्ते च।
सेव्य * न॰ सेव-ण्यत्। वीरणमूले। अश्वत्थे, हिज्जलवृक्षे च पु॰।
सेवार्हे त्रि॰। वन्दावृक्षे स्त्री॰।
सैंहली * स्त्री॰ सिंहले देशे भवा अण् ङीप्। सिंहपिप्पल्याम्।
सैंहिकेय * पु॰ सिंहिकाया भवः ढक्। राहौ। तस्याः अपत्यम् ढक्।
सिंहिकेयोऽप्यत्र। [सिकतामयप्रदेशे त्रि॰।
सैकत * न॰ सिकताः सन्त्यत्र अण्। वालुकामये नद्यादितटे।
सैकतेष्ट * न॰ सैकतं स्थानमिष्टं यस्य। आर्द्रके। सैकतप्रिये त्रि॰।
सैतवाहिनी * स्त्री॰ सितायाः शर्करायाः अयम् अण् सैतो मधुर-
रसस्तं वहति वह-णिनि। बाहुदायां नद्याम्।
सैद्धान्तिक * पु॰ सिद्धान्तं वेत्ति ठक्। सिद्धान्ताभिज्ञे।
सैनापत्य * न॰ सेनापतेर्भावः कर्म॰ वा ष्यञ्। सेनापतिधर्मे, तत्-
कर्मणि च "सैनापत्यमुपेत्य वः" इति कुमार॰।
सैनिक * पु॰ सेनाया समवैति ठञ्। मिलिते हस्त्यश्वादौ।
सैन्धव * न॰ सिन्धुनदीसमीपे देशे भवम् अण्। लवणभेदे। सिन्धो-
रदूरभवः अण्। घोटके, तस्य सिन्धुदेशसमुद्रसमीपस्थतद्-
देशोद्भवत्वात् तथात्वम्।

[illegible]

सोमगर्भ • पु॰ सोमस्य तदाख्यकान्तिरूपमोक्षस्य गर्भः स्थानम्। विष्णौ। [इन्धे। चन्द्रजाते त्रि॰। बुधे पु॰।

सोमज • न॰ सोमात् सम्भूरितोषधिस्यरसपानात् जायते जन-ड।

सोमतीर्थ • न॰ सोमेन तपस्तप्त्वा कृतं तीर्थम्। प्रभासतीर्थे।

सोमप • पु॰ सोमं तद्रसं पिबति पा-क। यज्ञे सोमरसपानकर्तरि पितृगणभेदे ब॰ व॰। पा-क्विप् सोमपा अप्यत्र। [ऋषिभेदे।

सोमपथ • पु॰ सोमस्य सोमरसस्य पथेव पन्था यस्य। (तत्पुरुष)

सोमपीति(थि)न् • पु॰ पीतमनेन इति सोमं पीतः पु॰ वा तस्य यः। यज्ञे सोमरसपायिनि। पा॰ इनिप्। सोमपीथ्यत्र।

सोमबन्धु • पु॰ सोमस्य बन्धु, सोमो बन्धुरस्य वा। सूर्ये तद्दीप्तिकरत्वात् तस्य तथात्वम्। चन्द्रजे बुधे पु॰। कुमुदे न॰।

सोमभू • पु॰ सोम एव भूरुत्पत्तिस्थानं यस्य। बुधपदे, चन्द्रांशे पतिदेव च। [भेदे।

सोमयाग • पु॰ सोमेन यागः। त्रिवर्षसाध्ये सोमरसपानाङ्गके याग

सोमयाजिन् • पु॰ सोमेन यजते यज-णिनि। सोमयागकर्तरि।

सोमयोनि • न॰ सोम. योनिरस्य। चन्दनभेदे।

सोमराजी • स्त्री॰ सोमेन राजते राज-अच् गौरा॰ ङीष्। (सोमराजी) ओषधिभेदे। स्वार्थे कन्। सोमराजिकाप्यत्र। राज णिनि। सोमराजीत्यत्र पु॰।

सोमलता • स्त्री॰ सु-मन् कर्म॰। [illegible]

सोमवल्लिका • स्त्री॰ सोमवल्ल्या इवार्थे कन् [illegible]

सोमवंश • पु॰ [illegible] चन्द्रवंशे, चन्द्रवंशिके [illegible]

[illegible]

सोमवल्क • पु॰ [illegible] कट्फले, रोठाकाष्ठे, [illegible]

[illegible]

[illegible]

सोल्लुण्ठ * त्रि॰ सह उल्लुण्ठेन सादेशः। भूमौ पार्श्वपरिवर्त्तनादियुक्ते अश्वादौ, अन्यार्थशब्दस्य अन्यपरत्वयुक्ते वाक्ये च।

सोल्लुण्ठन * सह उल्लुण्ठनेन सादेशः। अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनसहिते वाक्ये (स्तुतिपरस्य निन्दापरता निन्दापरस्य च स्तुतिपरता इत्येवंरूपे वाक्ये)। [शूकरस्य कर्मणि।

सौकर्य * न॰ सुकरस्य भावः कर्म वा ष्यञ्। अनायाससाध्यत्वे।

सौखशायनिक * त्रि॰ सुखशयनं सुखेन शयनं पृच्छति ठञ्। प्रातःकाले सुखशयनप्रश्नकर्त्तरि वैतालिकादौ।

सौख्य * न॰ सुखमेव चातु॰ ष्यञ्। सुखे।

सौगत * पु॰ सुगत एव अण्। सुगते बुद्धभेदे। तस्येदमण्। सुगतसम्बन्धिनि त्रि॰। सुगतमताध्यायिनि। त्रि॰।

सौगन्ध * न॰ सु शोभनो गन्धोऽस्य स्वार्थे अण्। कत्तृणे रामकर्पूरे।

सौगन्धिक * न॰ सुष्ठु गन्धः सुगन्धः तस्येदम् ठक्। स्वार्थे अण् कह्लारे। सुगन्धके पु॰।

सौगन्ध्य * न॰ सुगन्धस्य भावः ष्यञ्। सद्गन्धे। स्वार्थे ष्यञ्। सुगन्धौ।

सौगन्धिक * पु॰ पर्श्वौ तत्कर्मभीवनमुपजीवति ठक्। (इत्यर्थः) भौषमकारके। ["सौगन्ध्यगन्ध्यं यशः" इत्युद्भटः।

सौजन्य * न॰ सुजनस्य भावः ष्यञ्। सुजनतायां, सद्व्यवहारे च

सौण्डी * स्त्री॰ शुण्डाकारोऽस्त्यस्याः अण् ङीप् पृ॰ सस्य सः। गजपिप्पल्याम्।

सौत्र * पु॰ पाणिन्यादिभिः सूत्रेण कर्मविशेषाय पठितः अण्। भ्वादिदशगणीयभिन्नेषु सूत्रमात्रपठितेषु धातुषु। सूत्रं ब्राह्मण्यमर्हति अण्। विप्रे।

सौत्रामणी * स्त्री॰ सुत्रामा इन्द्रो देवताऽस्य अण् अपूर्वत्वात् न टिलोपः णत्वम्। यज्ञभेदे तत्र हि सुरापान विधानादपि विधेः "सौत्रामण्यां सुरां पिबेत्" इति श्रुतिः।

सौदामनी * स्त्री॰ सुदामा पर्वतभेदस्तेनैका दिक् तत्सामीप्यभवत्वात् अण्। विद्युति। सा हि स्फटिकमयस्य सुदाम्नः पर्वतस्य कटके जाता। अप्सरोभेदे च। सुदामा ऐरावतगजस्तस्य पत्नी ङीप्। ऐरावतप्रियायाम्। तत्र ङीपि सौदामिन्यपि।

सौदायिक * न॰ सुदायात् बन्धुभ्यः आगतं ठञ्। "ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा। भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्" इति स्मृत्युक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्" इति स्मृतिः।

[illegible] * पु॰ [illegible] सुदामा [illegible]।

सौध * पु॰ न॰ सुधया लेपनद्रव्येण रक्तम् अण्। राजसदने [illegible] अर्हति अण्। रूप्ये न॰। सुधासम्बन्धिनि त्रि॰।

[illegible] * पु॰ सुधा [illegible] (अमरः)।

सौन्दर्य * न॰ सुन्दरस्य भावः ष्यञ्। [illegible]

कान्तां यः कविवैरी यशोदितम्। [illegible] "सौन्दर्यं [illegible]" इत्युक्ते अङ्गादीनां मनोहरत्वे।

सौपर्ण * न॰ सुष्ठु पर्णानि यस्य सुपर्णस्तस्येदं अण्। मरकतमणौ। [illegible] स्त्री॰ ङीप्। सुपर्णसम्बन्धिनि त्रि॰।

सौपर्णेय * पु॰ सुपर्ण्याः विनतायाः अपत्यम् ढक्। गरुडे।

सौप्तिक * त्रि॰ सुप्तिकाले रात्रौ भवम् ठञ्। रात्रियुद्धे [illegible] ठञ्। महाभारतपर्वभेदे।

सौभ * न॰ सुष्ठु भाति [illegible] अण्। हरिश्चन्द्रपुरे च।

सौभद्र * पु॰ सुभद्रायाः अप॰ अण्। सुभद्रापुत्रे अभिमन्यौ।

सौभद्रेय * पु॰ सुभद्रायाः अपत्यम् ढक्। सुभद्रापुत्रे अभिमन्यौ।

सौभरि * पु॰ मुनिभेदे।

सौभागिनेय * पु॰ सुभगायाः अपत्यम् ढक् [illegible]। [illegible]।

सौभाग्य * न॰ सुभगस्य भावः ष्यञ् [illegible]। [illegible] सिन्दूरे, टङ्कणे च। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सौरभेय * पु॰ सुरभेरपत्यम् ढक्। गवि। स्त्रियां ङीप्। "सौरभेयीभ्य एव च" इति गोदानमन्त्रः। तस्या इदम् ढक्। सुरभिसम्बन्धिनि त्रि॰।

सौराष्ट्र * पु॰ सुष्ठु राष्ट्रमस्यास्ति प्रज्ञा॰ अण्। (सुरट) देशभेदे। सुराष्ट्रे भवः अण्। सुराष्ट्रदेशभवे त्रि॰। विषभेदे न॰। कांस्ये न॰।

सौराष्ट्रिक * न॰ सुराष्ट्रदेशे भवः ठक्। विषभेदे। [ज्योतिषम्।

सौरि * पु॰ सूरस्यापत्यम् इञ्। शनैश्चरे, "सौरिवारेऽमृतानि" इति

सौरिरत्न * न॰ सौरिप्रियं रत्नम् शाक॰। नीलके मणौ। [तत्रैव।

सौरेय * पु॰ सुरायै हितम् ढक्। शुक्लझिण्ट्याम्। स्वार्थे कन्

सौल्विक * त्रि॰ सुल्वं ताम्रपात्रादिनिर्माणं शिल्पमस्य ठक्। ताम्रमयपात्रनिर्माणकर्त्तरि वणिक्भेदे। (काँसारि)।

सौव * त्रि॰ स्वस्येदम् स्वर्ग इदम् अण् न वृद्धिः वात्पूर्वं सौत्। आत्मसम्बन्धिनि। स्वर्गसम्बन्धिनि। [स्वग्रामभवे पदार्थे।

सौवग्रामिक * त्रि॰ स्वग्रामे भवः ठक् न वृद्धिः वात्पूर्वं सौत्।

सौवर्चल * न॰ सुवर्चलदेशे भवम् अण्। कृष्णलवणे।

सौवर्णभेदिनी * स्त्री॰ सुवर्णस्य विकारः अण् सौवर्णमिव भिनत्ति प्रकाशते भिद-णिनि। प्रियङ्गौ। [पुरोहिते।

सौवस्तिक * पु॰ स्वस्तिकरणे कुशलः ठक् न वृद्धिः वात्पूर्वं सौत्।

सौविद * पु॰ सुविदोऽस्ति सु+विद-क स्वार्थेऽण्। अन्तःपुररक्षके।

सौविदल * पु॰ सुष्ठु विदन्तं विद्वांसमपि लाति ला-क स्वार्थेऽण्। अन्तःपुररक्षके।

सौवीर * न॰ सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवम् अण्। स्रोतोऽञ्जने। काञ्जिके, बदरे च न॰। स्वार्थे कन्। काञ्जिकभेदे न॰। बदरवृक्षे पु॰।

सौवीरसार * पु॰ न॰ कर्म॰। स्रोतोऽञ्जने।

सौवीराञ्जन * न॰ सौवीराख्यमञ्जनम्। अञ्जनभेदे "सौवीरन्तु वल्मीकाग्रे: वल्मीकं निखुधैः शतम्। शोधनेऽपि सौवीरम्" इत्याद्युक्ते अञ्जनभेदे।

सौहव * न॰ सुहृ मद तस्य भावः अण् टिलोपः। आतिथ्ये "स सौहवौदार्य्यविशेषशालिनीम्" इति किरातार्जुनीयम्।

सौहार्द * न॰ सुहृदो भावः अण्। द्विपदवृद्धिः। स्नेहे, मित्रत्वे च।

सौहित्य * न॰ सुहितस्य प्रश्नस्य भावः ष्यञ्। तृप्तौ, "नातिसौहित्यमाचरेत्" इति स्मृतिः।

सौहृद * न॰ सुहृदो भावः अण्। मित्रत्वे, बन्धुतायाञ्च।

स्कुद * उत्प्लुत्य गतौ, अक॰ उद्धृतौ, आप्लावे च सक॰ भ्वादि॰ आत्म॰ सेट् इदित्। स्कुन्दते अस्कुन्दिष्ट।

स्कन्द * [illegible] चुरा॰ उभ॰ सक॰ सेट्। स्कन्दयति ते अचस्कन्दत् त। [अस्कदत् अस्कान्त्सीत्।

स्कन्द * गतौ शोषणे च भ्वादि॰ पर॰ सक॰ अनिट्। स्कन्दति

स्कन्द * पु॰ स्कन्दते [illegible] अच्। कार्त्तिकेये। देहे,

पारदे।

स्कन्दन * न॰ स्कन्द+ल्युट्। रेचने, क्षरणे, गतौ, शोषणे च।

स्कन्दांशक * पु॰ स्कन्दस्यांश इवांशो यस्य कप्। पारदे। त शिववीर्यजत्वादेकांशत्वम्।

स्कन्ध * पु॰ स्कन्दते आरुह्यते सुखेन शाखया कर्मणि घञ् पृ॰। (कांध), वृक्षस्य काण्डे (गुँडि), नृपे, व्यूहे, युद्धे, समूहे, का भद्रादौ छन्दोभेदे, सौगतमतसिद्धेषु विज्ञानादिषु पञ्चसु "मुक्त - स्कन्धपञ्चकम्" इति माघः। पथि, ग्रन्थपरिच्छेदे च। "स्क द्वादशभिर्युताम्" इति भागवतविशेषणम्।

स्कन्धतरु * पु॰ स्कन्धप्रधानस्तरुः। नारिकेलवृक्षे।

स्कन्धफल * पु॰ स्कन्धे फलमस्य। नारिकेलवृक्षे, उडुम्बरवृक्षे च

स्कन्धबन्धना * स्त्री॰ स्कन्धे बन्धनमस्याः। मधुरिकायाम्।

स्कन्धरुह * पु॰ स्कन्धात् रोहति रुह+क। वटवृक्षे।

स्कन्धवाह पु॰ स्कन्धेन वाहयति वह-णिच्-अच्। शकटादिव स्कन्धवाहके वृषादौ। ण्वुल्। स्कन्धवाहक तत्रैव। [या

स्कन्धशाखा * स्त्री॰ स्कन्धात् प्रसृता शाखा। वृक्षस्य प्रधानशा

स्कन्धशृङ्ग * पु॰ स्त्री॰ स्कन्धपर्य्यन्तं शृङ्गमस्य। महिषे। स्त्रि ङीप्।

स्कन्धावार * पु॰ स्कन्धार्थमावारः आ+वृ-घञ्। युद्धार्थमुद्युक्तसैन्य स्थापने, तदाधारे कटके च। राजधान्याम्। [त्र। अर्थे न॰

स्कन्न * त्रि॰ स्कन्द-क्त। च्युते, गलिते, चरिते, शुष्के, गते च। भ

स्कभ * प्रतिघाते क्र्या॰ स्वा॰ उ॰ सक॰ सेट्। स्कभ्नाति स्कभ्नो स्कभ्नोति स्कभ्नुते। अस्कम्भीत् अस्कभिष्ट। [भिद

स्कभ * स्तम्भे भ्वादि॰ आत्म॰ सक॰ सेट् इदित्। स्कम्भते अस्क

स्कु * उद्धृतौ आप्रवणे च क्र्या॰ स्वा॰ उभ॰ सक॰ अनिट्। स्कुनाति स्कुनोति स्कुनुते। अस्कौषीत् अस्कोष्ट।

स्कुद * आप्रवणे उद्धृतौ च भ्वादि॰ आत्म॰ सक॰ सेट् इदित् स्कुन्दते अस्कुन्दिष्ट।

स्कुभ * रोधने सा॰ क्र्या॰ स्वादि॰ कार्य्यभागो पर॰ सक॰ सेट् स्कुभ्नाति स्कुभ्नोति। अस्कुभीत्। [स्खदयति

स्खद * विदारे दि॰ आत्म॰ सक॰ सेट्। स्खद्यते अस्खदिष्ट घटादि

स्खल * चले भ्वादि॰ पर॰ सक॰ सेट् वा घटा॰। स्खलति अस्खा सीत् स्खलयति स्खालयति।

स्खलन * न॰ स्खल-भावे ल्युट्। चलने, पतने च।

स्खलित * न॰ स्खल-भावे क्त। कूटयुद्धादौ प्रवृत्त्या वीरमर्य्यादात पतने, स्खलनमात्रे च। कर्त्तरि क्त। चलिते त्रि॰।

स्तन * मेघशब्दे अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्तनयति ते अतस्तनत् त। वृद्ध्यभावात् न षोपदेशः।

स्तन * पु॰ स्तन अच्। (माइ) स्त्रीणाम् वक्षोभेदे पयोधरे।

स्तनन * न॰ स्तन-ल्युट्। ध्वनिमात्रे, मेघशब्दे, कुन्थनशब्दे च।

स्तनन्धय * पु॰ स्त्री॰ स्तनं धयति धे खश् मुम् च। बालादौ

स्त्रियां ङीप्। [स्त्रियां टाप्।

स्तनप * पु॰ स्त्री॰ स्तनं पिबति पा-क। अतिशिशौ बालके।

स्तनभर * पु॰ ६त॰। स्थूलस्तनभारे, महाभोगे च।

स्तनयित्नु * पु॰ स्तन+इत्नु। मेघे, मुस्तके, मेघशब्दे, विद्युति, मृत्यौ, रोगे च। [ण्यच।

स्तनवृन्त * पु॰ स्तनस्य वृन्त इवाग्रम्। स्तनाग्रे। स्तनशिखाद्योऽ-

स्तनान्तर * न॰ स्तनयोरन्तरम्। हृदि, स्तनमध्ये च।

स्तनाभोग * पु॰ ६त॰। स्तनस्य परिपूर्णतायाम्।

स्तनित * न॰ स्तन+भावे क्त। मेघशब्दे, सुरतादिशब्दे च। कर्त्तरि क्त। शब्दिते त्रि॰। [स्तभ्नाति अस्तभत् अस्तम्भीत्।

स्तन्भ * रोधने क्र्या॰ स्वा॰ पर॰ सक॰ सेट् क्त्वा वेट्। स्तभ्नाति

स्तन्य * न॰ स्तने भवम् यत्। स्तनजाते दुग्धे।

स्तब्धरोमन् * पु॰ स्तब्धानि रोमाणि यस्य। शूकरे। जड़ीभूतरोमणि त्रि॰ स्त्रियां वा डाप् ङीप् च।

स्तभ * स्तम्भने जडीभावे अक॰ सत्कारे, क्रियानिरोधे च सक॰ भ्वादि॰ आत्म॰ सेट् इदित्। स्तम्भते अस्तम्भिष्ट।

स्तम्ब * पु॰ स्था+अम्बच् किच्च पृ॰। काण्डरहित झिण्टिकादौ हर्षे, तृणादेः, गुच्छे च।

स्तम्बकरि * पु॰ स्तम्बं गुच्छं करोति कृ-इन्। व्रीहिधान्ये।

स्तम्बघन * पु॰ स्तम्बो हन्यतेऽनेन हन+क नि॰। स्तम्बोच्छेदके खनित्रादौ।

स्तम्बघ्न * त्रि॰ स्तम्बो हन्यतेऽनेन हन-घञर्थे क। स्तम्बोच्छेदके खनित्रादौ। [रमते अच् अलुक् स॰। गजे।

स्तम्बेरम * पु॰ स्त्री॰ स्तम्बे तृणादीनां काण्डे गुच्छे गुल्मे वा

स्तम्भ * पु॰ स्तम्भ-घञ्। (थाम) स्थूणायाम्। भावे घञ्। जडीभावे पु॰।

स्तम्भन * न॰ स्तम्भ-जडीकरणे भावे ल्युट्। जडीकरणे। करणे ल्युट्। मन्त्रोक्ते जडीकरणसाधने प्रयोगभेदे। [मध्ये बाणभेदे।

स्तम्भिन् * पु॰ स्तम्भयति स्तम्भ-णिच्-ल्यु। कन्दर्पस्य पञ्चसु बाणेषु

स्तव * पु॰ स्तु+अप्। गुणमाख्याने, स्तुतौ च।

स्तवक * पु॰ स्तु+वुन्, स्ता-अवक इ॰ वा। गुच्छे। ग्रन्थपरिच्छेदे।

स्तावक * त्रि॰ स्तु-ण्वुल्। स्तुतिकारके।

स्तिमित * न॰ स्तिम भावे क्त। आर्द्रतायाम्, अचाञ्चल्ये च। कर्त्तरि क्त। अचपले, आर्द्रे च त्रि॰।

स्तुत * पु॰ स्तु-क्त। स्तवस्थे।

स्तुति * स्त्री॰ स्तु-क्तिन्। स्तवे।

स्तुतिपाठक * पु॰ स्तुतिं पठति पठ-ण्वुल्। वाक्राईवन्दिनि।

स्तुन्भ * रोधने सौ॰ क्र्या॰ स्वा॰ आर्यभावी पर॰ सक॰ सेट् उदित्। स्तुभ्नोति स्तुभ्नाति। अस्तुम्भीत्।

स्तुभ * पु॰ स्त्री॰ स्तुन्भ-मूल॰ क। छागे। स्त्रियां [illegible]

स्तूप * उच्छ्राये अद॰ चुरा॰ सक॰ उभ॰ सेट् [illegible]

अत न। सकृत् मत्वात् न षोपदेशः।

स्तूप * पु॰ स्तु-पक् पृषो॰ स्तूप-अच् वा। राशीकृते मृत्तिकादौ। महाते, मले, निष्ठ्यूजने च।

स्तृ * विस्तारे स्वा॰ उभ॰ सक॰ अनिट्। स्तृणोति स्तृणुते अस्ता-र्षीत् अस्तृत अस्तरिष्ट।

स्तृ * प्रीतौ अक॰ रक्षणे सक॰ स्वा॰ पर॰ अनिट्। स्तृणोति अस्ता-र्षीत्। षोपदेशत्वात् षः। [हिंसायां षः।

स्तृक्ष * गतौ भ्वादि॰ पर॰ सक॰ सेट्। स्तृक्षति अस्तृक्षीत्। षोप-

स्तृह * वधे तुदा॰ पर॰ सक॰ वेट्। स्तृहति अस्तर्हीत् अस्तृक्षत्। षोपदेशत्वात् षः।

स्तॄ * आच्छादने क्र्यादि॰ स्वादि॰ उभ॰ सक॰ सेट्। स्तृणाति स्तृ-णोति अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट। [स्तेनत् न।

स्तेन * चौर्ये अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्तेनयति-ते अति-

स्तेन * पु॰ स्तेन-घञ्। चौर्ये। कर्त्तरि अच। चोरे त्रि॰।

स्तेप * क्षेपे चुरा॰ उभ॰ सक॰ सेट्। स्तेपयति-ते अतिस्तिपत् च। षोपदेशत्वात् षः।

स्तेम * पु॰ स्तिम-घञ्। आर्द्रभावे, स्वेदे च।

स्तेय * न॰ स्तेनस्य भावः यत् नलोपः। चौर्ये "प्रच्छन्नं वा प्रकाशं वा रात्रौ वा यदि वा दिवा। यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम्" इत्युक्ते परद्रव्यापहारे। [ढीन्।

स्तेयिन् * त्रि॰ स्तेयमस्यास्ति इनि। परद्रव्यापहारके। स्त्रियां

स्तैन(न्य) * न॰ स्तेनस्य भावः अण् ष्यञ् वा। चौर्ये परद्रव्यापह-रणे। स्तेन एव स्वार्थे ष्यञ्। चोरे त्रि॰।

स्तैमित्य * न॰ स्तिमितस्य भावः ष्यञ्। जाड्ये, स्वेदे, आर्द्रभावे च।

स्तोक * पु॰ स्त्री॰ स्तुच-घञ्। चातके, जलबिन्दौ च। अल्पे त्रि॰।

स्तोकक * पु॰ स्त्री॰ स्तोकाय जलाय कायति प्रार्थयते कै-क। चातके।

स्तोत्र * न॰ स्तु-ष्ट्रन्। स्तवे गुणकीर्त्तिने [illegible]

स्तोभ * पु॰ स्तुभ-घञ्। [illegible] सामाङ्गभूतहाउहुवादिवर्णे शब्द-भेदे। [illegible] हेलने, स्तम्भे च।

स्तोम * श्लाघागुणाविष्कारे अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्तोम-यति-ते अतुष्टोमत्-त।

स्तोम * पु॰ स्तोम अच् स्तु-मन् वा। समूहे, यज्ञे, स्तवे च। मस्तके, धने, शस्ये, लौहदण्डे च न॰। वक्रे त्रि॰।

स्त्यान * न॰ स्त्यै-भावे क्त नस्य नः। स्नेहे, घनत्वे, अमृते, आलस्ये, प्रतिशब्दे च। कर्त्तरि क्त। घनीभूतके, आलस्यके च त्रि॰।

स्त्यै * शब्दे संघाते भ्वादि॰ पर॰ अनिट्। स्त्यायति अस्त्यासीत्। षोपदेशत्वात् [illegible]

स्त्री * स्त्री [illegible] इत्यादि शब्दान्।

स्त्रीकर्ण [illegible] वाची शोभ [illegible]

स्त्री [illegible] पु॰ [illegible]

स्त्रीमनोहारके त्रि॰। [धारण चिह्ने स्तनादौ। स्त्रीलक्षणे च।
स्त्रीचिह्न * न॰ स्त्रिया असाधारणं चिह्नम्। योनौ। स्त्रिया आभा-
स्त्रीचौर * पु॰ स्त्रियाः चोर इव। कामुके।
स्त्रीजित * पु॰ स्त्रिया जितः जि-क्त। स्त्रीवश्ये।
स्त्रीधन * न॰ ६त॰। स्त्रीस्वत्वाश्रये द्रव्यमात्रे इति मिताक्षरा-
दयः। "अध्यग्न्यध्यावाहनिकं भर्तृदायं तथैव च। भ्रात्रा दत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम्" इत्येवं परिगणिते स्त्रीस्व-
त्वाश्रये धने इति दायभागादयः।
स्त्रीधर्म * पु॰ ६त॰। ऋतौ नारीकुसुमविकाशे रजसि।
स्त्रीधर्मिणी * स्त्री॰ स्त्रीधर्मोऽस्त्यस्या इनि। ऋतुमत्यां स्त्रियाम्।
स्त्रीपुंधर्म * पु॰ स्त्रियाः पुंसश्च धर्मः तमधिकृत्य व्यवहारो वा। स्त्रीपुंसयोः यथाशास्त्राचाररूपे धर्मे तद्विषयके अष्टादशसु विवादेषु मध्ये विवादभेदे "स्त्रीपुंधर्मो विभागश्च" इति स्मृतिः।
स्त्रीपुंस * पु॰ द्वि॰ स्त्री च पुमांश्च अच् समा॰। मिलितयोः स्त्रीपुरुषयोः।
स्त्रीपुंलक्षणा * स्त्री॰ स्त्रीपुंसयोर्लक्षणमस्याम्। स्तनश्मश्रुप्रभृति-
स्त्रीपुरुषचिह्नधारिण्यां स्त्रियाम्।
स्त्रीप्रिय * पु॰ ६त॰। आम्रवृक्षे। नारीप्रियमात्रे त्रि॰।
स्त्रीलिङ्ग * पु॰ स्त्रिया इव लिङ्गं तत्कार्यं यस्य। स्त्रीलिङ्गविहि-
तव्याकरणोक्तसंस्कारयुक्ते शब्दभेदे। ६त॰। स्त्रीचिह्ने स्तनादौ न॰।
स्त्रीवश * पु॰ ६त॰। स्त्रीवशीभूते।
स्त्रीविधेय * पु॰ ६त॰। स्त्रीवशीभूते। [भेदे।
स्त्रीसंग्रहण * न॰ स्त्रियाः संग्रहणं यत्र। परस्त्रीहरणरूपे विवाद-
स्त्रीसभ * न॰ स्त्रीणां सभा स्त्रीत्वम्। स्त्रीसमाजे।
स्त्रीसेवा * स्त्री॰ ६त॰। स्त्रीसम्भोगे, व्यवायधर्मेण नारीसेवने।
स्त्रीस्वभाव * पु॰ स्त्रिया इव स्वभावो यस्य। अन्तःपुररक्षके षण्ढ-
के। ६त॰। स्त्रीणां शीले च।
स्त्रैण * न॰ स्त्रिया इदम् नञ् नञ्। स्त्रीस्वभावे, "स्त्रैणेन नीता विकृतिं लघिम्ना" इति भट्टिः। स्त्रीविधेये, स्त्रीसम्बन्धिनि च त्रि॰। स्त्रिया अपत्यं स्त्रीणां समूहो वा नञ् स्त्र्यपत्ये, स्त्रीसमूहे न॰।
स्थ * त्रि॰ स्था-क। स्थितिशीले। प्रायेण उत्तरपदस्थित एवायं प्रयु-
ज्यते। यथा वनस्थः मार्गस्थः निकटस्थ इत्यादि।
स्थग * संवरणे भ्वादि॰ पर॰ सक॰ सेट् घटा॰ मित् न वृद्धिः। स्थगति, अस्थगीत्। [illegible] चिन्त्यमूलम्।
स्थगन * न॰ स्थग ल्युट्। आच्छादने।
स्थगित * त्रि॰ स्थग-क्त। आवृते तिरोहिते। [करङ्के।
स्थगी * स्त्री॰ स्थगयत्यनया [illegible] ङीष्। ताम्बूलाधार-
स्थण्डिल * न॰ स्थल+इलच् नुम् [illegible]। चत्वरे, [illegible]
शून्ये भूतले शयने "निवेदुषी स्थण्डिल एव केवले" इति कुमारः। यज्ञार्थं परिष्कृतस्थाने, होमार्थं कुण्डप्रतिनिधित्वेन वालुकादिभिः कर्त्तव्ये मण्डलभेदे च "नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत्। तस्याभावे तु तत् कुर्यात् वालुकाभिः समन्ततः" इति तन्त्रम्।
स्थण्डिलशायिन् * पु॰ स्थण्डिले चत्वरे शेते व्रतवशात् शी-णिनि। व्रतार्थं चत्वरे शयितरि। "स्थण्डिलशायिनश्च" इति भट्टिः।
स्थण्डिलेशय * पु॰ स्थण्डिले शेते अच् अलुक् समा॰। व्रतार्थं चत्वरे शयितरि।
स्थपति * पु॰ स्था-क्त तस्य पतिः। कञ्चुकिनि, शिल्पिभेदे (छुतार), कुबेरे, अधीशे, वृहस्पतिसवनामकयागकर्त्तरि च। सत्तमे त्रि॰।
स्थपुट * त्रि॰ तिष्ठति स्था-क स्थं पुटं यत्र। विषमोन्नतप्रदेशे, "स्थपुटगतमपि क्रव्यमव्यग्रमत्ति" इति मालतीमाधवम्। विष-
मस्थाने सञ्चारिणि जीवे पु॰। [छलधातुर्नेत्राय गत्यर्थं इत्यन्ये।
स्थल * स्थाने भ्वादि॰ पर॰ अक॰ सेट् ज्वला॰। स्थलति अस्थालीत्।
स्थल * न॰ स्त्री॰ स्थल-अच्। जलशून्ये-अकृत्रिमे भूभागे। स्त्रीत्वपक्षे ङीष् "वनस्थलीमर्मरपत्रमोक्षाः" इति कुमारः। कृत्रिमा-
कृत्रिमप्रदेशमात्रे, कृत्रिमभूभागे च न॰।
स्थलकन्द * पु॰ स्थलजः कन्दः। (वनओल) अग्राम्यकन्दे।
स्थलकमल * न॰ स्थलजातं कमलम्। स्थलपद्मे।
स्थलकुमुद * पु॰ स्थले कुमुदमस्त्यस्य सादृश्येन अच्। करवीरे।
स्थलपद्म * न॰ स्थलजातं पद्मं शाक॰। स्वनामख्याते पुष्पवृक्षे।
स्थलजं पद्ममिव। मानके पु॰।
स्थलपद्मिनी * स्त्री॰ स्थलपद्मानां समूहः तेषां सन्निकृष्टदेशो वा इनि ङीप्। स्थलपद्मसमूहे, तद्युक्तदेशे च। "ददर्श दूनः स्थल-
पद्मिनीं नलः" इति नैषधम्।
स्थलमञ्जरी * स्त्री॰ स्थलस्य मञ्जरीव। अपामार्गे।
स्थलशृङ्गाट * पु॰ स्थलजातः शृङ्गाटः शाक॰। गोक्षुरे। तस्य
कण्टकावृतत्वात् तथात्वम्। [ण्याम्।
स्थलेरुहा * स्त्री॰ स्थले रोहति रुह-क अलुक् स॰। घृतकुमा-
स्थलेशय * पु॰ स्थले शेते शी-अच् अलुक् स॰। वराहहरिणप्रभृतौ
पशौ। स्थलशायिनि त्रि॰।
स्थविर * न॰ स्था-किरच् स्थवादेशः। शैलेये गन्धद्रव्ये। चतुर्थे
आश्रमिणि पु॰। अचले, स्थिरे, वृद्धे च त्रि॰। महाश्रावण्यां स्त्री॰।
स्थविष्ठ * त्रि॰ अतिशयेन स्थूलः इष्ठन् यणलोपे गुणः। अतिशये
ईयसु स्थवीयानपि। अतिवृद्धे। स्त्रियां ङीप्।
स्थाणु * पु॰ स्था+नु पृ॰ णत्वम्। शिवे, शाखाशून्यवृक्षे च। अस्त्र-
भेदे पु॰। स्थिरे त्रि॰। [तरि।
स्थाण्डिल * पु॰ स्थण्डिले शयिताऽण्। व्रतार्थं स्थण्डिले शयि-
स्थान * न॰ स्था-ल्युट्। स्थितौ, सादृश्ये, अवकाशे, सन्निवेशे, सपत्नौ, राज्याङ्गे, भाजने, निकटे, व्याकरणोक्ते वर्णो-
(च्चारणस्थानरूपे कण्ठताल्वादौ) ... नीतिवेदिना-

मृदचट्टाद्यपष्टहीने साम्यावस्थाने च ।

स्थानचञ्चला * स्त्री० स्थाने स्थितापि चञ्चला । बर्बरीदृक्षे । तस्य वातेन चञ्चलत्वात्तस्यास्तथात्वम् ।

स्थानाध्यक्ष * त्रि० स्थाने अध्यक्षः । स्थानरक्षके ।

स्थानिक * त्रि० स्थानेऽधिकृतः ठक् । स्थानाध्यक्षे ।

स्थानिन् * त्रि० स्थानमस्यास्ति रक्षकत्वेन इनि । स्थानरक्षके । स्थानं प्रसङ्गः अस्त्यर्थे इनि । व्याकरणोक्ते आदिश्यमानयथादेशकार्ये इगादौ "स्थानिवदादेशोऽनल्विधौ" इति पाणिनिः ।

स्थानीय * न० स्थीयतेऽस्मिन् स्था-आधारे अनीयर् । नगरे । स्थानं मानमर्हति स्थानस्येदम् वा छ । मानयोग्ये देशे, स्थानसम्बन्धिनि च त्रि० ।

स्थाने * अव्य० स्था-न । योग्यत्वे, औचित्ये च "स्थाने वृतानेकनराधिपः सन्" इति रघु० । सत्ये, सादृश्ये, कारणार्थे च ।

स्थापत्य * पु० स्थपतिरेव स्वार्थे ष्यञ् । अन्तःपुररक्षके कञ्चुकिप्रभृतौ । तस्य भावः ष्यञ् । स्थपतिधर्मे न० ।

स्थापन * न० स्था-णिच्-पुक् ल्युट् । आरोपणे, समाधौ, पुंसवनाख्ये गर्भसंस्कारे च । युच् । स्थापनाप्यत्र स्त्री० सा च निवेशने ।

स्थापनी * स्त्री० स्थाप्यतेऽनया स्था-णिच्-पुक् करणे ल्युट् ङीप् । पाठायाम् ।

स्थापित * त्रि० स्था-णिच्-पुक् क्त । निश्चिते, निवेशिते, न्यस्ते च ।

स्थामन् * न० स्था-मनिन् । सामर्थ्ये, बले च ।

स्थायिन् * त्रि० स्था-णिनि । स्थितिशीले, अलङ्कारोक्ते रसानुकूले रत्यादिभावे पु० । "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा । रत्यादी रसतामेति स्थायी भावः सचेतसाम्" इति साहित्य० ।

स्थायुक * त्रि० स्था-उकञ् । स्थितिशीले । एकग्रामाधिकृते पु० ।

स्थाल * न० स्थलति तिष्ठत्यत्राद्यम् आधारे घञ् । (थाल) भक्ष्यपात्रे । पाकपात्रे (हांड़ि) स्त्री० गौरा० ङीष् ।

स्थालीपाक * पु० स्थाल्यां पाकः । गृह्यसूत्रेण स्थाल्यां कृते पाकभेदे । तद्विधानं वाचस्पत्ये ।

स्थालीपुलाक * पु० स्थालीस्था पुलाकास्तण्डुलाः सन्त्यत्र एकधर्मेणोपलक्षणेन अच् । मीमांसकोक्ते "स्थालीस्थास्तण्डुला एते सर्वे सिद्धा विभागिनः । समकालाग्निसंयोगभागित्वात् परिदृश्यवत्" इत्यनुमानरूपके न्यायभेदे । यथा एकस्य पाकदर्शनेन अन्येषां पाकज्ञानम् एवं एकरूपाणां सर्वेषामेकधर्मोपलक्षितत्वसिद्धेः तदुपोद्बलनम् । [वृक्षभेदे ।

स्थालीवृक्ष * पु० स्थाल्याः वृक्षः । पाटलावृक्षे । स्थालीतिवृक्षविशेषे

स्थावर * त्रि० स्था+वरच् । अचलने स्थिरे, वृक्षादौ, मृदादौ च "स्थावरं जङ्गमञ्चैव यदपि कल्पमविक्रेयम्" इति स्मृतिः । पर्वते पु० । धनुर्गुणे न० । [अचलेऽपि वाचस्पत्याभिधाने ।

स्थाविर * न० स्थविरस्य भावः अण् । वृद्धत्वे तत्र कदाचित्कदाचिदत्रे

स्थाशक * पु० स्था-क आशादौ कन् । चन्दनादि, स्थासके च न-

बुद्बुदे च । [इति मेदि० ।

स्थास्नु * त्रि० स्था-स्नु । स्थितिशीले, "स्थास्नु दिवाकरप्रभा"

स्थित * त्रि० स्था+क्त । स्थिते, ऊर्द्धतया दण्डायमाने, "स्थितायां स्थानमादरेः" इति रघुः, निश्चले, प्रतिज्ञायुक्ते, स्थितियुक्ते, स्थितिमति च । [च ।

स्थिति * स्त्री० स्था-क्तिन् । मर्यादायां, न्याय्यपथावस्थाने, स्थाने

स्थिर * पु० स्था-किरच् । पर्वते, देवे, वृक्षे, कार्तिकेये, शनौ, मोक्षे, वृषे, धवदृक्षे, ज्योतिषोक्तेषु वृषसिंहवृश्चिककुम्भराशिषु च । कठिने, निश्चले च त्रि० । शाल्मली, काकोली, पृश्निपर्णी, माषपर्ण्यांञ्च स्त्री० ।

स्थिरगन्ध * पु० स्थिरो गन्धो यस्य । चम्पकवृक्षे । पाटलायां, केतक्याञ्च स्त्री० । स्थिरगन्धयुक्ते द्रव्यमात्रे त्रि० ।

स्थिरच्छद * पु० स्थिरश्छदो यस्य । भूर्जपत्रवृक्षे । [वटादौ च ।

स्थिरच्छाय * पु० स्थिरा छाया यस्य । वृक्षमात्रे, छायाप्रधाने

स्थिरजिह्व * पु० स्थिरा अचञ्चला जिह्वा यस्य । मत्स्ये ।

स्थिरजीविता * स्त्री० स्थिरं जीवितमायुर्यस्याः । शाल्मलीवृक्षे । चिरजीविनि त्रि० ।

स्थिरतर * त्रि० अतिशयेन स्थिरः तरप् । अत्यन्तस्थिरे । देवे पु० ।

स्थिरदंष्ट्र * पु० स्त्री० स्थिरा दंष्ट्रा यस्य । सर्पे । स्त्रियां ङीष् । वराहावतारविष्णौ पु० । शम्भौ ।

स्थिरपुष्प * पु० स्थिरं पुष्पमस्य । चम्पकवृक्षे, बकुलवृक्षे च ।

स्थिरफल * पु० स्थिराणि फलान्यस्य । [illegible]

स्थिरपुष्पिन् * पु० स्थिरं पुष्पमस्यास्ति इनि । तिलकवृक्षे

स्थिरफला * स्त्री० स्थिरं फलं यस्याः । कूष्माण्डाम् ।

स्थिरमति * स्त्री० स्थिरा-मतिः । स्थिरबुद्धिः । स्थिरा मतिर्यस्य । स्थिरबुद्धियुक्ते त्रि० "[illegible] स्थिरमतिः" इति [illegible] ।

स्थिरयौवन * न० पु० स्थिरं यौवनमस्य । विद्याधरादौ देवयोनिभेदे । [illegible] त्रि० ।

स्थिररङ्गा * स्त्री० स्थिरो रङ्गो रागो यस्याः । नीलीवृक्षे ।

स्थिररागा * स्त्री० स्थिरो रागो रञ्जनं यस्याः । दारुहरिद्रायाम् । स्थिरानुरागयुक्ते त्रि० । [वृक्षे ।

स्थिरसाधनक * पु० स्थिरं साधयति [illegible] । सिन्धु-

स्थिरसार * पु० स्थिरः सारो यस्य । शिंशपावृक्षे ।

स्थिरायुस् * पु० शल्मलि । [illegible]

स्थिरायुस् * पु० स्थिरमायुरस्य । [illegible] । चिरजीविनि त्रि० । [illegible]

स्थुड * सम्व० तुदा० कुटा० पर० अक० सेट् । [illegible]

स्थूणा * स्त्री० स्था-नक् [illegible] । [illegible]

[illegible]

स्थूरिन् * पु० स्था-ऊरन् [illegible] [illegible]

[illegible] इति [illegible] [illegible]

प्रा: स्थू स्थौर तदस्यास्ति इति। स्थौरोऽप्यत्र। [नत्-न।
स्थूल * वृंहणे चुरा० उभ० सक० सेट्। स्थूलयति-ते अतुस्थु-
स्थूल * त्रि० स्थूल-अच्। पीवरे (मोटा), जडे, समूहे च न०।
पनसे पु०। महदिन्द्रवारुणी, एर्वारौ, हृद्देलायाञ्च स्त्री०। स्वार्थे
कन्। पीवरे त्रि०। मत्स्यभेदे पुं०। (कनुयड) [illegible]भेदे पु०।
स्थूलकाष्ठ * पु० कर्म०। वृहत्काष्ठे (वाँधान)।
स्थूलकणा * स्त्री० कर्म०। स्थूलजीरके द्वन्द्व०। पीनकणवति त्रि०।
स्थूलकण्टक * पु० स्थूल: कण्टकोऽस्य। बालवब्बूरे। मदनायाँ कप्
टाप् इत्वम्। शाल्मलीवृक्षे स्त्री०।
स्थूलकण्टा * स्त्री० स्थूल: कण्टः कण्टकोऽस्या:। वृहत्याम्।
स्थूलकन्द * पु० स्थूल: कन्दोऽस्य। रक्तलशुने, सूरणे, हस्तिकन्दे,
मानके च। [स्थूलमध्ये त्रि०।
स्थूलकर्ण * पु०। स्थूलौ कर्णौ स्तः यस्य। महाबलराक्षसे।
स्थूलजीरक * पु० कर्म०। जीरकभेदे (कालजिरा)।
स्थूलताल * पु० कर्म०। हिन्ताले।
[illegible]

स्थूलांशा * स्त्री० स्थूलः अंशोऽवयवोऽस्या:। गन्धपत्रायाम्।
स्थूलाम्र * पु० कर्म०। आम्रभेदे।
स्थूलैला * स्त्री० कर्म०। हृद्देलायाम्।
स्थूलोच्चय * पु० स्थूलानामुपलानामुच्चयो यत्र। गण्डशैले। स्थूलस्य
गजस्य उच्चय:। गजमध्यगतौ वरण्डे, गजदन्तविच्छेदे च।
स्थेय * पु० स्थीयते विवादनिर्णायकतयाऽसौ स्था-कर्मणि यत्।
विवादे संशयनिर्णायके (जुरी), पुरोहिते च। स्थिरे त्रि०।
स्थेयस् * त्रि० अतिशयेन स्थिर: ईयसुन् स्थादेश:। स्थिरतरे
स्त्रियां ङीप्। इष्ठन् स्थेष्ठोऽप्यत्र त्रि०। सान्त्वने न०।
स्थैर्य * न० स्थिरस्य भाव: ष्यञ्। स्थिरतायाम्। [गन्धद्रव्ये।
स्थौणेय(क) * पु० स्थूणायां तत्समीपे भव: ढक्। ग्रन्थिपर्णनाम-
स्थौल्य * न० स्थूलस्य भाव: ष्यञ्। पीवरत्वे।
स्नपन * पु० स्ना-णिच्-पुक् ल्युट्। जलादिनाऽभिषेककरणे।
स्नव * पु० स्नु-भावे अप्। स्रवणे, क्षरणे च।
स्नसा * स्त्री० स्नस-निरासे अच्। स्नायौ।
स्नातक * पु० स्ना-भावे क्त स्नातं वेदाध्ययनानन्तरं समावर्त्तनाङ्ग-
स्नानं तदस्यास्ति कन्। वेदाध्ययनानन्तरं गार्हस्थ्याय कृत-
समावर्त्तनाङ्गस्नाने।
स्नातकव्रत * न० ६त०। स्नातककर्त्तव्ये स्मृत्युक्ते व्रतभेदे. "वर्तयेत् [illegible]
धेय कन्यायाः स्नातकव्रतमाचरेत्" इति स्मृति.।
स्नान * न० स्ना-ल्युट्। शोधने, अवगाहने, मज्जने च। तच्च
मन्त्रादिस्नानभेदादष्टविधम्। विस्तरो वाचस्पत्ये।
स्नानतृण * न० स्नानार्थं तृणम्। कुशे।
स्नानीय * त्रि० स्नानाय हितम् छ। स्नानसाधने तैलामलकादौ।
स्नायु * स्त्री० स्नाति शुध्यति दोषोऽनया स्ना-उण्। शरीरस्थे [illegible]
वाहिनाडीभेदे।
स्निग्ध * त्रि० स्निह-क्त। स्नेहयुक्ते, अरुणे, मसृणे, चिक्कणे च।
रक्तैरण्डे, सरलवृक्षे च पु०। भक्तमण्डे न०। मेदायां स्त्री०।
स्निग्धतण्डुल * पु० कर्म०। यष्टिशाल्यौ।
स्निग्धता * स्त्री० स्निग्धस्य भाव:। स्नेहे, चिक्कणे च। [illegible]
स्निग्धदारु * पु० स्निग्धं दारु काष्ठमस्य। मामदारु, देवदारु [illegible]
स्निग्धपत्र * पु० स्निग्धं पत्रमस्य अच्। करञ्जभेदे, बदर-
वृक्षे, गर्भरक्षणे च। बदर्या, पालक्या, नागवल्ल्यां च स्त्री०।
[illegible]
[illegible]
[illegible]

[illegible] * स्त्री॰ [illegible]। [illegible], [illegible] च।

[illegible] * स्त्री॰ [illegible] वा टाप्। [illegible]।

[illegible] * स्त्री॰ [illegible] वा ङीप्। (समभासिन्) [illegible]। "[illegible]" इति पुराणम्।

खेट * पु॰ खिट अच्। ग्रामे, [illegible], ज्योतिषोक्ते ग्रहभेदे च [illegible]।

खेटन * न॰ खिट ल्युट्। [illegible] [illegible]।

खेटकि * पु॰ [illegible] [illegible]। मदीपे।

[illegible] * स्त्री॰ [illegible]। [illegible] धातुभेदे, [illegible] च।

[illegible] * पु॰ [illegible] कर्मणि घञ्। निभे।

खेटवत् * त्रि॰ [illegible] मतुप् मस्य व। [illegible] स्त्रियां ङीप्। सा च भेदायां पु॰ स्त्री॰।

[illegible] * न॰ [illegible] [illegible]। [illegible]। [कारणे न॰।

[illegible] * पु॰ [illegible] बीजमस्य। [illegible]। इत॰। [illegible]

[illegible] * पु॰ [illegible] अच्-अण्। मदीपे।

खेटिन् * पु॰ खिट णिनि। [illegible], [illegible]। [illegible] त्रि॰ स्त्रियां ङीप्। [म्लिष्ट।

स्पद * ईषत्कम्पे भ्वादि॰ आत्म॰ अक॰ सेट् इदित्। स्पन्दते अस्प-

स्पन्द * पु॰ स्पदि-घञ्। ईषच्चलने, ईषत्कम्पे, क्रियाभेदे च। [illegible] स्पन्दादौ प्रमाप्रमविवेचनं वाचस्पत्ये।

स्पर्द्ध * संघर्षे (पराभिभवेच्छायाम्) भ्वादि॰ आत्म॰ अक॰ सेट्। स्पर्द्धते अस्पर्द्धिष्ट। [च।

स्पर्द्धा * स्त्री॰ स्पर्द्ध-अ। संघर्षे, पराभिभवेच्छायां, साम्ये, क्रमोन्नतौ

स्पर्श * ग्रहणे, दाने च चुरा॰ उभ॰ सक॰ सेट्। स्पर्शयति ते अपस्पर्शत् त।

स्पर्श * पु॰ स्पर्श-स्पृश-वा अच् घञ् वा। न्यायोक्ते त्वगिन्द्रियग्राह्ये गुणभेदे, ग्रहणे, रोगे, युद्धे, गुप्तचरे, उपतापके च। वायौ पु॰। स्पर्शके त्रि॰। स्पृश-विच्-अच्। दाने। स्पृश्यन्ते वायुना जिह्वाग्रादयोऽत्र घञ्। कादिषु मावसानेषु वर्णेषु पु॰।

स्पर्शन * स्पर्श-स्पृश वा ल्युट्। ग्रहणे, स्पर्शे च। णिच्-ल्युट्। स्पर्शने, दाने च। स्पृश कर्त्तरि ल्यु। वायौ पु॰।

स्पर्शलज्जा * स्त्री॰ स्पर्शमात्रेण लज्जते लज्ज-अच्। लज्जालुवृक्षे।

स्पर्शसहा * स्त्री॰ स्पर्शं सहते। शतमूल्याम्। [प्यच।

स्पर्शन् * त्रि॰ स्पृश-तृच्। उपतापयितरि। रोगे पु॰। असु। अस्टा-

स्पश * स्पर्शे बाधने च भ्वादि॰ उभ॰ सक॰ सेट्। स्पशति ते अस्पशीत् अस्पाशीत्। अस्पशिष्ट। [रपस्पशा" इति माघः।

स्पश * पु॰ स्पश-अच्। चरमात्रे, युद्धे, गूढचरे च। "राजनीति-

स्पष्ट * त्रि॰ स्पश+क्त नि॰ इडभावः। व्यक्ते, स्फुटे च।

स्पृ * प्रीतौ अक॰ प्रीणने रक्षणे पालने च सक॰ स्वादि॰ पर॰ अनिट्। स्पृणोति अस्पार्षीत्।

स्पृक्का * स्त्री॰ स्पृश-क्वक् पृ॰ शस्य कः। पृक्कायाम्।

स्पृश * स्पर्शे तुदा॰ पर॰ सक॰ अनिट्। स्पृशति अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत्।

स्पृशा * स्त्री॰ स्पृश-क। सर्पघातिनीवृक्षे। कण्टकार्यां स्त्री॰ ङीप्।

स्पृष्ट * त्रि॰ स्पृश-क्त। लब्धस्पर्शे। भावे क्त। स्पर्शे न॰।

स्पृष्टास्पृष्ट * न॰ स्पृष्टेन वा सम्यक् स्पृष्टम्। परस्परस्पर्शने।

स्पृष्टास्पृष्टि * न॰ स्पृश-भावे क्त नञ्+स्पृश-क्तिन्, स्पृष्टय अस्पृष्टिश्च द्वयोः समाहारः। स्पर्शास्पर्शयोः। "नगरे ग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति" इति स्मृतिः। [स्पृहत्-त।

स्पृह * इच्छायां अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्पृहयति-ते अप-

स्पृहणीय * त्रि॰ स्पृह-अनीयर्। वाञ्छनीये, श्लाघ्ये च "अहो व्रतासि स्पृहणीयवीर्यः" इति कुमारः।

स्पृहयालु * त्रि॰ स्पृह-आलुच्। स्पृहाशीले। [कुमारः।

स्पृहा * स्त्री॰ स्पृह-अङ्। इच्छायाम् "मिथुने स्पृहावती" इति

स्पृह्य * पु॰ स्पृह-कर्मणि यत्। मातुलुङ्गवृक्षे। वाञ्छनीये त्रि॰।

स्फट * विशीर्णतायाम् अक॰ भ्वादि॰ पर॰ सेट्। स्फटति अस्फटीत् अस्फाटीत्। इदिदयमप्ययमुक्तार्थे स्फण्टति अस्फण्टीत्।

स्फट * पु॰ स्त्री॰ स्फट-अच्। सर्पफणायाम्।

स्फटि(टी) * स्त्री॰ स्फट-इन् वा ङीप्। (फट्किरि) वणिग्द्रव्यभेदे।

स्फटि(टी)क * पु॰ स्फटि(टी)व कायति इवार्थे कन्। स्वनामख्याते मणौ। स्वार्थेऽण्। स्फाटिकमप्यत्र न॰। [स्फाटिकमयपर्वते च।

स्फटिकाचल * पु॰ स्फटिक इव शुभ्रः अचलः। कैलासपर्वते,

स्फटिकाद्रिभिद्(द) * पु॰ स्फटिकाद्रिं स्फाटिकपर्वतं भिनत्ति साद्दश्यात् भिद-क्विप् क वा। कर्पूरे।

स्फटिकाभ * पु॰ स्फटिकवर्णः अभ्र इव। कर्पूरे।

स्फटिकारि * पु॰ इत॰। (फट्किरि) वणिग्द्रव्यभेदे तस्य स्फटिकतुल्यदीप्तिमत्त्वात्तथात्वम्। [अपस्फण्डत्-त।

स्फण्ड * परिहासे चुरा॰ उभ॰ सक॰ सेट् इदित्। स्फण्डयति-ते

स्फर * चले स्फूर्त्तौ च तुदा॰ पर॰ अक॰ सेट्। स्फरति अस्फारीत्।

स्फरण * न॰ स्फर-भावे ल्युट्। स्फुरणे।

स्फल * चले स्फूर्त्तौ च तुदा॰ पर॰ अक॰ सेट्। स्फलति अस्फालीत्।

स्फाटिकोपल * पु॰ स्फटिकमिव उपलः। स्फटिके।

स्फाति * स्त्री॰ स्फाय-भावे क्तिन्। वृद्धौ।

स्फाय * वृद्धौ भ्वादि॰ आत्म॰ अक॰ सेट्। स्फायते अस्फायि-अस्फायिष्ट। निष्ठायामनिट् यलोपे ईत् स्फीतः। [च त्रि॰।

स्फार * पु॰ स्फाय+रक्। स्वर्णबुद्बुदे। विपुले, विकटे, प्रचुरे

स्फारण * न॰ स्फुर-णिच्स्फारादेशः ल्युट्। विकासने।

स्फाल * पु॰ स्फल-घञ्। स्फूर्त्तौ।

स्फिग्घातन * पु॰ स्फिचं घातयति हन-स्वार्थे णिच्-ल्यु। कट्फले।

स्फिच् * स्त्री॰ स्फाय+डिच्। कटिप्रोथे, तत्स्थे वातजे रोगभेदे च।

स्फिट * हतौ हिंसे अनादरे च चुरा॰ उभ॰ सक॰ सेट्। स्फेटयति ते अपिस्फिटत् त।

स्फिर * त्रि० स्फाय-किरच्। प्रवृद्धे, वृद्धे च।
स्फीत * त्रि० स्फाय-क्त स्फीभावः। वृद्धे, समृद्धे च।
स्फुट * भेदे चुरा० उभ० सक० सेट्। स्फोटयति ते अपुस्फुटत् त।
स्फुट * विकाशे कुटा० पर० अक० सेट्। स्फुटति अस्फुटत् अस्फोटीत्। [पुस्फोट।
स्फुट * विकाशे भ्वा० पर० अक० सेट्। स्फुटति अस्फुटीत्
स्फुट * विकाशे कुटा० आत्म० अक० सेट्। स्फोटते अस्फोटिष्ट।
स्फुट * भासे चुरा० उभ० अक० सेट् इदित्। स्फुण्टयति ते अपु-स्फुण्टत् त। [ति अपुस्फुटत् त।
स्फुट * भिदे चुरा० उभ० सक० सेट् आकोशादपुरैः। आस्फोटयति
स्फुट * विकाशे भ्वा० चुरा० उभ० अक० सेट्। स्फुटयति ते अपु-स्फुटत् त।
स्फुट * त्रि० स्फुट-क। [illegible]

[illegible]

स्फुर्त्ति * स्त्री० स्फुर्च्छ-स्फुर-वा क्तिन्। स्फुरणे, विकाशने, प्रतिभा-याञ्च। [आयुक्ते विकाशयुक्ते च त्रि०।
स्फुर्त्तिमत् * पु० स्फुर्त्तिरस्त्यस्य मतुप्। पाशुपताख्ये शैवभेदे, प्रति-
स्फेयस् * त्रि० अतिशयेन स्फिरः, ईयसु स्फादेशः। अतिप्रवृद्धे, स्त्रियां ङीप्। इष्ठन्। स्फेष्ठोऽप्यत्र त्रि०।
स्फोट * पु० स्फुटत्यर्थो यस्मात् स्फुट-घञ्। व्याकरणोक्ते वर्णातिरिक्ते पूर्वपूर्ववर्णानुभवसहितचरमवर्णश्रवणेन अर्थप्रत्यायके अखण्डे शब्दभेदे "शृणोति य इमं स्फोटम्" इति भागवतम्। "न स्फोटः अर्थोपलब्धिभ्याम्" इति शारीरकसूत्रम्, यथा च वर्णसमु-दायानां नार्थबोधकत्वं तथा प्रपञ्चितमस्माभिः शब्दार्थरत्ने। व्रणभेदे च (फोड़ा)।
स्फोटक * पु० स्फुट-ण्वुल्। (फोड़ा) व्रणभेदे, विदारके च।
स्फोटन * न० स्फुट-ल्युट्। विदारणे, विकाशने च।
स्फोटनी * स्त्री० स्फुट्यतेऽनया स्फुट्+ल्युट्-ङीप्। मणिवेधनसाधने यन्त्रभेदे (भोमरी)। [प्रदानके।
स्फोटबीजक * पु० स्फोटस्य व्रणभेदस्य बीजम् ततः स्वार्थे कन्।
स्फोटायन * पु० स्फोट एवायनं अर्थबोधकतयाश्रयणं यस्य। अर्थबो-धकत्वेन स्फोटाभ्युपगन्तरि वैयाकरणे मुनिभेदे "अवङ् स्फोटायनस्य" इति पाणिनिः।
स्फ्य * न० स्फाय यत् नि०। खड्गाकारे यज्ञीये काष्ठभेदे।
स्म * अव्य० स्मि-ड। अतीते, पादपूरणे च।
स्मय * पु० स्मि-अच्। गर्वे, अद्भुते च।
स्मर * पु० स्मरति प्रियमनेन स्मृ-अप्। कामदेवे। भावे अप्। स्मरणे।
स्मरकूप * न० स्मरस्य कूप इव। स्त्रीचिह्नभेदे। कामसिद्धान्तो-ऽप्यत्र।
स्मरण * न० स्मृ-ल्युट्। ज्ञातस्य ज्ञानोऽनपेक्षाधीनसंस्कारमात्र-जन्यज्ञानविषये, ज्ञानभेदे, ध्याने, चिन्तने च।
स्मरदशा * स्त्री० स्मरजन्या दशा। कामिनां स्मरजाता नयनप्री-त्यादिषु दशसु दशासु। विस्तरो वाचस्पत्ये।
स्मरलिपि * स्त्री० [illegible]
स्मरवीथिका * स्त्री० [illegible]
स्मरहर * पु० स्मरं हरति नाशयति हृ-अच्। महादेवे। [illegible]
[illegible]
स्मरा[illegible] * पु० [illegible]
[illegible]
स्मार्त्त * त्रि० स्मृतिं वेत्ति [illegible]
[illegible]
स्मि * भ्वा० आत्म० अक० सेट्। [illegible]

स्मयते। अयं घोपदेश एव। अन्यतो विस्मये स्माययतीत्येव। अयं भ्वादिरपि अनिट्। स्मयते अस्मेष्ट। [असिस्मिटत् त।
स्मिट * अनादरे सक० चु० उभ० सेट्। स्मेटयति ते
स्मित * न० स्मि+भावे क्त। ईषद्धास्ये "मुखं विकसितस्मितम्" इति मालतीमाधवम्। विकसिते, ईषद्धास्यान्विते च त्रि०।
स्मील * निमिषणे भ्वादि० पर० सक० सेट्। स्मीलति अस्मीलीत्।
स्मृ * स्मरणे भ्वादि० पर० सक० अनिट्। स्मरति अस्मार्षीत्। [र्षीत्।
स्मृ * प्रीतिकृते भ्वादि० पर० सक० अनिट् घटा०। स्मरति अस्मा-
स्मृत * त्रि० स्मृ-क्त। कृतस्मरणे स्मृतिविषये च।
स्मृति * स्त्री० स्मृ-क्तिन्। अनुभूतवस्तुन उद्बोधकसहकारेण संस्काराधीने ज्ञानभेदे। स्मर्यते वेदधर्मोऽनेन करणे क्तिन्। धर्मसाधनशास्त्रे वेदार्थानुभवजन्ये वेदार्थानुवादके मुनिप्रणीते वाक्यरूपे शास्त्रे। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" इति मनुः।
स्मृतिहेतु * पु० ६त०। संस्कारे भावनारूपे गुणभेदे।
स्मेर * त्रि० स्मि-रन्। विकसिते ईषद्धास्यान्विते, च "महाजनः स्मेरमुखो भविष्यति" इति कुमारः।
स्यद * पु० स्यन्द घञर्थे क। वेगे।
स्यन्द * स्रवणे भ्वादि० आत्म० लुङि, लृटि लृङि च उभ० अक० ऊदित् वेट्। स्यन्दते ऌदित् अस्यदत् अस्यन्दिष्ट अस्यन्त।
स्यन्द * पु० स्यन्द-भावे घञ्। द्रवद्रव्यक्षरणे, स्रवे।
स्यन्दन * न० स्यन्द-भावे ल्युट्। क्षरणे। कर्त्तरि ल्यु। जले न०। रथे, तिनिशवृक्षे च पु०। [रथारोहेण योद्धरि।
स्यन्दनारोह * पु० स्यन्दनमारोहति युद्धार्थम्, आ+रुह-अण्।
स्यन्दनि * पु० स्यन्द-अनि। तिनिशवृक्षे। ङीप्। लालायां स्त्री०।
स्यन्दिन् * त्रि० स्यन्द+णिनि। प्रस्रविणि। लालायां स्त्री० ङीप्।
स्यन्न * त्रि० स्यन्द-क्त। स्रुते जलादौ। [अस्यमीत्।
स्यम * ध्वनने भ्वादि० पर० अक० सेट् क्त्वावेट् फणादि०। स्यमति
स्यम * वितर्के चु० उभ० सक० सेट्। स्यामयति ते असिस्यमत् त।
स्यम * ध्याने अद० चुरा० उभ० सक० सेट्। स्यमयति ते असिस्यमत् त।
स्यमन्तक * पु० स्यम+झच् संज्ञायां कन्। श्रीकृष्णस्य हस्तस्थे मणिभेदे। तस्य गुणादिकं। वाचस्पत्याभिधाने। [पथौ स्त्री०।
स्यमीका * स्त्री० स्यम ईकन्। वल्मीके। काले, मेघे च पु०। नीलो-
स्यूत * त्रि० सिव-कर्मणि क्त। सूच्यादिना ग्रथिते वस्त्रादौ। प्रसर-
चितवाने पु०। पु० स्योत्। स्योनोऽप्यत्र।
स्यूति * स्त्री० सिव-भावे क्तिन्। सूच्यादिना वस्त्रादिसीवने।
स्यून * पु० सिव-नक्। सूर्ये किरणे, सूच्यादिस्यूतवस्त्रनिर्मित पदार्थे (थकड़ी) च। [पुष्। संमनायाम् स्त्री०।
स्रंसन * न० स्रन्स-णिच्-ल्युट्। अर्द्धपक्वस्याधोनयने पातने।
स्रंसिन् * त्रि० स्रन्स-णिनि। अधःपतनशीले। स्त्रियां ङीप्। पीलुवृक्षे पु०।

स्रक * गतौ भ्वादि० आत्म० सक० सेट् इदित्। स्रङ्कते अस्रङ्किष्ट।
स्रग्वत् * त्रि० स्रक् मालास्यास्ति मतुप् मस्य वः कुत्वम्। स्रग्वति। विनि। स्रग्वीत्यप्यत्र। उभयत्र स्त्रियां ङीप्।
स्रज् * स्त्री० सृज्यते सृज-क्विन् नि०। माल्ये।
स्रन्स * पतने भ्वादि० आत्म० लुङि उभ० अक० सेट् क्त्वावेट्। स्रंसते अस्रसत् अस्रंसिष्ट। ["नास्रसत् करिणां ग्रैवम्" इति रघुः।
स्रन्स * प्रमादे भ्वादि० आत्म० अक० सेट् क्त्वावेट्। स्रंसते अस्रंसिष्ट।
स्रम्भ * विश्वासे भ्वादि० आत्म० अक० सेट् क्त्वावेट्। स्रम्भते अस्रम्भिष्ट। [क्त्वावेट्। स्रम्भते अस्रभत् अस्रम्भिष्ट।
स्रम्भ * विश्वासे भ्वादि० आत्म० ऌदित् लुङि उभ० अक० सेट्
स्र(स्रा)व * पु० स्रु अप् घञ् वा। क्षरणे। कर्त्तरि अच्। निर्झरे।
स्रवण * न० स्रु-ल्युट्। मूत्रजले, घर्मे च। भावे ल्युट्। क्षरणे।
स्रवन्ती * स्त्री० स्रु-शतृ-ङीप्। नद्याम्। ओषधिभेदे, गुल्मस्थाने च। गह। स्रवविशिष्टे त्रि०। स्त्रियां ङीप्।
स्रवा * स्त्री० स्रु-अच्। मूर्वायाम्। क्षरणयुते त्रि०।
स्रष्टृ * पु० सृज-तृच् नित्यमम्। जगत्कर्त्तरि, चतुर्मुखे, शिवे च। सृष्टिकर्त्तरि त्रि०। स्त्रियां ङीप्।
स्रस्त * त्रि० स्रन्स-क्त। च्युते पतिते।
स्रस्तर * पु० स्रन्स-तरच् किच्च। आसने।
स्राक् * अव्य० स्रु-डाक्। त्वरिते, द्रागित्यर्थे च।
स्रावक * न० स्रावयति स्रु-णिच्-ण्वुल्। मरिचे। निःस्रावके त्रि०।
स्रिभ * हिंसे भ्वादि० पर० सक० सेट् उदित् क्त्वावेट्। स्रेभति अस्रेभीत्। [अस्रेमीत्।
स्रिम * हिंसे भ्वादि० पर० सक० सेट् उदित् क्त्वावेट्। स्रेमति
स्रिव * शोषे अक० दिवा० पर० गतौ सक० सेट्। क्त्वावेट्। स्रीव्यति अस्रेवीत्। [स्रवत्।
स्रु * गतौ सक० क्षरणे अक० भ्वादि० पर० अनिट्। स्रवति असु-
स्रुग्दारु * पु० स्रुचे यज्ञपात्राय दारु यस्य। विकङ्कतवृक्षे।
स्रुघ्न * पु० देशभेदे। सोऽस्य निवासः अण् [illegible] ङीप्। स्रुघ्निकाक्षारे स्त्री०। [नगरभेदे वाद्यभेदे यज्ञपात्रभेदे।
स्रुच्(चा) * स्त्री० स्रु-क्विप् चिट् च वा टाप्। बटपत्राकारे शिरस-
स्रुत * त्रि० स्रु-क्त। क्षरिते जलादौ, गते च। विद्रुतवत् स्त्री०।
स्रुव * पु० स्त्री० स्रु-क। खदिरकाष्ठमये हस्तमिते यज्ञपात्रभेदे। मधुस्रवाम्, मूर्वायाम् स्त्री०।
स्रू * स्त्री० स्रु-क्विप् नि०। यज्ञपात्रभेदे, निर्झरे च।
स्रै * विमुक्तौ भ्वादि० पर० सक० अनिट्। स्रायति अस्रासीत्।
स्रोत * न० स्रु-तन्। स्रोतसि वेगेन जलस्य गमने [illegible]
स्रोतस् * न० स्रु-असि तुट् च। वेगेन जलस्य गमने, इन्द्रिये च। [illegible]
स्रोतस्वत् * त्रि० स्रोतांसि सन्त्यस्य मतुप् मस्य वः। स्रोतस्विनि। [illegible] स्त्री० ङीप्। [इत्र त्रि०।
स्रोतस्विनी * स्त्री० स्रोतस्+अस्त्यर्थे विनि ङीप्। नद्याम् [illegible]

[illegible]

[illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible] । [illegible]

[illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । "[illegible]" [illegible] ।

[illegible] । [illegible] ।

[illegible]

स्वरमण्डलिका * स्त्री॰ स्वराणां मण्डलमस्त्यस्य ठन्। वीणायाम्
६त॰। स्वरसमूहे। [ण्वुल्। वीणायां, वंशायां च।
स्वरमासिका * स्त्री॰ स्वरैः निषादादिभिः मस्यति नृत्यतीव लस-
स्वरस * पु॰ स्वेन स्वभावेन रसः चालाद्यः। शिलापिष्टकल्कभेदे,
क्वाथभेदे च। स्वस्य रसः रागः। स्वाभिप्राये, स्वतात्पर्य्ये,
वाक्यादौ रचनाभङ्ग्यां च।
स्वराज् * पु॰ स्वेनैव राजते राज-क्विप्। ईश्वरे "अर्थेष्वभिज्ञः
स्वराट्" इति भागवतम्। [अव्यय।
स्वरापगा * स्त्री॰ स्वः स्वर्गस्यापगा। गङ्गायाम्। स्वर्गापगादयो-
स्वरित * पु॰ स्वरो जातोऽस्य इतच्। उदात्तानुदात्तसमाहाररूपे
स्वरभेदे। स्वर-क्त। स्वरयुक्ते त्रि॰। [कभेदे च।
स्वरु * पु॰ स्वृ-उ। वज्रे, यूपखण्डे, बाणे, यज्ञे, सूर्य्यकिरणे, वृश्चि-
स्वरुचि * त्रि॰ स्वस्यैव रुचिः प्रवर्त्तिका स्वकृत्ये यस्य। स्वतन्त्रे।
६त॰। स्वस्याभिलाषे स्त्री॰।
स्वरूप * न॰ स्वस्य रूपम्। स्वभावे। स्वमेव रूपम्। स्वात्मके
पदार्थे। स्वं यथास्वं रूपयति रूप-अण्। यथास्वरूपाभिज्ञे
पण्डिते पु॰। स्वेन स्वभावेनैव रूपमस्य। मनोज्ञे त्रि॰।
स्वरूपसम्बन्ध * पु॰ स्वरूपं सम्बन्धः, स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते
स्वात्मके सम्बन्धे, षट्पदार्थातिरिक्ते पदार्थभेदे, यथा प्रतियो-
गित्वम् विषयत्वमित्यादि।
स्वरोदय * स्वराणामुदयो यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभ-
त्वज्ञानसाधने तन्त्रशास्त्रभेदे।
स्वर्ग * पु॰ स्वरिति गीयते गै-क सु+अर्ज-घञ् वा। दुःखासम्भिन्ने
सुखसन्ताने, देवानामाश्रमस्थाने च।
स्वर्गनाथ * पु॰ ६त॰। इन्द्रे। स्वर्गपत्यादयोऽप्यत्र।
स्वर्गवधू * स्त्री॰ ६त॰। अप्सरसु।
स्वर्गादन * पु॰ स्वर्गमाक्रम्योऽस्थनः। सुमेरुपर्वते। [त्रि॰।
स्वर्गिन् * पु॰ स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। देवे। स्वर्गभागिनि
स्वर्गौकस् * पु॰ स्वर्ग ओको यस्य। देवे।
स्वर्जिक * पु॰ सु+अर्ज-घञ् स्वार्थे ठन्। सर्जिकाक्षारे। कर्म॰।
स्वर्जिकाक्षारादयोऽप्यत्र।
स्वर्ण * न॰ सुष्ठु वर्णो वर्णो यस्य। काञ्चने, धुस्तूरे, नागकेशरे,
गौरसुवर्णशाके च। [स्वर्णवर्णे भेदे पु॰।
स्वर्णकण * न॰ स्वर्णमिव पीतः कणोऽस्य। कणगुग्गुलौ। ६त॰।
स्वर्णकाय * पु॰ स्वर्णमिव पीतः कायोऽस्य। गरुडे।
स्वर्णकार * पु॰ स्वर्णं स्वर्णमयमलङ्कारादि करोति कृ-अण्। (सेकरा)
जातिभेदे।
स्वर्णकेतकी * स्त्री॰ स्वर्णमिव पीता केतकी। पीतकेतक्याम्।
स्वर्णक्षीरी * स्त्री॰ स्वर्णमिव पीतं क्षीरं निर्यासोऽस्त्यस्य अच्
गौरा॰ ङीष्। ओषधिभेदे। सा च हिमालये जायते।
स्वर्णगैरिक * न॰ स्वर्णमिव पीतं गैरिकम्। (अर्कमाटि) पदार्थभेदे।
स्वर्णग्रीवा * स्त्री॰ नदीभेदे।
स्वर्णचूड * पु॰ स्त्री॰ स्वर्णमिव पीता चूडा यस्य। चाषपक्षिणि।
स्वर्णज * न॰ स्वर्णात् जायते जन-ड। वङ्गे। स्वर्णजातमात्रे त्रि॰।
स्वर्णजीवन्ती * स्त्री॰ स्वर्णमिव पीता जीवन्ती। पीतपुष्पजीव-
न्त्याम्। [ङीप्। हरिद्रायाम्। ६त॰। गङ्गायाम्।
स्वर्णदी * स्त्री॰ स्वर्णं द्यति अपसारयति तुल्यवर्णत्वात् दो-क गौरा॰
स्वर्णदीधिति * पु॰ स्वर्णमिव भास्वरा दीधितिरस्य। अग्नौ, चित्र-
कवृक्षे च।
स्वर्णद्रु * पु॰ स्वर्णमिव पुष्पादौ पीतो द्रुः। आरग्वधे।
स्वर्णपक्ष * पु॰ स्वर्णमिव पीतः पक्षोऽस्य। गरुडे।
स्वर्णपाटक * पु॰ स्वर्णं पाटयति पट णिच्-ण्वुल्। टङ्कणे। (सोहागा)
स्वर्णपुष्प * पु॰ स्वर्णमिव पीतं पुष्पमस्य। चम्पके। आरग्वधे पु॰
स्त्री॰ स्त्रीत्वे ङीप्। सा च स्वर्णकेतक्याञ्च। सातलायाम् कलि-
कार्य्यां स्त्री॰ टाप्। [कदल्याम्।
स्वर्णफला * स्त्री॰ स्वर्णमिव पीतं फलमस्याः। (चाँपाकला) स्वर्ण-
स्वर्णभृङ्गार * पु॰ स्वर्णमिव स्वर्णमयो वा भृङ्गारः। पीतभृङ्गराजे,
स्वर्णमयकलसे च। [धातुभेदे।
स्वर्णमाक्षिक * न॰ स्वर्णमिव पीतं माक्षिकम्। स्वनामख्याते उप-
स्वर्णयूथी * स्त्री॰ स्वर्णमिव पीता यूथी। पीतयूथिकायाम्।
स्वर्णलता * स्त्री॰ स्वर्णमिव पीता लता। ज्योतिष्मत्याम्।
स्वर्णवर्णा * स्त्री॰ स्वर्णमिव वर्णो रूपमस्याः। हरिद्रायाम्। सुवर्ण-
वर्णे त्रि॰।
स्वर्णवल्कल * पु॰ स्वर्णमिव पीतं वल्कलमस्य। श्योनाकवृक्षे।
स्वर्णशेफालिका * स्त्री॰ स्वर्णमिव पीता शेफालिका। पीतशेफा-
लिकायाम्। [देहे त्रि॰।
स्वर्णाङ्ग * पु॰ स्वर्णमिवाङ्गं पत्रपुष्पादि यस्य। आरग्वधे। पीतवर्ण-
स्वर्णारि * पु॰ ६त॰। गन्धके। तस्य स्वर्णमारकत्वात्तथात्वम्।
स्वर्त्त * गतौ सक॰ दुःखेन जीवने अक॰ चुरा॰ उभ॰ सेट्। स्वर्त्त-
यति ते अससर्त्तत् त।
[स्वर्द * आस्वादने भ्वा॰ आत्म॰ सेट्।
स्वर्द * प्रीतौ सक॰ मौखने छेदने च अक॰ भ्वादि॰ आत्म॰ सेट्।
स्वर्भानव * पु॰ स्वर्भानोः राहोः प्रियः अण् नि॰ गादिवृद्धिः।
गोमेदमणौ।
स्वर्भानु * पु॰ स्वः स्वर्गे भानुर्दीप्तिरस्य। राहौ।
स्वर्लोक * पु॰ स्वरेव लोकः भुवनम्। स्वर्गे। ६त॰। स्वर्गवासिनि।
स्वर्वापी * स्त्री॰ स्वः स्वर्गस्य वापीव। गङ्गायाम्।
स्वर्वेश्या * स्त्री॰ स्वः स्वर्गस्य वेश्या। स्वर्वाराङ्गनासु।
स्वल्प * त्रि॰ सुष्ठु अल्पम् प्रा॰ स॰। अत्यल्पे दृढे।
स्वल्पकेदारिन् * पु॰ स्वल्पः केदारः क्षेत्रमस्य इनि। नीलिकावृक्षे।
स्वल्पपत्रक * पु॰ स्वल्पं पत्रमस्य कप्। कोविदारे। भद्रकदे।
स्ववासिनी * स्त्री॰ स्वर्विषम् पित्रावसे वसति वस णिनि। चिर
पितृपरादिवासिन्यामुढायामनूढायां वा स्त्रियाम्।

स्वसृ * स्त्री॰ सु+अस-ऋन्। भगिन्याम्।

स्वस्क * गतौ चुरा॰ उभ॰ सक॰ सेट्। स्वस्कति ते असस्वस्कत् त।

स्वस्ति * अव्य॰ सु-अस-क्तिच्, अस्तीति विभक्तिरूपकम् अव्ययं प्रादि॰ स॰ वा। क्षेमे, आशिषि, पुण्यादौ स्वीकारसूचने च।

स्वस्तिक * पु॰ न॰। स्वस्ति शुभाय हितम् ठन्। "स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दानुगतं भवेत्। तत्पार्श्वानुगतौ चान्यौ तत्पर्यन्तगतोऽपरः" इत्युक्तलक्षणे गृहभेदे, सितावरशाके, आसनबन्धभेदे, तण्डुलचूर्णनिर्मिते त्रिकोणाकारे द्रव्यभेदे च। "घृतं स्वस्तिकसिन्दूरम्" इत्यधिवासनद्रव्यज्ञापकशास्त्रम्। चतुष्पथे पु॰। [पु॰। स्वस्तिवादिनि त्रि॰।

स्वस्तिमुख * पु॰ स्वस्ति मुखे आदौ यस्य। लेख्ये पत्रादौ। विप्रे

